# প্রশ্নোত্তরে সংস্কৃত এম. এ.

## প্রথম পত্র : বেদ

অধ্যাপক ব্যানার্জি ও হালদার

প্রাপ্তিস্থান :

জে, এন, ঘোষ এণ্ড সন্স

৬, বঙ্কিম চাটার্জি ষ্ট্রীট,

কলিকাতা-১২

প্রকাশনায় ঃ

প্রভাকর রায়চৌধুরী

গোবরডাঙ্গা হিন্দু কলেজ

২৪ পরগণা

ও

সমাজরঞ্জন হালদার

জয়গাছি, টাবাবেড়িয়া

২৪ পরগণা

প্রথম সংস্করণ ১৩৫৭ সাল

মুদ্রাকর ঃ

শ্রীকৃষ্ণপদ ভট্টাচার্য্য

হাবড়া আর্ট প্রেস

হাবড়া, ২৪ পরগণা

# ভূমিকা

সংস্কৃত বিষয়ে এম. এ. পরীক্ষার্থীদের জন্য এইরূপ একখানি পুস্তকের বিশেষ প্রয়োজন ছিল। বিশ্ববিদ্যালয়ের সংখ্যা যেমন বাড়িতেছে তেমনি সংস্কৃত বিষয়ে ছাত্র-ছাত্রীর সংখ্যাও দিন দিন বৃদ্ধি পাইতেছে। বিশেষতঃ প্রাইভেট্ পরীক্ষার্থীর সংখ্যাও পূর্বাপেক্ষা অনেক বেশী। কিন্তু সংস্কৃতে পরীক্ষা দিতে ইচ্ছুক সকল ছাত্র ছাত্রীই সিলেবাসের প্রথম পত্রের দিকে তাকাইয়া নিরাশ হইযা পড়েন। প্রাইভেট পরীক্ষার্থীরা তো সংস্কৃতে পরীক্ষা দেওয়া প্রায় অসম্ভবই মনে করেন। সকলের সকল শ্রম লাঘব করিবার জন্য গ্রন্থকারদ্বয়ের এই প্রচেষ্টা। প্রথম চেষ্টা হিসাবে গ্রন্থখানিতে কিছু কিছু প্রমাদ থাকা অসম্ভব নহে। গ্রন্থখানি ছাত্র-ছাত্রী সমাজে সমাদর লাভ করিলে পরবর্তী সংস্করণকে যথাসাধ্য ত্রুটিমুক্ত করিবার চেষ্টা করা হইবে।

এই গ্রন্থে ঋক্‌গুলির যে অনুবাদ দেওয়া হইয়াছে তাহা শ্রীরমেশচন্দ্র দত্ত মহাশয় কৃত গ্রন্থ হইতে উদ্ধৃত।

ইতি—

**গ্রন্থকারদ্বয়**

# CONTENTS


| | Subjects | Pages |
|---|---|---|
| 1. | Explanations from Rig-Veda | 1 |
| 2. | Word Formations | 56 |
| 3. | Rks for স্বরসঞ্চার | 76 |
| 4. | Explanations from the Extracts of Sāyana-Bhāsya | 90 |
| 5. | Answers on terms of Sāyana-Bhāsya | 107 |
| 6 | Answers on ঋগ্বেদভাষ্যোপক্রমণিকা | 122 |
| 7. | Vājasaneyi-Samhita | 138 |
| 8. | Atharva-Veda | 142 |
| 9. | Aitareya-Brahmana | 152 |
| 10. | Satapatha-Brāhmana | 157 |
| I1. | Yāska's Nirukta | 160 |
| 12. | Kathopanisada | 181 |

# Important Explanations from Rig-Veda

1. বায় উক্‌থেভির্জরন্তে ত্বামচ্ছা জরিতারঃ।
সুতসোমা অহর্বিদঃ ॥ ( 1. 2. 2. )

**বঙ্গানুবাদ**—হে বায়ু, যজ্ঞাভিজ্ঞ স্তোতাগণ সোমরস অভিষুত করিয়া তোমার উদ্দেশে স্তুতিবাক্য প্রয়োগ করিয়া স্তব করিতেছে।

**Expl :**—বায়বীয়সূক্তস্য বায়ব্যতৃচে দ্বিতীয়া ঋক্। অস্য সূক্তস্য মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ, বায়ুর্দেবতা, প্রউগশস্ত্রে বিনিয়োগঃ।

হে বায়ো, জরিতারঃ স্তোতারঃ ঋত্বিগ্‌যজমানাঃ ত্বামচ্ছ ত্বামভিলক্ষ্য উক্‌থেভিঃ আজ্যপ্রউগাদি শস্ত্রৈর্জরন্তে স্তুবন্তি। কীদৃশাঃ? সুতসোমাঃ অভিষুতেন সোমেন উপেতাঃ। অহর্বিদঃ অহংশব্দ একেনাহ্না নিষ্পাদ্যেঽগ্নিষ্টোমাদিক্রতৌ বৈদিকব্যবহারেণ প্রসিদ্ধঃ। ক্রতুবিষয়ে নিপুণা ইত্যর্থঃ। যাস্কনিরুক্তগ্রন্থে অর্চতিগায়তীত্যাদিষু চতুশ্চত্বারিংশৎসু অর্চতি-কর্মসু ধাতুষু জরতে হ্বয়তীতি পঠিতম্। স্তুত্যর্থো জরতিধাতুঃ। জরিতারঃ শব্দঃ জরিতৃশব্দস্য বহুবচনেরূপম্। জরিতৃশব্দস্তু তৃচ্‌প্রত্যয়ান্তং পদম্ নতু তৃণ্‌প্রত্যয়ান্তম্। অচ্ছ শব্দস্য সংহিতায়াং নিপাতস্য চ ইতি দীর্ঘত্বে অচ্ছাশব্দঃ নিষ্পন্নঃ। সুতসোমা ইতি পদং বহুব্রীহিসমাসনিষ্পন্নম্।

অস্য মন্ত্রস্যায়ং হি আশয়ঃ—বায়ুমুদ্দিশ্য ঋত্বিজঃ যজমানাশ্চ বহুবিধোপচারেণ সহ স্তুবন্তি। তে চ যজমানাঃ যজ্ঞবিষয়ে কুশলাঃ সোমযুক্তাশ্চ। অতএব তেষাম্ আহ্বানং শ্রুত্বা বায়োরত্র যজ্ঞে আগমনম্ অবশ্যমেব উচিতমিতি। আগত্য চ তেষাং যজমানানাং প্রীতিসম্পাদনং কর্ত্তব্যমিতি।

2. *বায়ো তব প্রপৃঞ্চতী ধেনা জিগাতি দাশুষে।*
*উরূচী সোমপীতয়ে ॥* (1. 2. 3)

***বঙ্গানুবাদ***—হে বায়ু, তোমার সোমগুণপ্রকাশক বাক্য সোমপানার্থ হব্যদাতা যজমানের নিকট আসিতেছে, অনেকের নিকট আসিতেছে।

**Expl :**—বায়বায়সূক্তস্য বায়ব্যেতৃচে তৃতীয়া ঋগিয়ম্। সূক্তস্যাস্য মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ, বায়ুশ্চ দেবতা। প্রউগশস্ত্রে বিনিয়োগঃ।

হে বায়ো! তব ধেনা বাক্ সোমপীতয়ে সোমরসপানার্থং দাশুষে দাশ্বাংসং দত্তবন্তং যজমানং জিগাতি গচ্ছতীত্যর্থঃ। হে যজমান, ত্বয়া দত্তং সোমং পাস্যামীত্যেবং বায়ুর্বদতীত্যর্থঃ। কীদৃশী ধেনা? প্রপৃঞ্চতী। প্রকর্ষেণ সোমসম্পর্কং কুর্বতী। সোমস্য গুণং বর্ণয়ন্তীতি ভাবঃ। উরূচী। উরূন্ বহূন্ যজমানান্ গচ্ছন্তী। যে যে সোম-যাজিনঃ তান্ সর্বান্ বর্ণয়ন্তীত্যর্থঃ। অত্র ধেনা-শব্দস্য বাণীত্যর্থঃ। রসং শ্রাবয়তি যা বাণী অত্র সৈব ধেনুরিত্যুচ্যতে। প্রপৃঞ্চতীশব্দঃ প্র-পূর্ব্বকাৎ পৃঞ্চধাতোঃ সম্পর্কার্থত্বাৎ শতৃপ্রত্যয়েন স্ত্রিয়াংঙীপিরূপম্। জিগাতি গচ্ছতীত্যর্থঃ যাস্কাচার্যেণ নিরুক্তে পঠিতত্বাৎ। দাশুষে—দাশৃ দানে ইতি ধাতোঃ পরং ক্বসুপ্রত্যয়ঃ। দত্তবতে ইত্যর্থঃ। উরূচী ইতি পদং উরূপপদাৎ গমনার্থকস্য অঞ্চধাতোঃ পরং ষিদ্গৌরাদিভ্যশ্চ ইতি সূত্রেণ ঙীষিরূপম্। সোমপীতয়ে ইতি শব্দঃ দাশুষে ইত্যস্য বিশেষণম্। সোমশব্দো মনিন্ প্রত্যয়ান্তঃ।

যজমানপ্রদত্তং সোমং পাতুং বায়ুর্যজ্ঞস্থলে আগত্য সান্ত্বনামূলকয়া বাচা যজমানং প্রীণয়তি। যজমানপ্রদত্তস্য সোমস্য গুণং চ বর্ণয়িত্বা যজমানস্য মনসি উল্লাসং জনয়তি চেত্যস্য মন্ত্রস্য আশয়ঃ।

3. *ইন্দ্রবায়ূ ইমে সুতা উপ প্রয়োভিরা গতম্।*
*ইন্দবো বামুশন্তি হি।* (1. 2. 4)

***বঙ্গানুবাদ***—হে ইন্দ্র ও বায়ু, এই সোমরস অভিষুত হইয়াছে, অন্ন লইয়া আইস; সোমরস তোমাদিগকে কামনা করিতেছে।

হে মিত্রাবরুণৌ, যুবাং দ্বাবপি কথংভূতৌ ঋতাবৃধৌ। ঋতশব্দঃ সত্যবাচী যজ্ঞবাচী বা। ঋতস্য বর্দ্ধয়িতারৌ যুবাং দ্বাবপি সত্যস্য বর্দ্ধয়িতারৌ বা। যদ্বা, ঋতং নামোদকম্। জলস্য বর্দ্ধয়িতারৌ বা। তাদৃশৌ তৌ ঋতং স্পৃশত। তাদৃশৌ যুবাং ঋতেন সত্যেন ক্রতুং যজমানেন ক্রিয়মাণম্ আশাথে ব্যাপ্য তিষ্ঠতঃ। কীদৃশং ক্রতুম্? বৃহন্তং সত্ত্বগুণযুক্তং ক্রতুম্। কৃঞ্ ধাতোঃ কতুপ্রত্যয়েন ক্রতুশব্দো নিষ্পন্নঃ। মিত্রশ্চ বরুণশ্চেতি মিত্রাবরুণৌ 'দেবতাদ্বন্দ্বে চ' ইতি পূর্বপদস্যানঙাদেশঃ। ঋতস্পৃশা ইতি পদং 'সুপাং সুলুক্' ইতি ডাদেশেন নিষ্পন্নম্। মিত্রাবরুণৌ, ঋতাবৃধৌ, ঋতস্পৃশা ইতি ত্রীণি পদানি সম্বুদ্ধ্যন্তানি। আষ্টমিকো নিঘাতঃ।

**7· কবী নো মিত্রাবরুণা তুবিজাতা উরুক্ষয়া।**
**দক্ষং দধাতে অপসম্॥** (1. 2. 9)

***বঙ্গানুবাদ—ইন্দ্র*** ও বরুণ মেধাসম্পন্ন বহুলোকের হিতার্থে জাত ও বহুলোকের আশ্রয়ভূত; তাঁহারা আমাদিগের বল ও কর্মপোষণ করেন।

**Expl.** ঃ—বায়বীয়সূক্তে অত্র মিত্রাবরুণৌ দেবতে। অত্র মধুচ্ছন্দা ঋষিঃ, গায়ত্রী চ ছন্দঃ। মিত্রাবরুণৌ ইমৌ দেবৌ নোঽস্মাকং দক্ষং বলমপসম্ কর্ম চ দধাতে পোষয়তঃ। কীদৃশৌ মিত্রাবরুণৌ? কবী। কবিশব্দঃ ক্রান্তকারী মেধাবিবাচী। অতএব মেধাবিনৌ ইত্যর্থঃ। পুনশ্চ কীদৃশৌ? তুবিজাতৌ। তুবীনাং বহূনামুপকারকতয়া জাতৌ ইতি বা। উরুক্ষয়া বহুনিবাসৌ ইত্যর্থঃ। ক্ষিধাতুঃ ক্ষয়ার্থকঃ ক্ষিধাতোরেরজিত্যচ্ প্রত্যয়েন ক্ষয়শব্দো জাতঃ! ক্ষিয়ন্ত্যস্মিন্নিতি ক্ষয়ঃ, উরূণাং বহূনাং ক্ষয় ইতি উরুক্ষয়ঃ। ক্ষয়ং গৃহং নিবাসস্থানম্। বহূনাং নিবাসস্থানমিত্যর্থঃ। উরুতুবীতোতৌ শব্দৌ দ্বাদশসু বহুনামসু পঠিতৌ। অপশ্ শব্দঃ কর্মনামসু পঠিতঃ। তুবিশব্দশ্চ শীঘ্রবাচিত্বে অনেকবাচিত্বে চ বর্ত্ততে। চ দক্ষতের্ধাতোঃ ঘঞি দক্ষমিতি পদং নিষ্পন্নম্। তুবীনাং জাতৌ ইতি ষষ্ঠীতৎপুরুষসমাসে তুবিজাতৌ ইতি পদম্।

*অশ্বিনা যজ্বরীরিষো দ্রবৎপাণী শুভস্পতী ।*
*পুরুভুজা চনস্যতম্* ॥ ( 1. 3. 1 )

***বঙ্গানুবাদ***—হে ক্ষিপ্রপাণি, শুভকর্মপালক, বিস্তীর্ণ ভুজবিশিষ্ট অশ্বিদ্বয়, তোমরা যজ্ঞের অন্ন কামনা কর।

**Expl** ঃ—অত্র মন্ত্রে অশ্বিনৌ দেবতে, বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দশ্চ। আশ্বিনস্তৃচঃ প্রাতরনুবাকস্যাশ্বিনে ক্রতৌ বিনিযুক্তঃ।

হে অশ্বিনৌ যুবাম্ ইষো হবির্লক্ষণানি অন্নানি চনস্যতম্। ইচ্ছতম্। ভুঙ্ক্তাথামিত্যর্থঃ। যদ্যপি চনস্‌শব্দোঽন্নবাচী তথাপীষ ইত্যনেন সহ নাস্তি পুনরুক্তদোষঃ। ইচ্ছাম্ উপলক্ষয়িতুং প্রবৃত্তত্বাৎ। কীদৃশীঃ ইষঃ ? যজ্বরীঃ। যাগনিষ্পাদিকাঃ। কীদৃশৌ অশ্বিনৌ ? দ্রবৎপাণী। হবির্গ্রহণায় দ্রবদ্ভ্যাং ধাবদ্ভ্যাং পাণিভ্যাম্ উপেতৌ। শুভস্পতী। শুভস্য শোভনস্য কর্মণঃ পালকৌ। পুরুভুজা। বিস্তীর্ণভুজৌ বহুভোজিনৌ বা। দ্রবৎপাণীতি শব্দঃ দ্রবন্তৌ ধাবন্তৌ-পাণী হস্তৌ যয়োস্তৌ ইতি বহুব্রীহিসমাসঃ। শুভস্পতীত্যত্র শুভস্য পতীতি ষষ্ঠীতৎপুরুষ সমাসে সলোপাভাবঃ ইতি বৈদিকী স্থিতিঃ। যজ্‌ধাতোঃ 'সুযজোঙ্বনিপ্' ইতি সূত্রেণ ঙ্বনিপ্ প্রত্যয়ঃ। তদনন্তরং 'বনোরচ' ইতি সূত্রেণ নকারস্য রেফাদেশঃ। ততোঙীপা যজ্বরীতি রূপম্। চনস্‌শব্দোঽন্নবাচী। চনঃ আত্মন ইচ্ছতীতি চনস্যতি। তত্রলোট্ মধ্যমপুরুষে দ্বিবচনে রূপং ভবতি চনস্যতমিতি।

---

(9.) *অশ্বিনা পুরুদংসসা নরা শবীরয়া ধিয়া ।*
*ধিষ্ণ্যা বনতং গিরঃ ॥* ( 1. 3. 2 )

***বঙ্গানুবাদ***—হে বহুকর্মা, নেতা ও বিক্রমশালী অশ্বিদ্বয়, অপ্রতিহত বুদ্ধির সহিত আমাদিগের স্তুতি গ্রহণ কর।

**Expl** ঃ—মন্ত্রোঽয়ং প্রাতরনুবাকস্য আশ্বিনে ক্রতৌ বিনিযুক্তঃ।

**Expl.** ঃ বৈশ্বদেবতৃচে প্রথমা ঋগিয়ম্। অত্র বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ, বিশ্বেদেবা দেবতাঃ, গায়ত্রী চ ছন্দঃ। বিশ্বেশব্দস্য সকল ইত্যর্থঃ। দেবানাং কশ্চন বিগ্রহো মীমাংসকৈঃ নাঙ্গীক্রিয়তে। যদি অগ্নিদেবতাকং কর্ম কিঞ্চিদ্বর্তিতুমায়াযে হবিদীয়তে অথাদ্ হবিবিষয়কস্য স্বত্বস্য নিবৃত্তিপূর্বকং পরস্বত্বোৎপাদন জাতম্। বিশ্বে দেবাঃসর্বে ইতি যাজ্ঞিকসিদ্ধান্তমতং ন তু মীমাংসকমতম্।

হে বিশ্বে দেবাস এতন্নামকা দেবাবিশেষাঃ। দাশুষো হবির্দত্তবতো যজমানস্য সুতমভিষুতং সোমং প্রত্যাগত্য পুনঃ গচ্ছত। সোমমবাপ্তুমত্র যজ্ঞে আগচ্ছ। তে চ দেবা ওমাসঃ রক্ষকাঃ চর্ষণীধৃতঃ মর্ত্যানাং মনুষ্যাণাং ধারকাঃ। দাশ্বাংসঃ ফলস্য দাতারঃ। ওমাস ইতি অব রক্ষণে ইতি ধাতোর্মন্ প্রত্যয়ান্তং পদম্। তস্য টিলোপে জাতে ওম্ ইতি রূপম্। তত্র জস্ প্রত্যয়ে কৃতে জস্ প্রত্যয়স্যাসুগাগমঃ। চর্ষণীশব্দস্য যাস্কাচার্যেণ মর্ত্যো মরণশীলঃ ইত্যর্থঃ কৃতঃ। দাশৃ দানে ইতি ধাতোঃ ক্বসুপ্রত্যয়ে দাশ্বান্ ইতি রূপং ভবতি। দ্বিতীয়াবহুবচনে দাশুষ ইতি।

13. ***পাবকা নঃ সরস্বতী বাজেভির্বাজিনীবতী।***
***যজ্ঞং বষ্টু ধিয়াবসুঃ*** ॥ (1. 3. 10)

***বঙ্গানুবাদ*** পবিত্রা, অন্নযুক্তযজ্ঞবিশিষ্টা, ও যজ্ঞফলরূপধন দাত্রী সরস্বতী আমাদিগের অন্নবিশিষ্ট যজ্ঞ কামনা করুন।

**Expl.** ঃ– সরস্বতে তৃচে প্রথমা ঋক্ পাবকা ন ইতি। অত্র মন্ত্রে সরস্বতী দেবতা, মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ। অস্য মন্ত্রস্য অন্বারম্ভণীয়েষ্টৌ সরস্বতীদেবতাকে কর্মণি পুরোঽনুবাক্যাত্বেন বিনিয়োগঃ। অন্বারম্ভণীয়েষ্টিঃ দর্শপূর্ণমাসৌ আরপ্স্যমানেন যজমানেন কর্তব্যত্বেন বিহিতা। তস্যাম্ ইষ্টৌ সরস্বতীদেবতাকং কর্ম। সরস্বতী নাম্নী কাচন দেবতা। মীমাংসকমতেন সরস্বতী আনুপূর্বী দেবতা। যাজ্ঞিকমতে তু বিগ্রহবতী দেবতা। সরোঽস্যা অস্তীতি সরস্বতী গমনশীলা। স্থিররূপেণ সরস্বতী কদাপি ন তিষ্ঠতি।

সরস্বতীদেবী বাজেভির্হবির্লক্ষণৈরন্নৈর্নিমিত্তভূতৈঃ। অথবা যজমানেভ্যো দাতব্যৈরন্নৈর্নিমিত্তভূতৈঃ মঃ অস্মদীয়ং যজ্ঞং বষ্টু কাময়তাম্। কময়িত্বা চ নির্বহত্বিত্যর্থঃ। কীদৃশী সা সরস্বতী ? পাবকা শোধয়িত্রী। পাবং শুদ্ধিং কাময়তীতি পাবকা। কৈধাতোঃ শব্দয়তীত্যর্থঃ। বাজিনীবতী। অন্নবৎক্রিয়াবতী ইত্যর্থঃ। বাজোঽন্নম্। বাজিন্যো যস্যাঃ সন্তীতি সা বাজিনীবতী 'অত ইনিঠনৌ' ইতি ইনিপ্রত্যয়ঃ। 'ছন্দসীরঃ' ইতি মতুপোবত্বম্। ধিয়াবসুঃ। এতদপি সরস্বত্যা বিশেষণম্। কর্মপ্রাপ্যধননিমিত্তভূতা ইত্যর্থঃ। ধিয় নাম বুদ্ধ্যা। ধিয়া বসুর্বর্তনশীলং দ্রব্যং যথা স্যাদিতি বহুব্রীহি সমাসঃ। ধিয়া কর্মণা বসুঃ যস্যাঃ সকাশাদ্ভবতি সা ধিযাবসুরিতি সায়ণঃ। বাজেভিরিতি শব্দঃ ছান্দসঃ প্রয়োগঃ। 'বশকান্তৌ' ইতি ধাতোঃ লোটি প্রথমপুরুষৈকবচনে রূপম্। কান্তিরভিলাষঃ। ইচ্ছত্বিত্যর্থঃ।

14. ***চোদয়িত্রী সুনৃতানাম্ চেতন্তী সুমতীনাম্।***
***যজ্ঞং দধে সরস্বতী।*** ( 1. 3. 11 )

**বঙ্গানুবাদ**—সুনৃত বাক্যের উৎপাদয়িত্রী, সুমতি লোকদিগের শিক্ষয়িত্রী সরস্বতী আমাদিগের যজ্ঞ গ্রহণ করিয়াছেন।

**Expl** ঃ—সারস্বতে তৃচে দ্বিতীয়া ঋগিয়ম্। সরস্বতী অত্র দেবতা। বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ। যা সরস্বতী তন্নাম্নী দেবী সেয়ম্ ইমং যজ্ঞঃ যজ্ঞরূপং কর্ম দধে ধারয়ামাস। কীদৃশী সা ? সুনৃতানাং প্রিয়ানাং সত্যবাক্যানাং চোদয়িত্রী প্রেরয়িত্রী। সুমতীনাং শোভনবুদ্ধিযুক্তানাম্ অনুষ্ঠাতৄণাং চেতন্তী তদীয়মনুষ্ঠেয়ং জ্ঞাপয়ন্তী। চেতনং কুর্বন্তী। ঊণ পরিহানে ইতি ধাতোঃ ক্বিপ্ প্রত্যয়ে সুতরামূনয়ত্যাপ্রিয়মিতি সূন্ ইতি প্রিয়মুচ্যতে। তচ্চ তদৃতং সত্যঞ্চেতি সুনৃতম্। 'চুদ্ প্রেরণে' ইতি ধাতোঃ ণ্যন্তাৎ তৃচ্ প্রত্যয়ে, 'ঋন্নেভ্যো ঙীপ্' ইতি ঙীপ্ প্রত্যয়ে চোদয়িত্রী ইতি পদম্। 'চিতি সংজ্ঞানে' ইতি ধাতোঃ শতৃপ্রত্যয়ান্তেন ঙীপি চ চেতন্তী ইতি পদম্।

15. **অথা তে অন্তমানাং বিদ্যাম সুমতীনাম্।**
**মা নো অতি খ্য আ গহি ॥** ( 1. 4. 3 )

***বঙ্গানুবাদ*** আমরা যেন তোমার সমীপবর্ত্তী সুমতিদিগের মধ্যে থাকিয়া তোমাকে জানিতে পারি ; আমাদিগকে অতিক্রম করিয়া অন্যের মধ্যে আপনাকে প্রকাশ করিও না , আমাদের নিকট আইস।

Expl : অগ্নিষ্টোমে প্রাতঃসবনে ব্রাহ্মণাচ্ছংসিন। প্রাতঃসবনে ষট্সু সুক্তেষু সুরূপকৃত্নুমিত্যপি সূক্ত বিনিযুক্তম। তত্র সূক্তে তৃতীয়া ঋক্ ইয়ম্। ইন্দ্রদেবতাকং সূক্তমিদম্ অত্র দেবতা ইন্দ্রঃ বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ। ইন্দ্রোঽত্র স্তূয়তে। অথ সোমপানাস্তবমিত্যর্থঃ। হে ইন্দ্র তব অন্তমানামতিশয়েন সমীপবর্তিনাম্ অত্যন্তম অন্তিকানাং সুমতীনাম্ শোভনবুদ্ধিযুক্তানাং পুরুষাণাং মধ্যে স্থিত্বা বিদ্যাম ত্বাং বয়ং জানীয়ামঃ যদ্বা, সুমতীনাং শোভনবুদ্ধীনাং কর্মানুষ্ঠানবিষয়াণাং লাভার্থম ইত্যধ্যাহারঃ। বুদ্ধিলাভায় ত্বা স্মরেমেত্যর্থঃ। অস্য ফলমিদং—ত্বমপি নোঽস্মান অতি অতিক্রম্য ন কস্মৈবপাপ্যস্মৈ প্রকটিতবাং স্বকীয়ং রূপম্। নোঽতি মা খ্যঃ। অস্মানতিক্রম্য অন্যেষাং তৎস্বরূপং মা প্রকথয়। কিন্তু আগহি অস্মানেবাগচ্ছ অথা ইতি নিপাতঃ। অন্তমানাম্ ইতি অতিশায়নে তমপ্ প্রত্যয়ান্তং পদম্। 'অত ইনিঠনৌ' ইতি সূত্রেণ ঠনপ্রত্যয়ঃ। বেত্তের্লিঙি যাসুট্ প্রত্যয়ে বিদ্যাম ইতি পদম্। শোভনা মতির্যেষাং তে সুমতয়ঃ ইতি বহুব্রীহিনিষ্পন্নং পদম্। ষষ্ঠীবহু-বচনে রূপমিদম্। 'খ্যা প্রকথনে' ইতি ধাতোর্লুঙি মধ্যমপুরুষৈকবচনে খ্যঃ ইতি রূপম্।

16. **পরেহি বিগ্রমস্তৃতমিন্দ্রং পৃচ্ছা বিপশ্চিতম্।**
**যস্তে সখিভ্য আ বরম্॥** ( 1. 4. 4 )

***বঙ্গানুবাদ***—অজেয় ও মেধাবী ইন্দ্রের সমীপে যাও, এই মেধাবীর কথা জিজ্ঞাসা কর, সেই ইন্দ্র তোমার বন্ধুদিগকে শ্রেষ্ঠ ধন দান করেন।

Expl ঃ—ঐন্দ্রদেবতাকে সূক্তে চতুর্থী ঋগিয়ম্। ইন্দ্রদেবতাঽত্র স্তূয়তে। বৈশ্বামিত্রো মধুচ্ছন্দা অস্য সূক্তস্য ঋষিঃ। গায়ত্রী চ ছন্দঃ। অত্র মন্ত্রে হোতা যজমানমুদ্দিশ্য বদতি। হে যজমান, ত্বমিন্দ্রং পরেহি। ইন্দ্রস্য সমীপং গচ্ছ। গত্বা চ বিপশ্চিতং মেধাবিনং হোতারং মাং পৃচ্ছ। অসৌ হোতা সম্যক্ স্তুতবান নবেতি প্রশ্নং কুরু। য ইন্দ্রস্তে তব যজমানস্য সখিভ্য ঋত্বিগ্‌ভ্যো বরং শ্রেষ্ঠং ধনং পুত্রাদিকম্ আ সমন্তাৎ প্রযচ্ছতীতি শেষঃ। তাদৃশমিন্দ্রম্ ইতি পূর্বত্রান্বয়ঃ। তস্য পাণ্ডিত্যা-বাগমে বিশেষকারণমস্তি। তস্যমদ্বিষয়কং জ্ঞানং সর্বাধিকং স্যাৎ। পুনরপি কীদৃশম্? বিপ্রম্। মেধাবিনম্। অস্তৃতম্। অহিংসিতং হিংসারহিতমিত্যর্থঃ। 'বৃঙ বরণে' ইতি ধাতোরপ প্রত্যয়েন বরমিতি পদং নিষ্পন্নম।

(17) ***উত ব্রুবন্তু নো নিদো নিরন্যতশ্চিদারত।***
***দধানা ইন্দ্র ইদ্দুবঃ*** ॥ ( 1. 4. ৫ )

***বঙ্গানুবাদ***—আমাদিগের ঋত্বিকেরা ইন্দ্রের পরিচর্যা করিয়া তাঁহাকে স্তুতি করুন, হে নিন্দুকগণ, এই দেশ হইতে এবং অন্য দেশ হইতেও দূর হইয়া যাও।

Expl ঃ—ঐন্দ্রদেবতাকে সূক্তে পঞ্চমী ঋগিয়ম্। অত্র দেবতা ইন্দ্রঃ মধুচ্ছন্দা ঋষিঃ, গায়ত্রী চ ছন্দঃ। অত্র ইন্দ্রদেবতা স্তূয়তে। নোঽস্মাকং সম্বন্ধিনঃ ঋত্বিজঃ ইতি শেষঃ। তে ব্রুবন্তু ইন্দ্রং স্তুবন্তু। ব্রুধাতোঽত্র লক্ষণয়া স্তুত্যর্থঃ। স্তোত্রং কুর্বন্তু। উতশব্দঃ সমুচ্চয়বাচী অপি চ ইত্যর্থঃ। হে নিদঃ, নিদি কুৎসায়াং নিন্দন্তীতি নিদঃ। নিন্দিতারঃ পুরুষা নিরারত নির্গচ্ছত। ইতো দেশান্নির্গচ্ছত। অন্যত্র গচ্ছন্তু ইত্যর্থঃ। নির্গতি প্রাপনযোরিতি ধাতুঃ। অন্যতশ্চিদন্যস্মাদপি দেশান্নির্গচ্ছত। কীদৃশা ঋত্বিজঃ। ইন্দ্রে দুবঃ পরিচর্যাং দধানাঃ কুর্বাণাঃ। ইৎশব্দোঽবধারণে। সর্বদা পরিচর্যাং কুর্বন্ত এব তিষ্ঠন্তিত্যর্থঃ।

নিদ্‌ধাতোঃ ক্বিপ্‌প্রত্যয়ান্তং পদং নিদঃ ইতি। অন্যশব্দাৎ তসিল্‌ প্রত্যয়েন অন্যতঃ ইতি রূপং সিদ্ধম্‌। চিদিতি পদম্‌ অপিশব্দার্থম্‌। আরত ইত্যত্র 'ঋ গতিপ্রাপণয়ো' রিতি ধাতোর্লোডর্থে লুঙ্‌লকারঃ। লোটি মধ্যমপুরুষ বহুবচনে ত ইত্যাদেশঃ। তদানীং ঋ ত ইতি স্থিতে চ্লিলুঙি ইতি সূত্রেণ প্রাপ্তস্য চ্লেঃ সর্তিশাস্ত্যর্তিভ্যশ্চ ইতি সূত্রেণ অঙাদেশঃ, ঋ অ ত ইতি স্থিতে ঋ দৃশোঽঙি গুণঃ ইতি সূত্রেণ গুণে প্রাপ্তে জাতম্‌।

---

১৪. *এমাশুমাশবে ভর যজ্ঞশ্রিয়ং নৃমাদনম্‌।*
*পতয়ন্‌ মন্দয়ৎসখম্‌॥* ( 1. 4.. 7 )

***বঙ্গানুবাদ***—এই সোমরস ব্যাপনশীল ও যজ্ঞে সম্পদরূপ, ইহা মনুষ্যকে হৃষ্ট করে, কার্যসাধন করে এবং হর্ষদাতা ইন্দ্রের সখা; যজ্ঞব্যাপী ইন্দ্রকে ইহা দান কর।

**Expl :** ঐন্দ্রদেবতাকে সূক্তে সপ্তমী ঋগিয়ম্‌। ঐন্দ্রদেবতাকোঽয়ং মন্ত্রঃ, মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ। ইন্দ্রদেবতাঽত্র স্তূয়তে।

অত্র মন্ত্রে ঈমিতি নিপাত ইদংশব্দার্থে বর্ততে। হে যজমান। আশবে কৃৎস্নসোমযাগব্যাপ্তায়েন্দ্রায়। ইমাভর। ইমং সোমমাহর। কীদৃশং সোমম্‌? আশুম্‌। সবনত্রয়েঽপি ব্যাপ্তুমন্তম্‌। যজ্ঞশ্রিয়ম্‌ যজ্ঞস্য সম্পদ্রূপম্‌। নৃমাদনম্‌। নৄন্‌ মাদয়তীতি, নৃণাম্‌ ঋত্বিগ্‌-যজমানানাং হর্ষোৎপাদকম্‌। পতয়ৎ পতয়ন্তম্‌। পতৃ গতৌ। কর্মণি প্রাপ্নুবন্তমিত্যর্থঃ। মন্দয়ৎসখম্‌। য ইন্দ্রো মন্দয়তি যজমানান্‌ হর্ষয়তি তস্মিন্নিন্দ্রে সখিভূতোঽয়ং সোমঃ। ইন্দ্রস্য প্রীতিবর্দ্ধনার্থং তৃপ্তিদানার্থং চ নানাগুণসম্পন্নং সোমরসাত্মকং দ্রব্যং যজ্ঞেঽস্মিন্নাহর ইতি মন্ত্রস্যাস্য ভাবার্থঃ। 'কৃবাপাজি—' ইত্যনেন সূত্রেণ উণ্‌প্রত্যয়েন আশুমিতি পদম্‌। 'করণাধিকরণযোশ্চ' ইত্যনেন ল্যুট্‌ প্রত্যয়েন মাদনমিতি পদম্‌।

তদনন্তরং ষষ্ঠীসমাসে নৃমাদনমিতি রূপং ভবতি। পত্‌ধাতোর্ণিচ্‌ প্রত্যয়েন পতয়দিতি পদম্‌। মন্দযৎসখেত্যত্র মন্দয়তি সখা ইতি সমাসে রাজাহঃসখিভ্যষ্টচ্‌ ইতি সমাসান্তঃ।

---

19. **যো রায়োঽবনির্মহান্‌সুপারঃ সুন্বতঃ সখা।**
**তস্মা ইন্দ্রায় গায়ত**॥ (1. 4. 10)

**বঙ্গানুবাদ**—যিনি ধনের রক্ষক এবং মহান্‌, যিনি কর্মের পূরয়িতা এবং অভিষবকারীর সখা, সেই ইন্দ্রের উদ্দেশ্যে গাও।

**Expl** :- ঐন্দ্রদেবতাকে সূক্তে দশমী ঋগিয়ম্‌। অত্র ইন্দ্রো দেবতা, মধুচ্ছন্দা ঋষিঃ, গায়ত্রী চ ছন্দঃ। য ইন্দ্রো রায়ো ধনস্যাবনী রক্ষকঃ স্বামী বা। তস্মা ইন্দ্রায় গায়ত। হে ঋত্বিজস্তৎপ্রীত্যর্থং স্তুতিং কুরুত। কীদৃশঃ ইন্দ্রঃ। মহান্‌। গুণৈরধিকঃ। সুপারঃ সুষ্ঠু কর্মণঃ পূরয়িতা। সুন্বতো যজমানস্য সখা সখিবৎ প্রিয়ঃ। 'অব রক্ষণে' ইতি ধাতোরনিপ্রত্যয়েন অবণিরিতি পদং নিষ্পন্নম্‌। সুপারঃ ইত্যত্র পৃ পালনপূরণযোরিত্যস্মাণ্ণিজন্তাৎ কর্ত্তরি ইত্যনুবৃত্তৌ পচাদ্যচ্‌। সমানং খ্যায়তে ইতি সখা। সমানে খ্যঃ স চোদাত্তঃ। ইতীণ্‌ প্রত্যয়ঃ। তৎসন্নিযোগেন যলোপঃ। ডিত্ত্বাট্টিলোপঃ। ইন্দ্রশব্দো রন্‌প্রত্যয়ান্তো নিপাতঃ। কর্মণা যমভিপ্রৈতি স সম্প্রদানমিত্যত্র ক্রিয়াগ্রহণং কর্ত্তব্যমিতি বচনাদ্‌ দানক্রিয়য়া প্রাপ্তত্বাৎ ইন্দ্রায় ইতি পদং সম্প্রদানত্বেন চতুর্থী।

---

20. **স ঘা নো যোগ আ ভুবৎস রায়ে স পুরন্ধ্যাম্‌।**
**গমদ্বাজেভিরা স নঃ**॥ (1.5 3)

**বঙ্গানুবাদ**—তিনি আমাদিগের উদ্দেশ্য সাধন করুন, তিনি ধন প্রদান করুন, তিনি স্ত্রী প্রদান করুন, তিনি অন্ন লইয়া আমাদিগের সমীপে আগমন করুন।

**Expl.** :—ঐন্দ্রদেবতাকে সূক্তে ইন্দ্রদেবতায়াঃ স্তুতিরূপিণী ঋগিয়ম্। অত্র দেবতা ইন্দ্রঃ, মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ। অস্য সূক্তস্য বিশেষবিনিয়োগঃ অতিরাত্রে তৃতীয়পর্য্যায়ে মৈত্রাবরুণশস্ত্রে স্তুত্রিয়োঽয়ং তৃচঃ।

ঘ-শব্দোঽবধারণার্থো নিপাতঃ। হ্রস্বান্তোঽয়ং শব্দঃ। ছন্দসি দীর্ঘত্বম্। ইন্দ্র এব প্রকৃতত্বাৎ। স এব ইন্দ্রঃ পূর্বমন্ত্রোক্তগুণবিশিষ্টঃ নোঽস্মাকং যোগে অপ্রাপ্তপ্রাপণে অলব্ধস্য পদার্থস্য প্রাপ্তৌ স সাহায্যং বিদধাতু। স এব রায়ে ধনার্থমাভুবৎ। আ ভবতু। স এব পুরন্ধ্যাং যোষিত্যাভুবৎ। যদ্বা, বহুবিধায়াং বুদ্ধাবাভুবৎ। পুরন্ধির্বহুধীঃ ইতি যাস্কঃ। স এব বাজেভির্দেয়ৈঃ অন্নৈঃ স নোঽস্মানাগমৎ। অত্র ভুবৎ-শব্দ আশীর্লিঙি ছান্দাসো রূপম্। পুরন্ধিরিত্যত্র পৃষোদরাদিত্বাৎ উকারস্যামাদেশে ঈরগরস্য হ্রস্বত্বম্। গমদিত্যত্র গমের্লট্তিপ্। ইতশ্চলোপঃ পরস্মৈপদেষু ইতীকারলোপঃ। বহুলং ছন্দসি ইতি শপো লুক্। লেটোঽডাটৌ ইত্যডাগমঃ।

---

(21) সুতপাবে সুতা ইমে শুচয়ে যন্তি বীতয়ে।
সোমাসো দধ্যাশিরঃ॥ (1.5.5)

***বঙ্গানুবাদ***—এই অভিষুত পবিত্র দধিমিশ্রিত সোমরসসমূহ অভিষুত সোমপায়ীর পানার্থে তাঁহার নিকট যাইতেছে।

**Expl.** :—ইন্দ্রো দেবতা, মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ। ইমে সোমাসঃ আজ্জসেরসুক্ সোমা ইত্যর্থঃ। সুতপাবে—চতুর্থ্যন্তং পদমিদম্। সুতং পিবতি ইতি সুতপাবা। পাধাতোর্বনিপ্ প্রত্যয়ান্তং পদম্। অভিষুতস্য সোমস্য পানকর্ত্রে ইত্যর্থঃ। বীতয়ে ভক্ষণার্থং যন্তি গচ্ছন্তি। দধ্যাশিরঃ অবনীয়মানং দধি আশীর্দোষঘাতকং যেষাং

হিংসায়ামিতি ধাতুঃ। আহিনস্তি ইত্যর্থঃ। যদ্বা মিশ্রযতি। দধ্যো-বাশীর্যেষাং সোমানাং তে দধ্যাশিরঃ। বহুব্রীহৌ—পূর্বপদপ্রকৃতিস্বরত্বম্।

**22 ত্বং সুতস্য পীতয়ে সদ্যো বৃদ্ধো অজায়থাঃ।**
**ইন্দ্র জ্যৈষ্ঠায় সুক্রতো (1. 5. 6)**

**বঙ্গানুবাদ** হে সুক্রতু ইন্দ্র, তুমি অভিষুত সোমপানের জন্য ও দেবগণের মধ্যে জ্যেষ্ঠত্ব প্রাপ্তির জন্য একেবারেই বৃদ্ধিপ্রাপ্ত হইয়াছ।

**Expl** ঃ ইন্দ্রদেবতাকা ঋগেযম্। বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ। হে সুক্রতো শোভনকর্মন্ শোভনপ্রজ্ঞ বা যস্য ইন্দ্রস্য কর্ম প্রজ্ঞা বা শোভনা। ত্বং সুতস্যাভিষুতস্য সোমস্য পীতয়ে পানার্থং জ্যৈষ্ঠায দেবেষু জ্যেষ্ঠত্বার্থঞ্চ সদ্যঃ অস্মিন্নেব ক্ষণে বৃদ্ধোঽজায়থাঃ। অভিবৃদ্ধোৎসাহেন যুক্তোঽভূঃ। সর্বদেবাপেক্ষযা প্রাথম্যং তব বর্ত্ততাম্। পা পানে ইতি ধাতোঃ ক্তিন্ প্রত্যযেন পীতয়ে ইতি পদম্। সদ্য ইত্যত্র সমানেঽহনি ইত্যর্থে সমানশব্দস্য সভাবস্ততো দ্যস্। জ্যেষ্ঠস্য ভাবঃ জ্যৈষ্ঠ্যম্। চতুর্থীবিভক্তৌ জ্যৈষ্ঠ্যায ইতি পদম্।

---

**23 অক্ষিতোতিঃ সনেদিমং বাজমিন্দ্রঃ সহস্রিণম্।**
**যস্মিন্ বিশ্বানি পৌংস্যা ( 1 5. 9 )**

**বঙ্গানুবাদ—ইন্দ্র** রক্ষণে বিরত না হইয়া এই সহস্রসংখ্যক অন্ন গ্রহণ করুন, যে অন্নে সমস্ত পৌরুষ অবস্থিত করে।

**Expl.** ঃ—অত্রাপি হীন্দ্রস্য স্তুতিঃ। বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ, গায়ত্রী চ ছন্দঃ। অক্ষিতোতিরিতি ইন্দ্রস্য বিশেষণম্। ন ক্ষিতা অক্ষিতা। অক্ষিতা ঊতির্যস্য সঃ, ক্ষিত ইত্যস্য নাশঃ ক্ষয় ইত্যর্থঃ।

ক্ষয়রহিতা উতির্যস্য স ইত্যর্থঃ। তদীয়ং যদ্রক্ষণং তদ্বিংসারহিতম্। তাদৃশ ইন্দ্রঃ সহস্রিণং সহস্রমস্যাস্তীতি সহস্রিন্ তমিদং বাজং সোমরূপমন্নং সনেৎ সম্ভজেৎ। যস্মিন্ বাজে বিশ্বানি সর্বাণি পৌংস্যা পুংস্থানি বলানি বর্ত্তন্তে। পৌংস্যা ইত্যত্র ব্রাহ্মণাদেরাকৃতিগণত্বাৎ গুণবচনব্রাহ্মণাদিভ্যঃ কর্মণি চ ইতি ষ্যঞ্। প্রথমাবহুবচনস্য 'সুপাং সুলুক্' ইতি ডাদেশঃ। সনেত্ ইতি পদং বনষণ সম্ভক্তৌ ইতি ধাতোঃ রূপম্।

---

24. *মা নো মর্তা অভি দ্রুহন্তনূনামিন্দ্র গির্বণঃ।*
*ঈশানো যবয়া বধম্॥* ( 1. 5. 10 )

**বঙ্গানুবাদ**—হে স্তুতিভাজন ইন্দ্র, বিরোধী মনুষ্যেরা আমাদিগের শরীরে যেন আঘাত না করে, তুমি ক্ষমতাশালী, আমাদিগের বধ নিবারণ কর।

**Expl** : – অত্রাপি ইন্দ্রস্য স্তুতিঃ বৈশ্বামিত্রোমধুচ্ছন্দা ঋষিঃ, গায়ত্রী চ ছন্দঃ। হে গির্বণঃ ইন্দ্রঃ মর্তা মরণশীলা মনুষ্যাঃ। অত্র মরণশীলতা শত্রোরেব বর্ত্ততে বিশেষেণ। অতো বিরোধিনো মনুষ্যা ইত্যর্থঃ। অত্র সামান্যেন মনুষ্যপদং বোধয়তি। নোঽস্মদীয়ানাং তনূনাং শরীরাণাং মাভিদ্রুহন্, অভিতো দ্রোহং মা কুর্যুঃ। অস্মাকং শরীরস্য বৃতে পীড়া ন সম্পাদয়তু। ঈশানঃ সমর্থঃ সন্ ত্বং বধং বৈরিভিঃ সম্পাদ্যমানং যবয়—অস্মত্তঃ পৃথক্ কুরু। মৃধাতোস্তন্ প্রত্যয়েন মর্তা ইতি পদম্। দ্রুহন্ ইতি দ্রুহ্ ধাতো র্লোট্ লকারে রূপম্। দ্রুহ্ জিঘাংসায়ামিতি ধাতুঃ। ঈশ্ ধাতোঃ শানচ্ প্রত্যয়েন ঈশানঃ ইতি পদম্। যবয় ইত্যত্র যু মিশ্রণামিশ্রণয়োরিতি ধাতুঃ। যৌতীতি যবঃ। পচাদ্যচ্। যবং করোতি ইত্যর্থে তৎকরোতি তদাচষ্টে ইতি ণিচ্।

---

25. **যুঞ্জন্তি ব্রধ্নমরুষং চরন্তং পরি তস্থুষঃ।**
**রোচন্তে রোচনা দিবি ॥** (1. 6. 1)

**বঙ্গানুবাদ**—চতুর্দিকস্থ লোকেরা সূর্যরূপ ইন্দ্রের প্রতাপান্বিত, অরুষ ও বিচরণকারী অশ্ব যোজনা করিতেছে। আলোকগণ আকাশে দীপ্যমান রহিয়াছে।

**Expl.** :—অত্র বৈশ্বামিত্রঃ ঋষিঃ, গায়ত্রী ছন্দঃ। ইন্দ্রো দেবতা। অত্র যদ্যপি ইন্দ্রপদং মন্ত্রে নাস্তি তথাপীন্দ্রদেবতাকত্বমস্য লিঙ্গবলাদ-ঙ্গীকর্ত্তব্যম্। ইন্দ্রস্তু পরমৈশ্বর্যসম্পন্নঃ। ব্রধ্নত্বেন বিদ্যমানোঽয়ম্। ব্রধ্ন ইতি সূর্য আদিত্যরূপেণস্থিতম্। স ইন্দ্র আদিত্যরূপেণ বর্ত্ততে। আদিত্য-মণ্ডলে স্বকীয়মাধিপত্যম্ অস্তি। অরুষম্। ন সন্তি রুষো যত্র তদরুষঃ তম্ অরুষম্। হিংসকাঃ পদার্থা যত্র ন ভবন্তি স অরুষশব্দেন ব্যবহ্রিয়তে। চরন্তম্। চরতীতি চরধাতোঃ শতৃপ্রত্যয়ে দ্বিতীয়ৈকবচনে রূপম্। বায়ু-রূপেণ সর্বত্র প্রসরন্তমিত্যর্থঃ। ইন্দ্রং পরি তস্থুষঃ পরিতোঽবস্থিতা লোকত্রয়বর্ত্তিনঃ প্রাণিনো যুঞ্জন্তি। স্বকীয়ে কর্মণি দেবতাত্বেন সংবধ্নন্তি। তস্যৈব ইন্দ্রস্য মূর্ত্তিবিশেষভূতা রোচনা নক্ষত্রাণি দিবি দ্যুলোকে রোচন্তে। প্রকাশন্তে। রোচনাশব্দেনাত্র নক্ষত্রাণাং পরিগ্রহঃ, প্রকাশমানানি নক্ষত্রাণীত্যর্থঃ।

---

26. **যুঞ্জন্ত্যস্য কাম্যা হরী বিপক্ষসা রথে।**
**শোণা ধৃষ্ণূ নৃবাহসা ॥** (1. 6. 2)

**বঙ্গানুবাদ**—তাহারা ইন্দ্রের কমণীয়, রক্তবর্ণ, তেজঃপূর্ণ ও পুরুষ-বাহক হরি নামক অশ্বদ্বয় রথের উভয়পার্শ্বে সংযোজিত করে।

**Expl**:—মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ। ইন্দ্রদেবতাকা ঋগিয়ম্।

যত্র হরীতি পদমাগচ্ছতি তত্র ইন্দ্রস্যৈব বাহনমশ্বং বোদ্ধব্যম্। অস্য ইন্দ্রস্য রথে হরী এতন্নামানৌ দ্বাবশ্বৌ সারথয়ো যুঞ্জন্তি। কীদৃশৌ হরী। কাম্যা কাময়িতব্যৌ। কমু কান্তৌ ইতি ধাতোর্ণিৎ প্রত্যযঃ। অভিলাষবিষয়ীভূতৌ ইত্যর্থঃ। বিপক্ষসা বিবিধে পক্ষসী রথস্য পার্শ্বৌ যয়োরশ্বয়ো স্তৌ। সুপাং সুলুগিতি লোপে জাতে ডাদেশে অকারান্তং রূপম্। শোণা রক্তবর্ণৌ ধৃষ্ণু প্রগল্‌ভৌ। নৃবাহসা নৄণাং বোঢ়ারৌ ইত্যর্থঃ। অসুন্ প্রত্যয়ান্তমিদং রূপম্। শোণৃ বর্ণগত্যোরিতি ধাতোঃ করণে ঘঞ্ প্রত্যয়েন শোণা ইতি পদম্। ঞিধৃষা প্রাগল্‌ভ্যে ইতি ধাতোঃ ক্নু প্রত্যয়েন ধৃষ্ণু ইতি পদম্।

---

27. কেতুং কৃণ্বন্নকেতবে পেশো মর্যা অপেশসে।
সমুষদ্ভিরজায়থাঃ ॥ ( 1. 6. 3 )

বঙ্গানুবাদ—হে মনুষ্যগণ, সূর্যরূপ ইন্দ্র নিদ্রায়, সংজ্ঞারহিতকে সংজ্ঞাদান করিয়া, অন্ধকারে রূপরাহিত্যকে রূপদান করিয়া, জ্বলন্ত রশ্মির সহিত উদিত হইতেছেন।

Expl :—বিশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ, গায়ত্রী ছন্দঃ। অত্রাপীন্দ্র এব দেবতা। মর্যা মরণশীলা মর্ত্যাঃ ইতি লৌকিকে। ইদমাশ্চর্যং পশ্যত বিলোকয়ত ইত্যধ্যাহর্তব্যম্। অযমিন্দ্র উষদ্ভিঃ উষং ইতি তকারান্তশব্দাত্তৃতীয়াবহুবচনম্। সূর্যস্য রশ্মিভিরিত্যর্থঃ। যুক্তঃ অজায়থাঃ সূর্যস্য উষঃকালে প্রাদুর্ভাবত্বাৎ। প্রজানুরঞ্জনং যঃ করোতি স এব হি রাজা। প্রজারূপত্বং যদা স্বয়ং ধত্তে তদৈব রাজা প্রজারঞ্জনে সমর্থঃ। এবমিন্দ্রোঽপি আদিত্যরূপং দধাতি। কিং কুর্বন্। অকেতবে কেতুং কৃণ্বন্। কেতুশব্দো জ্ঞানবাচী। জ্ঞানরহিতায় নাম রাত্রৌ নিদ্রাভিভূতত্বেন প্রজ্ঞানরহিতায় প্রাণিনে প্রাতঃ প্রজ্ঞানং কুর্বন্।

অপেশসে। রাত্রৌ অন্ধকারাবৃতত্বেনানভিব্যক্তত্বাদ্ রূপরহিতায় পদার্থায় প্রাতরন্ধকারনিবারণেন পেশো রূপমভিব্যঞ্জমানং কুর্বন্।

---

28. *আদহ স্বধামনু পুনর্গর্ভত্বমেরিরে।*
*দধানা নাম যজ্ঞিয়ম্॥* ( 1. 6. 4 )

**বঙ্গানুবাদ**—তাহার পর মরুৎগণ যজ্ঞার্হ নাম ধারণ করিয়া স্বীয় প্রকৃতি অনুসারে মেঘের মধ্যে জলের গর্ভাকার রচনা করিলেন।

**Expl** ঃ—মরুদ্দেবতাকেন মন্ত্রেণ স্তূয়তে। ঋষিরত্র মধুচ্ছন্দা, গায়ত্রী চ ছন্দঃ। অত্র অনন্তরমিত্যর্থে আৎ ইতি পদং প্রযুক্তম্। মরুৎসু দেবতাসু বর্তমানানাং গুণানাং বর্ণনং ভবতি। অনন্তরশব্দস্তু সাপেক্ষ এব। কস্মাদনন্তরমিতি সাপেক্ষপূরণায় প্রসঙ্গাদ্ বর্ষাকালানন্তর-মেব ইত্যর্থঃ। অহ ইত্যবধারণার্থম্। স্বধাশব্দস্য অন্নমিত্যর্থঃ। বায়োঃ সম্বন্ধমন্তরা মেঘেষু জলসঞ্চারো ন ভবতি। অতো জলপ্রদাতৃত্বশক্তিরিতি ত্রিষ্বপি দেবতাসু পরিগণ্যতে। ইন্দ্রবরুণমরুৎসু তৎ প্রাপ্যতে। কীদৃশো মরুতঃ। যজ্ঞিয়ং যজ্ঞার্হং নাম দধানা। ধারয়ন্তঃ। জনিষ্যমাণমন্নমুদকং বাহুল্যলক্ষ্য মরুতো দেবা গর্ভত্বমেরিরে মেঘমধ্যে জলস্য গর্ভাকারং প্রেরিতবন্তঃ। জলস্য কর্ত্তারঃ পর্জন্য প্রেরিতবন্তঃ। প্রতিবৎসরমেবং কুর্বন্তীতি দর্শয়িতুং পুনঃশব্দো যুক্তঃ। যজ্ঞিয়মিতি পদং ঘ প্রত্যয়েন নিষ্পন্নম্

---

29. *ইন্দ্রো দীর্ঘায় চক্ষস আ সূর্যং রোহয়দ্দিবি।*
*বি গোভিরদ্রিমৈরয়ৎ॥* ( 1. 7. 3)

**বঙ্গানুবাদ**—ইন্দ্র বহুদূর দর্শনের জন্য আকাশে সূর্যকে আরোহণ করাইয়াছিলেন ; সূর্য কিরণদ্বারা পর্ব্বত আলোকিত করিয়াছেন।

Expl :—মহাব্রতে নিষ্কেবল্যে শস্ত্রে ইন্দ্রমিদ্‌গাথিন ইতি সূক্তম্। তত্র তৃতীয়া ঋগিয়ম্। ইন্দ্রোঽত্র স্তূয়তে। ঋষিরত্র মধুচ্ছন্দা। ছন্দশ্চ গায়ত্রী। অয়মিন্দ্রো দেবতা দীর্ঘায় প্রৌঢ়ায় নিরন্তরায় চক্ষসে দর্শনায় দিবি সূর্যমারোহয়ৎ। পুরা বৃত্রাসুরেণ জগতি যদাপাতিতং তমস্তন্নিবারণেন প্রাণিনাং দৃষ্টিসিদ্ধ্যর্থমাদিত্যং দ্যুলোকে স্থাপিতবানিত্যর্থঃ। স চ সূর্যো গোভিঃ স্বকীয়াবশ্মিভিরদ্রিং পর্বতমুখং সর্ব্বং জগৎ বৈরয়ৎ। বিশেষেণ দর্শনার্থং প্রেরিতবান্ দীর্ঘদর্শনায় সূর্যং দিবি প্রেরয়েদিন্দ্রঃ। যথা বা লোকানাং দর্শনং সম্যক্ স্যাত্তথা সূর্যং দ্যুলোকে প্রেরয়ামাস। অপি চ ইন্দ্রেণ কিং কৃতম্? অস্যাংশস্য দ্বাবর্থৌ। গোশব্দস্য সূর্যকিরণ ইত্যর্থঃ। অপি চ গোশব্দস্য জলমিত্যর্থঃ। গোভিঃ সূর্যরশ্মিভির্জলৈর্বা অদ্রিং পর্বতম্। অদন্তি পশবস্তৃণাদিকমত্রেত্যদ্রিঃ। অপি চ অদ্রিশব্দো মেঘবাচী। মেঘং জলসহিতং কৃত্বা প্রেরযেৎ। অত ইন্দ্রোঽপি জলধিপর্তৃদেব হতি ভাবঃ।

---

### √30. তুঞ্জেতুঞ্জে য উত্তরে স্তোমা ইন্দ্রস্য বজ্রিণঃ। ন বিন্ধে অস্য সুষ্টুতিম্। (1. 7. 7)

**বঙ্গানুবাদ**—ভিন্ন ভিন্ন ফলদাতা ভিন্ন ভিন্ন দেবতা সম্বন্ধে যে স্তুতিবাক্য প্রয়োগ উৎকৃষ্ট হয় সে সমস্ত স্তোমত বজ্রধারী ইন্দ্রের, তাঁহার যোগ্যস্তুতি আমি জানি না।

Expl :—অত্রাপীন্দ্রো দেবতা মধুচ্ছন্দা ঋষিঃ, গাযত্রী ছন্দঃ। মহাব্রতে নিষ্কেবল্যে শস্ত্রে ইন্দ্রমিদ্‌গাথিন ইতি সূক্তম্। তত্র সপ্তমী ঋগিয়ম্। তুঞ্জে তুঞ্জে তস্মিন্ তস্মিন্ ফলদাতরি দেবান্তরে যে স্তোমাঃ স্তোত্রবিশেষা উত্তরে উৎকৃষ্টাঃ সন্তি তৈঃ স্তোমৈঃ সর্বৈরপি বজ্রিণো বজ্রযুক্তস্য ইন্দ্রস্য সুষ্টুতিং যোগ্যাং শোভনস্তুতিং ন বিন্ধে। ন বিন্দামি। তুঞ্জতিধাতুঃ দানকর্মা দদাতীত্যর্থঃ। অত্র বীপ্সা আগতা। উত্তরে

উর্ধ্বং তরণং যেষাং তে, স্তোম ইত্যস্য বিশেষণম্ ইদম্। যে উৎকৃষ্টাঃ স্তোমাস্তস্মিন্ তস্মিন্ ফলদাতরি প্রযুজ্যতে। সুষ্টুতিমিত্যত্র 'ষ্টুঞ্ স্তুতৌ' ইতি ধাতুঃ। ঋত্বাদেঃ ষঃ সঃ ইতি সূত্রেণ ষ কারস্য সকারঃ। স্ত্রিয়াং ক্তিন্নিত্যনেন ভাবে ক্তিন্ প্রত্যয়ে কৃতে ষ্টুতি ইতি রূপে জাতে, অনন্তরং সু ইত্যুপসর্গেণ সমাসে কৃতে, অকারস্য ষকারে জাতে সুষ্টুতিঃ ইতি রূপং সম্পদ্যতে।

---

31. *বৃষা যূথেব বংসগঃ কৃষ্টীরিয়র্ত্যোজসা।*
*ঈশানো অপ্রতিষ্কুতঃ॥* ( 1. 7. 8 )

**বঙ্গানুবাদ** যেরূপ বননীয়গতি বৃষভযুথকে বলপূর্ণ করে, অভীষ্টবর্ষী ইন্দ্র সেইরূপ মনুষ্যদিগকে বলপূর্ণ করেন, ইন্দ্র ক্ষমতাশালী ও যাচ্ঞা অগ্রাহ্য করেন না।

Expl. ঃ—ইন্দ্রস্তুতিবিষয়কা ঋগিয়ম্। বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ গায়ত্রী চ ছন্দঃ। বৃষা কামানাং বর্ষিতেন্দ্রঃ ওজসা স্বকায়বলেনানুগ্রহীতুং কৃষ্টীর্মনুষ্যান্ ইয়র্তি প্রাপ্নোতি। কীদৃশঃ ইন্দ্রঃ? ঈশানঃ সমর্থঃ। অপ্রতিষ্কুতঃ প্রতিশব্দরহিতঃ। যাচ্যমানং ন পারহরতীত্যর্থঃ। ইন্দ্রস্য দৃষ্টান্তঃ। বংসগো। বননীয়গতির্বৃষভো যূথেব গোযূথানি যথা প্রাপ্নোতি তদ্বৎ। অথবা বসং গচ্ছতীতি বসঙ্গঃ। কামান্ বর্ষতীতি বৃষা, বর্ষতিধাতোঃ কনিন্ প্রত্যয়ঃ। কর্ষন্তীতি কৃষ্টয়ঃ, তাঃ কৃষ্টীঃ। কৃষ্ ধাতোঃ ক্তিচ্ প্রত্যয়ঃ। ঈষ্টেঃ শানচ্ প্রত্যয়ে ঈশান ইতি পদম্। যু মিশ্রণামিশ্রণয়োরিতি ধাতোঃ থ প্রত্যয়েন যূথেতি পদম্। ইবেন সহ নিত্যসমাসঃ। তত্র অব্যয়ীভাবসমাসাৎ পূর্ব্বপদপ্রকৃতিস্বরত্বং প্রাপ্তম্। ঋ গতৌ ইতি ধাতোঃ তিপ্ প্রত্যয়েন ইয়র্ত্তি ইতি পদম্। অপ্রতিষ্কুত ইতি পদং নঞ্ সমাসঃ। কু শব্দে কর্মণি ক্তঃ। পারস্করাদেরাকৃতিগণত্বাৎ সুডাগমঃ।

---

32. *য একশ্চর্ষণীনাং বসূনামিরজ্যতি ।*
*ইন্দ্রঃ পঞ্চ ক্ষিতীনাম্* ॥ ( 1. 7. 9 )

***বঙ্গানুবাদ*** – যে ইন্দ্র একাকী মনুষ্যদিগের, ধনসমূহের এবং পঞ্চক্ষিতির উপর শাসন করেন ।

**Expl** ঃ য ইন্দ্রঃ স্বয়মেক চর্ষণীনাং মনুষ্যাণামিরজ্যতি । ঈষ্টে । তথা বসূনাং ধনানামিরজ্যতি । স ইন্দ্রঃ পঞ্চ নিষাদপঞ্চমানাং ক্ষিতীনাং নিবাসার্হাণাং বর্ণানামনুগ্রহীতেতি শেষঃ । যদ্যপি একশব্দ একত্ব-সংখ্যাবাচীতি লোকে প্রযুজ্যতে কিন্তু কুত্রচিৎ সংখ্যাবান্ পদার্থোঽপি অভিধীয়তে । অর্থাদেকত্বসংখ্যাবান ইত্যর্থঃ । বিশেষণতয়া বিশেষ্যতয়া অপি একশব্দঃ প্রযুজ্যতে । 'ঈড্ গতৌ' ইতি ধাতোঃ কন্ প্রত্যয়ে কৃতে এক ইতি রূপম্ । তত্র গতিমান্ ক্রিয়াবানিত্যর্থঃ । অত্র একশব্দস্য অবয়ববুৎপত্ত্যা এতীতি গমনার্থকার্থো গ্রাহ্যঃ । ইরজ্যতি ঈষাং করোতি, ঈর্ষাবান্ ভবতীত্যর্থঃ । ঈশ্বরো ভবতি ইত্যেবং প্রকৃতোঽর্থঃ । যঃ ইন্দ্রঃ ঈশ্বরো ভবতি, ঐশ্বর্যং সম্পাদয়িতুময়মেব একাকী সমর্থো ভবতি । চর্ষণিশব্দো মনুষ্যবাচী । . চর্ষণীনাম্ মনুষ্যা-ণামিত্যর্থঃ । চর্ষো নাম ব্যাপারঃ, ব্যাপারবত্ত্বমেব চর্ষণিশব্দেন ব্যবহ্রিয়তে । বস্ ধাতোরুপ্রত্যয়েন বসুরিতি পদম্ । বসন্তীতি বসুঃ । ধনেন বিনা বাসো ন ভবতি । ক্ষি ইতি ধাতোর্বাস ইত্যর্থঃ । তদানীং বাসয়িতুং যোগ্যঃ পদার্থঃ ক্ষিতিশব্দেন ব্যবহ্রিয়তে । নিষাদপঞ্চমা ইতি বাসযোগ্যা ব্রাহ্মণক্ষত্রিয়বৈশ্যশূদ্রনিষাদানাময়মনুগ্রহপ্রদায়কঃ ।

---

33. *নি যেন মুষ্টিহত্যয়া নি বৃত্রা রুণধামহৈ ।*
*ত্বোতাসো ন্যর্বতা* ॥ ( 1. 8. 2 )

***বঙ্গানুবাদ***—যে ধনদ্বারা ( নিযুক্ত সৈন্যদিগের ) নিরন্তর মুষ্টি-

প্রহার দ্বারা আমরা শত্রুকে নিবারণ করিব, অথবা তোমার দ্বারা রক্ষিত হইয়া অশ্বদ্বারা শত্রুকে নিবারণ করিব।

**Expl.** ঃ— ইন্দ্রদেবতাকা ঋগিয়ম্। গায়ত্রী ছন্দঃ বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ। যেন ধনেন সংপাদিতানাং ভটানাং নি মুষ্টিহত্যয়া নিতরাং মুষ্টিপ্রহারেণ বৃত্রা শত্রূন্নিরুণধামহৈ নিরুদ্ধান্ করবাম। তাদৃশং ধনমাবহেত্যর্থঃ। ত্বোতাসস্ত্বযা উতাসঃ ত্বয়া রক্ষিতা বয়মর্বতা অস্মদীয়েন অশ্বেন নিরুণধামহা ইত্যনুষঙ্গঃ। পদাতিযুদ্ধেন অশ্বযুদ্ধেন চ শত্রূন্ বিনাশ-য়ামেত্যর্থঃ। অত্র মন্ত্রে পূর্বমন্ত্রোক্তমেব ধনং যচ্ছব্দেন পরামৃশ্যতে। যেন পূর্বোক্তেন ধনেন ইত্যর্থঃ। মুষ্টিতাড়নেন বয়ং শত্রূন্ নিঃশেষেণ রোধং কুর্মঃ পুনশ্চ বয়ম্ অশ্বানারূঢ়্যাপি বয়ং যুদ্ধং কুর্ম ইতি হি মন্ত্রস্যাস্য সরলার্থঃ। মুষ্টিহত্যা ইতি পদং মুষ্টিভির্হত্যা ইতি তৃতীয়সমাসঃ। হন্ ধাতোঃ ক্যপ্ প্রত্যযে হত্যা ইতি রূপম্। নকারস্য তকারশ্ছান্দসো জাতঃ। বৃৎ ধাতোঃ রক্ প্রত্যয়েন বৃত্রা ইতি পদম্। অর্ব গতৌ ইতি ধাতুঃ তস্মাদ্বনিপ্-প্রত্যযঃ।

---

34. ***ইন্দ্র ত্বোতাস আ বয়ং বজ্রং ঘনা দদীমহি।***
***জয়েম সং যুধি স্পৃধঃ*** (1 8. 3)

***বঙ্গানুবাদ*** হে ইন্দ্র, তোমার দ্বারা রক্ষিত হইয়া আমরা কঠিন অস্ত্র ধারণ করি, যুদ্ধে স্পর্ধাযুক্ত শত্রুকে জয় করিব।

**Expl** :—অত্রাপি ইন্দ্রস্তুতির্বর্ণিতা। ছন্দঃ গায়ত্রী। ঋষিশ্চাত্র মধুচ্ছন্দা। ইন্দ্রমুদ্দিশ্য ইদং কথ্যতে—হে ইন্দ্র! ত্বোতাসঃত্বয়া রক্ষিতা পালিতা বা বয়ং ঘনা ঘনং শত্রুপ্রহরণার্থং দৃঢ়ং বজ্রমায়ুধং আদদীমহি স্বীকুর্মঃ। তেন চ বজ্রেণ যুধি যুদ্ধে স্পৃধঃ স্পর্দ্ধমানান্ শত্রূন্ সঞ্জয়েম সম্যগ্ জয়েম। ঘনা ইতি পদম্ অর্শাদ্বিতাদচ্। সুপাং সুলুগিত্যনেন

ডাদেশে রূপম্। যুধ্ ধাতোঃ ক্বিপি যুধি ইতি পদম্। ডুদাঞ্ দানে ইতি ধাতোঃ প্রার্থনায়াং লিঙি দদীমহীতি রূপম্। স্পর্ধ সঙ্ঘর্ষে ইতি ধাতোঃ ক্বিপি স্পৃধঃ ইতি রূপং সিদ্ধম্। অত্র মন্ত্রে যজমানস্য ইন্দ্রমুদ্দিশ্য ইয়ং হি প্রার্থনা—যজ্ঞস্থলে সুষ্ঠুরূপেণ স্তুত ইন্দ্রঃ স্বস্থানাদাগত্য যজমানানাং শক্তিবৃদ্ধিং করিষ্যতি। তেন ইন্দ্রদেবেন রক্ষিতা যজমানা বজ্ররূপমায়ুধং গৃহীত্বা প্রবলপরাক্রান্তানপি শত্রূন্ হন্তুং সমর্থাঃ। ইন্দ্রস্য দয়য়া তে সর্বে জেতুং সমর্থা ভবিষ্যন্তীতি।

—

35. ***এবা হ্যস্য সূনৃতা বিরপ্শী গোমতী মহী।***
***পক্বা শাখা ন দাশুষে॥*** (1. 8. 8)

***বঙ্গানুবাদ***—ইন্দ্রের সূনৃত বাক্য প্রকৃতই সূনৃত এবং বিবিধ ( মিষ্ট ) বচনযুক্ত, যে বাক্য মহৎ এবং গাভীদান করে, এবং হব্যদাতার পক্ষে সে বাক্য পরিপক্ক ফলপূর্ণ শাখার ন্যায়।

**Expl** :- অভিপ্লবষডহগতেষূক্থেষু তৃতীয়সবনে ব্রাহ্মণাচ্ছংসিনঃ 'এবা হ্যস্য সূনৃত ইত্যনুরূপস্তৃচঃ। তস্মিন্ তৃচে প্রথমাং সূক্তে অষ্টমীম্ ঋচম্ আহ। অস্য ইন্দ্রস্য সূনৃতা প্রিয়সত্যরূপা বাগ্ দাশুষে হবির্দত্তবতে যজমানায় তদর্থমেবা হি। এবং খলু। অনন্তরপদবক্ষ্যমাণগুণোপেতা ভবতীত্যর্থঃ। কিদৃশী? বিরপ্শী বহ্বাবধোপচারবাদিনীত্যর্থঃ। গোমতী বহুভির্গোভিরুপেতা। গোপ্রদেত্যর্থঃ। অত এব মহী মহতী পূজ্যা। যথোক্তবাচঃ দৃষ্টান্তঃ। পক্বা শাখা ন। যথা বহুভিঃ পক্বৈঃ ফলৈরুপেতা পনসবৃক্ষাদিশাখা প্রীতিহেতুস্তদ্বৎ। সুতরামূনয়তি প্রিয়মিতি সূন্। সা চাসৌ ঋতা চ সত্যা চেতি সূনৃতা প্রিয়সত্যা বাক্। বিবিধং বিচিত্ররূপেণ রপণং বিরপ্। রপ্ লপ্ ব্যক্তায়াং বাচি। ভাববাচ্যে ক্বিপ্। অদেতদেষামস্তীতি বিরপ্শানি বাক্যানি। তানি যস্যাং বাচি সন্তি সা

বাক্ বিরপ্শিনী। অত ইনিঠনৌ ইতীনিঃ। যস্যেতি চ ইত্যকারলোপঃ। ঋন্নেভ্যো ঙীপ্ ইতি ঙীপ্। নকারলোপশ্ছান্দসঃ।

---

36. *এবা হি তে বিভূতয় ঊতয় ইন্দ্র মাবতে।*
*সদ্যশ্চিৎসন্তি দাশুষে॥* ( 1. 8. 9 )

**বঙ্গানুবাদ** হে ইন্দ্র, তোমার ঐশ্বর্য প্রকৃতই এইরূপ এবং মাদৃশ হব্যদাতার রক্ষণের হেতু এবং তৎক্ষণ ফলদায়ী।

**Expl** :—অভিপ্লবষডহেষূক্থেষু তৃতীয়সবনে ব্রাহ্মণাচ্ছংসিনঃ 'এবা হ্যস্য সূনৃত' ইত্যনুরূপস্তৃচঃ। তস্মিন্ তৃচে দ্বিতীয়ং সূক্তে নবমীম্ ঋচমাহ। ইন্দ্রমুদ্দিশ্য অত্রোচ্যতে—হে ইন্দ্র। তে তব বিভূতয়ঃ ঐশ্বর্য-বিশেষাঃ। এবা হি। এবংবিধাঃ খলু। কিংবিধা ইতি তদুচ্যতে। মাবতে মৎসদৃশায় দাশুষে হবির্দত্তবতে যজমানায় ঊতয়স্তদীয়রক্ষারূপাঃ সদ্যশ্চিৎসন্তি। যদা কর্মানুষ্ঠিতং তদৈব ভবন্তি। অস্মৎশব্দাৎ বতুপ্ প্রত্যয়েন মাবতে পদং সিদ্ধম। মপর্যন্তস্য প্রত্যয়োত্তরপদয়োশ্চ ইতি মাদেশঃ। সদ্যঃ ইতি পদং নিপাতনম। সমানে হ্যবি ইত্যর্থঃ।

---

37. *ইন্দ্রেহি মৎস্যন্ধসো বিশ্বেভিঃ সোম পর্বভিঃ।*
*মহাঁ অভিষ্টিরোজসা॥* ( 1. 9. 1 )

***বঙ্গানুবাদ***—হে ইন্দ্র, আইস সোমরসরূপ খাদ্যসমূহে হৃষ্ট হও, মহাবল হইয়া শত্রুদিগের পরাজয়ী হও।

**Expl** :—ইন্দ্রেহীত্যাদিকং দশর্চং সূক্তং সুরূপকৃত্নুমিত্যাদিষু ষষ্ঠম্। বিশেষস্তু অতিরাত্রে দ্বিতীয়পর্যায়ে অচ্ছাবাকশস্ত্রে ইন্দ্রেহীত্যনুরূপস্তৃচঃ।

নিয়তমোকো যস্য তস্মৈ ইত্যর্থঃ। ঋ গতৌ ইতি ধাতোঃ অচ্ ইঃ ইতীকার প্রত্যয়ঃ।

---

43. *যৎসানোঃ সানুমারুহদ্ভূর্যস্পষ্ট কর্ত্বম্।*
*তদিন্দ্রো অর্থং চেততি যূথেন বৃষ্ণিরেজতি॥* (1.10.2)

**বঙ্গানুবাদ**—যজমান সোমলতা আহরণার্থ যখন সানু হইতে অপর সানুতে আরোহণ করে এবং প্রভূত কর্ম উপক্রম করে, তখন ইন্দ্র যজমানের প্রয়োজন জানিতে পারেন, এবং অভীষ্টবর্ষণে উৎসুক হইয়া মরুৎদলের সহিত যজ্ঞস্থানে আগমনার্থ উদ্যত হয়েন।

**Expl :**—অভিপ্লবষড়হস্তোক্থে তৃতীযসবনেঽচ্ছাবাকস্য গায়ন্তীতি স্তোত্রিয়ঃ তৃচঃ। তত্র দ্বিতীযা ঋগিয়ম্। অত্র দেবতা ইন্দ্রঃ, বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ। ছন্দোঽত্র অনুষ্টুপ্। যজমানানাং যজ্ঞবিষয়ক কর্মানুষ্ঠানানাং প্রকৃতোঽর্থঃ উদ্দেশ্যো বা ইন্দ্রেণ জ্ঞাত ইত্যর্থ অত্র বিশেষেণ বর্ণ্যতে। যৎ যদা সানোঃ সানুমারুহ্য যজমানঃ সোমরসসমিদাদ্যাহরণায় একস্মাৎ পর্বতভাগাদপরং পর্বতভাগমারূঢ়বান্ তথা ভূরি প্রভূতং কর্ত্বং কর্ম সোমযাগরূপমস্পষ্ট। স্পৃষ্টবান্ উপক্রান্তবানিত্যর্থঃ। তৎ তদানীম্ ইন্দ্রোঽর্থং যজমানস্য প্রয়োজনং চেততি জানাতি। জ্ঞাত্বা চ বৃষ্ণিঃ কামানাং বর্ষয়িতা সন্ যূথেন মরুদ্গণেন সহ এজতি কম্পতে। স্বস্থানাৎ যজমানভূমিমাগন্তুম্ উদ্যোগী ভবতীত্যর্থঃ। ডুকৃঞ্ করণে ইতি ধাতোঃ 'অন্যেভ্যোঽপি দৃশ্যন্তে' ইত্যনেন বিচি কর্ত্বমিতি রূপম্। যূথশব্দস্থক্প্রত্যয়ান্তঃ নিপাতিতঃ। বৃষিধাতো র্নিপ্রত্যয়ান্তেন বৃষ্ণিশব্দো নিষ্পন্নঃ।

---

✓44. *যুক্ষ্বা হি কেশিনা হরী বৃষণা কক্ষ্যপ্রা।*
*অথা ন ইন্দ্র সোমপা গিরামুপশ্রুতিং চর॥* (1.10.3)

**বঙ্গানুবাদ**—তোমার কেশরযুক্ত পর্যাক্রান্ত এবং পুষ্টাঙ্গ অশ্বদ্বয় সংযোজিত কর। তাহার পর হে সোমপায়ী ইন্দ্র আমাদিগের স্তুতি শ্রবণার্থং নিকটে আইস।

**Expl** :—অভিপ্লবষড়হস্তোক্থে তৃতীয়সবনে অচ্ছাবাকস্য গয়ন্তীতি স্তোত্রিয়স্তৃচঃ। অত্র অন্তিমা ঋগিয়ম্। অত্র দেবতা ইন্দ্রঃ, মধুচ্ছন্দা বৈশ্বামিত্রঃ ঋষিঃ, ছন্দোঽত্র অনুষ্টুপ্। শোভনরূপকমাদিবিশিষ্টাশ্বাধিষ্ঠিতম্ ইন্দ্রদেবতামুদ্দিশ্য যজমানসমীপে তস্য আগমনায় প্রার্থনা ক্রিয়তে অত্র। হে সোমপাঃ সোমপাননিপুণ ইন্দ্র! হরী তব বাহনভূতৌ অশ্বৌ যুক্ষ্বা হি সর্ব্বথা সংযোজয়। অথ তদনন্তরং নোঽস্মদীয়ানাং গিরাং স্তুতীনামুপশ্রুতিং সমীপে শ্রবণমুদ্দিশ্য চর তৎ প্রদেশং গচ্ছ। কীদৃশৌ হরী। কেশিনা স্কন্ধপ্রদেশে লম্বমানৌ কেশরযুক্তৌ। বৃষণা সেচনসমর্থৌ যুবানৌ। কক্ষ্যপ্রা অশ্বস্যোদরবন্ধনরজ্জুঃ কক্ষ্যা ইতি শব্দেন ব্যবহ্রিয়তে। তস্যাঃ পূরকৌ। পুষ্টাঙ্গৌ ইত্যর্থঃ। এতদ্বিশিষ্টগুণযুক্তৌ হরী আরুহ্য অস্মাকং স্তুতিমুদ্দিশ্য অত্রাগচ্ছ ইতি যজমানস্য প্রার্থনা। বৃষু সেচনে ইতি ধাতোঃ কনিন্ প্রত্যয়েন বৃষণা ইতি পদং সিদ্ধম্। কক্ষ্যপ্রা—কক্ষয়োর্ভবং কক্ষ্যং সূত্রম্। প্রা পূরণে ইতি ধাতোঃ আতোঽনুপসর্গে কঃ ইতি ক প্রত্যয়ঃ।

---

45. *এহি স্তোমাঁ অভি স্বরাভি গৃণীহ্যা রুব।*
*ব্রহ্ম চ নো বসো সচেন্দ্র যজ্ঞং চ বর্দ্ধয়॥* ( 1. 10. 4)

**বঙ্গানুবাদ**—হে নিবাসকারণভূত ইন্দ্র, আইস, আমাদিগের স্তুতি প্রশংসা কর, অনুমোদন কর ও শব্দ দ্বারা আনন্দ প্রকাশ কর; আমাদিগের অন্ন ও যজ্ঞ এককালে বর্দ্ধন কর।

Expl ঃ—যজ্ঞকর্ম্মণি ইন্দ্রস্য আগমনম্ আগত্য চ যজমানানাং স্তুতিশ্রবণং তদনন্তরঞ্চ যজমানানাং মহোপকারসাধনঞ্চ অত্র মন্ত্রে প্রার্থনা-কীর্ত্তিতম্। অত্র দেবতা ইন্দ্রঃ, বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ। ছন্দোঽত্র অনুষ্টুপ্। হে বসো নিবাসকারণভূত ইন্দ্র! এহি অস্মিন্ কর্ম্মণি আগচ্ছ। আগত্য চ স্তোমানুদ্গাতৃপ্রযুক্তানি স্তোত্রাণ্যভিস্বর। অভিলক্ষ্য প্রশংসাবাচকং শব্দং কুরু। তথা অধ্বর্যবমভিলক্ষ্য গৃণীহি শব্দং কুরু। তদনন্তরং হোতৃপ্রযুক্তানি শস্ত্রাণ্যালক্ষ্য রুব শব্দং কুরু। পরিতোষেণ সর্বান্ ঋত্বিজঃ প্রশংসেত্যর্থঃ। তত ঊর্ধ্বং নোঽস্মাকং ব্রহ্ম চান্নং চ যজ্ঞং চানুষ্ঠীয়মানং কর্ম চ সচা সহ বর্ধয়। সাঙ্গত্ব-সংপাদনেন যজ্ঞং বর্ধয়িত্বা তৎফলমন্নং চ প্রবৃদ্ধং কুরু। ইণ্ গতাবিতি ধাতোঃ সেহি আদেশেন ইহি। স্তোমশব্দো মন্ প্রত্যয়ান্তঃ।

---

46. *সুবিবৃতং সুনিরজমিন্দ্র ত্বাদাতমিদ্যশঃ*
*গবামপ ব্রজং বৃধি কৃণুষ্ব রাধো অদ্রিবঃ॥* (1.10.7)

**বঙ্গানুবাদ**—হে ইন্দ্র, তোমার প্রদত্ত অন্ন সর্ব্বত্র প্রসারিত এবং সুখপ্রাপ্য, হে বজ্রধারী ইন্দ্র, গাভীর নিবাসস্থান খুলিয়া দাও, ধন সম্পাদন কর।

Expl ঃ—ইন্দ্রদেবতাকা ঋগিয়ম্। বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ। অনুষ্টুভত্র ছন্দঃ। ইন্দ্রসকাশে যজমানস্য যশঃ প্রার্থনা অন্নপ্রার্থনা ধনপ্রার্থনা চাত্র বিশেষেণ বর্ণিতা। হে ইন্দ্র, যশঃ অন্নং কর্মফলভূতং সুবিবৃতং চ সুষ্ঠু সর্ব্বত্র প্রসৃতং সুনিরজং, বিশেষেণ সর্ব কর্মজন্যং ফলং প্রাপ্তুং যোগ্যম্, ত্বাদাতমিৎ ত্বয়া প্রদত্তং ত্বয়া পরিশোধিতম্, সম্পন্নমিতি শেষঃ। তদনন্তরং ক্ষীরাদিরসলাভার্থং গবাং ব্রজং নিবাস-স্থানমপ বৃধি। অপাবৃতমুদ্ঘাটিতদ্বারং কুরু। হে অদ্রিবঃ। পর্ব্বত-সদৃশবজ্রযুক্ত ইন্দ্র! রাধো ধনং কৃণুষ্ব সংপাদয়। এতদ্বস্তুনিচয়ং

ত্বং মহ্যং প্রযচ্ছ ইতি যজমানস্যাশযঃ। সুবিবৃতম্—বৃঙ্ বরণে ইতি ধাতোঃ কর্মণি ক্ত প্রত্যয়েন বিবৃতমিতি পদং নিষ্পন্নম্। তদনন্তরং বিশব্দেন প্রাদিসমাসঃ। সুনিরজম্—অজ গতিক্ষেপণয়োবিতি ধাতোঃ খল্ প্রত্যযেন অজনিতি। সুনিসোরুপসর্গয়োঃ প্রাক্ প্রযোগঃ। অদ্রিবঃ—বজ্রার্থকস্য অদ্রিশব্দস্য মতুপি রূপম্। ছন্দসীবঃ ইতি মকারস্য বত্বম্।

---

47. *নহি ত্বা রোদসী উভে ঋঘায়মাণমিন্বতঃ।*
*জেষঃ স্বর্বতীরপঃ সং গা অস্মভ্যং ধূনুহি* ॥ (1.10..8)

***বঙ্গানুবাদ***—হে ইন্দ্র, শত্রুবধকালে এই উভয় জগৎ তোমাকে ধারণ করিতে পারে না; তুমি স্বর্গীয জল জয় কর, আমাদিগকে সম্যকরূপে গাভীপ্রেরণ কর।

**Expl** ঃ—ইন্দ্রস্তুতিবিষয়কো মন্ত্রোঽযম্। ঋষিরত্র বৈশ্বামিত্রো মধুচ্ছন্দা, ছন্দশ্চাত্র অনুষ্টুপ্। ইন্দ্রমুদ্দিশ্য যজমানস্য প্রার্থনাঽত্র বর্ণ্যতে। হে ইন্দ্র! ঋঘায়মাণং শত্রুবধং কুর্বাণং ত্বা ত্বাং রোদসী উভে দ্যাবাপৃথিব্যৌ অপি ত্বদীযং মহিমানং ব্যাপ্তুং ন হি ইন্বতঃ। ন সমর্থে ইতি ভাবঃ। যদা ত্বং শত্রুবধং করোষি তদা তব মহিমা স্বর্গং পৃথিবীং চ ব্যাপ্য তিষ্ঠতি। কিন্তু দ্যাবাপৃথিব্যৌ তব মহিমাং ব্যাপ্তুং সমর্থে ন ভবতঃ ইতি হি স্তুতিকারস্য আশযঃ। তাদৃশঃং স্বর্বতীঃ স্বর্লোকযুক্তা অপো বৃষ্ট্যাদিরূপা জেষঃ জয়েঃ। প্রেরয ইত্যর্থঃ। কিঞ্চ বৃষ্টিপ্রদানাৎ অন্নসম্পত্তেকর্দ্ধম অস্মভ্যং ক্ষীরাদিরসপ্রদা গাঃ সন্ধুনু হি। সম্যক প্রেরয়। অত্র ইন্দ্রসকাশাৎ বৃষ্টিপ্রার্থনা গবাদিপশুপ্রার্থনা চ যজমানেন কৃতা। রোদসী—রুদ্ধাতোরসুন্ প্রত্যযঃ। উগিতশ্চ ইতি ঙীপ্। ঋঘায়মাণম্—নূন্ হন্তীতি ঋঘা। অন্যেভ্যোঽপি দৃশ্যতে ইতি বিচ্। অনৃঘা ঋঘা ভবতীত্যভূততদ্ভাবে 'লোহিতাদিডাজ্ভ্যঃ ক্যষ্' ইতি ক্যষ্ প্রত্যয়ো ভবতি। 'বা ক্যষঃ' ইতি আত্মনেপদম্। লটঃ

শানচ্। ইন্বতঃ—ইবি ব্যাপ্তৌ ইতি ধাতোঃ নুম্ প্রত্যয়ঃ। জেষঃ—জেঃ প্রার্থনায়াং লিঙর্থে লেট্।

---

48. *আশ্রুৎ কর্ণ শ্রুধী হবং নূচিদ্দধিষ্ব মে গিরঃ*
*ইন্দ্র স্তোমমিমং মম কৃষ্বা যুজশ্চিদন্তরম্* ॥ (1.10.9)

***বঙ্গানুবাদ***—হে ইন্দ্র, তোমার কর্ণ চারিদিক হইতে শুনিতে পায়। আমাদিগের আহ্বান শীঘ্র শ্রবণ কর; আমার স্তুতি ধারণ কর, আমার এই স্তোত্র ও আমার সখার স্তোত্র আপনার নিকটে ধারণ কর।

**Expl**ঃ—অভিপ্লবষড়হস্তোক্থেষু তৃতীয়সবনে অচ্ছাবাকস্য ষট্ স্তোত্রিয়ানুরূপযুগলেষু দ্বিতীয়স্মিন্ যুগলে 'আশ্রুৎ কর্ণেতি' তৃচোঽনুরূপঃ। তস্মিন্ তৃচে ইয়ং হি প্রথমা ঋক্। অত্র ইন্দ্রো দেবতা। অনুষ্টুপ্ ছন্দঃ, বৈশ্বামিত্রো মধুচ্ছন্দা ঋষিঃ। অস্মাকং শ্রুতিং শ্রুত্বা হে ইন্দ্র! ত্বমত্র আগত্য অস্মাকং প্রীতিং জনয়েতি হি যজমানানাং প্রার্থনা। হে ইন্দ্র! আশ্রুৎ কর্ণ সর্বতঃ শ্রবণযোগ্যৌ কর্ণৌ যস্য তাদৃগিন্দ্র! হবমস্মদীয়ম্ আহ্বানং নু ক্ষিপ্রং শ্রুধী। শৃণু। মে মম হোতুঃ গিরঃচিৎ স্তুতীরপি দধিষ্ব। চিত্তে ধারয়। চিৎ সমুচ্চয়ার্থে। অস্মাকং সমীপে আগত্য ইদং সর্বং শৃণু। কিঞ্চ মম মদীয়মিমং স্তোমং স্তোত্ররূপং বাক্যজালং যুজশ্চিৎ স্বকীয়সখ্যুরপ্যন্তরং কৃষ্ব। আসন্নং কুরু। যথা বচনং তস্য প্রিয়ং মন্যসে তদ্বৎ অস্মদীয়স্তুতিষ্বপি প্রীতিং কুরু ইত্যর্থঃ। আশ্রুৎ কর্ণ—আ সমন্তাৎ শৃণুত ইত্যাশ্রুৎ। ক্বিপ্। তাদৃশৌ কর্ণৌ যস্য। শ্রুধী—শ্রু শ্রবণে ইতি ধাতোঃ লোটো হিঃ। 'শ্রুশৃণুপৄকৃবৃভ্যঃছন্দসি' ইতি হের্ধিঃ। দধিষ্ব—দধাতেধাতোঃ লোট্।

---

49. ***পূর্বীরিন্দ্রস্য রাতয়ো ন বি দস্যন্ত্যূতয়ঃ।***
***যদী বাজস্য গোমতঃ স্তোতৃভ্যো মংহতে মঘম্॥***
(1 11. 3)

**বঙ্গানুবাদ**—ইন্দ্রের ধনদান পূর্বকাল সিদ্ধ; যদি তিনি স্তোতাদিগকে গাভীযুক্ত ও অন্নযুক্ত ধনদান করেন, তাহা হইলে তাহাব রক্ষণাবেক্ষণ ক্ষান্ত হইবে।

Expl :—মহাব্রতে মাধ্যন্দিনে হোত্রা ক্রিয়মানে শস্ত্রে কৃৎস্নং 'ইন্দ্রং বিশ্বা' ইতি সূক্তং শংসনীয়ম্। তস্য সূক্তস্য তৃতীযা ঋগিয়ম্। অত্র মধুচ্ছন্দসঃ পুত্রঃ জেতৃনামকঃ ঋষিঃ। ছন্দস্তু অনুষ্টুপ্। ইন্দ্রো দেবতা অনুবর্ত্ততে। ইন্দ্রস্য স্বভাবো হি ধনদাতৃত্বং মনুষ্যানাঞ্চ রক্ষণামিতি হি যজমানস্য বক্তব্যমত্রমন্ত্রে। ইন্দ্রস্য সম্বন্ধিন্যো রাতযো—ধনানি পূর্বীঃ অনাদিকালসিদ্ধাঃ প্রভূতা বা। অস্যেন্দ্রস্য সর্বদা যষ্টৃভ্যো ধনদানমেব স্বভাবঃ ইত্যর্থঃ। এবং সতি ইদানীন্তনোঽপি যজমানঃ স্তোতৃভ্য ঋত্বিগ্ভ্যো গোমতী গোসহিতস্য বাজস্যান্নস্য পর্যাপ্তং মঘং ধনং যদি মংহতে (মংহতির্দানার্থকা) দক্ষিণারূপেণ দদাতি তদানীমূতয়ো বহু ধনদান পূর্বকাণি ইন্দ্রস্য অস্মদ্বিষযাণি রক্ষণাণি ন বিদস্যন্তি বিশেষেণ নোপক্ষীয়ন্তে। যজমানঃ যদি বিশিষ্টেভ্যঃ ঋত্বিগ্ভ্যঃ বহূনি ধনানি গোপ্রভৃতীনি চ দদাতি তদা ইন্দ্রোঽপি যজমানস্য মহদুপকারং সাধয়তি। কদাপি স যজমানং প্রতি অবজ্ঞাং দর্শয়তি। পূর্বী—পুরুশব্দস্য 'বোতো গুণবচনাদ্' ইতি ঙীষ্। আত্মস্যোকাবস্য দীর্ঘশ্ছান্দসঃ। রাতয়ঃ—ক্তিন্নন্তং পদস্য রাতেঃ প্রথমাবহুবচনম্। দস্যন্তি—দসু উপক্ষয়ে ইতি ধাতোঃ শ্যন্।

---

50. ***মায়াভিরিন্দ্র মায়িনং ত্বং শুষ্ণমবাতিরঃ।***
***বিদুষ্টে তস্য মেধিরাস্তেষাং শ্রবাংস্যুত্তির॥*** (1. 11. 7)

**বঙ্গানুবাদ**—হে ইন্দ্র, তুমি মায়াবী শুষ্ণ (নামক অসুরকে) মায়াদ্বারা

বধ করিয়াছিলে ; মেধাবিগণ তোমার (মহিমা) জানে, তাহাদিগের অন্ন বর্দ্ধন কর ।.

**Expl. :**—মহাব্রতে মাধ্যন্দিনে হোত্রা ক্রিয়মাণে শস্ত্রে 'ইন্দ্রং বিশ্বা' ইতি সূক্তং শংসনীয়ম্ । তস্য সূক্তস্য সপ্তমী ঋগিয়ম্ । অত্র মধুচ্ছন্দসঃ পুত্রো জেতৃনামকঃ ঋষিঃ । ছন্দস্তু অনুষ্টুপ্ । ইন্দ্রো দেবতা অনুবর্ত্ততে । শুষ্ণনামকাসুরস্য হন্তুরিন্দ্রস্য স্তুতিরস্য মন্ত্রস্য প্রতিপাদ্যবিষয়ঃ । হে ইন্দ্র ! ত্বং মায়িনং নানাবিধকপটোপেতং শুষ্ণং ভূতানং শোষণহেতুং শুষ্ণনামকং অসুরং মায়াভিস্তৎপ্রতিকূলৈঃ কপটবিশেষৈঃ অথবা তদ্বধোপায়বিশেষৈঃ তব প্রজ্ঞাভিঃ । অবাতিরঃ হিংসিতবানসি । 'ইন্দ্রঃ শুষ্ণং জঘানেতি' ইত্যনেন যস্কাচার্যেণাপি এতদেব উক্তম্ । 'শুষ্ণং পিপ্রুম্' ইতি ঋক্ মন্ত্রেঽপি শুষ্ণেণ ইন্দ্রস্য শত্রুতা বিশেষেণোক্তা । মেধিরা মেধাবন্তঃ অনুষ্ঠাতারঃ যাজ্ঞিকাশ্চ তস্য তাদৃশস্য তব ইন্দ্রস্য মহিমানং বিদুর্জানন্তি । তেষাং জ্ঞানিনাম্ অনুষ্ঠানকর্তৃণাং শ্রবাংসি অন্নানি উক্তির বিশেষেণ জানন্তি তেষাং সম্পদ্বর্ধনমপি ইন্দ্রস্য কর্ত্তব্যম্ । ঔণাদিকেন ইরন্ প্রত্যয়েন মেধিরাঃ শব্দঃ নিষ্পন্নঃ । অত্র মেধৃ ইতি ধাতুঃ হিংসার্থকঃ ।

---

51. *অগ্নিমগ্নিং হবীমভিঃ সদা হবন্ত বিশ্পতিম্ ।*
*হব্যবাহং পুরুপ্রিয়ম্* ॥ ( 1. 12. 2 )

**বঙ্গানুবাদ**—প্রজাপালক, হব্যবাহী, এবং বহুলোকের প্রিয় অগ্নিকে যজ্ঞের অনুষ্ঠাতৃগণ নিরন্তর আহ্বানমন্ত্র দ্বারা আহ্বান করিয়া থাকে ।

**Expl. :**—অত্র মন্ত্রে অগ্নির্নাম দেবতা । কণ্বপুত্রো মেধাতিথিঃ ঋষিঃ । গায়ত্রী ছন্দঃ । পৃষ্ঠ্যষড়হস্য দ্বিতীয়ে অহনি 'অগ্নিং দূতং' ইতি সূক্তম্ আজ্যশস্ত্ররূপেণ নিযুক্তম্ । তত্র দ্বিতীয়া ঋগিয়ম্ । অত্র বিবিধগুণোপেতস্যাগ্নেরাহ্বানং যজমানেন কৃতম্ । অগ্নিশব্দোঽত্র

বীপ্সায়াং প্রযুক্তঃ। যদ্যপি অগ্নিঃ স্বরূপেণ এক এব তথাপি প্রয়োগভেদাৎ আহবনীয়াদিস্থানভেদাৎ পাবকাদিবিশেষণভেদাৎ বা বহু প্রকারত্বমভিপ্রেত্য অগ্নিমগ্নিম্ ইতি বীপ্সা। অগ্নিমগ্নিমিতি এক এব শব্দঃ নতু পৃথক্ পৃথক্ শব্দঃ। তাদৃশম্ অগ্নিং হবিমভিঃ আহ্বানকরণৈঃ মন্ত্রৈঃ সদা হবন্ত। নিরন্তরমনুষ্ঠাতার আহ্বয়ন্তি। কীদৃশম্ অগ্নিম্? বিশ্পতিম্। বিশাং প্রজানাং হোত্রাদীনাং পালকম্ নায়কং বা। হব্যবাহম্। যজমানসমর্পিতস্য হবিষো দেবান্ প্রতি বোঢ়ারম্। অতএব পুরুপ্রিয়ম্ বহূনাং প্রীত্যাস্পদম্। অত্র গার্হপত্যে বিদ্যমানোঽগ্নিঃ দক্ষিণাগ্নে ভিদ্যতে। স এব ভেদোঽত্র মন্ত্রেণ প্রতিপাদ্যতে। অনুষ্ঠানাবসরে ভূযাংসঃ অগ্নয়ঃ আরাধ্যন্তে পঞ্চসু কুণ্ডেষু। তস্মিন্ তস্মিন্ কুণ্ডে নিক্ষিপ্তমগ্নিং বয়ং ঋত্বিজঃ আহ্বয়াম ইতি। অগ্নিমগ্নিম্—'নিত্যবীপ্সয়োঃ' ইতি বীপ্সায়াং দ্বির্ভাবঃ। হবীমভিঃ—হ্বেঞ্ স্পর্ধায়াং শব্দে চ ইতি ধাতোঃ 'অন্যেভ্যোঽপি দৃশ্যন্তে' ইতি কর্তরি মনিন্ প্রত্যয়ঃ। তস্য ছান্দসঃ ঈড়াগমঃ। সদা—সর্বশব্দাৎ দা প্রত্যয়ঃ।

---

52. ***কবিমগ্নিমুপ স্তুহি সত্যধর্মাণমধ্বরে।***
***দেবমমীবচাতনম্॥*** (1. 12. 7)

**বঙ্গানুবাদ**—মেধাবী, সত্যধর্মা, শত্রুনাশক, দেবঅগ্নির নিকটে আসিয়া যজ্ঞকর্মে তাহার স্তুতি কর।

**Expl.** :—অগ্নিরত্র দেবতা। কণ্বপুত্রো মেধাতিথির্নাম ঋষিঃ। গায়ত্রী ছন্দঃ। পৃষ্ঠ্যষড়হস্য দ্বিতীয়ে অহনি 'অগ্নিং দূতং' ইতি সূক্তম্ আজ্যশস্ত্ররূপেণ নিযুক্তম্। তত্র সূক্তে সপ্তমী ঋগিয়ম্। অত্র অগ্নেঃ স্তুত্যর্থম্ অধ্বর্যবং প্রতি নির্দেশঃ প্রদত্তঃ। হে অধ্বর্যুসম্প্রদায়! অধ্বরে ক্রতৌ অগ্নিম্ উপস্তুহি। উপেত্য স্তুতিং কুরু। কীদৃশম্

বষড়্ ইত্যস্য করণং যস্মিন্ যাগে ইতি বহুব্রীহিসমাসঃ। ইন্দ্রং প্রতি ইয়ং হি প্রার্থনা—সর্বে দেবা তব সাহায্যেন সোমং পিবন্তু। সোমপানায় হে ইন্দ্র! ত্বং তেষাং সাহায্যং কুরু ইতি হি যজমানস্য আশয়ঃ।

---

56. *ত্বং হোতা মনুর্হিতোঽগ্নে যজ্ঞেষু সীদসি।*
*সেমং নো অধ্বরং যজ॥* (1.14.11)

**বঙ্গানুবাদ** হে অগ্নি, তুমি মনুষ্যনিযুক্ত দেবগণের আহ্বানকারী যজ্ঞে উপবেশন কর; তুমি আমাদিগের এই যজ্ঞ সম্পাদন কর।

**Expl** ঃ—ব্যূঢ়দ্বাদশাহস্য প্রথমে ছন্দোমে তৃতীযসবনে বৈশ্বদেবশস্ত্রে 'এভিরগ্নে দুবো গির' ইতি সূক্তং বিনিযুক্তম্। তত্র একাদশী ঋগিয়ম্। অত্র কণ্বপুত্রো মেধাতিথিঃ ঋষিঃ। দেবতা অত্র বিশ্বেদেবাঃ। গায়ত্রং চ ছন্দঃ। ইন্দ্রমুদ্দিশ্য অত্র যজমানেন ইদমুচ্যতে—হে অগ্নে! মনুর্হিতো মনুষা হোত্রাদিরূপেণ মনুষ্যেণ হিতঃ সংপাদিতো হোতা হোমনিষ্পাদকো যস্ত্বং যজ্ঞেষু সীদসি তিষ্ঠসি। অস্মাভিঃ যজমানৈ, বিশেষেণ স্তুতঃ হোমনিষ্পাদনার্থং যজ্ঞস্থলে আহূতঃ ত্বং যজ্ঞভূমিষু সুষ্ঠু বর্ত্তসে। স ত্বং নোঽস্মদীয়মিমম্ অধ্বরং যজ্ঞং যজ নিষ্পাদয়। যজ্ঞনিষ্পাদনস্য ত্বমেব কর্ত্তা। অতএব উত্তমরূপেণ ত্বং যজ্ঞকার্যস্যনিষ্পাদনং কুরু। মনুর্হিতঃ—মনেরুস্ প্রত্যয়েন মনুঃ। ধা-ধাতোঃ ক্তপ্রত্যয়েন হিতঃ। মনুষা হিতো মনুর্হিতঃ। সীদসি—ষদ্ধাতোঃ লটঃ সিপ্। অধ্বরম্—ন বিদ্যতে ধ্বরো-হিংসা যস্মিন্ স অধ্বরঃ।

---

57. *অগ্নে দেবাঁ ইহা বহ সাদয়া যোনিষু ত্রিষু।*
*পরিভূষ পিব ঋতুনা॥* ( 1. 15. 4 )

***বঙ্গানুবাদ***—হে অগ্নি, দেবগণকে এই স্থানে আনয়ন কর, তিনটি

যজ্ঞস্থানে তাহাদিগকে উপবেশন করাও, তাহাদিগকে অলঙ্কৃত কর, তুমি ঋতুর সহিত সোম পান কর।

**Expl** :—'ইন্দ্র সোমং পিব' ইতি সূক্তস্যান্তর্গতো মন্ত্রোঽয়ম্। অস্য মন্ত্রস্য ঋষিঃ কণ্বপুত্রো মেধাতিথির্নাম। ছন্দশ্চ গায়ত্রী। অত্রাগ্নির্নাম দেবতা। যজ্ঞস্থলে অগ্নিঃ যজমানেন স্তুতঃ সন্ স্বর্গাৎ দেবান্ সুষ্ঠুরূপেণ সন্তোষ্য আনয়তি। আগতা স্তে অগ্নিনা সহ মিলিতাঃ সন্তঃ যজ্ঞস্য শোভাং বর্দ্ধয়ন্তি। অতএব যজ্ঞস্য শোভাসম্পাদনং হি অগ্নেঃ কৃতিত্বম্ ইতি যজমানস্যাশয়ঃ। হে অগ্নে। দেবান্ ইহ অস্মিন্ যজ্ঞরূপে কর্মণি আবহ। ততো যোনিষু স্থানেষু ত্রিষু সবনেষু সাদয় দেবান্ উপবেশয়। ততস্তান্ পরিভূষ অলঙ্কুরু। ঋতুনা সহ ত্বং সোমং পিব। যদ্যপি অগ্নিরত্র দেবতা তথাপি ঋতুদেবতা অপি অত্র প্রসঙ্গতঃ স্তুতা ভবতি। যো নযু—যু মিশ্রণে ইতি ধাতোঃ বহিশ্রি - ইত্যনেন নিপ্রত্যয়ঃ।

---

58. *যুবং দক্ষং ধৃতব্রত মিত্রাবরুণ দূলভম্।*
*ঋতুনা যজ্ঞমাশাথে ॥* (1. 15. 6)

**বঙ্গানুবাদ**—হে ধৃতব্রত মিত্র-বরুণ, তোমরা ঋতুর সহিত আমাদিগের এই প্রবৃদ্ধ ও অদহনীয় যজ্ঞে ব্যাপ্ত হও।

**Expl** :—মন্ত্রস্যাস্য ঋষিঃ কণ্বপুত্রো মেধাতিথিঃ। ছন্দশ্চাত্র গায়ত্রী। অত্র মিত্রাবরুণৌ দেবতে। 'ইন্দ্র সোমং পিব' ইতি সূক্তং যদ্যপি ঋতুদেবতাকম্। তথাপি অত্র অন্যে দেবা অপি তেন সহ আহূতা ভবন্তি। হে ধৃতব্রতা স্বীকৃতকর্মাণৌ মিত্রাবরুণা হে মিত্রনামকবরুণ-নামকৌ দেবৌ। যুবমুভৌ যুবাম্ ঋতুনা সহ অস্মদীয়ং যজ্ঞমাশাথে ব্যাপ্নুথঃ। কীদৃশং যজ্ঞম্? দক্ষম্ প্রকৃষ্টরূপেণ বৃদ্ধি প্রাপ্তম্। দূলভম্ দুর্বহম্। শত্রুভির্দগ্ধুং বিনাশয়িতুমশক্যমিত্যর্থঃ। এতাদৃশ-গুণযুক্তে যজ্ঞস্থলে যুবাম্ ঋতুদেবেন সহ আগত্য যজ্ঞরূপং কর্ম সুষ্ঠু সম্পাদয়তু।

যুবম্—প্রথমা দ্বিবচনস্য 'ঙে প্রথময়োঃ' ইত্যনেন অমাদেশঃ। দক্ষম্—'দক্ষ বৃদ্ধৌ' ইতি ধাতোঃ করণে ঘঞ্। দক্ষন্তি অনেনেতি দক্ষঃ। ধৃতব্রতা—ধৃতানি ব্রতানি যাভ্যাং তৌ ধৃতব্রতৌ। 'সুপাং সুলুক্' ইত্যনেন বিভক্তেরাকারঃ। দূলভম্—দহ ভস্মীকরণে ইতি ধতোঃ 'ঈষদ্দুঃসুষু'—ইত্যাদিনা দঙ্গেঃ খল্ প্রত্যয়ঃ। 'ব্যতয়ো বহুলম্' ইত্যনেন উকারস্য উকারঃ, রেফস্য লোপঃ। হকারস্য ভকারশ্চ।

---

59. ***দ্রবিণোদাঃ পিপীষতি জুহোত প্র চ তিষ্ঠত।***
***নেষ্ট্রাদৃতুভিরিষ্যত॥*** (1. 15. 9)

***বঙ্গানুবাদ***—দ্রবিণোদা ঋতুদিগের সহিত নেষ্টার পাত্র হইতে সোমপান করিতে ইচ্ছা করেন; হে ঋত্বিকগণ (যজ্ঞস্থানে) গমন কর, হোম কর, পরে প্রস্থান কর।

Expl :—মন্ত্রস্যাস্য ঋষিঃ কণ্বপুত্রো মেধাতিথিঃ।, ছন্দঃ গায়ত্রী। দ্রবিণোদা অগ্নিরত্র দেবতা। 'ইন্দ্রসোমং পিব' ইতি সূক্তং যদ্যপি ঋতুদেবতাকম্ তথাপি অত্র অন্যে দেবাঽপি আহূতাঃ তেনৈব সহ। দ্রবিণোদা নাম দেব ঋতুভিঃ তন্নামকদেবতাভিঃ সহ নেষ্ট্রাৎ নেষ্টৃ-সম্বন্ধিপাত্রাৎ পিপীষতি সোমং পাতুমিচ্ছতি। ততো হে ঋত্বিজ ইষ্যত। হোমস্থানে গচ্ছত। গত্বা চ জুহোত হোমং কুরুত। হুত্বা প্র তিষ্ঠত চ। একস্মাৎ হোমস্থানাৎ স্থানান্তরং প্রতি প্রস্থানমপি কুরুত। দ্রবিণোদা—তদ্ দদাতি ইতি দ্রবিণোদাঃ। ইনন্ প্রত্যয়ান্তঃ ততঃ 'ক্বিপি চ' ইতি ক্বিপ্ প্রত্যয়ঃ। পিপীষতি—পা পানে ইতি ধাতোঃ সন্ প্রত্যয়ঃ। ছান্দস ঈকারঃ। নেষ্ট্রাৎ—নেষ্টুঃ সম্বন্ধি পাত্রং নেষ্ট্রম্। 'তস্যেদম্' ইতি অণ্ প্রত্যয়ঃ। ইষ্যত – ইষ্ গতৌ ইতি ধাতোঃ লোট্ মধ্যমপুরুষবহুবচনম্।

---

## বামীয়সূক্ত

60. *অস্য বামস্য পলিতস্য হোতুস্তস্য ভ্রাতা*
*মধ্যমো অস্ত্যশ্নঃ।*
*তৃতীয়ো ভ্রাতা ঘৃতপৃষ্ঠো অস্যাত্রাপশ্যং*
*বিশ্‌পতিম্‌ সপ্তপুত্রম্‌ ॥* (1.164.1)

**বঙ্গানুবাদ**—সকলের সেবনীয় জগৎপালক হোতার মধ্যমভ্রাতা সর্বত্রব্যাপ্ত আছেন। উঁহার তৃতীয় ভ্রাতা আহুতি ধারণ করেন। ভ্রাতৃগণের মধ্যে সপ্ত পুত্র বিশিষ্ট বিশ্‌পতিকে দেখিলাম।

Expl :—অত্র দীর্ঘতমা ঔচথ্যঃ ঋষিঃ, বিশ্বে দেবাঃ দেবতা, ত্রিষ্টুপ্‌ ছন্দঃ। বামীয়সূক্তস্য ইয়ং প্রথমা ঋক্‌। অত্র দ্বিতীযপাদে তচ্ছব্দশ্রুতেঃ প্রথমপাদে যচ্ছব্দঃ অধ্যাহার্যঃ।

যোঽয়ং দিবি দ্যোত্যতে তস্য অস্য বামস্য বননীযস্য সম্ভজনীযস্য পলিতস্য পালযিতুঃ প্রকাশবৃষ্ট্যাদিপ্রদানেন পালকস্য। তথা যোঽযং দিবি দ্যোত্যতে তস্যাস্য হোতুঃ হ্বাতব্যস্য আহ্বানার্হস্য আদিত্যস্য মধ্যমো মধ্যমস্থানঃ। মধ্যে ভবো বাযুরুচ্যতে। স চ অশ্নঃ সর্ব্বত্র ব্যাপ্তঃ। ন হি বায়ুরহিতঃ কশ্চিৎ প্রদেশোঽস্তি। তাদৃশো ভ্রাতা ভ্রাতৃস্থানীযোঽস্তি ভবতি। কিঞ্চ ঘৃতপৃষ্ঠঃ ঘৃতমাহুতিলক্ষণং পৃষ্ঠে যস্য তাদৃশো ভ্রাতা তস্য তৃতীয়োঽস্তি। তত্র এষু ভ্রাতৃষু মধ্যে পুরোদেশে বিশ্‌পতিং বিশাং প্রজানাং পালযিতারং সপ্তপুত্রং সর্পণরশ্মিপুত্রোপেতম্‌। ঐতিহ্যসকপক্ষেঽদিতিঃ পুত্রকামেতি প্রস্তুতে মিত্রাবরুণাদিষ্বদিতিপুত্রেষু অস্য আদিত্যস্য সপ্তমপুত্রত্বম্‌। ঈদৃশং মহানুভবমাদিত্যমহমপশ্যম্‌ – অদ্রাক্ষম্‌, বিশুদ্ধযা অন্তঃকরণবৃত্ত্যা ভাবনয়া আত্মত্বেন সাক্ষাৎ করোমীত্যর্থঃ।

এবং বা অস্য বামস্য বিশ্বস্য উদ্‌গরিতুঃ জগৎস্রষ্টুরিত্যর্থঃ। তস্য তাদৃশস্য পরমেশ্বরস্য ভ্রাতা তদ্‌ভাগহারী তদংশভূতঃ সূত্রাত্মা মধ্যমঃ সর্ব্বত্র মধ্যে বর্ত্তমানঃ অস্তি। স চাশ্নঃ ব্যাপনশীলঃ। কিঞ্চাস্য পরমেশ্বরস্য তৃতীযো ঘৃতপৃষ্ঠঃ ঘৃতমিতি উদকনাম। তেন তৎকার্য্যং শরীরমুচ্যতে। যদ্বা প্রদীপ্তপৃষ্ঠঃ প্রকাশিতশরীরাভিমানীত্যর্থঃ। অত্রৈষু মধ্যে বিশ্‌পতিং বিশাং প্রজানাং পতিম্। সর্ব্বস্য পতিমিত্যর্থঃ। সপ্তপুত্রং সপ্তলোকঃ পুত্রো যস্য তাদৃশম্। তং শুদ্ধসত্ত্বপ্রধানয়া মায়য়া সৃষ্টসর্বলোকমহমপশ্যম্ সাক্ষাৎ করোমীত্যর্থঃ।

---

61. *সপ্ত যুঞ্জন্তি রথমেকচক্রমেকো অশ্বো*
*বহতি সপ্তনামা।*
*ত্রিনাভি চক্রমজরমনর্বং যত্রেমা বিশ্বা*
*ভুবনাধি তস্থুঃ* ॥ (1.164.2)

**বঙ্গানুবাদ**—সূর্যের একচক্র রথে সপ্ত-অশ্ব-যোজিত হইয়াছে, এক অশ্বই সপ্ত নামে রথ বহন করিতেছে। চক্রের তিন নাভি, উহা কখনও শিথিল হয় না, কখনও জির্ণ হয় না এবং সমস্ত জগৎ ইহাকে আশ্রয় করিয়াছে।

**Expl** :—বামীয়সূক্তস্য ইয়ং দ্বিতীয়া ঋক্। অত্র দীর্ঘতমা ঔচথ্যঃ ঋষিঃ, বিশ্বে দেবাঃ দেবতা, ত্রিষ্টুপ্ ছন্দঃ।

একচক্রম্ একরথাঙ্গোপেতম্। যদ্যপি সপ্তচক্রাণি তথাপি তেষাম্ একরূপত্বাৎ একচক্রমিত্যুচ্যতে। রথং রংহণস্বভাবং সূর্যস্য সম্বন্ধিনং সপ্ত এতৎ সংখ্যকা অশ্বা যুঞ্জন্তি অনুবহন্তি। কিং বস্তুতঃ সপ্ত নেত্যাহ— একোঽশ্বঃ সপ্তনামা। এক এব সপ্তাভিধানঃ সপ্তধামনপ্রকারো বা। এক এব বায়ুঃ সপ্তরূপাণি ধৃত্বা বহতীত্যর্থঃ। একচক্রমিত্যুক্তম্। কীদৃশং তৎ ইত্যত আহ ত্রিনাভি বলত্রয়মধ্যস্থিতনাভিস্থানীযচ্ছিদ্রোপেতম্।

অজরম্ অমরণধর্মকম্ অনর্বম্ অশিথিলম্ পুনস্তদেব বিশেষ্যতে। যত্র যস্মিন্ চক্রে ইমা বিশ্বানি সর্ব্বাণি ভুবনা ইমানি প্রসিদ্ধানি জাতান্যধি আশ্রিতঃ তস্থুঃ তিষ্ঠন্তি।

অথবা—একচক্রমেকচারিণম্ সঞ্চরন্তং রথমাদিত্যমণ্ডলম্ সপ্ত যুঞ্জন্তি সর্পণস্বভাবাঃ সন্ত যুঞ্জন্তি। স চৈকসহায়োঽশ্বো ব্যাপনশীলঃ আদিত্য সপ্তনামা সপ্তরথানাং সন্নময়িতাবো বশ্ময়ো যস্য তাদৃশঃ। বহতি ধাবয়তি ভ্রময়তীত্যর্থঃ। ত্রিনাভি চক্রম্—ভূতভবিষ্যদ্বর্ত্তমানাখ্যা স্ত্রয়ঃ কালাঃ ত্রিনাভয়ঃ। অজরম্ অমরণম্. ন হি কদাচিদপি কালো ম্রিয়তে, 'অনাদিনিধনঃ কালঃ' ইতি স্মৃতেঃ। অনর্বমপ্রতিহতম্। পুনঃ কীদৃশং তৎ, যত্র যস্মিন্ চক্রে ইমা বিশ্বা ভুবনা সর্ব্বাণি ভূতান্যধিতস্থুঃ আশ্রিতঃ তিষ্ঠন্তি। কালাধীনত্বাৎ সর্ব্বস্য স্থিতেঃ।

—

62. *ইমং রথমধি যে সপ্ত তস্থুঃ সপ্তচক্রং*
*সপ্ত বহন্ত্যশ্বাঃ।*
*সপ্ত স্বসারো অভি সং নবন্তে যত্র গবাং*
*নিহিতা সপ্ত নাম ॥* (1.1C4.3)

***বঙ্গানুবাদ***—যে সপ্ত এই সপ্তচক্র রথে অধিষ্ঠান করে, তাহারাই সপ্ত অশ্ব এবং তাহারাই এই রথ বহন করে। সাত ভগিনী, এই রথাভিমুখে আগমন করে এবং ইহাতে সপ্ত গো নিহিত আছে।

**Expl.** :—ইয়ং বামীয়সূক্তস্য তৃতীয়া ঋক্। অত্র দীর্ঘতমা ঔচথ্যঃ ঋষি, বিশ্বে দেবাঃ দেবতা, ত্রিষ্টুপ্ ছন্দঃ।

ইমম্ আদিত্যমণ্ডলাখ্যং রথং যে সপ্তরশ্ময়োঽধিতস্থুঃ অধিষ্ঠিতাঃ। কীদৃশং রথম্? সপ্তচক্রম্। চক্রাণি রশ্ময়ঃ। তে সপ্ত যস্য রথস্য তাদৃশং রথম্। অশ্বা ব্যাপনশীলাঃ সপ্ত বহন্তি নির্বহন্তি চ। তাদৃশং সপ্ত স্বসারঃ স্বয়ং সরণাঃ। আভিমুখ্যেন সংগচ্ছন্তে অভি সন্নব্যাপ্ত।

বর্ত্ততে, যচ্চ সত্যস্বরূপং তত্ত্বং তৎ কিং স্বরূপমিতি অহং পৃচ্ছামি। তন্তূন্—আদিত্যপক্ষে সপ্তসংখ্যকাঃ রশ্ময়ঃ। অথবা সপ্তসংখ্যাকঃ সোমযাগঃ। ওততয়া প্রোততয়া চ পটস্য বয়নং ভবতি। ইমান্ সপ্তসংখ্যকান্ যাগান্ কবয়স্তির্যকৃতন্তুত্বেন যোজয়ন্তি তদা পরিদৃশ্যমানস্য জগতঃ স্থিরত্বমাগচ্ছতি। কথম্? কর্মানুষ্ঠানদ্বারা।

---

65. *অচিকিত্বান্ চিকিতুষশ্চিদত্র কবিন্*
*পৃচ্ছামি বিদ্মনে ন বিদ্বান্।*
*বি যস্তস্তম্ভ ষট্ ইমা রজাংসি*
*অজস্য রূপে কিমপি স্বিদেকম্॥*
(1.164.6)

***বঙ্গানুবাদ***—আমি অজ্ঞান, কিছু না জানিয়াই জ্ঞানী মেধাবিগণের নিকট জানিবার জন্য জিজ্ঞাসা করিতেছি। যিনি এই ছয় লোক স্তম্ভন করিয়াছেন, যিনি জন্মরহিতরূপে নিবাস করেন তিনি কি সেই এক?

**Expl.** :—বামীয়সূক্তস্য ষষ্ঠী ঋগিয়ম্। অত্র উচথ্যস্য পুত্রঃ দীর্ঘতমা নাম ঋষিঃ, বিশ্বে দেবাঃ দেবতা, ত্রিষ্টুপ্ ছন্দঃ।

অচিকিত্বান্ দেবতাতত্ত্বমজানন্নহং চিকিতুষো বিশেষেণ তত্ত্বং জানতঃ কবীন্ ক্রান্তদর্শিনোঽধিগতপরমার্থান্ অত্র অস্মিংস্তত্ত্ববিষয়ে পৃচ্ছামি। কিমর্থম্—বিদ্মনে বেদনায় পরমার্থজ্ঞানায়। কিং জানন্নেব পরাভবাত্থর্থং নেত্যাহ, বিদ্বান্ন পৃচ্ছামি অপি তু অজ্ঞানাদেব। যঃ পরমেশ্বরস্তস্তম্ভ স্তম্ভিতবান্ নিয়মিতবান্। কিম্ ইমা ইমানি ষট্ রজাংসি লোকান্ রঞ্জনাত্মকান্। যদ্যপি লোকাঃ সপ্ত তথাপি সত্যলোকস্য কর্মিণাং সর্বেষাং সাধারণত্বাভাবাৎ ষড়িত্যুক্তম্। নন্থ ষড়েবোক্তাঃ সপ্তম কিমিতি

ন নির্দ্দিষ্ট ইতি উচ্যতে। অজস্য জননাদিরহিতস্য চতুর্মুখস্য ব্রাহ্মণঃ রূপে স্বরূপে একং সত্যলোকাখ্যং পুনরাবৃত্তিরহিতং স্থানং কিমপি স্বিৎ। কিং স্বিদেব তৎ ন কেনাপ্যধিগন্তুং শক্যমিত্যর্থঃ, কৈশ্চিদ্দেবোপাসকৈঃ অচিরাদিমার্গেণ গন্তব্যত্বাদিতি ভাবঃ।

যদ্বা, ষড়রজাংসি বিলক্ষণাঃ ষড়্‌তবঃ। তানি অস্তম্ভয়ৎ তত্বম্। অজস্য গমনশীলস্য জামরস্তিতস্য বাদিত্যস্য রূপে রূপমাণে দৃশ্যমানে মণ্ডলে একমদ্বিতীয়ং কিমপি স্বিৎ, যৎ কিঞ্চিদবাঙ্‌মনসগম্যং তত্ত্বমস্তি তৎপৃচ্ছামি। অথবা, ষড়িমানি রজাংসি ত্রিবিধান্ দ্যুলোকান্ ভূলোকাংশ্চ যস্তস্তম্ভ। তস্যাস্য পরব্রহ্মণো রূপে নানাবিধবিকারভাজি জগতি কিমপি স্বিদেকমেকাত্মকমস্তি ইতি প্রশ্নঃ।

---

## বিভ্রাট্‌সূক্তম্

(66) *বিভ্রাড্‌ বৃহৎপিবতু সোম্যং মধ্বায়ুর্দধদ্*
*যজ্ঞপতাববিহ্রুতম্।*
*বাতজূতো যো অভিরক্ষতি ত্মনা প্রজাঃ*
*পুপোষ পুরুধা বিরাজতি॥*
(10.170.1)

***বঙ্গানুবাদ***—অতি দীপ্তিশালী সূর্যদেব মধুতুল্য সোমরস পান করুন, যজ্ঞানুষ্ঠানকারী ব্যক্তির প্রকৃষ্ট পরমায়ু বিধান করুন। তিনি বায়ু দ্বারা প্রেরিত হইয়া প্রজাদিগকে স্বয়ং রক্ষা করেন, প্রজাবর্গের পুষ্টিবিধান করেন এবং অশেষপ্রকারে শোভা পান।

**Expl :**—সূর্যদেবতাকে বিভ্রাট্‌সংজ্ঞকস্যার্ষে বিভ্রাড্‌বৃহদিতিসূক্তস্য প্রথম ঋগিয়ম্। অষ্টচত্বারিংশদক্ষরা প্রতিপাদং দ্বাদশাক্ষরসমন্বিতা

জগতীছন্দস্কা ইয়মৃক্। বাজপেয়নামাসোমযাগে অতিরিক্তোক্থ্যস্য শস্ত্রযাজ্যাত্বেন অস্য মন্ত্রস্য বিনিযোগঃ। কিঞ্চ অস্য সূক্তস্যাত্তস্তৃচঃ গবাময়নস্য বিষুবন্নামকমধ্যমাদিনে জ্যোতিষ্টোমান্তর্গতে মাধ্যন্দিনসবনে হোত্রা ক্রিয়মাণে নিষ্কেবল্যশস্ত্রে স্তোত্রিয়ত্বেন বিনিযুজ্যতে। অত্রেয়ং প্রথমা ঋক্—বিভ্রাড্ বৃহৎ পিবত্বিতি।

বিভ্রাড্ বিশেষেণ ভ্রাজ্যমানঃ সর্ব্বাপেক্ষয়া দীপ্যমানঃ সূর্যো বৃহদ্ মহৎ পরিবৃঢ়ং সোম্যং সোমময়ং মধু পিবতু। কীদৃশঃ সূর্যঃ—কিং কার্যং কুর্বন্ মধু পিবত্বিতি জিজ্ঞাসায়ামাহ—যজ্ঞপতৌ যজমানে অবিহ্রুতম্ অকুটিলম্ আয়ুর্দধৎ জগতঃ আয়ুঃ কুর্বন্। যঃ সূর্যো বাতজূত বাতেন মহাবায়ুনা প্রেরিতঃ সন্ ত্মনা আত্মনা স্বয়মেব অভিরক্ষতি। সর্বং জগৎ অভিমুখোন পশ্যন্ পালয়তি। যদ্যপি সূর্যো বায়ুনা ন প্রের্য্যতে সূর্যমণ্ডলস্য স্থিরত্বাৎ তথাপি মেষাদিরাশিচক্রস্য বায়ুনা প্রের্যত্বাৎ তাদৃশ-রাশিচক্রস্য কারণভূতঃ সূর্যোঽপি বায়ুনা প্রের্য্যতে ইতি ব্যবহ্রিয়তে। স সূর্যঃ প্রজাঃ জনান্ পুপোষ বৃষ্ট্যাদিপ্রদানেন জীবমাত্রং রক্ষতি পোষয়তি। তদুক্তং স্মৃতৌ—'আদিত্যাদ্ জায়তে বৃষ্টিঃ বৃষ্টেরন্নং ততঃ প্রজাঃ'। কিঞ্চ স সূর্যঃ পুরুধা বহুধা বিরাজতি বিশেষেণ দীপ্যতে ইতি যাজ্ঞিকব্যাখ্যানম্।

আধ্যাত্মিকব্যাখ্যাঞ্চ ইত্থং ভবতি—স সূর্যো বিশেষেণ দীপ্যমানঃ মহৎ সোম্যং সোমশ্চন্দ্রঃ সোমমর্হতীতি সোম্যঃ চান্দ্রমসং মধু পিবতু, অমাবস্যায়াং তিথৌ সূর্যাচন্দ্রমসোঃ একস্মিন্ স্থানে স্থিতত্বাৎ চান্দ্রমমৃতং সূর্যো ধারয়তু ইতি প্রার্থনা।

কিঞ্চ পক্ষান্তরে ব্যাখ্যানম্ বিভ্রাট্ পরিবৃঢ়ঃ স পরমাত্মা সোম্যং মধু উময়া সহ বর্ত্তমানঃ সোমঃ শিবঃ তৎসম্বন্ধি মধু অমৃতং জগৎ কারণরূপং পিবতু ধারয়তু। মূর্ত্তিত্রয়স্য ব্রহ্মাবিষ্ণুরুদ্ররূপস্য পরমাত্মনা সহ তাদাত্ম্যাদিদং ব্যাখ্যানং যুজ্যতে।

---

67. ***বিভ্রাড্ বৃহৎ সুভৃতং বাজসাতমং ধর্মন্দিবো ধরুণে সত্যমর্পিতম্।***
***অমিত্রহা বৃত্রহা দস্যুহন্তমং জ্যোতির্জজ্ঞে অসুরহা সপত্নহা ॥***
(10. 170. 2)

***বঙ্গানুবাদ*** - সূর্যরূপ আলোকময় পদার্থে উদয় হইতেছে ; ইহা প্রকাণ্ড, অতি দীপ্তিশালী, উত্তমরূপে সংস্থাপিত, ইহার মত অন্নদান কেহ করে না, ইহা আকাশের অবলম্বনের উপর যথাযোগ্যরূপে সংস্থাপিত হইয়া আকাশকে আশ্রয় করিয়া আছে। ইহা শত্রুনিধন করে, বৃত্রকে বধ করে, দস্যুদিগের প্রধান নিধনকারী, অসুরদিগের বধকারী, বিপক্ষদিগের সংহারকারী।

Expl : – সূর্যদেবতাকে বিভ্রাট্‌সংজ্ঞকস্যার্ষে বিভ্রাড্ বৃহদিতি সূক্তস্য দ্বিতীয়া ঋগিয়ম্। জগতী ছন্দঃ। অনেন মন্ত্রেণ সৌরস্য তেজসঃ প্রাশস্ত্যং প্রকাশ্যতে।

বিশেষেণ দীপ্যমানঃ সূর্যঃ সমগ্রং জগদাভিমুখ্যেন পশ্যন্ পালয়তীতি পূর্বমন্ত্রে কীর্ত্তিতম্। অধুনা কীদৃশং তত্তেজঃ জ্যোতিরিত্যভিপ্রেত্য তদ্বিশেষম্ আহ—বিভ্রাড্ বিশেষেণ ভ্রাজ্যতে দীপ্যতে ইতি বিভ্রাট্ বিভ্রাজমানম্ বৃহৎ প্রৌঢ়ং সুভৃতং সহস্রেণ অংশুভিঃ সুপুষ্টম্, বাজসাতমং বলং বা তৎ সনতি দদতি ইতি বাজসা অতিশয়িতম্ দাতৃতমম্ ইতি বাজসাতমম্।

পুনঃ ধর্মন্ ধর্মাণি বায়ুনা ধারয়িতব্যো দিবো দ্যুলোকস্য ধরুণে ধারকে সূর্যমণ্ডলে অর্পিতং নিক্ষিপ্তং সত্যম্ অবিনশ্বরং অমিত্রহা অমিত্রাণাম্ অপ্রিয়াণাং শত্রূণাং হন্তারম্, পুনঃ বৃত্রহা বৃত্রাণামাবরকাণাং তমসাং হন্তৃ, পুনঃ দস্যুহন্তমং দস্যূনাম্ উপক্ষপয়িতৄণাম্ হন্তৃতমম্, অসুরহা অসুরাণাং ক্ষেপ্তৃণাং ঘাতকম্ সপত্নানাম্ স্বাভাবিকশত্রূণামপি ঘাতকম্—ঈদৃশং সৌরং তেজঃ জ্যোতিঃ জজ্ঞে প্রাদুর্ভবতি।

অত্র ব্যাকরণপ্রক্রিয়া—

ধর্মন্—ধর্মন্ শব্দাৎ ঙৌ-বিভক্তৌ 'সুপাং সুলুক্' ইত্যনেন বিভক্তে-র্লুকি ধর্মন্ ইতি পদম্। লোকে তু ধর্মণি ধারকে ইতি তদর্থঃ।

অমিত্রহা, বৃত্রহা, অসুরহা, সপত্নহা—চত্বারি জ্যোতিষাং বিশেষণানি। অতঃ নপুংসকে অমিত্রহ, বৃত্রহ, ইত্যাদিরূপাণি ভবন্ত্যেব। 'সুপ্তিঙুপ্-গ্রহলিঙ্গনরাণাম্ ব্যত্যয়মিচ্ছতি' ইত্যাদিনা 'ছন্দসি বহুলম্' ইতি সূত্রমনুসৃত্য নপুংসকস্য স্থানে পুংলিঙ্গস্য প্রয়োগঃ।

জজ্ঞে—'জনি প্রাদুর্ভাবে' ইত্যস্মাদ্ লিটি প্রথমপুরুষৈকবচনে ত-প্রত্যয়ে তস্য এশাদেশে উপধা লোপে সপ্তম্যাং জজ্ঞে ইতি পদম্।

---

68. *ইদং শ্রেষ্ঠং জ্যোতিষাং জ্যোতিরুত্তমং*
*বিশ্বজিদ্ধনজিদুচ্যতে বৃহৎ।*
*বিশ্বভ্রাড্ ভ্রাজো মহি সূর্যো দৃশ*
*উরুপপ্রথে সহ ওজো অচ্যুতম্॥*
(10. 170. 3)

***বঙ্গানুবাদ***—এই সূর্য সকল জ্যোতির্ময় পদার্থের শ্রেষ্ঠ অগ্রগণ্য; ইনি সকলই জয় করেন, ধন জয় করেন, ইঁহাকে প্রকাণ্ড কহে, ইনি সকল বস্তু আলোকযুক্ত করেন, ইনি অত্যন্ত দীপ্তিশালী; ইনি দৃষ্টির সুবিধার জন্য বিস্তারিত হইয়াছেন, ইনি বলস্বরূপ ও অবিচলিত তেজঃস্বরূপ।

**Expl.** :—অস্য মন্ত্রস্য সূর্যদেবতা, সূর্যপুত্রঃ বিভ্রাট্ ঋষিঃ, জগতী ছন্দশ্চ। অনেন মন্ত্রেণ সৌরস্য তেজসঃ মহিমা কীর্ত্যতে। সুমেরু-পর্বতস্থা আদিত্যোপাসকা আর্য্যা মানবাঃ প্রাচ্যাং দিশি উদীয়মানং সৌরং তেজঃ শ্রেষ্ঠং প্রশস্ততমং জ্যোতিষাম্ অন্যেষাং গ্রহনক্ষত্রাদীনামপি জ্যোতিঃ প্রকাশকম্ অতএব উত্তমং সর্বোৎকৃষ্টং, বিশ্বজিৎ বিশ্বস্য সর্বস্য

জেতৃ, ধনজিৎ ধনস্যাপি জেতৃ, স্ববশে সর্ব্বমৈশ্বর্য্যং যস্যাস্তি স হি ধনজেতা। অপি চ ইদং বৃহৎ মহৎ প্রভূতমুচ্যতে—অর্থাৎ এবং-বিধৈর্বিশিষ্টৈগু র্ণৈর্যুক্তং সৌরং তেজঃ কথ্যতে। কিঞ্চ, বিশ্বভ্রাড্ বিশ্বস্য প্রকাশয়িতা ভ্রাজঃ ভাসমানঃ মহি মহান্ সূর্যো দৃশে দর্শনায় উরু বিস্তীর্ণং সহস্তমসোঽভিভবিতৃ অচ্যুতম্ চ্যুতরহিতম্ অবিনাশম্ ওজঃ তেজোরূপং বলং পপ্রথে বিস্তারয়তি। প্রথমার্দ্ধে এবংগুণবিশিষ্টং সৌরং তেজঃ বর্ণিতম্। দ্বিতীয়ার্দ্ধে তাদৃশঃ মহান্ সূর্যঃ স্বকীয়ং তেজোরূপং বলং সর্বাসু দিক্ষু বিস্তারয়ন্ আত্মানং প্রকাশয়তীতি বর্ণ্যতে।

অথ ব্যাকরণপ্রক্রিয়া ঃ—

দৃশে- দ্রষ্টুমিতি যাবৎ। 'দৃশে বৃক্ষে চ' ইত্যনেন সূত্রেণ তুমুনর্থে শেপ্রত্যয়ে কৃতে দৃশে ইতি সিধ্যতি। লোকে তু দ্রষ্টুমিতি পদং ভবতি।

পপ্রথে—বিস্তারয়তীত্যর্থঃ। পথ্ প্রখ্যানে ইত্যস্মাদ্ধাতোঃ অন্তর্ভাবিতণ্যর্থাৎ 'ছন্দসি বর্ত্তমানে' ইতি লিট্ প্রয়োগঃ।

মহি— মহৎ ইত্যর্থে মহি ইতি পদং সাধু।

---

(69) *বিভ্রাজন্ জ্যোতিষা স্বরগচ্ছো রোচনং দিবঃ।*
*যেনেমা বিশ্বা ভুবনান্যাভৃতা বিশ্বকর্মণা*
*বিশ্বদেব্যাবতা ॥*
(10. 170. 4)

**বঙ্গানুবাদ**—হে সূর্য, তুমি জ্যোতির্ময হইয়া আকাশের উজ্জ্বল স্থানে গিয়াছ। তোমার প্রতাপ সকল কর্মের সহায়স্বরূপ, সকল যাগযজ্ঞাদির অনুকূল, তাহাদ্বারা সকল ভুবন পুষ্টিলাভ করে।

**Expl** ঃ—সূর্যদেবতাকে বিভ্রাট্সংজ্ঞকস্যার্ষে বিভ্রাড্ বৃহদিতি সূক্তস্য চতুর্থী ঋগিয়ম্। অস্মিন্ সূক্তে বিভ্রাট্ সৌর্যঃ ঋষিঃ। সূর্যো দেবতা। অত্র মন্ত্রে আস্তারপংক্তিঃ ছন্দঃ। ইদং সূক্তং গবাময়নস্য

বিষবন্নামকমধ্যমদিনে নিষ্কেবল্যশস্ত্রে স্তোত্রিয়ত্বেন বিনিযুজ্যতে। আদ্যৈ-স্ত্রিভির্মন্ত্রৈঃ সৌরস্য তেজসঃ প্রাশস্ত্যং সংকীর্ত্ত্য অত্রান্তিমে মন্ত্রে সূর্যমুদ্দিশ্য প্রার্থনং ক্রিয়তে।

হে সূর্য! ত্বং জ্যোতিষা স্বকীয়েন বিশিষ্টগুণাত্মকেন সৌরেণ তেজসা স্বঃ স্বয়মেব জগদ্ বিভ্রাজন্ বিশ্বং প্রকাশয়ন্, দিবঃ দ্যুলোকস্য সম্বন্ধি রোচনং স্থানমগচ্ছঃ প্রাপ্তঃ ভব। যথা জীবা দ্যুলোকং প্রাপিতাস্তথেদং জ্যোতিঃ দ্যুলোকস্থানং কেনাপি প্রাপিতমিতি ন, কিন্তু স্বয়মেব আগচ্ছতি। অনেন স্বয়ং কর্ত্তৃত্বেন মহত্ত্বমস্য গম্যতে। পুনঃ কীদৃশং জ্যোতিরিত্যুচ্যতে—বিশ্বকর্মণা বিশ্বেস্য কর্ম যস্য অসৌ বিশ্বকর্মা, তেন সর্বব্যাপারহেতুনা বিশ্বদেব্যাবতা বিশ্বেষাং দেবানাং হিতো যাগাদিঃ বিশ্বদেব্যঃ, তদ্বতা যেন সৌরেণ তেজসা ইমা ইমানি পরিদৃশ্যমানানি বিশ্বা সর্বাণি-ভুবনানি উদকানি ভৌমাণ্যাভৃতা ধর্মকালে আভৃতানি ভবন্তি। তেন জ্যোতিষা ত্বং দ্যুলোকস্থানমগচ্ছঃ।

অত্র স্বশব্দঃ আত্মবাচী সূর্যস্য বিশেষণম্। বিভ্রাজন্—বিপূর্বকাৎ ভ্রাজ্ ধাতোঃ অন্তর্ভাবিতণ্যর্থাৎ লটি শতৃপ্রত্যয়ে রূপম্।

জ্যোতিষ্ শাস্ত্রস্য অয়ং তেজঃ—সৌরেণ তেজসা বলবৎ আকৃষ্টানি ভৌম্যাণি জলানি সৌরমণ্ডলে সম্ভৃতানি ভবন্তি। ততঃ প্রাবৃট্ ঋতৌ বৃষ্ট্যা জলানি পৃথিব্যাং পতন্তি। তাদৃশঃ সৌরতেজসা যুক্তস্ত্বং হে সূয! দ্যুলোকরূপং স্বকীয়ং গৃহমগচ্ছ ইত্যনেন প্রকারেণ সৌরং তেজঃ-স্তূয়তে।

—

# Important Word Formations

***অপ্তুরঃ***—অপ্-উপপদাৎ ত্বরার্থকাৎ 'তুর্'-ধাতোঃ শ্লু বিকরণী—তুতুরতি, ত্বরয়ন্তীতি অর্থে ক্বিপ্-প্রত্যয়ে সম্বোধনবহুবচনে রূপম্।

***ঘৃতাচীম্***—ঘৃতমঞ্চতীতি ঘৃতাচীতি বিগ্রহে 'ঋত্বিগ্ দধৃক্' ইত্যাদিনা ঘৃতোপপদাৎ অঞ্চধাতোঃ ক্বিন্-প্রত্যয়ে 'অনিদিতামি'তি নকারলোপে অঞ্চতেশ্চোপসংখ্যানম্' ইতি ঙীপ্ প্রত্যয়ে 'অচঃ' ইতি অকারলোপে 'চৌ' ইতি পূর্ব্বপদস্য অকারস্য দীর্ঘে কৃতে কর্মকারকে দ্বিতীয়ৈকবচনে 'ঘৃতাচীম্' ইতি।

***আগহি***—আঙ্পূর্বকাৎ গম্ধাতোঃ লোটি মধ্যমপুরুষৈকবচনে 'বহুলং ছন্দসি' ইতি শপো লুকি 'হে র্ভিত্বাদনুদাত্তোপদেশঃ' ইত্যাদিনা মকারলোপঃ। ততঃ 'অতো হেঃ' ইত্যভ্যাচ্ছাস্ত্রীয়ে লুকি কর্ত্তব্যে, 'অসিদ্ধবদত্রাভাৎ' ইত্যভ্যাচ্ছাস্ত্রীয়ো মকারলোপঃ অসিদ্ধবদ্ ভবতীতি 'আগহি' ইতি পদম্।

***কৃধি***—করণার্থককৃধাতোঃ লোট্লকারে পরস্মৈপদে মধ্যমপুরুষৈকবচনে সের্হ্যপিচ্চ ইতি সেঃ হিরাদেশে 'বহুলং ছন্দসি' ইতি শপো লুকি 'শ্রুশৃণুপৄকৃবৃভ্যশ্ছন্দসি' ইতি হের্ধিরাদেশে কৃধি ইতি।

***অপ্রতিষ্কুতঃ***—শব্দার্থক-কুধাতোঃ ক্তপ্রত্যয়ে প্রথমৈকবচনে প্রতেঃ প্রাক্প্রয়োগে পারস্করাদেরাকৃতিগণত্বাৎ সুডাগমে সুষামাদেরাকৃতিগণত্বাৎ ষত্বে নঞ্সমাসে অপ্রতিষ্কুতঃ ইতি।

***স্বসরাণি***—গমনার্থকাৎ সৃধাতোঃ পচাদ্যচ্ ইতি অচ্প্রত্যয়ে সর ইতি। স্ব সরো যেষাং তানীতি বিগ্রহে স্বসরশব্দস্য বহুবচনে রূপং স্বসরাণি ইতি।

***স্বর্বতীঃ***—স্বরঃশব্দাৎ মতুপ্প্রত্যয়ে স্ত্রিয়ামীপ্প্রত্যয়ে দ্বিতীয়া-বহুবচনে রূপম্।

***বার্য্যাণাম্***—সেবার্থকবৃঙ্ধাতোঃ কর্মবাচ্যে 'ঋহলোর্ণ্যৎ' ইতি ণ্যৎ প্রত্যয়ে ষষ্ঠীবহুবচনে রূপম্।

**ইয়র্তি**—গত্যর্থকাৎ ঋধাতোঃ লট্লকারে তিপি শপো শ্লু বিকরণে 'শ্লৌ' ইতি দ্বিভাবে অভ্যাসস্য 'ঋ' স্থানে অত্বে হলাদিশেষে 'অর্ত্তিপিপর্ত্ত্যোশ্চ' ইতি অকারস্থানে ইকারে 'অভ্যাসস্যাসবর্ণে' ইতি ইয়ঙাদেশে অঙ্গস্য গুণে রপরত্বে ইয়র্তি ইতি।

**রিশাদশম্**—রিশান্ত্যস্মিন্ সন্তীতি বিশাঃ শত্রবঃ ইত্যর্থে বিশ্ ধাতোঃ 'ইগুপধজ্ঞাপ্রীকিরঃ কঃ' ইতি কপ্রত্যয়ে বিশ ইতি। তান্ দ্যতি বিশাদা ইত্যস্য 'সর্ব্বধাতুভ্যোঽসুন্' ইতি অসুন্প্রত্যয়ে দ্বিতীয়ৈকবচনে বিশাদসম্ ইতি পদম্। শত্রুবিনাশকম্ ইত্যর্থঃ।

**ঋতাবৃধৌ**—ঋতস্য বর্দ্ধয়িতারৌ ইত্যর্থে অন্তর্ভাবিতণ্যর্থাদ্ বৃধেঃ ক্বিপ্প্রত্যয়ে 'নহি-বৃতি-বৃষ-ব্যধি-রুচি-সহি-তনিষু ক্বৌ' ইতি পূর্বপদস্য দীর্ঘঃ। 'অন্যেষামপি দৃশ্যতে' ইতি পূর্বপদস্য দীর্ঘ ইতি পাঠঃ কস্মিংশ্চিদ্ দৃশ্যতে। ততঃ প্রথমাদ্বিবচনে ঋতাবৃধাবিতি রূপম্।

**বৃধি**—বরণার্থকাৎ 'বৃঙ্'ধাতোঃ লোটঃ সিপি তৎস্থানে 'সেহ্যপিচ্চ' ইতি হ্যাদেশে, 'স্বাদিভ্যঃ শ্নুঃ' ইতি শ্নুপ্রত্যয়ে, 'বহুলং ছন্দসি' ইতি শ্নুপ্রত্যয়লোপে, 'শ্রুশৃণুপৄকৃবৃভ্যশ্ছন্দসি' ইতি হের্ধিরাদেশে তস্য ঙিত্ত্বাৎ বৃধাতোর্গুণাভাবে 'বৃধি' ইতি পদম্।

**সংজগ্মানঃ**—সম্পূর্ব্বকাদ্ গমধাতোঃ 'ছন্দসি লুঙ্লঙ্লিটঃ' ইতি বর্তমানে লিট্লকারে 'সমো গম্যৃচ্ছিভ্যাম্' ইতি আত্মনেপদবিধানাৎ লিটঃ কানচ্ আদেশে 'লিটি ধাতোরনভ্যাসস্য' ইতি দ্বিবচনে 'হলাদিঃশেষঃ' ইতি দ্বিবচনস্য পূর্ব্বভাগস্য মকারলোপে 'কুহোশ্চুঃ' ইতি গকারস্থানে জকারে 'গম্-হন্-জন্-খন্-ঘসাং লোপঃ ক্ঙিত্যনঙি' ইতি পরভাগস্য উপধা-অকারলোপে পুংলিঙ্গপ্রথমৈকবচনে রূপম্।

**অহাসত**—হাধাতোঃ লুঙ্লকারাত্মনেপদপ্রথমপুরুষবহুবচনে ঝস্য অদাদেশে চ্লেঃ সিচি আডাগমে অহাসত ইতি।

**ইন্দ্রম্**—পরমৈশ্বর্যবাচকাৎ ইদিধাতোঃ 'ঋজ্রেন্দ্রাগ্র' ইত্যাদিনা রন্প্রত্যয়ে দ্বিতীয়ৈকবচনে রূপম্।

**সুতপাব্নে**—সুতং পিবতীত্যর্থে সুতোপপদাৎ পানার্থক পা-ধাতোঃ বনিপ্প্রত্যয়ে চতুর্থ্যেকবচনে রূপম্।

**দধ্যাশিরঃ**— ধারণপোষণার্থক-'ধা'-ধাতোঃ 'আদৃগমহনজনঃ কিকিণৌ লিট্ চ' ইতি কিন্প্রত্যয়ে লিঙ্বদ্ভাবাৎ দ্বির্ভাবে কিত্ত্বাদাকার-লোপে অভ্যাসে চর্চ' ইতি ধকারস্য দকারে দধি ইতি পদম্। হিংসার্থকশৃধাতোঃ ক্বিপ্প্রত্যয়ে 'আশী' ইতি পদং নিষ্পন্নম্। ততঃ 'ঋত ইদ্ধাতোঃ' ইতি ইত্ত্বেরপরত্বে প্রথমাবহুবচনম্।

**সহস্রিণম্**—সহস্রমস্যাস্তীতি সহস্রশব্দস্য 'অত ইনি ঠনৌ' ইতি ইনিপ্রত্যয়ে দ্বিতীয়ৈকবচনে রূপম্।

**গির্বণঃ**—গৃধাতোঃ ক্বিপ্প্রত্যয়ে 'ঋত ইদ্ধাতোঃ' ইতি ইত্ত্বে রপরত্বে চ গির্ ইতি পদম্। ততঃ গির্উপপদাৎ রন্ধাতোঃ 'সর্ব্ব-ধাতুভ্যোঽসুন্' ইতি অসুন্প্রত্যয়ে সম্বোধনস্য একবচনে গির্বণ ইতি।

**যবয়ঃ**—যুধাতোর্ণিচি লোটি মধ্যমপুরুষৈকবচনে রূপম্। অত্র সংজ্ঞাপূর্ব্বকো বিধিরনিত্যঃ' ইতি বৃদ্ধি র্ন ক্রিয়তে। অথবা 'যৌতিতি যবঃ' ইত্যর্থে যুধাতোঃ 'নন্দিগ্রহিপচাদিভ্যো ল্যুণিণ্যচঃ' ইতি অচ্ প্রত্যয়ে ইষ্টবদ্ভাবাৎ টিলোপে তস্য স্থানিবদ্ভাবাৎ বৃদ্ধ্যভাবে যবয় ইতি।

**তস্থুষঃ**—স্থাধাতোর্লিটি কসুরাদেশে 'বস্বেকাজাদ্যসাম্' ইত্যৌট-মন্তরঙ্গমপি বাধিত্বা সম্প্রসারণে 'সম্প্রসারণাশ্রয়ং চ বলীয়ঃ' ইতি শসি পরতঃ ভত্বাদ্ 'বসোঃ সম্প্রসারণম্' ইতি সম্প্রসারণ পরপূর্ব্বত্বে 'শসিবসিমসীণাঞ্চ' ইতি ষত্বে উক্তং রূপং সিদ্ধম্।

**নৃবাহসা**—বহনার্থকবহধাতোঃ 'নৄন্ বহত' ইত্যর্থে 'বহিহাধাঞ্-ভ্যশ্ছন্দসি' ইতি অসুন্প্রত্যয়ে নিদিত্যনুবৃত্তেঃ বৃদ্ধৌ দ্বিতীয়াদ্বিবচনস্থানে সুপাং সুলুক্ ...' ইত্যাদিনা ডাদেশে নৃবাহসা ইতি।

**দাশুষে**- দানার্থকদাশৃধাতোঃ কসুপ্রত্যয়ে 'বসোঃ সম্প্রসারণম্' ইতি কসুপ্রত্যয়স্য 'ঋয়' ইতি বকারস্য সম্প্রসারণে (বকারস্থানে উকারে) 'সম্প্রসারণাচ্চ' ইতি পূর্ব্বরূপত্বে 'শসিবসিমসীণাঞ্চ' ইতি ষত্বে চতুর্থ্যেক-বচনে দাশুষে ইতি।

**অনূষত**—স্তুত্যর্থক ণুধাতোঃ 'ণোনঃ' ইতি সূত্রেণ ধাতোঃ ণকার-স্থানে নকারাদেশে লুঙ্লকারে প্রথমপুরুষবহুবচনে ব্যত্যয়েন ঝস্য অদাদেশে 'চ্লে সিচ্' ইতি সিচাগমে, অস্য ধাতোঃ কূটাদিত্বেন সিচো

ঙিত্বাদ্গুণাভাবে ছান্দসত্বাৎ ইডভাবে দীর্ঘে অডাগমে অনূষত ইতি।

***রারণাৎ***--শব্দার্থক-রণ্-ধাতোঃ 'ধাতোরেকাচো হলাদেঃ, ক্রিয়া-সমভিহারে যঙ্' ইতি যঙ্প্রত্যয়ে 'যঙোঽচি' ইতি যঙ্প্রত্যয়স্য লোপে 'প্রত্যয়লোপে প্রত্যয়লক্ষণম্' ইতি দ্বিভাবে 'হলাদিশেষে' 'দীর্ঘো অকিতঃ' ইতি দীর্ঘে প্রত্যয়লক্ষণেন সনাদ্যন্তা ধাতবঃ' ইতি 'রারণ', অস্য ধাতুসংজ্ঞায়াং হেতুহেতুমদ্ভাবলক্ষণে বিধিলিঙর্থে লেট্প্রত্যয়ে তিপি 'ইতশ্চ লোপঃ পরস্মৈপদেষু' ইতীকারলোপে 'লেটোঽডাটৌ' ইতি অডাগমে 'কর্ত্তরি শপ্' ইতি শপ্প্রত্যয়ে রারণাৎ ইতি।

***সূর্যম্***—প্রেরণার্থক ষূ-ধাতোঃ 'সূর্য্যমৃষোদ্য রুচ্য' ইত্যাদিনা নিপাতনে ক্যপ্প্রত্যয়ে রুডাগমে 'ধাত্বাদেঃ ষঃ সঃ' ইতি সত্বে দ্বিতীয়ৈকবচনে সূর্যম্ ইতি। অত্র ক্যপঃ কিত্ত্বাদ্ গুণাভাবঃ।

***তুবিজাতৌ***—তুবীনাং জাতৌ বহূনামপকারকতয়া তৎসম্বন্ধিত্বেন জাতাবিতি ষষ্ঠীসমাসে সমাসান্তোদাত্তত্বম্।

***ঐরিরেঃ***—অন্তর্ভাবিতণ্যর্থাৎ আঙ্পূর্বকাৎ ঈর্ধাতোঃ লিট্লকারে আত্মনেপদী প্রথমপুরুষবহুবচনে রূপম্। অত্র 'ইজাদেশ্চ গুরুমতোঽনৃচ্ছঃ' ইতি আম্ ন।

***জেষঃ***—জয়ার্থকাৎ জীধাতোঃ বিধিলিঙর্থে লেট্, তস্য মধ্যমপুরুষৈক-বচনে সিপ্, 'ইতশ্চ লোপঃ পরস্মৈপদেষু' ইতীকারলোপঃ. কর্ত্তরি শপি প্রাপ্তে তদপবাদঃ, 'সিব্বহুলং লেট্' ইতি সিপ্। 'লেটোঽ-ডাটৌ'—ইতি অড়াগমে ঈকারস্য গুণে একারে ষত্বে জেষঃ ইতি।

***হূমহে***—আহ্বানর্থকাৎ হ্বে ধাতোঃ লট্লকারে আত্মনেপদে উত্তমপুরুষবহুবচনে 'বহুলং ছন্দসি' ইতি সম্প্রসারণে হূমহে ইতি। বহুলং ছন্দসীতি শপো লুক্।

***শকৎ*** - শক্ত্যর্থক শক্ধাতোঃ ধাতুসম্বন্ধাকারে 'ছন্দসি লুঙ্ লঙ্ লিটঃ' ইতি লুঙি তিপি ইতশ্চ ইতীকারলোপে চ্লৌ পুষাদিদ্যুতাদ্য দিতঃ পরস্মৈপদেষু' ইতি চ্লেরঙাদেশে 'বহুলং ছন্দসি' ইতি অডাগমা-ভাবে 'শকৎ' ইতি।

***অবিভ্যুষা***—নঞ্পূর্বকাৎ ভয়ার্থকাৎ 'ভী' ধাতোঃ লিট্ লকারে

'শেষাৎ কর্ত্তরি পরস্মৈপদম্' ইতি পরস্মৈপদে কসুশ্চ ইতি লিটঃ কসুবাদেশে তস্যকিত্ত্বাৎ গুণাভাবে দ্বির্বচনে অভ্যাসস্য হ্রস্বে 'অভ্যাসে চর্চ্চঃ' ইতি ভকারস্থানে বকারে 'বসোঃ সম্প্রসারণম্' ইতি বকারস্থানে উকারে নঞ্‌সমাসে শসিবসিঘসীনাঞ্চ' ইতি ষত্বে তৃতীয়ৈকবচনে অবিভ্যুষা ইতি।

**বৃষ্ব**—বরণার্থকাৎ বৃধাতোঃ লোট্‌লকারে থাস্‌প্রত্যয়ে তস্য স্থানে 'থাসঃ সে' ইতি সে-আদেশে 'সবাভ্যাং বাসৌ' ইতি বকারাদেশে 'বহুলং ছন্দসি' ইতি শপো লুকি শাসিবসিঘসীনাঞ্চ' ইতি ষত্বে বৃষ্ব ইতি।

**বৃণুষ্ব**—বৃধাতোঃ 'ইদিতোঽনুম্ ধাতোঃ' ইতি নুমাগমে ব্যত্যয়ে নাত্মনেপদে লেটঃ থাস্‌প্রত্যয়ে 'থাসঃ সে' ইতি সে-আদেশে সবাভ্যা বাসৌ' ইতি বাদেশে কর্ত্তরি শপি প্রাপ্তে 'ধিন্বিকৃণ্ব্যোরচেতি' উ প্রত্যয়ে তৎসন্নিয়োগেন বকারস্য অকারে তস্য 'অতোঃ লোপঃ' ইতি লোপে 'অচঃ পরস্মিন্ পূর্ব্ববিধৌ' ইতি অকারলোপস্য স্থানিবদ্ভাবাৎ লঘূপধ-গুণাভাবে বৃণুষ্ব ইতি সিদ্ধম্।

**অদ্রিবঃ**—পর্ব্বতবাচকাৎ অদ্রিশব্দাৎ অদ্রিরস্যাস্তীতি অর্থে মতুপ্ প্রত্যয়ে ছন্দসীরঃ' ইতি বত্বে সম্বোধনে 'উগিদচাম্' ইতি নুমাগমে হলঙ্যাদিসংযোগান্তলোপৌ' মতুবসো রু সম্বুদ্ধৌ ছন্দসি' ইতি বিসর্গৌ সম্বোধনস্য একবচনে অদ্রিবঃ ইতি।

**তূতুজান**—শীঘ্রার্থক তুজ্-ধাতোঃ 'লিটঃ কানজ্বা' ইত্যনেন লিটঃ স্থানে কানজাদেশে তুজ্‌ধাতোর্দ্বিভাবে 'তুজাদীনাম্ দীর্ঘঃ অভ্যাসস্য' ইতি দীর্ঘত্বে প্রথমৈকবচনে রূপমিদম্।

**অবীবৃধন**—বর্দ্ধনার্থকাৎ 'বৃধ্'ধাতোঃ লুঙি চঙি উঋদিতামনুবৃত্তৌ 'নিত্যং ছন্দসি' ইতি ঋকারস্য ঋকারবিধানাৎ লঘূপধগুণাভাবে লুঙ্ লকারে পরস্মৈপদে প্রথমপুরুষবহুবচনে নিষ্পন্নম্। অত্র দ্বির্ভাব হলাদিঃ-শেষঃ-সন্বদ্ভাব ইত্ব-দীর্ঘত্ব অডাগমাঃ।

**উক্থা**—ভাষণার্থক বচধাতোঃ 'পাতৃতুদিবচিরিচিসিচিভ্যস্থক্' ইতি বচেঃ থক্-প্রত্যয়ে তস্য কিত্ত্বাৎ বচ্ ধাতোঃ বকারস্য সম্প্রসারণে উকারে

কৃতে 'শেশ্ছন্দসি বহুলম্' ইতি শিলোপে ন-লোপে চ উকৃথা ইতি পদম। উকৃথানি ইত্যর্থঃ।

**অক্ষিতোতিঃ**—ক্ষযার্থক-ক্ষি- ধাতুরকর্মকঃ। তস্য চ কর্মাভাবাদধিকরণে ভাবে কর্ত্তরি বা ক্তপ্রত্যযেন ভবিতব্যম্। তদিহ যদি কর্ত্রর্যধিকরণে বা স্যাত্তদা তযোরর্থযোর্ণ্যৎ-প্রত্যযস্যাবিধানাৎ ক্ষিয ইত্যনুবৃত্তৌ 'নিষ্ঠাযামণ্যদর্থে' ইতি দীর্ঘেণ ভবিতব্যম্। তথা চ 'ক্ষিযোদীর্ঘাৎ' ইতি নিষ্ঠানত্বে অক্ষীণঃ ইতি স্যাৎ ন ত্ব ক্ষতেতি। অথ "নপুংসকেভাবে ক্তঃ" ইতি ক্তপ্রত্যযে ভাবপঃ ক্ষিতশব্দো গৃহ্যতে তদা তস্য ণ্যদর্থত্বেন "অণ্যদর্থে" ইতি নিষেধাদ্দীর্ঘনত্বযোরভাবে ক্ষিতমিতি সিধ্যতি। ন ক্ষিতমস্যা ইতি অক্ষিতা। অক্ষিতা ঊতিরস্য স অক্ষিতোতিঃ।

**পৌংস্যা**—পুমস্‌শব্দস্য ব্রাহ্মণাদেরাকৃতিগণত্বাৎ "গুণবচনব্রাহ্মণাদিভ্যঃ কর্মণি চ" ইতি ষ্যঞ্ প্রত্যযে নপুংসকলিঙ্গে প্রথমাবহুবচনবিভক্তিস্থানে 'সুপাং সুলুক্' ইত্যনেন ডা-দেশে পৌংস্যা ইতি পদম

**দস্রাঃ**—দমনার্থক-দস্রশব্দস্য সম্বোধন দ্বিবচনে ঔকারস্থানে সুপাং সুলুক্ ইত্যাদিনা ডা-দেশে দস্রা ইতি।

**প্রপৃঞ্চতী**—'অঞ্চু গতৌ' ইতি ধাতুঃ। প্রপূর্বকাৎ পৃঞ্চধাতোঃ সম্পকার্থত্বাৎ শতৃপ্রত্যযেন স্ত্রিযাং ঙীপি রূপম্। শতৃপ্রত্যযা দ্বিবিধা ভবন্তি—নুমন্তঃ অনুমন্তশ্চ। অত্রানুমন্তমিদং পদম।

**উরুচী**—উরূন্ বহূন্ যজমানান গচ্ছন্তীতি বিগ্রহে উরুপূর্বাৎ অঞ্চ্‌ধাতোঃ "ঋত্বিগ্‌দধৃক্" ইত্যাদিনা ক্বিন্‌প্রত্যযে "অনিদিতামিতি" নকারলোপে "ষিদ্‌গৌরাদিভ্যশ্চ' ইতি ঙীষ্ প্রত্যযে "অচঃ" ইতি অকারলোপে 'চৌ' ইতি পূর্বপদস্যোকারস্য দীর্ঘে কৃতে প্রথমৈকবচনে উরুচীতি পদং নিষ্পন্নম।

**দ্রবৎপাণী**- গমনার্থক দ্রু ধাতোঃ শতৃপ্রত্যযে দ্রবাৎ ইতি। দ্রবন্তৌ ধাবমানৌ পাণী হস্তৌ যযোস্তৌ ইতি বহুব্রীহিসমাসঃ। সম্বোধন দ্বিবচনে রূপং দ্রবৎপাণীতি।

**শুভস্‌পতী**—শুভ-শুম্ভ দীপ্তৌ ইতি মঙ্গলবাচক-দীপ্ত্যর্থকশুভ্‌ধাতোঃ সম্পদাদিত্বাৎ ভাববাচ্যে ক্বিপ্‌প্রত্যযে ষষ্ঠ্যেকবচনে শুভ ইতি পদম্। তস্য

পতিঃ (পা + ডতি) ইতি ষষ্ঠীতৎপুরুষসমাসে সম্বোধনদ্বিবচনে 'শুভস্পতী' ইতি পদং নিষ্পন্নম্।

***যজ্বরীঃ***—যজ্ ধাতোঃ যাগকরণানামপ্যন্নানাম্ অসিশ্চিছনত্তীতিবৎ স্বব্যাপারে কর্তৃত্ববিবক্ষয়া "সুযজোঙ্বনিপ্ ইতি ঙ্বনিপ-প্রত্যয়ে 'বনো র চ' ইতি ঙীপ্-প্রত্যয়ে তৎসন্নিযোগেন নকারস্য রেফাদেশে চ দ্বিতীয়া বহুবচনে যজ্বরীঃ ইতি পদং নিষ্পন্নম্।

***চনস্যতম্***—চায্ পূজানিশামনযোরিতস্য চায্ ধাতোঃ অসুন্-প্রত্যয়ে চায়স্ ইতি জাতে 'চায়তেরন্নে হ্রস্বশ্চ' ইত্যনেন অকারস্য হ্রস্বে চানুকৃষ্টে নুডাগমে চ 'লোপো ব্যোর্বলি' ইতি যকারলোপে চনস্ ইতি স্থিতি আত্মেচ্ছার্থে 'সুপ আত্মনঃ ক্যচ্' ইতি ক্যচ্প্রত্যয়ে 'সনাদ্যন্তা ধাতবঃ' ইতি ধাতুসংজ্ঞায়াং লোটমধ্যমপুরুষদ্বিবচনে চনস্যতম্ ইতি। চনস্ শব্দোঽন্নবাচী।

***খ্যাঃ***—খ্যা-প্রকথনে ইতি কথনার্থকখ্যাধাতোঃ লুঙি সিপি "চ্লি লুঙি" ইতি চ্লিপ্রত্যয়ে "অস্যতিবক্তিখ্যাতিভ্যঃ অঙ্" 'ইতি চ্লেঃ অঙাদেশে 'আতো লোপ ইটি চ' ইতি খ্যাধাতোঃ আকারলোপে 'ইতশ্চ' ইতি ইকারলোপে রুত্ববিসর্গৌ খ্যাঃ ইতি পদম্। অত্র 'ন মাঙ্যোগে' ইতি অডভাবঃ। তথা সতি লুঙি মধ্যমপুরুষৈকবচনে খ্যাঃ ইতি রূপম্।

***বোচেয়ুঃ***—অত্র উচ্যাসুরিতি রূপমাবশ্যকমাসীৎ। কিন্তু ছান্দসং বোচেয়ুরিতি রূপম্ আগতম্। 'বচ পরিভাষণে' ইতি বচ্ধাতোরাশীর্লিঙি প্রথমপুরুষবহুবচনে রূপং বোচেয়ুরিতি। অত্র ঝেজুর্সাদেশে বচ উস্ ইতি স্থিতে 'লিঙাশিষ্যঙ্' ইতি সূত্রেণ অঙ্প্রত্যয়ে জাতে বচ অ উস্ ইতি স্থিতে 'বচ উম্' ইতি সূত্রেণ উমাগমে জাতে 'আদ্গুণ' ইতি গুণে সম্পন্নে বোচ্ অ উস্ ইতি জাতে যাসুডাগমে কৃতে বোচ্ যাস্ উস্ ইতি জাতে 'সলোপোঽনন্ত্যস্য' ইতি সূত্রেণ সলোপে 'অতো যেয়' ইতি সূত্রেণ যা ইত্যস্য ইয়াদেশে জাতে বোচ্ ইয়্ উস্ ইতি স্থিতে আদ্গুণ ইত্যনেন গুণে সম্পন্নে বোচেয়ুরিতি রূপং সিধ্যতি।

***শর্মণি***—শৃ হিংসায়ামিতি শৃধাতোঃ 'অন্যেভ্যোঽপি দৃশ্যন্তে' ইতি মনিন্প্রত্যয়ে 'নড্শিকৃতি' ইতি ইট্প্রতিষেধে শর্মণি রূপম্। শৃণাতি

হিনস্তি দুঃখমিতি শর্ম।

***স্যাম***—বিদ্যমানার্থক-অস্-ধাতোঃ বিধিলিঙ্‌লকারে উত্তমপুরুষ-বহুবচনে রূপম্। অত্র 'শ্নসোরল্লোপঃ' ইতি অস্ ধাতোঃ অকারলোপে যাসুটাগমে স্যাম ইতি।

✓***দস্ম***—'দসু উপক্ষয়ে' ইতি ধাতোরন্তর্ভাবিতণ্যর্থাদ্ মক্‌প্রত্যয়ঃ। 'ইষিযুধীন্ধিদসিশ্যাধূসূভ্যো মক্।'

***কৃষ্টয়ঃ***—কর্ষণার্থক 'কৃষ্‌ধাতোঃ 'ক্তিচ্‌ক্তৌ চ সংজ্ঞায়াম্' ইতি ক্তিচ্‌প্রত্যয়ে প্রথমাবহুবচনে 'কৃষ্টয়ঃ' ইতি।

***নৃমাদনম্***—মাদ্যন্তে অনেন ইতি মাদনঃ। নৃ-উপপদাৎ হর্ষার্থক-'মদ্'ধাতোঃ 'করণাধিকরণয়োশ্চ' ইতি ল্যুট্‌প্রত্যয়ে নৃমাদনম্ ইতি।

***ঘনঃ***—হরণার্থকাৎ হন্‌ধাতোঃ 'মূর্ত্তৌ ঘনঃ' ইতি কাঠিন্যার্থে-অপ্‌ প্রত্যয়ে ঘনঃ ইতি।

***সুমতীনাম্***. সুমতীশব্দস্য মতুপ্‌প্রত্যয়ে ষষ্ঠীবহুবচনে সুমতীনাম্ ইতি।

***সোমপাঃ***—'সোমং পিবতি যঃ সঃ' ইত্যর্থে সোমোপপদাৎ পানার্থক-পা-ধাতোঃ বিচ্‌প্রত্যয়ে উক্তং রূপং সিধ্যতি।

***সবনা***—'সূয়তে সোম এষু' ইতি সবনানি ইত্যর্থে 'করণাধি-করণয়োশ্চ' ইত্যধিকরণে ল্যুট্‌প্রত্যয়ে 'সুপাং সুলুক্' ইত্যাদিনা ডা-দেশে টিলোপে ইতি রূপম্।

***গোদাঃ***—গাং দদাতি যঃ সঃ ইত্যর্থে গো-উপপদাৎ দানার্থক-'দা'-ধাতোঃ বিচ্‌প্রত্যয়ে উক্তং রূপং সিদ্ধম্। অত্র 'ক্বিপ্ চ' ইতি ক্বিপং পরমপি সরূপং বাধিত্বা প্রতিপদবিধিত্বাদ্ "অন্যেভ্যোঽপি দৃশ্যন্তে"... "অতো মনিন্ ক্বনিপ্‌বনিপশ্চ" ইতি বিচ্। ক্বিপি হি 'ঘুমাস্থা' ইত্যাদিনা ধাতোরাকারস্য ইত্বং স্যাৎ।

***রেবতঃ***—রয়ির্ধনমস্যাস্তীতি রেবান্। রয়িশব্দস্য মতুপ্‌প্রত্যয়ে 'ছন্দসীরঃ' ইতি মতুপ্‌প্রত্যয়স্য মকারস্য বত্বে 'বহুলং ছন্দসি' ইতি সম্প্রসারণপরপূর্বত্বে গুণে ষষ্ঠ্যেকবচনে রেবতঃ ইতি।

***মদঃ***—মদ্‌ধাতোঃ 'মদোঽনুপসর্গে' ইত্যপ্‌প্রত্যয়ে ষষ্ঠ্যেকবচনে মদঃ ইতিঃ।

**সাতয়ে**— সম্যক্লাভার্থ-'সো'-ধাতোঃ "ঊতি-যূতি-জূতি সাতি-হেতি-কীর্তয়শ্চ" ইতি ক্তিন্প্রত্যয়ে চতুর্থ্যেকবচনে সাতয়ে ইতি সিদ্ধম্।

**অবনিঃ** রক্ষণগতিকান্তিপ্রীত্যাদ্যর্থকাৎ অব্ধাতোঃ "অর্তিসৃধৃধম্যশ্যবিতৃভ্যোঽনিঃ" ইতি অনিপ্রত্যয়ে প্রথমৈকবচনে অবনিরিতি।

**সখা** সমানোপপদাৎ কথনার্থকাৎ খ্যাধাতোঃ "সমানে খ্যঃ স চোদাত্তঃ" ইতি ইন্প্রত্যয়ে তৎসন্নিয়োগেন যকারলোপে সখা ইতি। তত্র ডিত্বাট্টিলোপঃ।

**সুপারঃ**—সুপপদাৎ পালনপূরণার্থকাৎ ণিজন্তপৃধাতোঃ 'পচাদ্যচ্' ইত্যচ্প্রত্যয়ে নিষ্পন্নম্।

**তস্মৈ**—তদ্ শব্দস্য পুংলিঙ্গে চতুর্থ্যেকবচনে তস্মৈ ইতি। 'অদিঃ' ইত্যনুবৃত্তৌ "ত্যজি-তনি-যজিভ্যো ডিৎ" ইতি বিস্তারার্থকাৎ তন্ধাতোঃ অদিপ্রত্যয়ে ডিত্বাট্টিলোপে তদ ইতি শব্দঃ নিষ্পন্নম্।

**ত্বা**— যুষ্মদ্শব্দস্য দ্বিতীয়ৈকবচনে "ত্বামৌ দ্বিতীয়ায়াঃ" ইতি ত্বাদেশঃ।

**যুবাকবঃ**—যু মিশ্রণে। যুবন্তি মিশ্রীভবন্তি বসতীবরীপ্রভৃতিভিঃ সহ যজ্ঞদ্রব্যাণীতি যবাকবঃ। কাকু প্রত্যয়ঃ। তস্য কিত্ত্বেন গুণাভাবাৎ উবঙাদেশে রূপং নিষ্পন্নম্।

**সচা** সমবায়ার্থক-ষচ্ধাতোঃ "ধাত্বাদেঃ ষঃ সঃ" ইতি ষচ্ধাতোঃ ষকারস্য স্থানে সকারাদেশে সম্পদাদিভ্যো ভাবে ক্বিপ্ ইতি ক্বিপ্প্রত্যয়ে তৃতীয়ৈকবচনে সচা ইতি।

**হরী**—হরণার্থকাৎ হৃধাতোঃ "হৃ-পিষি-রুহি-বৃতি-বিদি-ছিদি-কীর্তিভ্যশ্চ" ইতি ইন্প্রত্যয়ে দ্বিতীয়াবহুবচনে রূপম্।

**বিশ্বা** প্রবেশার্থকাৎ বিশ্ধাতোঃ ক্বন্প্রত্যয়ে বিশ্বা ইতি।

**আরত**—'ঋ গতিপ্রাপণয়োঃ' ইতি ধাতোর্লোডর্থে লঙ্লকারঃ। লোটি মধ্যমপুরুষবহুবচনে ত ইত্যাদেশঃ। তদানীং ঋ ত ইতি স্থিতে 'চ্লি-লুঙি' ইতি সূত্রেণ প্রাপ্তস্য চ্লেঃ 'সর্তিশাস্ত্যর্তিভ্যশ্চ' ইতি সূত্রেণ অঙাদেশঃ। ঋ অ ত ইতি স্থিতে 'ঋদৃশোঽঙি গুণঃ' ইতি সূত্রেণ গুণে প্রাপ্তে জাতম্।

**ভুবৎ**— সত্তার্থকভূধাতোঃ আশীর্লিঙলকারে প্রথমপুরুষৈকবচনে "লিঙাশিষ্যঙ্" ইত্যঙ্প্রত্যয়ে তস্য ডিত্বেন গুণাভাবাদুবঙাদেশে ভুবৎ ইতি পদম্। কিদাশিষি যাস্থুণ্ ন ভবতি 'অনিত্যমাগমশাসনম্' ইতি বচনাৎ।

**গমৎ** – গম্ধাতোঃ লেটস্তিপ্প্রত্যয়ে 'ইতশ্চ লোপঃ পরস্মৈপদেষু' ইতি ইকারলোপে 'বহুলং ছন্দসি' ইতি শপো লুকি 'লেটোঽডাটৌ' ইতি অডাগমে গমৎ ইতি রূপসিদ্ধিঃ।

**বাজেভিঃ**—অন্নবাচক বাজশব্দস্য তৃতীযাবহুবচনে বাজেভিঃ ইতি। 'বহুলং ছন্দসি' ইতি ভিস্বিভক্তিস্থানে ন ঐসাদেশঃ।

**জৈষ্ঠ্যায়**—জ্যেষ্ঠস্য ভাবঃ জৈষ্ঠ্যম্। জ্যেষ্ঠশব্দস্য 'গুণবচন-ব্রাহ্মণাদিভ্যঃ কর্মণি চ' ইতি ষ্যঞ্প্রত্যয়ে চতুর্থ্যেকবচনে নিষ্পন্নম্।

**সদ্যঃ**– 'সমানে অহনি' ইত্যর্থে সমানশব্দস্থানে 'সদ্যঃপরুৎপরারি' ইতি সূত্রেণ সমানশব্দস্য সভাব স্তুতো দ্যস্প্রত্যয়ে সদ্য ইতি রূপস্য সিদ্ধিঃ।

**পীতয়ে**—পানার্থক-পা-ধাতোঃ "স্থাগাপাপচো ভাবে" ইতি ক্তিন্ প্রত্যয়ে "ঘুমাস্থাগাপাজহাতিসাং হলি" ইতি পা-ধাতোঃ আকারস্থানে ঈকারে চতুর্থ্যেকবচনে পীতয়ে ইতি।

**বীতয়ে**—বী-ধাতোঃ ক্তিন্প্রত্যয়ে চতুর্থ্যেকবচনে বীতয়ে ইতি।

**শুচয়ঃ**—দীপ্ত্যর্থকাৎ শুচ্ধাতোঃ 'ইগুপধাৎ কিৎ' ইতি ইন্প্রত্যয়ে কিত্বাৎ লঘূপধগুণাভাবে প্রথমাবহুবচনে রূপম্।

**সমৎসু**—সম্পূর্বকাৎ অদ্ ভক্ষণে ইতি ধাতোঃ ক্বিপ্প্রত্যয়ে সপ্তমীবহুবচনে রূপম্।

**পাবকাঃ**–পবনং পাবঃ শুদ্ধিস্তং কাযতীতি পাবকা। পাবম্ উপপদাৎ কৈ ধাতোঃ 'আতোঽনুপসর্গে কঃ' ইতি ক-প্রত্যয়ে স্ত্রিয়ামাপ্ পাবকা ইতি। যদ্বা পূতার্থকাৎ পূধাতোঃ 'ণ্বুল্ তৃচৌ' ইতি ণ্বুল প্রত্যয়ে স্ত্রিয়মাপ্ পাবকা ইতি। অত্র স্ত্রীলিঙ্গে 'প্রত্যযস্থাৎ কাৎ পূর্ব্বস্যাত ইদাপ্যসুপঃ' ইতীত্বস্যাভাবঃ।

**ধিয়াবসুঃ**—কর্মপ্রাপ্যধননিমিত্তভূতেত্যর্থঃ। ধিযা নাম বুদ্ধ্যা।

ধিয়া কর্মণা ইতি সায়ণঃ। ধিয়া কর্মণা বসুঃ যস্যাঃ সকাশাদ্ভবতি সা ধিয়াবসুরিতি অলুক্‌সমাসে স্ত্রীলিঙ্গপ্রথমৈকবচনে ধিয়াবসুঃ ইতি।

**যজ্ঞম্**—দেবপূজার্থকাৎ যজধাতোঃ 'যজযাচঃ' ইতি নঙ্‌প্রত্যয়ে দ্বিতীয়ৈকবচনে রূপমিদম্।

***বাজিনীবতী***—বাজেঽন্নম্ আসু ক্রিয়াসু ইত্যর্থে বাজশব্দস্য "অত ইনিঠনৌ" ইতি ইনিপ্রত্যয়ে স্ত্রীলিঙ্গেন ঙীপি বাজিনীতি জাতে, তাঃ অন্নযুক্তাক্রিয়াঃ যস্যাঃ সন্তীত্যর্থে বাজিনীশব্দস্য মতুপ্ প্রত্যয়ে ঙীপ্ প্রত্যয়ে চ প্রথমৈকবচমে বাজিনীবতী ইতি। অত্র 'ছন্দসীরঃ' ইতি মতুপঃ স্থানে বত্বম্।

***অদ্রুহঃ***—'দ্রুহ জিঘাংসায়াম্' ইতি জিঘাংসার্থকদ্রুহধাতোঃ নাস্তি হিংসা যেষামিত্যর্থে 'সম্পাদাদিভ্যঃ ক্বিপ্' ইতি ক্বিপি প্রথমাবহুবচনে অদ্রুহ ইতি পদং নিষ্পন্নম্।

***চোদয়িত্রী***—চুদ্ প্রেরণে ইতি-ধাতোঃ 'ণ্যন্তাত্তৃচ্' ইতি তৃচ্ প্রত্যয়ে 'ঋন্নেভ্যো ঙীপ্' ইতি ঙীপ্ প্রত্যয়ে প্রথমৈকবচনে চোদয়িত্রী ইতি রূপম্। প্রেরয়িত্রী ইত্যর্থঃ।

***বষ্টু***—বশ্ কান্তৌ ইতি ধাতোঃ প্রথমপুরুষৈকবচনে 'আদিপ্রভৃতিভ্যঃ শপঃ' ইতি শপো লুকি ব্রশ্চভ্রশ্চ ইত্যাদিনা ষত্বে বষ্টু ইতি।

***মহো***—শ্রেষ্ঠার্থবাচক 'মহৎ' শব্দস্য ত্কারস্য ব্যত্যয়ে সকারে সকারস্য চ রুত্বে উত্বে গুণে চ মহো ইতি পদম্।

***অর্ণঃ***—অর্তীত্যর্ণঃ। গমনার্থক 'ঋ'ধাতোঃ 'উদকে নুট চ' ইতি অসুন্‌প্রত্যয়ে নুডাগমে অর্ণ ইতি।

***সুরূপকৃত্নুম্***—করোতীতি কৃত্নুঃ। সুরূপোপদাৎ যঃ করোতীত্যর্থে 'কৃহনিভ্যাং ক্নুঃ' ইতি ক্নুপ্রত্যয়ে কিত্ত্বাৎ গুণাভাবে ছান্দসত্বাৎ তকারোপজনে রূপম্।

***সুদুঘাম্***—'সুষ্ঠু দুগ্ধে' ইত্যর্থে সুপপদাৎ দুহ্‌ধাতোঃ 'দুহঃ কব্‌ ঘশ্চ' ইতি কপ্‌প্রত্যয়ে হকারস্য চ ঘকারে স্ত্রীলিঙ্গে আপ্‌প্রত্যয়ে দ্বিতীয়ৈকবচনে রূপম্।

***ঊতয়ে***—রক্ষণার্থকাৎ অব্‌ধাতোঃ "জ্বরত্বরস্রিব্যবিমবামুপধায়াশ্চ"

ইতি উণাদেশে "উতিযূতিজূতিসাতি ··" ইতি ক্তিন্‌প্রত্যয়ে চতুর্থৈক-বচনে উতয়ে ইতি।

***সরস্বতী***—গমনার্থক 'সৃ'ধাতো অসুনপ্রত্যয়ে সরস ইতি-জাতে অস্যা অস্তীত্যর্থে মতুপ প্রত্যয়ে স্ত্রীলিঙ্গে ঙীপি প্রথমৈকবচনে সরস্বতী ইতি পদম্।

***জুহূমসি***— আহ্বানার্থক হ্বে-ধাতোঃ লড়ুত্তমপুরুষবহুবচনে "বহুলং ছন্দসি" ইতি শপঃ শ্লুপ্রত্যয়ে "অভ্যস্তস্য চ" ইতি অভ্যস্ত-কারণস্য হ্বেধাতোঃ প্রাগেব দ্বির্বচনাৎ সম্প্রসারণে হ্বে ধাতোঃ বকারস্থানে উকারে "সম্প্রসারণাচ্চ" ইত্যনেন পরপূর্ব্বত্বে (ধাতো-রন্তঃস্থ-একারস্থানে উকারে) 'হলঃ' ইতি দীর্ঘে হূ ইতি জাতে ততঃ 'শ্লৌ' ইতি দ্বিত্বে হূ হূ ইতি স্থিতে 'হ্রস্ব' ইতি অভ্যাসহ্রস্বে 'কুহোশ্চুঃ' ইতি চুত্বে 'অভ্যাসে চর্চ্চ' ইতি জশত্বে হকারস্থানে জকারে 'ইদন্তো মসিঃ' ইতি ইকারাগমে জুহূমসি ইতি রূপম্।

***দিবেদিবে***—বকারান্তাৎ দিব্‌শব্দাৎ পরস্যাঃ সপ্তম্যাঃ 'সুপাং সুলুক্' ইত্যাদিনা শেভাবে সতি 'নিত্যবীপ্সয়োঃ' ইতি দ্বিভাবে দিবেদিবে।

***অশ্নবৎ***—অশ্নোতের্ধাতোর্লটি ব্যত্যয়েন তিপ্। 'ইতশ্চ লোপঃ' ইতীকারলোপঃ। 'লেটোঽডাটৌ' ইত্যডাগমঃ।

***বক্ষতি***—বহ্‌ধাতোর্লোডর্থে ছান্দসো লেট্। তত্র স্যপ্রত্যয়গতস্য যকারস্য লোপোঽপি ছান্দসঃ। যদ্বা, 'লেটি সিব্‌বহুলম্' ইতি সিপ্‌প্রত্যয়ঃ। 'লেটোঽডাটৌ' ইতি অডাগমশ্চ। ততো বক্ষতীতি সম্পদ্যতে।

***পুরূতমম্***—পূর্বপদাৎ গ্লান্যর্থে 'তমধাতো' অন্তর্ভাবিতণ্যর্থঃ 'পচাদ্যচ্' ইতি অচ্‌প্রত্যয়ে পুরূতমম্ ইতি।

***অশ্বিনা***—অশ্-ধাতোঃ বিনপ্রত্যয়ে অশ্বিন ইতি জাতে সম্বোধন দ্বিবচনে 'সুপাং সুলুক্' ইত্যনেন ঔস্থানে ডাদেশে অশ্বিনা ইতি পদং নিষ্পন্নম্।

***দীদিবিম্***—পুনঃ পুনঃ ভৃশং বা দীব্যতীতি বিগ্রহে দিব্ ধাতোঃ লিটি ছন্দসি কিপ্রত্যয়ে 'লিটি ধাতোরনভ্যাসস্য' ইতি দ্বিত্বে অভ্যাসদীর্ঘে দীদিবিশব্দো নিষ্পন্নস্তস্য দ্বিতীয়ৈকবচনে রূপম্ দীদিবিমিতি। অগ্নের্বিশেষণমিদং দীপ্যমান, দ্যোতমানং বেত্যর্থঃ।

***অপসম*** —আপ্যতে প্রাপ্যতে ফলমনেনেতি আপঃ কর্ম ইত্যস্মাৎ আপ্ ধাতোঃ "আপঃ কর্মাখ্যায়াং হ্রস্বোনুট্ চ" ইতি অসুন্-প্রত্যয়ান্ত আপ্ ধাতোঃ আকারস্থানে অকারে দ্বিতীয়ৈকবচনে উক্তরূপং সিধ্যতি।

***শ্রুধী***—শ্রুধাতোঃ লোটি সিপি "সেহ্যপিচ্চ" ইতি সেহ্যাদেশে "শ্রু শৃণুপৃ কৃবৃভ্যশ্ছন্দসি" ইতি হেধিভাবে "অন্যেষামপি দৃশ্যতে" ইতি ঈকারে শ্রুধী ইতি রূপং ভবতি।

***পূতাসঃ***—পূত-শব্দস্য প্রথমাবহুবচনে আজ্জসেরসুক্ ইতি অসুগাগমে পূতাসঃ ইতি।

***অণ্বীভিঃ***—সৌক্ষ্ম্যবাচক অণশব্দস্য 'বোতো গুণবচনাৎ' ইতি ঙীষিপ্রাপ্তে বাহুলযেন ঙীন্ প্রত্যয়ে তৃতীয়াবহুবচনে অণ্বীভিরিতি।

***বিপ্রজূতঃ***—'ডুবপ বীজতন্তুসন্তানে' ইতি বপ্ ধাতোঃ 'ঋজেন্দ্রাগ্রবজ্রবিপ্র' ইত্যাদিনা রনপ্রত্যয়ে বিপ্রশব্দো নিপাতনে সিদ্ধঃ নিপাতনাদুপধায়া ইকারো লঘূপধগুণাভাবশ্চ। তৈর্জূতঃ প্রাপ্ত ইতি বিপ্রজূতঃ।

***সুতাবতঃ***—সুতশব্দস্যাস্ত্যর্থে মতুপ্ প্রত্যয়ে ছান্দসত্বাদকারস্য দীর্ঘে সুতাবৎ ইতি নিষ্পন্নে তস্য ষষ্ঠ্যেকবচনে সুতাবত ইতি রূপম্।

***সখিভ্যঃ***—'সমানে খ্যঃ স চোদাত্তঃ' ইতি সমানোপপদাৎ খ্যাধাতোঃ ইণ্ প্রত্যয়ে তস্য ডিত্বাৎ টিলোপে তৎসন্নিযোগে খ্যাধাতোঃ যকারলোপে 'চন্দস্যমূর্ধপ্রভৃত্যাদর্কেষু' ইতি উপপদাৎ সমানস্য স্থানে 'স'ভাবে চতুর্থীবহুবচনে সখিভ্যঃ ইতি রূপম্।

***ঋতস্পৃশা***—ঋতোপপদাৎ 'স্পৃশ্ ধাতোঃ শতৃপ্রত্যয়ে 'সুপাং সুলুক্' ইত্যাদিনা প্রথমাবিভক্তেঃ ঔকারস্থানে ডা-দেশে ঋতস্পৃশা ইতি।

***সাধন্তা***—সাধ্ ধাতোঃ রাধসাধসংসিদ্ধাবিতি অস্মাদন্তর্ভাবিণ্যর্থা-ল্লটঃ শত্রাদেশে শ্নু বাধিত্বা ব্যত্যয়েন শপ্ প্রত্যয়ে দ্বিতীয়া-দ্বিবচনে 'সুপাং সুলুক্' ইত্যাদিনা দ্বিতীয়াদ্বিবচনবিভক্তেরাকারাদেশে সাধন্তা।

***ক্রতুম্***—ডুকৃঞ্ করণে ইতি কৃঞ্ধাতোঃ 'কৃঞঃ কতুঃ' ইত্যনেন কতু প্রত্যয়ে কর্মকারকে দ্বিতীয়ৈকবচনে ক্রতুমিতি।

***আশাথে***—অশ্ ধাতোঃ 'ছন্দসি' লুঙ্ লঙ্ লিটঃ' ইতি বর্তমানে লিটি আত্মনেপদমধ্যমপুরুষদ্বিবচনে আশাথে ইতি অত্র নুডভাব-শ্ছান্দসঃ।

***হুবম্***—আহ্বানার্থক হ্বেধাতোঃ 'বহুলং ছন্দসি' ইতি সম্প্রসারণে কৃতে হ্বেধাতোঃ বকারস্থানে উকারে উকারান্তত্বাৎ 'ঋদোরপ্' ইত্যপ প্রত্যয়ে হবম্ ইতি রূপম্।

***হুবে***—'হ্বে' ধাতোঃ 'বহুলং ছন্দসি' ইতি শপো লুকি হ্বঃ সংপ্রসারণম্ ইত্যনুবৃত্তৌ বহুলং ছন্দসি ইতি সম্প্রসারণে উবঙাদেশে হুবে ইতি।

***বরুণম্***—বৃ-ধাতোঃ 'কৃবৃভৃদারিভ্য উনন' ইত্যনেন উনন্ প্রত্যয়ে কর্মকারকে দ্বিতীয়ৈকবচনে বরুণমিতি পদম্।

***দর্শত***—'ভয়দৃশি' ইত্যাদিসূত্রেণ দৃশ্ ধাতোঃ অতচ্ প্রত্যয়ে সম্বোধনৈকবচনে দর্শত ইতি রূপম্।

***এমসি***—'ইদন্তো মসিঃ' ইতি আঙ্ পূর্বকাৎ ইধাতোঃ মসিপ্রত্যয়ে এমসি ইতি রূপম্।

***চেতন্তী***—জ্ঞানার্থকাৎ চিৎ ধাতোঃ শতৃপ্রত্যয়ে স্ত্রিয়ামীপ প্রত্যয়ে চেতন্তী ইতি।

***ঈমহে***—গত্যর্থকাৎ ঈঙ্ ধাতোঃ লট্ লকারস্য উত্তমপুরুষবহুবচনে 'দিবাদিভ্যঃ সন্' ইতি সন্ প্রত্যয়ে 'বহুলং ছন্দসি' ইতি সন্ প্রত্যয়-লোপে নিষ্পন্নম্।

***এহি***—আঙ্ পূর্বকাৎ ইন্ ধাতোঃ লোটি পরস্মৈপদস্য মধ্যমপুরুষৈক বচনে সিস্থানে "সের্হ্যপিচ্চ" ইতি হি আদেশে এহি ইতি।

**পতয়ৎ**—পত্ ধাতোঃ ণিচ্ প্রত্যযে 'অতো লোপঃ' ইত্যকারলোপে স্থানিবত্ত্বাদুপধায়া বৃদ্ধ্যভাবে লটঃ শত্রাদেশে 'ছন্দস্যুভয়থা' ইত্যার্ধধাতুকত্বেন শবভাবে আর্ধধাতুকত্বেঽপি "সর্ব্বে বিধয়শ্ছন্দসি বিকল্প্যন্তে" ইতি 'ণেরনিটি' ইতি ণিলোপাভাবে "সুপাং সুলুক্" ইতি দ্বিতীয়াবিভক্তের্লোপে 'ন লুমতাঙ্গস্য' ইতি প্রত্যয়লক্ষণনিষেধাৎ "উগিদচাম্ সর্ব্বনামস্থানেঽধাতোঃ" ইতি ন নুম্ ইতি পতযৎ ইতি সিদ্ধম্।

**নিদঃ**—কুৎসার্থক নিদিধাতোঃ ক্বিপ্ প্রত্যযে সম্বোধনবহুবচনে নিদ ইতি। অত্র নুমভাবশ্ছান্দসঃ।

**উস্রা ইব**—বিশ্বেষাং দেবানাং সোমং প্রত্যাগমনে উস্রা ইত্যাদির্দৃষ্টান্তঃ উস্রাশব্দঃ সূর্যকিরণবাচী রশ্ময়ঃ ইত্যর্থঃ। উস্রা ইব ইত্যত্র ইবেন সহ নিত্যসমাসো বিভক্ত্যলোপশ্চ।

**পুরুভুজা**—পুরূ বিস্তীর্ণৌ ভুজৌ যযোঃ তৌ ইতি বিগ্রহে পুরুভুজশব্দস্য সম্বোধনদ্বিবচনে 'সুপাং সুলুক্' ইতি ঔস্থানে ডাদেশে পুরুভুজা ইতি।

**ঈশানম্**—ঐশ্বর্যার্থকাৎ ঈশ্ ধাতোঃ শানচ্ প্রত্যযে দ্বিতীয়ৈকবচনে ঈশানম্ ইতি।

**সংস্থে**- সম্যক্ তিষ্ঠতীত্যর্থে সম্‌পূর্বকাৎ স্থা-ধাতোঃ 'আতশ্চোপসর্গে' ইতি ক-প্রত্যযে সপ্তম্যেকবচনে সংস্থে ইতি।

**প্রয়োভিঃ**— প্রীঞ্ধাতোঃ অন্তর্ভাবিতণ্যর্থাদসুন্‌প্রত্যযে তৃতীয়াবহুবচনে রূপম্।

**তূর্ণয়ঃ**—তূর্ণশব্দস্ত্বরাবাচী। ত্বর্ধাতোঃ "বহিশ্রিশ্রুযুদ্রুগ্লাহাত্বরিভ্যো নিৎ" ইতি নিৎপ্রত্যয়ে প্রথমাবহুবচনে তূর্ণযঃ ইতি পদম্।

**অস্রিধঃ**—শোষণার্থকাৎ স্রিধ্ ধাতোঃ 'সম্পদাদিভ্যো ভাবে ক্বিপ্' ইতি ভাববাচ্যে ক্বিপ্ প্রত্যযে নঞা বহুব্রীহিসমাসে সম্বোধনবহুবচনে অস্রিধঃ ইতি।

**জুষন্ত**—সেবনার্থকাৎ জুষ্ ধাতোঃ 'ছন্দসি লুঙ্‌লঙ্‌লিটঃ' ইতি লঙ্ লকারে আত্মনেপদে প্রথমপুরুষবহুবচনে রূপম্। অত্র 'বহুলং ছন্দসি' ইতি অমাঙ্‌যোগেঽপি' ইত্যডাগমাভাবঃ।

***অরিঃ***—হিংসার্থকাৎ ঋধাতোঃ 'অচ ই' ইতি উনাদিসূত্রানুসারেণ ই প্রত্যয়ে প্রথমাবহুবচনস্য ব্যত্যয়েন প্রথমৈকবচনে অরিঃ ইতি।

***পীত্বা***—পানার্থকাৎ পাধাতোঃ ক্ত্বাচ্ প্রত্যয়ে "ঘুমাস্থাগাপা" ইত্যাদিনা আকারস্থানে ঈকারে পীত্বা ইতি।

***বহ্নয়ঃ***—বহ্ ধাতোঃ নিদিত্যনুবৃত্তৌ 'বহিশ্রিশ্রু ...' ইত্যাদিনা নিৎপ্রত্যয়ে বহুবচনে বহ্নয়ঃ ইতি।

***সুভগান্*** -সংহিতায়াং 'দীর্ঘাদটি সমানপাদে' ইতি নকারস্য রুত্বম্। 'ভোভগো' ইতি যত্বম্. 'লোপঃ শাকল্যস্য' ইতি যলোপঃ। তস্যাসিদ্ধত্বন্ন পুনঃ সন্ধিকাযম্। "অতোঽটি নিত্যম্" ইতি আকারস্য সানুনাসিকতা।

***নিষীদত***—উপবেশনার্থক সদ্ ধাতোঃ লোট্লকারে মধ্যমপুরুষ-বহুবচনে "পাঘ্রধ্মাস্থা" ইত্যাদিনা সদেঃ সীদাদেশে 'সদেরপ্রতেঃ' ইতি ষত্বে নিষীদত ইতি।

***পুরূণাম***—পালন পূরণার্থক পৄ ধাতোঃ কুরিত্যনুবৃত্তৌ "পৄভিদিব্যধিগৃধিধৃষিদৃশিভ্যঃ" ইতি কুপ্রত্যয়ে ষষ্ঠীবহুবচনে পুরূণামিতি।

***অন্তমানাম্***—অতিশয়েনান্তিকা ইতি অন্তিকশব্দস্য অতিশায়নে তমপ্। 'তমেতাদেশ্চ' ইত্যনেন তাদিলোপঃ। 'অত ইনিঠনৌ' ইতি ঠন্। ষষ্ঠীবহুবচনে রূপম্ অন্তমানামিতি।

***হরিবঃ***—হরয়োঽস্য সন্তীতি হরিশব্দস্য মতুপ্ প্রত্যয়ে 'ছন্দসীরঃ' ইতি মকারস্য বকারাদেশে 'উগিদচাম্' সর্বনামস্থানেঽধাতোঃ ইতি নুমাগমে সংযোগান্তলোপে নকারস্য 'মতুবসোরু সম্বুদ্ধৌ ছন্দসি' ইতি রু আদেশে প্রথমৈকবচনেরুস্থানে বকারাদেশে রূপমিদম্।

***গোদুহে***—গো উপপদাৎ দুহ্ ধাতোঃ 'সংসৃদ্বিষ ... ...' ইত্যাদিনা ক্বিপ্ প্রত্যয়ে চতুর্থ্যেকবচনে গোদুহে ইতি।

***আগমৎ***—লোডমস্য আঙ্পূর্ব্বকাৎ গচ্ছতিঃ ইতি শব্দস্য ছত্বাভাবঃ উকারালোপশ্চ ছান্দসঃ। ততো রূপমাগমদিতি।

***পুরন্ধ্যাম্***—পুরূপপদাৎ ধাধাতোঃ কি প্রত্যযে স্ত্রীলিঙ্গে ঈপ্ প্রত্যয়ে "পৃষোদরাদীনি যথোপাদিষ্টম্" ইতি উকারস্য অকারাদেশে ঈকারস্য হ্রস্বে সপ্তম্যেকবচনে পুরন্ধ্যাম্ ইতি। অথবা পুরং শরীরং ধাযতে

অস্যামিতি পুরমুপপদাৎ ধাধাতোঃ 'কর্মণ্যধিকরণে চ' ইতি কি-প্রত্যয়ে স্ত্রীলিঙ্গে ঈপ্ প্রত্যয়ে সপ্তম্যেকবচনে পুরন্ধ্যাম্ ইতি। ছান্দসত্বাৎ অলুক্‌সমাসঃ।

***দাশ্বাংস***—'দাশৃদানে' ইতি দানার্থক দাশৃধাতোঃ কসুপ্রত্যয়ে "দাশ্বান্ মাহ্বান্ মীঢ্বাংশ্চ" ইতি নিপাতনাৎ প্রথমাবহুবচনে দাশ্বাংসঃ ইতি। অত্র ক্র্যাদিনিযমপ্রাপ্ত ইডাগমো দ্বির্বচনঞ্চ ন ভবতি।

***এহিমায়াসঃ***—আ সমন্তাদীহতে ইতি আঙ্পূর্বাৎ ঈহ্ধাতোঃ সবধাতুসাধারণে ইন্প্রত্যয়ে প্রথমৈকবচনে 'এহিঃ' ইতি পদস্য সিদ্ধিস্ততঃ এহিমাযা প্রজ্ঞা যেষামিতি বহুব্রীহৌ "আজ্জসেবসুক্" ইতি অসুগাগমে প্রথমাবহুবচনে এহিমাযাস ইতি।

***ওমাসঃ***—'অবন্তি রক্ষন্তি যে তে দেবাঃ' ইত্যর্থে অব্ধাতোঃ "অবিসিবিসিশুষিভ্যঃ কিৎ" ইতি মনপ্রত্যযে 'জ্বরত্বরস্রিবাবিমবামুপধাযাশ্চ" ইত্যুপধাযাঃ অকারস্য স্থানে 'ঊঠ্' আদেশে মন্প্রত্যযস্য কিত্ত্বেঽপি বহুলকাৎ উকারস্য গুণে ওকারে কৃতে আজ্জসেরসুগিতি জসেরসুগাগমে ওমাস ইতি।

***ত্বায়বঃ***—ত্বামিচ্ছন্তীত্যর্থে যুষ্মৎশব্দাৎ "সুপ আত্মনঃ ক্যচ্" ইতি ক্যচ্প্রত্যযে প্রত্যযোত্তরপদযোশ্চেতি মপর্যন্তস্য ত্বাদেশে ক্যাচ্ছন্দসীতি ক্যজন্তাদুপ্রত্যযে প্রথমাবহুবচনে ত্বয়্যব ইতি প্রাপ্তৌ 'যুষ্মদস্মদোরনাদেশ' ইত্যবিভক্তৌ অপি হলাদৌ ব্যত্যযেনাত্বম্ ইতি ত্বাযবঃ ইতি পদং নিষ্পন্নম্। ত্বাম্ কামযমানা ইত্যর্থঃ।

***শবীরয়া***—'কৃশৃপৃকটিপটিশৌটিভ্য ইরন্" ইত্যত ইরন্নিত্যনুবৃত্তৌ "বহুলবচনাদ্ অন্যত্রাপি" ইতি সূত্রেণ শু গত্যাবিতি ধাতোরীরন্ প্রত্যয়ে কৃতে সতি শবীর ইতি জাতে স্ত্রীলিঙ্গে আপ্প্রত্যয়ে শবীরা ইতি স্থিতে তৃতীযৈকবচনে শবীরযা ইতি পদং নিষ্পন্নম্।

***নাসত্যা*** —ন বিদ্যতে অসত্যমনযোরিত্যর্থে নাসত্যশব্দস্য সম্বোধনদ্বিবচনে ডাদেশে নিষ্পন্নমিতি। অত্র নভ্রাণ্ নপান-নবেদানসত্যা ইত্যাদিনা প্রকৃতিবদ্ভাবাৎ নঞো নলোপাভাবঃ।

***ইন্দবঃ***—'উন্দী ক্লেদনে' ইতি উন্দ্ধাতোঃ 'উন্দেবিচ্চাদেঃ' ইতি

ন্প্রত্যয়ে উন্দ্ধাতোরুকারস্থানে ইকাবাদেশে ইন্দুশব্দঃ নিষ্পন্নঃ। তস্য প্রথমাবহুবচনে ইন্দব ইতি।

**ইতা**—গত্যর্থক ইণ্ধাতোঃ লোট্মধ্যমপুরুষবহুবচনে দ্ব্যচোঽতস্তিঙঃ ইতি সংহিতায়াদীং ইর্ঘত্বেতা ইতি।

## ॥ স্বরপ্রক্রিয়া ॥

A. ***স্বরপ্রক্রিয়াগতানি সূত্রানি—***

1 ***অনুদাত্তং পদমেকবর্জম্*** যস্মিন্ পদে যস্য বর্ণস্য উদাত্তস্বরঃ শাস্ত্রেণ বিহিত স্ত বর্ণং পরিত্যজ্য শেষং তৎপদমনুদাত্তং ভবতি।

2) ***উদাত্তাদনুদাত্তস্য স্বরিতঃ***—উদাত্তাৎ পরতো বিদ্য মানস্যানুদাত্তস্য স্বরিতাস্বরো ভবতি।

3) ***স্বরিতাৎ সংহিতায়ামনুদাত্তানাম্*** স্বরিতাৎ পরেষা মনুদাত্তানাং প্রচয়স্বরো ভবতি।

4) ***ফিষোঽন্তউদাত্তঃ*** প্রাতিপদিকং ফিট্। তস্যান্ত উদাত্তঃ স্যাৎ।

5) ***সুপ্‌পিতৌ অনুদাত্তৌ***—সুপঃ পিতশ্চ প্রত্যয়া অনুদাত্তা ভবন্তি।

6) ***ধাতোঃ***– ধাতোরন্ত উদাত্তঃ স্যাৎ।

7) ***আদ্যুদাত্তাশ্চ***–প্রত্যয়ানাম আদ্যুদাত্তস্বরো ভবতি। অত্র প্রত্যয়েন সুপ্‌প্রত্যয়ং তিঙ্‌প্রত্যয়ঞ্চ বিহায় অপরেষাং প্রত্যয়ানাং গ্রহণমিতি বোধ্যম।

8) ***তিঙ্ঙতিঙঃ*** -অতিঙন্তাৎ পদাৎ পরতো বিদ্যমানস্য পাদাদাববর্ত্তমানস্য চ তিঙন্তস্য নিঘাতস্বরো ভবতি। নিঘাতো নাম সর্বানুদাত্তত্বম্।

9) ***একাদেশ উদাত্তেনোদাত্তঃ*** –উদাত্তেন সহ যস্য এক- দেশতা ভবতি তস্যাপি উদাত্তত্বং প্রাপ্যতে।

10) ***সাবেকাচস্তৃতীয়াদির্বিভক্তিঃ*** সাবিতি সপ্তমীবহু- বচনস্য সুশব্দস্য গ্রহণম্। তত্র সৌ য একাচ্ তস্মাৎ পরা তৃতীয়াদির্বি- ভক্তিরুদাত্তা।

11) *ঞ্নিত্যাদির্নিত্যম্*— ঞ্নিত্প্রত্যয়ান্তানাং নিত্ প্রত্যয়ান্তানাঞ্চ শব্দানামাদিরুদাত্তঃ।

12) *চিতঃ*—চিৎপ্রত্যয়ান্তং যৎ পদম্, তস্য সর্ব্বদা অন্তোদাত্তস্বরো ভবেৎ।

13) *লিতি*—লিতি প্রত্যয়াৎ পূর্ব্বমুদাত্তং ভবতি।

14) *কিতঃ* তদ্ধিতস্য কিতোঽন্ত উদাত্তো ভবতি।

15) *তিৎস্বরিতম্* তিৎ স্বরিতং ভবতি।

16) *শতুরনুমোনদ্যজাদি* - অনুম যঃ শতৃপ্রত্যয়স্তদন্তস্য পরা নদী অজাদিশ্চ বিভক্তিরুদাত্তা ভবতি

17) *সমাসস্য*—সমাসা অন্তোদাত্তাঃ স্যুঃ।

18) *বহুব্রীহৌ প্রকৃত্যা পূর্বপদম্*—বহুব্রীহিসমাসে পূর্ব্বপদপ্রকৃতিস্বরঃ ভবতি।

19) *নঞ্সুভ্যাম্*—নঞা স্বিত্যুপসর্গেণ চ সহ বহুব্রীহিসমাসে কৃতে উত্তরপদান্তোদাত্তঃ স্যাৎ।

20) *গতিকারকোপপদাৎ কৃৎ*—এভ্যঃ কৃদন্তং প্রকৃতিস্বরং স্যাত্তৎপুরুষসমাসে।

21) *গতিরনন্তরঃ*—কর্মার্থে ক্তান্তে পরেঽব্যবহিতো গতিঃ প্রকৃত্যা ভবতি।

22) *নিপাতা আদ্যুদাত্তাঃ*— যে যে নিপাতিতাঃ শব্দাস্তে সর্ব্বে আদ্যুদাত্তস্বরা ভবন্তি।

23) *চাদয়োঽনুদাত্তাঃ*—চকারপ্রভৃতীনি কানিচন পদান্যনুদাত্তস্বরাণি ভবন্তি।

24) *আগমা অনুদাত্তাঃ*—আগমরূপেণ যঃ প্রত্যয় আগচ্ছতি স অনুদাত্তঃ স্যাৎ।

25) *অভ্যস্তানামাদিঃ*—উদাত্তঃ স্যাৎ।

26) *তস্য পরমাম্রেড়িতম্*। *অনুদাত্তঞ্চ*। দ্বিরুক্তস্য পরং রূপম্ আম্রেড়িতসংজ্ঞং স্যাৎ। তদনুদাত্তঞ্চ।

27) *অনুদাত্তং সর্বমপাদাদৌ*— যুষ্মদস্মৎশব্দয়োর্যান্য

**ক্রতুম্**—কৃঞ্ ধাতোঃ কতুপ্রত্যয়ঃ। কতুপ্রত্যয়স্বরেণ আদিরুদাত্তঃ। অনুদাত্তং পদমেকবর্জম্। উদাত্তাদনুদাত্তস্য স্বরিতঃ।

**বৃহন্তম্**—প্রাতিপদিকস্বরত্বাদন্তোদাত্তত্বম্।

**আশাথে**—'তিঙ্ঙতিঙঃ' ইত্যনেন সর্ব্বে নিহন্যন্তে।

**অশ্বিনা যজ্বরীঃ ইষঃ দ্রবৎপাণী শুভস্পতী।
পুরুভুজা চনস্যতম্॥** (1. 3. 1.)

**অশ্বিনা**—'আমন্ত্রিতস্য চ' ইতি আদ্যুদাত্তঃ। অনুদাত্তং পদমেকবর্জম্। উদাত্তাৎ পরতো বিদ্যমানস্বরঃ স্বরিতঃ। স্বরিতাৎ পরং প্রচয়স্বরো ভবতি।

**যজ্বরী**—যজ্ ধাতোঃ ঙ্বনিপ্ প্রত্যয়ঃ। 'অনুদাত্তৌ সুপ্ পিতৌ' ইতি সর্বেষামেব প্রত্যয়দেহানামনুদাত্তত্বং জাতম্। যকারোত্তরবর্তিনোঽকারস্য উদাত্তস্বরঃ।

**ইষঃ**—প্রাতিপদিকস্বরস্যান্তোদাত্তত্বম্।

**দ্রবৎপাণী**—'আমন্ত্রিতস্য চ' ইতি আদ্যুদাত্তত্বম্। ন পুনরাষ্টমিকো নিঘাতঃ। অপাদাদৌ ইতি প্রতিষেধাৎ।

**শুভস্পতী**—আমন্ত্রিতস্য ইতি আদ্যুদাত্তঃ। বহুব্রীহৌ পূর্বপদ প্রকৃতিস্বরত্বম্। পতী ইতি তু আমন্ত্রিতং পদম্। পাদাদৌ অবর্তমানত্বাদস্য সর্বনিঘাতঃ।

**পুরুভুজা**—আমন্ত্রিতস্য ইতি আদ্যুদাত্তঃ। বহুব্রীহৌ পূর্বপদপ্রকৃতিস্বরত্বম্।

**চনসাতম্**--অত্র তিঙ্ঙতিঙঃ ইতি সূত্রস্য প্রবৃত্তির্নাস্তি। ক্যচ্ প্রত্যয়ে জাতে ক্যচঃ প্রত্যযস্বরেণোদাত্তত্বম্। অনুদাত্তং পদমেকবর্জম্।

***চোদয়িত্রী সূনৃতানাম্ চেতন্তী সুমতীনাম্।***
***যজ্ঞম্ দধে সরস্বতী*** ॥ (1 3. 11)

**চোদয়িত্রী** চুদধাতোঃ ণিজন্তাত্তৃচ্। চিত্বাদন্তোদাত্তঃ। অনুদাত্তম্ অবশিষ্টম্।

**সূনৃতানাম্**—পরাদিশ্ছন্দসি বহুলমিতি সূত্রং কর্মধারয়সমাসে উত্তরপদস্যাদ্যুদাত্তবোধকম্। ততঃ ঋকারে উদাত্তে জাতে শিষ্টা-অনুদাত্তাঃ।

**চেতন্তী**—ধাতুস্বরস্য উদাত্তত্বে স্বীক্রিয়মাণে শিষ্টমনুদাত্তম্।

**সুমতীনাম্**—সুমতিশব্দস্য মতুপি হ্রস্বত্বাদ্ নামন্যতরস্যাম্ ইতি বিভক্তেরুদাত্তত্বম্। মতুপি যো হ্রস্বস্তদন্তাদন্তোদাত্তাচ্চ পরতো বিদ্যমানস্য নামুদাত্তস্বরো ভবতি।

**যজ্ঞম্**—অত্র প্রত্যয়স্বরস্য উদাত্তত্বম্।

**দধে**—তিঙ্ঙতিঙঃ ইতি নিঘাতঃ।

**সরস্বতী**—সরঃশব্দঃ সর্তেরসুন্নন্তত্বাদাদ্যুদাত্তঃ।

***উপ নঃ সবনা আ গহি সোমস্য সোমপাঃ পিব***
***গোদাঃ ইৎ রেবতঃ মদঃ*** ॥ (1. 4 2.)

**উপ**—নিপাতত্বাদাদ্যুদাত্তঃ।

**নঃ**—অনুদাত্তং সর্বমপাদাদৌ।

**সবনা**—অধিকরণে ল্যুট্। 'লিতি' ইতি প্রত্যয়াৎ পূর্ব্বস্য অকারস্য উদাত্তত্বম্।

**আ**—নিপাতত্বাদাদ্যুদাত্তঃ।

**গহি**—তিঙ্ঙতিঙঃ ইতি নিঘাতঃ।

**সোমস্য**—অত্র ধাতুস্বরস্য আদ্যুদাত্তত্বম্।

**সোমপাঃ**—আমন্ত্রিতস্য চেতি নিঘাতঃ।

**পিব**—তিঙ্ঙতিঙঃ ইতি নিঘাতঃ।

**গোদা**—গোশব্দাদ্দাধাতোর্বিচ্ প্রত্যয়ঃ। চিত্ত্বাদন্তোদাত্তত্বম্

**ইৎ**—নিপাতত্বাদাদ্যুদাত্তত্বম্।

**রেবতঃ**—রৈধাতোর্মতুপি রূপম্। 'হ্রস্বনুড্ভ্যাং মতুপ্' ইতি মতুবুদাত্তঃ।

**মদঃ**—মদোঽনুপসর্গে ইতি অপ্। পিত্ত্বাদনুদাত্তত্বম্।

**সুরূপকৃত্নুম্ ঊতয়ে সুদুঘামিব গোদুহে।**
**জুহূমসি দ্যবিদ্যবি॥ (1. 4. 1)**

**সুরূপকৃত্নুম্**—করোতীতি কৃত্নুঃ। কৃহনিভ্যাং ক্নুঃ। কিত্ত্বাদ গুণাভাবঃ। সমাসান্তোদাত্তঃ।

**ঊতয়ে**—অবতের্ধাতোঃ ক্তিন্নুদাত্তো নিপাতিতঃ।

**সুদুঘাম্ ইব**—দুহঃ কপ্প্রত্যযো হকারস্য চ ঘকারঃ। কপঃ পিত্ত্বাদনুদাত্তত্বে ধাতুস্বরেণোকার উদাত্তঃ। সুশব্দেন গতিসমাসে কৃদুত্তরপদপ্রকৃতিস্বরত্বেন স এব স্বরঃ। ইবেন সমাসো বিভক্ত্যলোপশ্চ পূর্ব্বপদপ্রকৃতিস্বরত্বঞ্চ ইতীবসমাসে স এব।

**গোধুক**—কিপ্প্রত্যয়ান্তং পদম্। কৃদুত্তরপ্রকৃতিস্বরত্বম্।

***জুহূমসি***—ইদন্তো মসিঃ ইতীকারাগমঃ। প্রত্যয়স্বরেণ মকারস্য উদাত্তত্বম্।

***দ্যবিদ্যবি***—দ্যোশব্দঃ প্রাতিপদিকস্বরেণান্তোদাত্তঃ। নিত্যবীপ্সয়োরিতি দ্বির্ভাবঃ। তস্য পরমাম্রেড়িতম্। 'অনুদাত্তং চ' ইতি দ্বিতীয়স্যানুদাত্তত্বম।

***তম্ ত্বা বাজেষু বাজিনম্ বাজয়ামঃ শতক্রতো।***
***ধনানাম্ ইন্দ্র সাতয়ে*** ॥ (1. 4. 9)

***তম্***—প্রাতিপদিকস্বরত্বাদন্তোদাত্তঃ।

***ত্বা***—অনুদাত্তং সর্বমপাদাদৌ ইতি অনুদাত্তত্বম্।

***বাজেষু***—বৃষাদিত্বাদাদ্যুদাত্তঃ

***বাজিনম্***—ইনি প্রত্যযস্বরঃ। অনুদাত্তং পদমেকবর্জম্। উদাত্তাদনুদাত্তস্য স্বরিতঃ।

***বাজয়ামঃ***—পাদাদিত্বাদ্ তিঙ্ঙতিঙঃ ইতি ন নিঘাতঃ। ণিচঃ চিত্বাদন্তোদাত্তত্বম্। শপঃ পিত্ত্বেনানুদাত্তত্বম্।

***শতক্রতো***—আমন্ত্রিতস্য চ ইতি নিঘাতঃ।

***ধনানাম্***—নব্বিষয়স্যানিসন্তস্য ইত্যাদ্যুদাত্তঃ।

***ইন্দ্র***—আমন্ত্রিতনিঘাতঃ।

***সাতয়ে***—উতি-যূতি-জূতি-সাতি-ইতি ক্তিন্নুদাত্তঃ। অনুদাত্তং পদমেকবর্জম্।

***যঃ রায়ঃ অবনিঃ মহান্ সুহপারঃ সুন্বতঃ সখা।***
***তস্মৈ ইন্দ্রায় গায়ত॥*** (1. 4. 10)

**যঃ**—প্রাতিপদিকস্বরত্বাদন্তোদাত্তঃ।

**রায়ঃ**—ঊড়িদংপদাদ্যপ্ ইতি বিভক্তেরুদাত্তত্বম্।

**অবনিঃ**—অব্ধাতোরনিপ্রত্যযঃ। প্রত্যযাদ্যুদাত্তম্। পূর্ব্বমনুদাত্তং, পশ্চাৎ স্বরিতঃ।

**মহান্**—প্রাতিপদিকস্বরত্বাদন্তোদাত্তম্।

**সুপারঃ**—পচাদ্যচ্। চিতঃ ইত্যন্তোদাত্তঃ।

**সুন্বতঃ**—'শতুরনুমো নদ্যজাদী' ইতি বিভক্তিরুদাত্তা।

**সখা**—সমানে খ্যঃ স চোদাত্তঃ ইতীণ্প্রত্যযঃ। সশব্দস্য চোদাত্তঃ।

**তস্মৈ**—প্রত্যযস্বরঃ তচ্ছব্দ উদাত্তঃ– একাদেশ উদাত্তেনোদাত্তঃ।

**ইন্দ্রায়**—রন্প্রত্যযান্তঃ। নিত্বাদাদ্যুদাত্তঃ।

**গায়ত**—প্রত্যয়স্বরস্য উদাত্তত্বম্।

***আ তু আ ইৎ নি সীদত ইন্দ্রম্ অভি প্র গায়ত।***
***সখায়ঃ স্তোমবাহসঃ॥*** (1. 5. 1)

**আ, তু, আ, নি**—নিপাতত্বাদাদ্যুদাত্তঃ।

**ইৎ**—'তিঙ্ঙতিঙঃ' ইতি নিঘাতঃ।

**সীদত**—'তিঙ্ঙতিঙঃ' ইতি নিঘাতঃ।

**ইন্দ্রম্**—রন্‌প্রত্যয়ান্তঃ। নিত্বাদাদ্যুদাত্তঃ।

**অভি**—প্রাতিপদিকান্তোদাত্তত্বম্।

**গায়ত**—তিঙ্‌ঙতিঙঃ ইতি নিঘাতঃ।

**সখায়**—সমানে খ্যঃ স চোদাত্তঃ। সশব্দস্য উদাত্তত্বম্।

**স্তোমবাহসঃ**—স্তৌতের্মন্‌প্রত্যয়ে নিত্বাদাদ্যুদাত্তঃ। বহ্‌প্রাপণে ইতি ধাতোরসুন্‌প্রত্যয়ে বাহ ইতি রূপম্। কৃদুত্তরপদপ্রকৃতিস্বরত্বে প্রাপ্তে গতিকারকযোরপি পূর্ব্বপদপ্রকৃতিস্বরত্বঞ্চ ইত্যৌণাদিকসূত্রাৎ সমাসে আদ্যুদাত্তঃ।

**পুরুহতমম্ পুরূণাম্ ঈশানম্ বার্যাণাম্**
**ইন্দ্রম্ সোমে সচা সুতে॥ (1. 5. 2)**

**পুরুতমম্**—তমু গ্লানে ইতি ধাতোরন্তর্ভাবিতণ্যর্থাৎ পচাদ্যচি চিত্বাদন্তোদাত্তত্বেঽপি কৃদুত্তরপদপ্রকৃতিস্বরং বাধিত্বা পরাদিশ্ছন্দসি বহুলম্ ইত্যুত্তরপদাদ্যুদাত্তত্বম্।

**পুরূণাম্**—পৃ্‌ধাতোঃ কুপ্রত্যয়েন পুরু ইতি পদম্। প্রত্যয়-স্বরেণান্তোদাত্তঃ পুরুশব্দঃ। ততো মতুপি হ্রস্বাদন্তোদাত্তাৎ পুরুশব্দাৎ পরস্য নামো নামন্যতরস্যাম্ ইত্যন্তোদাত্তত্বম্।

**ঈশানম্**—শানচো লসার্বধাতুকানুদাত্তত্বম্। অতএব ঈকারস্য উদাত্তত্বম্। ততঃ স্বরিতঃ।

**বার্যাণাম্**—বৃঙ্‌ধাতোর্ণ্যৎ প্রত্যয়ঃ। ণ্যদন্তস্যাদ্যুদাত্তত্বম্।

**ইন্দ্রম্**—রন্ প্রত্যয়ান্তঃ। নিত্বাদাদ্যুদাত্তত্বম্।

*সোমে* —বন্ প্রত্যযান্তঃ। নিত্ত্বাদাদ্যুদাত্তত্বম্।

*সচা*—ষচ ধাতোঃ ক্বিপ্ প্রত্যয়ে নিষ্পন্নম্। ধাতুস্বরেণাদ্যুদাত্তঃ।

*সুতে* - উতিযূতিজূতি ইত্যাদীনাং শব্দানাং ক্তিন্ প্রত্যযস্য উদাত্তত্বম্।

***অক্ষিতঽঊতি সনেৎ ইমম্ বাজম্ ইন্দ্রঃ সহস্রিণম্।***
***যস্মিন্ বিশ্বানি পৌংস্যা॥*** (1 5 9)

***অক্ষিতঽঊতি*** -অত্র অব্যযপূর্বপদপ্রকৃতিস্বরত্বেন নঞ্ উদাত্তত্বম

***সনেৎ*** -তিঙ্ঙতিঙঃ ইতি সর্বানঘাতঃ

***ইমম্*** —প্রাতিপদিকস্বরত্বাদন্তোদাত্তঃ।

***বাজম্***—বৃষাদিগণে পঠিতত্বাদাদ্যুদাত্তম।

***সহস্রিণম্***—সহস্রমস্যাস্তীতি অত ইনিঠনৌ। প্রত্যযস্বরস্য উদাত্তত্বম্।

***যস্মিন্***—অনুদাত্তৌ সুপ্পিতৌ ইতি অনুদাত্তত্বাদ্ ধাতুস্বর এব শিষ্যতে। যকারস্থিতস্বরস্য উদাত্তত্বম্।

***বিশ্বানি***—বিশ্ ধাতোঃ কন্ প্রত্যযঃ। নিত্ত্বাদাদ্যুদাত্তঃ।

***পৌংস্যা***—ষ্যঞ্ প্রত্যযঃ। ঞিত্ত্বাদাদ্যুদাত্তঃ।

***মা নঃ মর্তাঃ অভি দ্রুহন্ তনূনাম্ ইন্দ্র গির্বণঃ।***
***ঈশানঃ যবয় বধম্॥*** (1. 5. 10)

***মা***—নিপাতত্বাদাদ্যুদাত্তঃ।

**নঃ**—অনুদাত্তং সর্বমপাদাদৌ।

**মর্তাঃ**—মৃধাতোঃ তন্ প্রত্যয়ঃ। নিত্ত্বাদাদ্যুদাত্তঃ।

**অভি**—এবাদীনামন্ত ইত্যন্তোদাত্তঃ।

**দ্রুহন্**—তিঙ্ঙতিঙঃ ইতি নিঘাতঃ।

**তনূনাম্**—অস্যামর্থান্ন পরাঙ্গবদ্ভাবঃ। নকারস্থিতস্য উকারস্য উদাত্তত্বম্।

**ইন্দ্রঃ, গির্বণঃ**—আমন্ত্রিতস্য ইতি নিঘাতঃ।

**ঈশানঃ**-লসার্বধাতুকানুদাত্তত্বে ধাতুস্বর এব শিষ্যতে।

**যবয়ঃ**—তিঙ্ঙতিঙঃ ইতি নিঘাতঃ।

**বধম্**—হন্তেরপ্। উদাত্তনিবৃত্তিস্বরেণ অপ উদাত্তত্বম্।

C. Important accents from suktas : 10, 11, 12.

**অর্কম্**—পুংসি সংজ্ঞায়াং ঘঃ প্রায়েণ ইতি করণে ঘঃ। চকারস্য কুত্বং ককারঃ। প্রত্যয়স্বরেণান্তোদাত্তঃ।

**গায়ত্রিণঃ**—অস্তীত্যর্থে অত ইনিঠনৌ ইত্যনেন গায়ত্রশব্দাৎ ইনি (ইন্) প্রত্যয়ে পুংলিঙ্গে প্রথমাবহুবচনবিবক্ষায়াং গায়ত্রিণ ইতি পদম্। প্রত্যয়স্বরাৎ ইকারস্য উদাত্তসংজ্ঞা।

**বৃষ্ণি**—নি-প্রত্যয়েন বৃষ্ণি ইতি পদং নিষ্পন্নম্। প্রত্যয়াদন্তোদাত্তঃ।

**যুক্ষ্ব**—অত্র যুজ্ধাতুঃ। শ্নমো লোপশ্ছান্দসঃ। সতি শিষ্টত্বেন প্রত্যয়স্বর এব শিষ্যতে। অতোঽন্তোদাত্তত্বম্।

**বৃষণা**—'বৃষু সেচনে' ইতি ধাতোঃ কনিন্‌প্রত্যয়ে 'ঞ্নিত্যাদির্নিত্যম্' ইতি আদ্যুদাত্তঃ।

**কক্ষ্যপ্রা**—কক্ষ্যাং সূত্রং প্রাতঃ পূরয়তঃ পুষ্টত্বাদিতি কক্ষ্যপ্রৌ। প্রা পূরণে ইতি ধাতোঃ আতোঽনুপসর্গে কপ্রত্যয়ঃ। কৃদুত্তরপদপ্রকৃতি-স্বরেণান্তোদাত্তঃ

**বাবণৎ**-বণ্‌ধাতোঃ যঙিপ্রাপ্তে 'যঙোঽচি চ' ইতি যঙ্‌লোপে প্রত্যয়লক্ষণেন দ্বির্ভাবে 'দীর্ঘোঽকিতঃ' ইতি দীর্ঘে ধাতুসংজ্ঞায়াং লিঙর্থে লেটি লেটোঽডাটৌ ইতি অভাগমে কর্তরি শপি বাবণৎ ইতি পদ নিষ্পন্নম। শাপোঽনুদাত্তত্বাৎ ধাতোঽন্তোদাত্ত এব শিষ্যতে। শপা লসার্বধাতুকস্য ব্যবধানাত্তত্র পরতো বিধীয়মানমভ্যস্তানামাদিঃ। ইত্যাদ্যুদাত্তত্ব ন ভবতি। ন চ 'তিঙ্‌ঙতিঙঃ' ইতি নিঘাতঃ, যথাশব্দ-যোগেন 'যাবৎযথাভ্যামিতি নিষেধাৎ।

**দধ্যাশিরঃ**—ধাধাতোঃ 'কন্‌প্রত্যয়ে সতি নিত্বাদাদ্যুদাত্তত্বম্।

**বার্য্যানাম্**—'বৃঙ্‌ সম্ভক্তাবিত্যস্মাৎ' ঋহলোর্ণ্যৎ ইতি ণৎপ্রত্যয়ে তিৎস্বরিতম্ ইতি প্রত্যয়স্বরং বাধিত্বা ইডবন্দবৃশংসদুহাং ণ্যৎ ইতি ণ্যদন্তস্যাদ্যুদাত্তত্বম্।

**সুতপাবে**—সুতং পিবতীতি সুতপাবা। বনিপঃ পিত্বাং ধাতুস্বর এব শিষ্যতে। সমাসে দ্বিতীয়াপূর্ব্বপদপ্রকৃতিস্বরত্বং বাধিত্বা কৃদুত্তর-পদপ্রকৃতিস্বরত্বম

**গির্বণঃ**—গীর্ভিঃ বননীয় ইত্যর্থে গিরপূর্ব্বকাৎ বন্‌ধাতোঃ সর্ব্ব-ধাতুভ্যো ঽসুন ইতি অসুন্‌প্রত্যয়ে গির্বণ ইতি পদে নিষ্পন্নে সতি আমন্ত্রিত পদত্বাৎ সর্ব্বনিঘাতত্বম্।

**জেষঃ**—জেঃ প্রার্থনায়াং লিঙর্থে লেট্। তস্য মধ্যমপুরুষৈকবচনে সিপ্। অডাগমস্যানুদাত্তত্বাৎ ধাতুস্বর এব শিষ্যতে।

*মন্দসানঃ*—অসানচ্ প্রত্যয়ঃ। চিত্ত্বাদন্তোদাত্তঃ।

*আয়ুঃ*—'উসি নি' দিত্যনুবৃত্তাবেতে 'নিচ্চ' ইত্যুসিপ্রত্যয়ঃ। নিত্ত্বাদাদ্যুদাত্তঃ।

*বিশ্বা*—বিশেঃ ক্বন্। নিত্ত্বাদাদ্যুদাত্তঃ।

*জুষ্টয়ঃ*—ক্তিন্ প্রত্যয়ান্তং পদমিদম্। নিত্ত্বাদাদ্যুদাত্তঃ।

*বাজানাম্*—বৃষাদিত্ত্বাদাদ্যুদাত্তঃ।

*বজ্রী*—মত্বর্থীয় ইনিঃ। প্রত্যয়স্বরঃ।

*কারবঃ*—কৃবাপাজি-ইত্যাদিনা উণ্। প্রত্যয়স্বরঃ।

*সহস্রম্*—কর্ম্মাদীনাং চ ইতি দ্বিতীয়াক্ষরমুদাত্তম্।

*বিশ্ববেদসম্*—বহুব্রীহৌ বিশ্বং সংজ্ঞায়াম্ ইতি পূর্বপদান্তোদাত্তত্বম্।

*সুক্রতুম্*—ক্রত্বাদয়শ্চ ইত্যাদ্যুদাত্তত্বম্।

*সদা*—সর্ব্বশব্দাৎ দা প্রত্যয়ঃ। ব্যত্যয়েনাদ্যুদাত্তত্বম্।

*বিশ্পতিম্*—পত্যাবৈশ্বর্যে ইতি পূর্ব্বপদপ্রকৃতিস্বরে প্রাপ্তে 'পরাদিশ্ছন্দসি বহুলম্' ইতি উত্তরপদাদ্যুদাত্তত্বম্।

*রক্ষস্বিনঃ*—মত্বর্থীয়ো বিনি-প্রত্যয়ঃ। প্রত্যয়াদ্যুদাত্তত্বম্।

*ঘৃতাহবন*—আমন্ত্রিতস্য চ ইত্যাদ্যুদাত্তত্বম্।

*দূত্যম্*—যৎ প্রত্যয়ান্তং পদম্। তস্য তিৎস্বরিতাপবাদত্বেন 'যতোঽনাবঃ' ইতি প্রাপ্তমাদ্যুদাত্তত্বং সর্বে বিধয়শ্ছন্দসি বিকল্পন্তে ইতি

নিবর্ততে। অতস্তিংস্বরিতম্ ইত্যেব ভবতি। শেষনিঘাতঃ।

***বর্হিষি*** —ইসি প্রত্যয়ান্তং পদম্। প্রত্যয়স্বরেণেকার উদাত্তঃ।

***ধিয়াবসুঃ***—সাবেকাচঃ ইতি বিভক্তিরুদাত্তা। বহুব্রীহৌ প্রকৃত্যা পূর্ব্বপদম্ ইতি সা এব শিষ্যতে।

***যুবাকবঃ***—কাকুপ্রত্যয়ঃ। প্রত্যয়স্বরেণাকার উদাত্তঃ।

***ধৃষ্ণু***--ত্রসিগৃধিধৃষি-ইত্যাদিনা ক্নুঃ। প্রত্যয়স্বরস্য উদাত্তত্বম্।

***জরিতারঃ***—তৃচ্ প্রত্যযান্তত্বাৎ 'চিতিঃ' ইতি সূত্রেণ তকারাৎ পরম্ আকারস্য উদাত্তত্বে জাতে 'অনুদাত্তং পদমেকবর্জম্' ইত্যনেন সূত্রেণ অবশিষ্টানাং পদানাং অনুদাত্তত্বম্। উদাত্তাদনুদাত্তস্য স্বরিতঃ ইতি রকারস্থিত-অকারস্য স্বরিতস্বরো ভবতি।

***বিপ্রজূতঃ***— রন্ প্রত্যযান্তঃ বিপ্রশব্দো নিপাতিতঃ। রন্-প্রত্যয়ান্তত্বাৎ ঞ্নিত্যাদির্নিত্যম্ ইত্যনেন সূত্রেণ অন্ত্যদাত্তো ভবতি। উদাত্তাদনুদাত্তস্য স্বরিতঃ ইত্যনেন সূত্রেণ প্র ইত্যস্য স্বরিতত্বম্।

***অশ্বীভিঃ***—বোতো গুণবচনাৎ ইতি ঙীষি প্রাপ্তে ব্যত্যয়েন ঙীন্, নিত্বাদাদ্যুদাত্তঃ।

***অপসম্***—অসুন্ প্রত্যয়ঃ। অসুন্ প্রত্যয়ান্তত্বে নিত্বাৎ আদ্যুদাত্তত্বং প্রাপ্তম্। কিন্তু অত্র প্রত্যয়স্বরস্য আদ্যুদাত্তত্বম্ ইতি সমীচীনম্।

***শবীরয়া***—ঈরণ প্রত্যয়ান্তং পদম্। ণিত্বাদাদ্যুদাত্তঃ।

***বরম্***—ব্রিয়ত ইতি বরঃ। "গ্রহবৃ..." ইত্যপ্। ধাতুস্বরেণাদ্যুদাত্তঃ।

***জুহ্বাস্যঃ***—হূয়তে অনয়া ইতি জুহূঃ। হুবঃ ইতি ক্বিপ্‌প্রত্যয়ান্তং পদম্। হুব ইতি পদং প্রাতিপদিকস্বরেণান্তোদাত্তঃ। বহুব্রীহৌ পূর্বপদপ্রকৃতিস্বরত্বেন স এব শিষ্যতে।

***বীরবতীম***—বীরশব্দঃ প্রাতিপদিকস্বরেণান্তোদাত্তঃ। শিষ্টম্ অনুদাত্তং স্বরিতঞ্চ।

***গায়ত্রেণ***—অণ্‌প্রত্যয়ান্তং পদমিদম্। প্রত্যয়স্বরেণ ত্র ইত্যত্র উদাত্তত্বম্।

***নবীয়সা***—ঈয়সুন্‌প্রত্যয়ঃ। নিত্বাদাদ্যুদাত্তঃ।

# Explanations from the extracts of Saiyana-Bhāsya.

1. ‘অগ্নিমীলে’ ইতি সূক্তং প্রাতরনুবাকে আগ্নেয়ে ক্রতৌ বিনিযুক্তম্ । (Hymn. 1)

কৃৎস্নস্য সূক্তস্য বিনিযোগাং ‘অগ্নিমীলে’ ইতি সূক্তস্য সূক্তবিনিযোগঃ। বিনিযোগো নাম কর্মভিঃ সম্বন্ধঃ। তথা চোক্তম্—‘অনেনেদং তু কর্ত্তব্যম্, বিনিযোগঃ প্রকীর্ত্তিতঃ।’ ইতি। স চ দ্বিবিধঃ। সামান্যতঃ বিশেষতশ্চেতি। বিশেষবিনিযোগশ্চ ত্রেধা ভবতি সূক্তবিনিযোগঃ, তৃচাদিবিনিযোগঃ, একৈকস্যা ঋচো বিনিযোগশ্চেতি। সোমযাগে যস্মিন্ দিনে সোমস্য রসং নিষ্কাস্য হোমঃ ক্রিয়তে তৎ সুত্যাদিবসমিতি কথ্যতে। জ্যোতিষ্টোমযাগে প্রাতরনুবাকাভিধানমঙ্গমেকং বিহিতমস্তি। সুত্যাদিনাং পূর্ব্বস্যা রাত্রেরুত্তরার্দ্ধে যদা বিহঙ্গা ন জাগ্রতি, জ্বলন্তি চ নভসি নক্ষত্রাণি তস্মিন্ কালে হোত্রা ঋত্বিজা পঠনীয়ত্বেন বিহিতো মন্ত্র-সমুদায়ঃ প্রাতরনুবাক ইত্যুচ্যতে। অনুচ্যতে পঠ্যতে ইত্যনুবাকঃ। প্রাতর্বিহিতোঽনুবাকঃ ইতি নির্বচনম্। তস্মিন প্রাতরনুবাকে প্রাতর্যা-বাণো দেবাঃ স্তূয়ন্তে। প্রাতর্যাবদেবস্বরূপং চ ঐতরেয়ব্রাহ্মণে বিবৃতম —‘ইমে বৈ দেবাঃ প্রাতর্যাবাণো যদগ্নিরুষা অশ্বিনৌ’ ইতি। এতে চ দেবা গায়ত্র্যাদিসপ্তচ্ছন্দোযুক্তৈর্মন্ত্রৈঃ প্রত্যেকমত্র স্তূয়ন্তে।

অনুবাকেঽস্মিন্ ভাগত্রয়মস্তি। আগ্নেয়ঃ ক্রতুরুষস্যঃ ক্রতুরাশ্বিনঃ ক্রতুশ্চেতি। ক্রতুশব্দেন প্রায়েণ যজ্ঞ ইতি বোধ্যঃ। অত্রতু ক্রতু-শব্দঃ পারিভাষিকঃ। মন্ত্রসমুদায়স্য সংজ্ঞামাত্রং ক্রতুরিতি শব্দত উচ্যতে। তেন প্রাতরনুবাকে অগ্নিদেবতাকো মন্ত্রকদম্বকঃ আগ্নেয়ক্রতুপদবাচ্যঃ।

তত্র প্রাতরনুবাকে আগ্নেয়ে ক্রতৌ গায়ত্রীচ্ছন্দোযুক্তমন্ত্রপাঠপ্রসঙ্গে 'অগ্নিমীলে' ইতি সূক্তং বক্তব্যম্।

2. ***বায়বা যাহীত্যাদয়স্তৃচাঃ প্রউগশস্ত্রে বিনিযুক্তাঃ … প্রউগশস্ত্রং হোত্রা শংসনীয়ম্॥*** (Hymn. 2)

অগ্নিষ্টোমে হোতুঃ ষট্ শস্ত্রাণি ত্রীণি সবনানি চ ভবন্তি। প্রতিসবনে চ শস্ত্রদ্বয়ম্। তত্র প্রাতঃসবনে আজ্যং প্রউগং মাধ্যন্দিনে সবনে নিষ্কেবল্যং মরুত্বতীয়ম্, তৃতীয়সবনে চ বৈশ্বদেবমগ্নিমারুতমিতি। শস্ত্রং নাম গানরহিতা স্তুতিঃ। এবঞ্চ হোতুঃ প্রাতঃসবনগতে শস্ত্রদ্বয়ে ইদং দ্বিতীয়ং শস্ত্রং প্রউগনামকম্। তত্র বায়ুঃ, ইন্দ্রবায়ু, মিত্রাবরুণৌ অশ্বিনৌ ইন্দ্রঃ বিশ্বেদেবা সরস্বতী ইতি সপ্ত দেবতাঃ স্তূয়ন্তে। তত্র প্রতিদৈবতম্ ঋক্ত্রয়মুচ্যতে, তত্তদ্দেবতাগ্রহপাত্রস্থিত সোম হোমাত্মকগ্রহানুষ্ঠানঞ্চ ভবতি। সরস্বত্যাস্তু গ্রহো নাস্তি।

3. ***বায়বো তৃচে প্রথমা গ্রহস্যৈন্দ্রবায়বস্যৈকা পুরোঽনুবাক্যা।*** (Hymn. 2)

তৃচঃ নাম তিসৃণাং ঋচাং সমাহারঃ। অনুবাক্যা নাম হবিগ্রহণাবসরে পঠ্যমানা ঋক্। প্রতিযাগং দেবতাবিশেষমুদ্দিশ্যাহুতী-দীয়তে। তত্র হবিষাং গ্রহণাবসরে যো মন্ত্রো হোত্রা পঠ্যতে সোঽনুবাক্যা পুরোঽনুবাক্যা বেত্যুচ্যতে। অনু আনুকূল্যেন উচ্যতে পঠ্যতে ইত্যনুবাক্যা। পুরতো যাজ্যায়া পঠ্যতে ইতি পুরোঽনুবাক্যা। বায়ুদেবতামুদ্দিশ্য প্রউগশস্ত্রে যস্তৃচঃ পঠ্যতে তস্য যা প্রথমা ঋক্ সা ইন্দ্রবায়ুদেবতাক-গ্রহানুষ্ঠানে পুরোঽনুবাক্যা। গ্রহো নাম বাযাদি-দেবতাগ্রহপাত্রস্থিতসোমহোমাত্মকম্ অনুষ্ঠানম্। এতৎ সর্বমভিপ্রেত্য উক্তং বায়ব্যে তৃচে প্রথমাগ্রহস্য ঐন্দ্রবায়বস্য একা পুরোঽনু বাক্যেতি।

### 4. *আশ্বিনস্তৃচঃ প্রাতরনুবাকস্যাশ্বিনে ক্রতৌ-বিনিযুক্তঃ।* (Hymn 3)

জ্যোতিষ্টোমযাগে প্রাতরনুবাকাভিধানমঙ্গমেকং বিহিতমস্তি। যস্মিন্ দিনে সোমস্য বসং নিষ্কাস্য হোমঃ ক্রিয়তে তস্মাৎ সুত্যাদিনাৎ পূর্বস্যা রাত্রেরুত্তরার্ধে যদা বিহঙ্গা ন জাগ্রতি, জ্বলন্তি চ নভসি নক্ষত্রাণি তস্মিন কালে হোত্রা ঋত্বিজা পঠনীযত্বেন বিহিতো মন্ত্র সমুদাযঃ প্রাতরনুবাক ইত্যুচ্যতে। অনুচ্যতে পঠ্যতে ইত্যনুবাকং প্রাতর্বিহিতঃ অনুবাকঃ প্রাতরনুবাক ইত্যুচ্যতে। তস্মিন প্রাতরনুবাকে প্রাতযাবাণো দেবাঃ স্তূযন্তে। প্রাতযাবদেবস্বরূপং ঐতরেযব্রাহ্মণে বিবৃতম—'ইমে বৈ দেবাঃ প্রাতর্যাবাণো যদাগ্নিরুষা অশ্বিনৌ' ইতি এতে চ দেবাঃ সপ্তচ্ছন্দোযুক্তৈর্মন্ত্রৈ প্রত্যেকমত্র স্তূযন্তে।

অনুবাকেঽস্মিন ভাগত্রযমস্তি। আগ্নেযঃ ক্রতুরুষস্য ক্রতু আশ্বিনঃ ক্রতুশ্চেতি। ক্রতুশব্দস্য প্রাযেণ যজ্ঞ ইত্যর্থঃ। প্রকৃতে সোঽর্থঃ নাভিপ্রেত। মন্ত্রসমুদাযস্য সংজ্ঞামাত্রং ক্রতুরিতি শব্দং উচ্যতে। তেন প্রাতরনুবাকেঽগ্নিদেবতাকো মন্ত্রকদম্বকঃ আগ্নেয ক্রতুপদবাচ্যঃ, উষোদেবতাক উষস্যক্রতুপদবাচ্যঃ আশ্বিনদেবতাকশ্চ আশ্বিনক্রতুপদবাচ্যঃ ইতি ফলিতোঽর্থঃ। অতএব আশ্বিনস্তৃচ জ্যোতিষ্টোমস্য প্রাতরনুবাকনামকাঙ্গে আশ্বিনাভিধানে ক্রতৌ পঠনীযা ইতি সারং।

### 5. *সারস্বতে তৃচে যা প্রথমা সান্বারম্ভণীয়েষ্টৌ সরস্বত্যাঃ পুরোঽনুবাক্যা।* (Hymn 3)

অন্বারম্ভণীযেষ্টির্দর্শপূর্ণমাসৌ আরপ্স্যমানেন যজমানেন কর্তব্যত্বেন বিহিতা "দর্শপূর্ণমাসাবারপ্স্যমানোঽন্বারম্ভণীয়েষ্টিং নির্বপেদিতি"। অরণি মন্থনপূর্ব্বকং শিখোদিতানামগ্নীনামজস্রং ধারণং দ্বাদশদিনপর্যন্তং বাহুগু হোঽনুষ্ঠায় অগ্নিহোত্রাখ্যৌ হোমৌ সাযং প্রাতরনুষ্ঠায পর্বণি প্রাপ্তে

দর্শপূর্ণমাসাখ্যযাগস্তেন কর্তব্যো ভবতি। তত্র যাগারম্ভাৎ প্রাক্ অন্বারম্ভণীয়নামিকেষ্টিরনুষ্ঠীযতে। অস্যামিষ্টৌ পৌর্ণমাসানুষ্ঠানরীতিবদন্বাধানব্রতে অনুতিষ্ঠতি। অন্বাধানেঽত্র কর্মণি প্রধানদেবতাঃ—অগ্নাবিষ্ণু, সরস্বতী সরস্বানগ্নির্ভগীতি। তত্র সরস্বতীদেবতাকে কর্মণি যাজ্যামন্ত্রঃ পুরোঽনুবাক্যামন্ত্রশ্চ ভবতঃ। তত্র অনুবাক্যা নাম হবির্গ্রহণাবসরে হোত্রা পঠ্যমানা ঋক্। পুরতো যাগাৎ অনূচ্যতে ইতি কৃত্বা স মন্ত্রঃ পুরোঽনুবাক্যা শব্দেন ব্যবহ্রিয়তে। এবমন্বারম্ভণীয়েষ্টৌ প্রধানাযাঃ সরস্বত্যাঃ দেবতাযাঃ চরুযাগে অনুবাক্যাত্বেন 'পাবকা ন' ইত্যস্য মন্ত্রস্য বিনিয়োগঃ।

6. ***অভিপ্লবষডহে ব্রাহ্মণাচ্ছংসিনঃ প্রাতঃসবনে স্তোমবৃদ্ধাবাবাপার্থানি সুরূপকৃত্নুমিত্যাদীনি ষট্ সূক্তানি।***

(Hymn 4.)

ষড়্‌ভির্দিনৈরনুষ্ঠীয়মানঃ সোমযাগবিশেষঃ ষড়হশব্দেন উচ্যতে। তস্য চ প্রকারদ্বয়ম্—অভিপ্লবষড়হঃ পৃষ্ঠ্যষড়হশ্চ। তত্র স্থভিতঃ প্লবন্তে যে ষড়হাঃ তে অভিপ্লবষড়হা ইতি কথ্যন্তে। তত্র রথন্তরবৃহতোরেব সাম্নোঃ ষট্‌সু দিনেষু গানং ভবতি। অভিপ্লবে আদ্যন্তিমে অহনি অগ্নিষ্টোমবতী ইতরাণি উক্থ্যবন্তি। উদ্‌গাতৃভিঃ সামগৈঃ সামগানায় ঔপদীয়মানতৃচেষু যথাযথম্ আবৃত্ত্যাদিনা অভিপ্রেতসংখ্যাযুক্তত্বেন ঋচাং সংঘঃ সম্পদ্যতে, স্তোমশব্দেন স উচ্যতে। তেষাং চ স্তোমানাং মধ্যে অসতি বিশেষে প্রাতঃসবনে ত্রিবৃৎস্তোমঃ, মাধ্যন্দিনে পঞ্চদশ তৃতীয়ে সবনে সপ্তদশ ইতি স্তোমা ভবন্তি। বিশেষফললাভায় তু ততোঽধিকস্য স্তোমস্য গ্রহণং কর্তব্যম্। তত্র অভিপ্লবষড়হে ত্রিবৃদাদীনাং স্তোমানাং স্থানে উত্তরস্তোমানামপি গ্রহণং ভবতি। যত্র চ যাদৃশঃ স্তোম উক্তঃ তদপেক্ষয়া উত্তরস্য তদধিকস্য স্তোমস্য তত্র গ্রহণং স্তোমবৃদ্ধিশব্দেনোচ্যতে।

স্তোমসাদৃশ্যং তু ঋক্‌সংখ্যাদ্বারেণ দেবতাদ্বারেণ ছন্দোদ্বারেণ চ। স্তোমবৃদ্ধৌ সত্যাং স্তোত্রসাদৃশ্যকরণায় মৈত্রাবরুণ ব্রাহ্মণাচ্ছংসিঅচ্ছাবাকৈঃ

ঋত্বিগ্‌ভিঃ স্তোমবৃদ্ধৌ যৎ শংসনাযম্‌ তন্নির্দ্দিষ্টাদধিকং শংসনীয়ম্‌ আবাপশব্দেনোচ্যতে। সোমস্য সবনাখ্যানি ত্রীণি রসনিষ্কাশনানি ভবন্তি। প্রতিসবনম্‌ অনেকানি স্তোত্রাণি শস্ত্রাণি চ পঠনীযাণি। তত্র প্রাতঃসবনে যদি আবাপঃ কর্ত্তব্যঃ ভবতি তদা সুরূপকৃত্নুমিত্যাদীণি সংহিতাযামুক্তাণি ষট্‌সূক্তানি আব পার্থং গ্রহীতব্যানি তত্র ষণ্ণামেব সূক্তানাং যুগপৎ পঠনমিতি নার্থঃ কিন্তু তদধিকেনাভিপ্রেযমানস্বসংখ্যাপূর্ত্তিপর্যন্তং সুরূপ-কৃত্নুমিত্যাদিসূক্ততঃ গ্রাহ্যাঃ।

7. *আদ্যানি ত্রীণি সূক্তানি মহাব্রতে নিষ্কেবল্যা ঔষ্ণিহতৃচাশীতৌ শস্তব্যানি*। (Hymn. 4)

Or, *মহাব্রতে নিষ্কেবল্যশস্ত্রে ঔষ্ণিহতৃচাশীতৌ ত্রস্য সানসিং রয়িমিত্যাদিকে দ্বে সূক্তে*। (Hymn. 8)

সোমযাগবিকৃতিভূতস্য গবামযনসত্রস্য সংবৎসরসাধ্যস্য সপ্তমে মাসি উপান্তিমমহর্মহাব্রতশব্দেনোচ্যতে। অনেকবিশেষযুক্তত্বাদস্য মহাব্রতত্বম। অযমপি সোমযাগ এব। সোমযাগসামান্যে চ ত্রিঃ সোমস্য সবনং ভবতি। সবনং নামাণুষ্ঠানসহিতং সোমরস নিষ্কাসনম্‌। মহাব্রতেঽপি প্রাতঃ, মাধ্যন্দিনং সাযঞ্চেতি সবনত্রযং ভবতি। প্রতিসবনমনেকানি স্তোত্রাণি শস্ত্রাণি চোচ্যন্তে। শস্ত্রকর্ত্তারশ্চ হোতৃপ্রভৃতযশ্চত্বারঃ ঋত্বিজঃ। তত্র হোতৃকর্ত্তৃকম্‌ নিষ্কেবল্যং মাধ্যন্দিন গতমাজ্যং শস্ত্রম্‌। শস্ত্রং নাম অপ্রগীতমন্ত্রসাধ্যাগুণিনিষ্ঠগুণাভিধানম্‌।

তত্র মহাব্রতে মাধ্যন্দিনে সবনে নিষ্কেবল্যশস্ত্রে পক্ষ্যাকারত্বেন কল্পিতে পঞ্চ বিশিষ্টা ভাগা কল্পন্তে। ভাগপঞ্চকশংসনোত্তরং তত্রোক্ত-পক্ষ্যাকারস্য নিষ্কেবল্যশস্ত্রস্য অনুষ্ঠানীযত্বেন তিস্রঃ তৃচাশীতযঃ শংসনীযাঃ। তত্র গাযত্রতৃচাশীতিঃ প্রথমা, বার্হতৃচাশীতির্দ্বিতীযা, ঔষ্ণিহতৃচাশীতিঃ তৃতীযেতি। এবঞ্চ মহাব্রতং যদ্যপি সত্রান্তর্গতং সত্রস্যোপান্ত্যমহমিত্যুক্তং পূর্ব্বং তথাপি সর্ব্বদা পৃথক্‌ স্বাতন্ত্র্যেণাপ্যনুষ্ঠীযতেঽবেষ্টিন্যাযেন। এবং

ভাগবিশিষ্টে শংসনীয়ে উক্তনিষ্কেবল্যশস্ত্রে উষ্ণিক্‌ছন্দোযুক্ততৃচাশীতিমধ্যে সুরূপকৃত্নুম্। আত্বেতা যুঞ্জতি ব্রধ্নম্ ইতি ত্রীণি সূক্তানি শস্তব্যাণীতি বিশেষবিনিয়োগো ভাষ্যকারেণ প্রদর্শিতঃ।

*৪. চতুর্বিংশেঽহনি মাধ্যন্দিনে সবনে ব্রাহ্মণাচ্ছংসিনঃ সুরূপকৃত্নুমূতয়ে ইতি বৈকল্পিকঃ স্তোত্রিয়স্তৃচঃ।*

(Hymn. 4)

সোমযাগস্য বিকৃতিষু অনেকেষু একো যাগো গবাময়নম্। অয়ং ক্রতুঃ সংবৎসরসাধ্যঃ। অস্য ত্রেধা পক্ষঃ পূর্ব্ব উত্তরো মধ্যমশ্চেতি। পূর্ব্বস্মিন্ পক্ষসি ১৮০ দিনানি, উত্তরস্মিন্ ১৮০ দিনানি, মধ্যে তু একমেব দিনম্। তত্র প্রথমমাসস্য দ্বাত্রিংশৎদিনানি, ষষ্ঠে মাসি চ অষ্টাত্রিংশৎ-দিনানি। প্রথমে মাসি প্রথমান্তিমে দিনে পরিত্যক্তব্যে। প্রথমং দিনং প্রায়নীয়ম্। অন্তিমঞ্চোদয়নীয়ম্। মধ্যগতস্য ত্রিংশৎদিনস্য দ্বিতীয় দিনং চতুর্বিংশশব্দেন ব্যবহ্রিয়তে। তস্মিন্ দিনে যানি স্তোত্রাণি ক্রিয়ন্তে তেষাং চতুর্বিংশস্তোমকত্বম্। অতএব তস্য দিনস্য চতুর্বিংশ ইতি নাম সম্পদ্যতে। তস্মিন্ দিনে ব্রাহ্মণাচ্ছংসিনঃ শংসনীয়ো যঃ স্তোত্রিয়স্তৃচঃ স বৈকল্পিকঃ ইতি। ব্রাহ্মণাচ্ছংসী ইতি শব্দাভিধেয়ঃ কশ্চন ঋত্বিক্। এবং চাস্মিন্ গবাময়নসত্রে দ্বিতীয়ে প্রারম্ভনীয়নামকে চতুর্বিংশাপর-নামকেঽহনি মাধ্যন্দিনে সবনে ব্রাহ্মণাচ্ছংসিনঃ সুরূপকৃত্নুমিতি বৈকল্পিকঃ স্তোত্রিয়ঃ তৃচঃ ভবতীত্যর্থঃ। এতদুক্তং ভবতি উক্তে অহনি মাধ্যন্দিনে সবনে ব্রাহ্মণাচ্ছংসিন একাদশস্তোত্রিয়ানুরূপযুগলানি উচ্যন্তে—তং বো দস্মমিত্যাদিনা। এবমেকাদশতৃদ্বিকা ব্রাহ্মণাচ্ছংসিকৃতে উচ্যন্তে। তত্র সামগৈর্যত্তৃচদ্বয়গতে যস্মিংস্তৃচে স্তুবয়তে তত্তৃচদ্বয়গতোঽপরতৃচো ব্রাহ্মণা-চ্ছংসিনা অনুরূপতয়া বক্তব্যঃ। এবঞ্চ, 'সুরূপকৃত্নুমূতয়ে, শুষ্মিন্তমন্ন উতয়ে' ইতি তৃচদ্বয়ে যদা সামগাঃ শুষ্মিন্তমন্ন উতয়ে ইতি তৃচে স্তুবীরংস্তদা ব্রাহ্মণাচ্ছংসিনা সুরূপকৃত্নুমূতয়ে ইতি তৃচোঽনুরূপতয়া

শংসনীয ইতি। এতেষামেকাদৃশানাং সমকার্যকরত্বমিতি বিকল্প ইতি ইতি বৈকল্পিক ইত্যুক্তং ভাষ্যে, তৃচ ইত্যনেন ঋকৃত্রযং গ্রহীতব্যম্।

## ৯. *অগ্নিষ্টোমে বৈশ্বদেবশস্ত্রে "স্বরূপকত্নুমূতয়ে" ইতি ধায্যা* I (Hymn. 4)

অগ্নিষ্টোমো নাম সোমলতাসাধ্যানাং যাগানাং প্রকৃতিভূতস্য জ্যোতিষ্টোমযাগস্য প্রথমা সংস্থা। সোমযাগসামান্যে চ ত্রিঃ সোমস্য সবনং ভবতি। তত্র অগ্নিষ্টোমে সোমযাগে হোতুঃ প্রতিসবনং শস্ত্রদ্বযং ভবতি আজ্যং প্রউগমিতি প্রাতঃসবনে, নিষ্কেবল্যং মরুত্বতীযম্ ইতি মাধ্যন্দিনে সবনে, বৈশ্বদেবম্ অগ্নিমারুতমিতি তৃতীযসবনে চেতি। তত্র তৃতীযসবনগতশস্ত্রদ্বযে প্রথমশস্ত্রে বৈশ্বদেবাখ্যে স্বরূপকত্নুমূতযে ইত্যেকা ঋগ্ ধায্যাত্বেনার্ভবসূক্তাৎ পূর্বং শংসনীযা। তদুক্তং ব্রাহ্মণে—'তে এতে ধায্যে অনিরুক্তে প্রাজাপত্যে শস্যেতে অভিত আর্ভবং সুরূপকত্নুমূতযে, অয বেনশ্চোদযেৎ পৃশ্নিগর্ভা' ইতি। এতদাশ্বলাযনেনাপ্যুক্তমিতি হেতোঃ ভাষ্যকৃতা আশ্বলাযনশ্রৌতসূত্রস্থানং নির্দিষ্টং সুরূপকত্নুমিত্যাদিনা। ধায্যা নাম দ্বযোমন্ত্রযোর্মধ্যে পঠনীযা ঋক্। ধীযতে অনযা সমিদিতি ধায্যা ঋক্।

## 10. *বিশেষবিনিয়োগস্তু অতিরাত্রে তৃতীয়পর্যায়ে মৈত্রাবরুণশস্ত্রে স্তোত্রিয়োঽয়ং তৃচঃ* (Hymn. 5)

অভিপ্লবষডহে ব্রাহ্মণাচ্ছংসিনঃ প্রাতঃসবনে স্তোমবৃদ্ধাবাবাপার্থানি সুরূপকৃত্নুমিত্যাদীনি ষট্সূক্তানি। তত্র 'আত্বেতি' দ্বিতীযং দশর্চং সূক্তমিতি সামান্যবিনিযোগঃ। বিশেষবিনিয়োগস্তু সূক্ত-তৃচ-ঋক্রূপেণ ত্রিবিধঃ। এবম্ 'আত্বেতি' তৃচঃ অতিরাত্রে তৃতীয়পর্য্যাযে মৈত্রাবরুণশস্ত্রে স্তোত্রিয়রূপেণ বিনিযুজ্যতে।

সোমযাগস্য সপ্ত সংস্থা ভবন্তি। অতিরাত্রনামকঃ সোমস্য সংস্থা-বিশেষঃ। তত্র ষোড়শিপর্যন্তমনুষ্ঠায় তত ঊর্দ্ধং ত্রয়ঃ পর্যায়া রাত্রৌ অনুষ্ঠীয়ন্তে। তদ্বশতোঽস্যাতিরাত্রমিতি নামঃ। পর্যায়ো নাম আবৃত্তিঃ। পর্যায়ে চত্বারো গণাঃ সন্তি। ষোড়শ্যনন্তরং রাত্রিপর্য্যায়ত্রয়ানুষ্ঠানম্। তেষু চ পর্যায়েষু প্রতিপর্য্যায়ং হোতা হোত্রকাশ্চ মৈত্রাবরুণব্রাহ্মণাচ্ছংস্য-চ্ছাবাকরূপাস্ত্রয়ো মিলিত্বা চত্বারঃ শস্ত্রাণি শংসন্তি। তত্র হোতুশ্চমসস্য মুখ্যত্বে হোত্রকচমসস্যামুখ্যত্বে একো গণো ভবতি। মৈত্রাবরুণচমসস্য মুখ্যত্বে তদিতরেষাং চমসানামমুখ্যত্বে দ্বিতীয়ো গণঃ, ব্রাহ্মণাচ্ছংসিনশ্চম-সস্য মুখ্যত্বেঽপরেষাং চ পূর্ব্ববদমুখ্যত্বে তৃতীয়ো গণঃ, অচ্ছাবাকচমসস্য মুখ্যত্বে চ চতুর্থো গণঃ। তত্র প্রথমগণদ্বয়েঽধ্বর্যুঃ প্রচরতি। উত্তর-গণদ্বয়ে চ প্রতিপ্রস্থাতা এবং গণচতুষ্টয়ানুষ্ঠানং প্রথমঃ পর্যায়ঃ। এবমেব দ্বিতীয়ঃ পর্যায়ঃ, এবমেব চ তৃতীয়ঃ পর্যায়ঃ। তেম্বেতেষু পর্যায়েষু প্রতিপর্যায়ং শস্ত্রচতুষ্টয়ম্, হোতুরেকং হোত্রকানাঞ্চ ত্রয়ম্।

তত্র তৃতীয়ে পর্যায়ে মৈত্রাবরুণস্য শস্ত্রে স্তোত্রিয়ত্বেন আত্বেতি তৃচস্য বিনিয়োগ ইত্যর্থঃ। অনেকদিবসৈরনুষ্ঠেয়েষু সোমযাগেষু মৈত্রা-বরুণাদিভিঃ ঋত্বিগ্‌ভিঃ স্বীয়শস্ত্রশংসনাবসরে তদ্দিবসীয়োদ্গাতৃণাং স্তোত্রে সামগানার্থং যস্তৃচঃ উপাত্তঃ তস্য শংসনং কর্ত্তব্যং ভবতি। স চায়ং তৃচঃ স্তোত্রিয়শব্দেনোচ্যতে। তৃচ ইত্যনেন ঋক্‌ত্রয়ং গ্রহীতব্যম্।

## 11. *যুঞ্জন্তীত্যসৌ তৃচস্তৃতীয়ে রাত্রিপর্য্যায়ে ব্রাহ্মণাচ্ছংসিনোঽনুরূপঃ* (Hymn. 6)

সোমযাগে সাকল্যেন সপ্ত সংস্থা ভবন্তি। সংস্থা নাম স্তোত্রেণ ক্রতুপারমঃ। অর্থাৎ যেন স্তোত্রেন ক্রতুঃ সমাপ্যতে তৎস্তোত্রনাম আদায় তৎক্রতোঃ নাম সম্পাদ্যতে। তত্রাতিরাত্র ইতি সোমস্য চতুর্থী সংস্থা। ষোড়শীসংস্থায়া ঊর্দ্ধং যদি অতিরাত্রস্তোত্রেণ ক্রতুঃ সমাপ্যতে তর্হি অতিরাত্রসংজ্ঞকো ভবতি স ক্রতুঃ। তস্যাং সংস্থায়াং চত্বারি

স্তোত্রাণি ভবন্তি। তেষাং চতুর্ণাং ত্রিসবনভেদেন ত্রিভিঃ পর্যায়ৈঃ গানং ভবতি। (অর্থাৎ ত্রিষু পর্যায়েষু অতিরাত্রস্তোত্রাণি মিলিত্বা সাকল্যেন দ্বাদশসংখ্যকানি সম্পাদ্যন্তে ইতি স্থিতিরস্তি।) তৎ এব পর্যায়া বা ত্রিপর্যায়া উচ্যন্তে। পর্যায়ো নাম তৃচস্য সমুদিতস্যাবৃত্তিঃ। তেষু চ পর্যায়েষু প্রতিপর্যায়ং হোতা হোত্রকাশ্চ মৈত্রাবরুণব্রাহ্মণাচ্ছংস্যচ্ছাবাকরূপাস্ত্রয়ো মিলিত্বা চত্বারি শস্ত্রাণি শংসন্তি। শস্ত্রং নাম অপ্রগীতমন্ত্রসাধ্যগুণিনিষ্ঠগুণাভিধানম্। তত্র হোতৃশ্চমসস্য মুখ্যত্বে হোতৃকচমসস্যামুখ্যত্বে একো গণো ভবতি। মৈত্রাবরুণচমসস্য মুখ্যত্বে অপরেষাং চমসানামমুখ্যত্বে দ্বিতীয়ো গণঃ। ব্রাহ্মণাচ্ছংসিনশ্চমসস্য মুখ্যত্বেঽপরেষাঞ্চামুখ্যত্বে তৃতীয়ো গণঃ। অচ্ছাবাকস্য মুখ্যত্বে চ চতুর্থো গণঃ। এবং গণচতুষ্টয়ানুষ্ঠানং প্রথমঃ পর্যায়ঃ। এবমেব দ্বিতীয়ঃ তৃতীয়ঃ পর্যায়শ্চ। অতএব ভাষ্যকারেণ স্তোত্রাণাং শস্ত্রাণাঞ্চ বিনিয়োগাবসরে প্রথমপর্যায়ে দ্বিতীয়পর্যায়ে তৃতীয়পর্যায়ে ইত্যেবং শব্দা উচ্যন্তে। প্রকৃতে যুঞ্জন্তীতি ঋক্ ত্র্যম্ অতিরাত্রে তৃতীয পর্যায়ে ব্রাহ্মণাচ্ছংসিনামকেনর্ত্বিজা ক্রিয়মাণে শস্ত্রে অনুরূপত্বেন বিনিযুজ্যতে।

12. ***অতিরাত্রে প্রথমে পর্যায়েঽচ্ছাবাকশস্ত্রে এন্দ্র সানসিমিতি সূক্তম্।*** (Hymn 8)

Same as No. 11. From সোমযাগে সাকল্যেন ........ ... ইত্যেবং শব্দা উচ্যন্তে।

Then add the following extract :—

প্রকৃতে এন্দ্র সানসিং রয়িমিতি সূক্তম্ জ্যোতিষ্টোমে অতিরাত্রসংস্থায়াং প্রথমে পর্যায়ে অচ্ছাবাককর্তৃকে শস্ত্রে বিনিযুজ্যতে ইত্যস্য বিনিযোগঃ কীর্ত্তিতঃ ভাষ্যকারেণ।

13. ***বিশেষস্তুতিরাত্রে দ্বিতীয়পর্যায়েঽচ্ছাবাকশস্ত্রে ইন্দ্রেহীত্যানুরূপস্তৃচঃ।*** (Hymn. 9)

Same as No. 11. সোমযাগে সাকল্যেন .... শব্দা উচ্যন্তে।

**Then add the following extracts :—**

প্রকৃতে ইন্দ্রেহীত্যনুরূপতৃচঃ জ্যোতিষ্টোমেঽতিরাত্র সংস্থায়াম্ দ্বিতীয়ে পর্য্যায়ে অচ্ছাবাককর্তৃকে শস্ত্রে বিনিযুজ্যতে ইত্যস্য বিনিয়োগঃ কীর্ত্তিতঃ ভাষ্যকারেণ।

## 14. *দর্শযাগে ইন্দ্রযাজিনঃ সান্নায্যস্যানুবাক্যা।*

(Hymn. 8)

দর্শপূর্ণমাসাভ্যাং 'স্বর্গকামো যজেত' ইতি বাক্যেন স্বর্গোদ্দেশেন দর্শপূর্ণমাসৌ যাগৌ বিহিতৌ। তত্র পূর্ণমাসে আগ্নেয়ঃ, উপাংশুযাজঃ, অগ্নিষোমীয় ইতি ত্রযো যাগাঃ। দর্শযাগেঽপি আগ্নেয়পুরোডাশযাগ ঐন্দ্রো দধিদ্রব্যকো যাগঃ ঐন্দ্রঃ পয়োদ্রব্যকো যাগ ইতি যাগত্রয়ং বিহিতম্। এবং মিলিত্বা দর্শপূর্ণমাসয়োঃ ষট্ প্রধানযাগা ভবন্তি। তত্রদর্শযাগে দধি পয়শ্চ পৃথক্ পৃথক্ সংপাদ্য যাগকালে উভৌ সংমেল্য সকৃদেব দ্বয়োর্যাগঃ ক্রিয়তে। দধিপয়সোর্মিলিতয়োঃ সান্নায্যমিতি সংজ্ঞা যাজ্ঞিকানাম্। তদ্দ্রব্যকো যাগো হি সান্নায্যযাগঃ। এবং শ্রুতে 'নাসোমযাজী সন্নয়েৎ' ইতি বাক্যেন যো যজমানঃ অসোমযাজী ভবতি অর্থাৎ সোমযাগং ন কৃতবান্ স সান্নায্যযাগং ন কুর্য্যাদিতি। এবঞ্চ সান্নায্যযাগে তস্যৈবাধিকারো য কৃতসোমযাগঃ। তথা চ প্রকৃতে ইন্দ্রযাজিনঃ সান্নায্যযাগং কর্ত্তুম্ অধিকারবতো যজমানস্য যঃ সান্নায্যযাগস্তস্য যাগস্য 'এন্দ্র সানসিং রয়িং সজিত্বানম্' ইতি মন্ত্রঃ পুরোঽনুবাক্যারূপেণ বিনিযুজ্যতে। পুরোঽনুবাক্যা নাম হবির্গ্রহণাবসরে হোত্রা পঠ্যমানো মন্ত্রঃ।

## 15. (a) *অভিপ্লবষড়হস্যোক্থ্যে তৃতীয়সবনেঽচ্ছাবাকস্য গায়ন্তীতি স্তোত্রিয়স্তৃচঃ।*

Or, (Hymn. 10)

(b) *অভিপ্লবষড়হগতোক্থ্যেষচ্ছাবাকস্য তৃতীয়-সবন 'উক্থ্যমিন্দ্রায় শংস্য'মিত্যনুরূপস্তৃচঃ।*

Or, (Hymn. 10)

(c) *অভিপ্লবষড়হস্যোক্থ্যেষু তৃতীয়সবনেঽচ্ছা-বাকস্য পুরাংভিন্দুর্যুবা কবিরিতি স্তোত্রিয়স্তৃচঃ।* (Hymn. 11)

সোমযাগস্য বিকৃতিভূতোঽভিপ্লবষড়হনামকঃ কশ্চন ষড়্ভির্দিনৈ-রনুষ্ঠীয়মানো যাগবিশেষঃ। তত্র প্রথমে এবং ষষ্ঠে চ দিবসেঽগ্নি-ষ্টোমবদনুষ্ঠানং মধ্যমেষু চতুর্ষহঃসু উক্থ্যনামকসোমসংস্থানুষ্ঠানং ভবতি। তত্র মধ্যবর্ত্যুক্থ্যনামকসোমযাগে তৃতীয়সবনে অচ্ছাবাকনামকর্ত্বিজা স্বীয়শস্ত্রশংসনাবসরে "গার্যন্তি ত্বা গার্যত্রিণ" ইত্যাদিস্তৃচঃ স্তোত্রিয়ত্বেন বিনিযুক্তঃ। সোমযাগে চ ত্রিঃ সোমরসনিষ্কাশনং ক্রিয়তে তচ্চ রস-নিষ্কাশনং সবনশব্দেনোচ্যতে। প্রতিসবনং চানেকানি স্তোত্রাণি শস্ত্রাণি চোচ্যন্তে। তত্র জ্যোতিষ্টোমে দ্বাদশ স্তোত্রাণি দ্বাদশ শস্ত্রাণি ভবন্তি। তত্র হোত্রা প্রাতঃসবনে আজ্যং প্রউগমিতি শস্ত্রদ্বয়ম্, মাধ্যন্দিনে নিষ্কেবল্যং মরুত্বতীযম্ চেতি শস্ত্রদ্বয়ম্, তৃতীয়েসবনে বৈশ্বদেবমাগ্নি-মারুতমিতি শস্ত্রদ্বয়ং শস্যতে। তদ্গণস্থৈঃ অপরৈশ্চ মৈত্রাবরুণব্রাহ্মণা-চ্ছংস্যচ্ছাবাকনামকৈঃ ঋত্বিগ্ভিঃ প্রাতঃসবনে এবং তৃতীয়সবনে একৈকং শস্ত্রাণি শস্যতে। উক্থ্যনামকে সোমযাগে চোক্তদ্বাদশ শস্ত্রাণি শস্ত্বা তত ঊর্দ্ধং ত্রীণি অধিকানি শস্ত্রাণি শংসনীযাণি ভবন্তি। অতএব অস্যোক্থ্যনামকশব্দব্যবহার্যতা।

Then for 15 (a) and (c), add the following extract :—

তত্র অচ্ছাবাকেন তৃতীযসবনে স্বীযশস্ত্রশংসনাবসরে এষ তৃচঃ স্তোত্রিয়ত্বেনাপেক্ষ্যত ইতি বিনিয়োগোঽস্য প্রতিপাদিতঃ। যদা পুনরনেক-দিনৈরনুষ্ঠেযা ভবন্তি সোমযাগা স্তদানীমভিপ্লবাদিষু যাগেষু ব্রাহ্মণা-

চ্ছংস্যাদিভিঃ ঋত্বিগ্‌ভিঃ স্বীয়শস্ত্রশংসনাবসরে তদ্দিবসীয়ে উদ্গাতৃণাং স্তোত্রে সামগানার্থং যস্তৃচ উপাত্তস্তস্য শংসনং কর্ত্তব্যং ভবতি। স চায়ং তৃচঃ স্তোত্রিয়শব্দেনোচ্যতে।

For 15 (b), add the following extracts :--

তত্র অচ্ছাবাকেন তৃতীয়সবনে স্বীযশস্ত্রশংসনাবসবে এষ তৃচঃ অনুরূপত্বেনাপেক্ষ্যত ইতি বিনিয়োগোঽস্য প্রতিপাদিতঃ। যদা পুনরনেকদিনৈবনুষ্ঠেযা ভবন্তি সোমযাগ স্তদানীম্ অভিপ্লবাদিষু যাগেষু ব্রাহ্মণাচ্ছংস্যাদিভিঃ ঋত্বিগ্‌ভিঃ স্বীযশস্ত্রশংসনাবসবে পবস্মিন্দিনে যস্মিংস্তৃচে উদ্গাতৃভির্গানং করিষ্যতে তস্য তৃচস্য পূর্ব্বস্মিন্ দিনে স্তোত্রিয়শংসনোত্তরং শংসনং কর্ত্তব্যং ভবতি। তস্য চাস্য পরদিবসীয়সামস্তোত্রিয়স্য তৃচস্য পূর্ব্বস্মিন্ দিনে অনুরূপশব্দেন ব্যবহারঃ ক্রিয়তে যাজ্ঞিকৈঃ।

16. ***পৃষ্ঠ্যাস্য পঞ্চমে অহনি নিষ্কেবল্যশস্ত্র ইন্দ্রং বিশ্বা অবীবৃধন্নিত্যনুরূপস্তৃচঃ।*** (Hymn. 11)

জ্যোতিষ্টোমে গবাময়নে বা যৎ পৃষ্ঠস্তোত্রং ভবতি তৎ ষট্‌দিনানি ভবন্তি অর্থাৎ পৃষ্ঠ্যষডহশব্দেন ব্যবহ্রিয়মানানীমানি দিনানি। এতৈঃ ষড়্‌ভির্দিনৈরনুষ্ঠীযমানো যাগোঽপিষড়হ ইত্যুচ্যতে। অয়ঞ্চ সোমযাগ এব। অয়ং ষড়হো দ্বিপ্রকারঃ। একস্তু অভিপ্লবষড়হশব্দেন অপরস্তু পৃষ্ঠ্যষড়হশব্দেন ব্যবহ্রিয়তে। তৎ ষট্‌সু দিনেষু রথন্তরবৃহতোঃ সাম্নোঃ আবৃত্ত্যা গানে সতি অভিপ্লবষড়হশব্দেন ব্যবহারঃ। অর্থাৎ তস্মিন্ ষড়হে প্রথমতৃতীয়পঞ্চমেষু দিনেষু রথন্তরং সাম দ্বিতীয়চতুর্থষষ্ঠেষু দিনেষু বৃহৎসাম ভবতি। যত্র তু রথন্তরং বৃহদ্বৈরূপ বৈরাজং শাক্করং রৈবতমিতি যন্নাং সাম্না গানং ভবতি তত্র পৃষ্ঠ্যষড়হশব্দেন ব্যবহারঃ। অভিপ্লব আদিমঞ্চান্ত্যং চ'হনী অগ্নিষ্টোমবদিতরাণি

উক্থ্যাবং। পৃষ্ঠ্যো আত্মং চতুর্থং চাহনী অগ্নিষ্টোমষোড়শীবাজিতরাপ্যু-ক্থ্যাবদিতি। তত্র পৃষ্ঠ্যষড়হস্য সোমযাগরূপত্বাত্তত্র সোমযাগবৎ প্রতিদিনং ত্রীণি সবনানি ভবন্তি। সবনং নামানুষ্ঠানসহিতং সোমবল্লীতো রস-নিষ্কাসনম্। প্রতিসবনং চ অনেকানি স্তোত্রাণি শস্ত্রাণি চোচ্যন্তে। তত্র পৃষ্ঠ্যষড়হে যৎ পঞ্চমং দিনং শাক্বরাখ্যসামযুতমুক্থ্যাবদনুষ্ঠীয়তে তস্মিন্ দিনে মাধ্যন্দিনে সবনে হোত্রা ক্রিয়মাণয়োঃ শস্ত্রয়োঃ নিষ্কেবল্য-মিত্যাখ্যং শস্ত্রম্। শস্ত্রং নাম গানরহিতকেবলমন্ত্রপাঠেন দেবতাবিষয়কা স্তুতিঃ। তস্মিন্ নিষ্কেবল্যশস্ত্রে 'ইন্দ্রং বিশ্বা অবীবৃধন্' ইত্যয়ং তৃচঃ অনুরূপত্বেন বিনিযুজ্যতে। যদা অনেকদিনৈরনুষ্ঠেয়া ভবন্তি সোমযাগাস্ত-দানীম্ অভিপ্লবাদিষু যাগেষু ব্রাহ্মণাচ্ছংস্যাদিভিঃ ঋত্বিগ্‌ভিঃ স্বীয়শস্ত্র-শংসনাবসরে পরস্মিন্ দিনে যস্মিংস্তৃচে উদ্গাতৃভির্গানং করিষ্যতে তস্য তৃচস্য পূর্বস্মিন্ দিনে স্তোত্রিয়শংসনোত্তরং শংসনং কর্তব্যং ভবতি। তস্য চাস্য পরদিবসীয়সামস্তোত্রিয়স্য তৃচস্য পূর্বস্মিন্ দিনে অনুরূপ-শব্দেন ব্যবহারঃ ক্রিয়তে যাজ্ঞিকৈঃ।

17. *তথা পৃষ্ঠ্যষড়হস্য দ্বিতীয়েহহনীদমেব সূক্তমাজ্যশস্ত্রম্।* (Hymn. 12)

Same as No. 16. জ্যোতিষ্টোমে গবাময়নে.........শস্ত্রাণি চোচ্যন্তে।

Then add the following extracts :—

তত্র প্রাতঃসবনে হোত্রা ঋত্বিজেন আজ্যং প্রউগমিতি শস্ত্রদ্বয়ং শস্যতে। শস্ত্রং নাম গানরহিতকেবলমন্ত্রপাঠেন দেবতাবিষয়কা স্তুতিঃ। এবং পৃষ্ঠ্যষড়হে যৎ দ্বিতীয়ং দিনং বৃহৎসামযুতমুক্থ্যাবদনুষ্ঠীয়তে তস্মিন্ন-হনি প্রাতঃসবনে আজ্যশস্ত্রত্বেন সূক্তমিদং বিনিযুজ্যতে।

18. *পত্নীসংযাজে ত্বষ্টুঃ পুরোঽনুবাক্যোঽহ ত্বষ্টারমগ্রিয়মিতি।* (Hymn. 13)

পত্নীসংযাজ ইতি কেচন হোমবিশেষাঃ দর্শপূর্ণমাসযাগস্য অঙ্গভূতাঃ। তত্র প্রৈষাশ্রাবণপ্রত্যাশ্রাবণাদিষু যথাযথং কৃতেষ্বধ্বর্যুর্গার্হপত্যস্যোত্তরার্ধে জুহুয়াৎ। তত্র সোম, ত্বষ্টা, দেবপত্ন্যঃ, রাকা, সিনীবালী, কুহূঃ, অগ্নির্গৃহপতিরিতি সপ্তসংখ্যকা দেবতা ভবন্তি। রাকাদীনাং তিসৃণাং হোমা নিত্যাঃ কামাশ্চ ইতরেষাং নিত্য এব। তত্র সর্বত্রোদ্দেশ্যত্যাগো যজমানেন পত্ন্যা চেত্যুভাভ্যাং কর্ত্তব্যঃ। তত্র পত্নীসংযাজে ত্বষ্টৃদেবতাকে হোমে ত্বষ্টারমগ্রিয়মিতি ঋক্ পুরোঽনুবাক্যাত্বেন পঠ্যেত ইতি বিশেষবিনিয়োগে ঋগ্ বিনিয়োগোঽত্র ভাষ্যকারেণ প্রদর্শিতঃ। অনুবাক্যা নাম অধ্বর্যুণা অনুব্রূহীতি প্রৈষে দত্তে হবির্গ্রহণাবসরে হোত্রা পঠ্যমানা ঋক্। পুরতো যাগাৎ অনুচ্যতে ইতি কৃত্বা স মন্ত্রঃ পুরোঽনুবাক্যাশব্দেনাপি ব্যবহ্রিয়তে।

19. *বিনিয়োগস্তু পশৌ সুসমিদ্ধো ন আবহেতি কাণ্বমাপ্রীসুক্তম্।* (Hymn. 13)

দর্শপূর্ণমাসযাগে প্রধানযাগাৎ পূর্ব্বং "প্রযাজৈশ্চরন্তি" ইত্যাদিনা প্রযাজাখ্যযাগবিশেষা অঙ্গত্বেন বিহিতাঃ। তে চ পঞ্চসংখ্যকা ভবন্তি। ইমে চ পঞ্চ প্রযাজা দর্শযাগস্য বিকৃতিভূতে অগ্নীষোমীয়পশুযাগে অতিদেশেন প্রাপ্তাঃ। এবং সতি "প্রকৃতিবদ্বিকৃতিঃ কর্ত্তব্যা" ইতি ন্যায়েন দর্শপূর্ণমাসয়োঃ যে পঞ্চ প্রযাজাস্তে পশুযাগেঽপি কর্ত্তব্যাঃ। এবঞ্চ অগ্নীষোমীয়পশুযাগে দর্শযাগতঃ পঞ্চসংখ্যাকেষু প্রযাজেষু প্রাপ্তেষু সৎস্বপি তৎপ্রকরণগতেন 'একাদশপ্রযাজান্ যজতি' ইতি বাক্যেন প্রযাজেষু একাদশত্বসংখ্যা তত্র সমাপতিতা। অতএব একাদশসংখ্যকাঃ প্রযাজাস্তত্র প্রাপ্তাঃ তত্র প্রযাজানাং যাগরূপত্বাৎ প্রতিপ্রযাজং

পৃথক্ পৃথক্ মন্ত্র আবশ্যকঃ। প্রকৃতে চ 'সুসমিদ্ধো ন আবহে'তি কণ্বর্ষিদৃষ্টে আপ্রীসূক্তে কথিতানাং সর্ব্বেষাং মন্ত্রাণাম্ অগ্নীষোমীয়পশুযাগে একাদশসু প্রযাজেষু প্রথমমারভ্য অন্তিমপর্যন্তং বিনিযোক্তব্যম্। একাদশ প্রযাজা ইতি খণ্ডে চ সূত্রিতম্—সমিদ্ধো অদ্যেতি সর্ব্বেষাং যথাঋষি বা ইতি।

## 20. *ব্যূঢদ্বাদশাহস্য প্রথমে ছন্দোমে তৃতীয়সবনে বৈশ্বদেবশস্ত্রে এভিরগ্নে দুবো গির ইতি সূক্তম্।*

(Hymn. 14)

জ্যোতিষ্টোমস্য বিকৃতির্হি দ্বাদশাহঃ। জ্যোতিষ্টোমযাগে চ দশ ধারাগ্রহাঃ দশ আসারগ্রহাশ্চ বিহিতা বর্ত্তন্তেঐন্দ্রবায়বং গৃহ্নাতি, মৈত্রাবরুণং গৃহ্নাতি, আশ্বিনং গৃহ্নাতি ইত্যাদয়ঃ। তেষু গ্রহেষু নিমিত্তভেদেন জ্যোতিষ্টোমে অগ্রতা বিহিতা। অর্থাৎ অস্মিন্ নিমিত্তে সতি অয়ং গ্রহঃ প্রথমং গ্রাহ্য ইতি। তত্র রথন্তরবৃহৎসাম্নোঃ জ্যোতিষ্টোমে বিকল্পো বর্ত্ততে। যদা রথন্তরসামা জ্যোতিষ্টোমস্তদা ঐন্দ্রবায়বস্য গ্রহস্যাগ্রতা। যদা বৃহৎসামা জ্যোতিষ্টোমস্তদা শুক্রগ্রহস্যাগ্রতা। অয়ম গ্রতাগুণঃ দ্বাদশাহে অতিদিশ্যতে। ইমমেম গুণমাদায় দ্বাদশাহস্য দ্বৈবিধ্যমাপততি—ব্যূঢদ্বাদশাহঃ সমূঢদ্বাদশাহশ্চেতি। সামভেদেন প্রাপ্তানাং গ্রহাগ্রতানাং ব্যুৎক্রমেণ বহনং যস্মিন্ দ্বাদশাহে ভবতি স দ্বাদশাহো ব্যূঢ় ইতি ব্যবহ্রিয়তে। ব্যূঢপ্রকারশ্চায়ম্—ঐন্দ্রবায়বাগ্রৌ প্রায়ণীযোদয়নীয়ৌ। অথেতরেষাং দশানামহ্নাম্ ঐন্দ্রবায়বাগ্রং প্রথমমহঃ, অথ শুক্রাগ্রম্। অথ দ্বে আগ্রয়ণাগ্রে, অথৈন্দ্রবায়বাগ্রম্, অথ দ্বে শুক্রাগ্রে, অথ আগ্রয়ণাগ্রম্, অথ দ্বে ঐন্দ্রবাযবাগ্রে। সমূঢদ্বাদশাহে তু গ্রহাগ্রতানাং ব্যুৎক্রমো ন ভবতি। কিন্তু ঐন্দ্রবায়বঃ শুক্র আগ্রয়ণশ্চেতি ত্রয়াণাং গ্রহাণাং ক্রমেণ সর্ব্বেষু দিনেষু অগ্রতা ভবতি।

তত্র চ ব্যূঢসংজ্ঞকে দ্বাদশাহক্রতৌ যানি অষ্টমনবমদশমদিনানি তেষাং ছন্দোমশব্দেন যাজ্ঞিকব্যবহারঃ। তেষাঞ্চ ছন্দোমদিনানাং প্রথমে

ছন্দোমে দ্বিতীয়ে ছন্দোমে তৃতীয়ে ছন্দোমে ইত্যাদিরূপেণ ব্যবহারঃ কৃতো ভাষ্যকারেণ। দ্বাদশাহস্য চ জ্যোতিষ্টোমবিকৃতিভূতত্বাৎ সোমযাগরূপত্বমেব। অতএব সোমযাগবত্তত্রাপি প্রতিদিনং ত্রীণি সবনানি ভবন্তি। সবনং নামানুষ্ঠানসহিতং সোমবল্লীতো রসনিষ্কাসনম্। প্রতিসবনং চানেকানি স্তোত্রাণি শস্ত্রাণি চোচ্যন্তে। স্তোত্রাণি উদ্গাতৃভিঃ ক্রিয়ন্তে। শস্ত্রকর্ত্তারশ্চ হোতৃপ্রভৃতয়শ্চত্বারঃ। তত্র হোতুঃ শস্ত্রষট্কেষু তৃতীয়সবনগতশস্ত্রদ্বয়ে বৈশ্বদেবমিতি আদ্যং শস্ত্রম্। শস্ত্রং নামাপ্রগীতমন্ত্রসাধ্যগুণিনিষ্ঠগুণাভিধানম্। তস্মিন্ ব্যূঢ়দ্বাদশাহক্রতুগতস্য প্রথমছন্দোমদিনস্য অর্থাৎ দ্বাদশাহস্য অষ্টমদিনস্য তৃতীয়সবনে হোত্রা ক্রিয়মাণে বৈশ্বদেবশস্ত্রে "এভিরগ্নে দুবো গিরঃ" ইতি সূক্তং বিনিযুজ্যতে ইতি বিশেষবিনিয়োগোঽস্য প্রদর্শ্যতে ভাষ্যকারেণ।

21. *বাজপেয়েঽতিরিক্তস্যোক্থ্যে বিভ্রাড়িত্যেকা শস্ত্রযাজ্যা।* ( বিভ্রাট্সূক্তম্ )

বাজপেয়নামা সোমযাগো 'বাজপেয়েন স্বরাজ্যকামো যজেত' ইতি বাক্যেন বিহিতঃ। অয়ং যাগো জ্যোতিষ্টোমস্য বিকৃতিভূতঃ। অতএব জ্যোতিষ্টোমে যানি স্তোত্রাণি শস্ত্রাণি চ সন্তি তানি তস্মাদতিদেশেন আত্রগচ্ছন্তি। তত্র উক্থ্যস্তোত্রেষু অতিদেশেনাগতেষু তদতিরিক্তমুক্থ্যস্তোত্রং বাজপেয়ে বিহিতমস্তি। তস্মিন্ বিভ্রাড়িত্যয়ং মন্ত্রঃ শস্ত্রযাজ্যাত্বেন বিনিযুজ্যতে। শস্ত্রযাজ্যা নাম প্রতিসোমযাগং তেষু তেষু শস্ত্রেষু সমাপ্তেষু সৎসু অধ্বর্য্যুণা আহবনীয়েঽগ্নৌ চমসেন কশ্চন হোমঃ ক্রিয়তে। তস্মিন্ হোমে হবিষোঽগ্নৌ প্রদানাবসরে হোত্রা পঠ্যমানো যো যাজ্যামন্ত্রঃ স শস্ত্রস্যান্তিমো মন্ত্রো ভবতি। অর্থাৎ শস্ত্রাণামন্তিমস্যৈব মন্ত্রস্য অধ্বর্য্যুকর্তৃকহোমে যাজ্যাত্বেন বিনিয়োগো ভবতি। প্রকৃতে যদুক্থ্যস্তোত্রং শস্ত্রং বা তত্রায়ং মন্ত্রোঽন্তিমো ভবতি। অতএব শস্ত্রযাজ্যাত্বেন অস্য বিনিয়োগঃ। তথাহি আশ্বলায়নেন মন্ত্রস্যাস্য বিনিয়োগঃ সূত্রিতঃ—বিভ্রাড্ বৃহৎ পিবতু সোম্যং মধ্বিতি যাজ্যা তস্য গবাং শতানামিতি।

# Additional বিনিয়োগs

1. অভিপ্লবষড়হস্য মধ্যবর্ত্তিষুক্থ্যেষু তৃতীয়সবনে মৈত্রাবরুণস্যাগ্নে যং যজ্ঞমিত্যাদিকো বৈকল্পিকোঽনুরূপস্তৃচঃ। (Hymn 1)

2. অগ্নিষ্টোমে সুত্যাদিনে সূর্যোদয়াৎ পূর্ব্বং প্রেষিতো হোতা প্র তরনুবাকমনুব্রূয়াৎ। (Hymn. 1)

3. মিত্রং হুব ইতি মৈত্রাবরুণস্তৃচো গবাময়ন আরম্ভণীয়ে চতুর্বিংশেঽহনি প্রাতঃসবনে মৈত্রাবরুণস্য স্তোত্রিয়ঃ। ((Hymn 2)

4. চতুর্বিংশেঽহনি প্রাতঃসবনে ব্রাহ্মণাচ্ছংসিশস্ত্র আদহ স্বধামন্বিতি দ্বে ঋচৌ। (Hymn. 6)

5. চতুর্বিংশেঽহনি ব্রাহ্মণাচ্ছংসিনঃ শস্ত্র ইন্দ্রমিদ্গাথিন ইতি ষড়হস্তোত্রিয়স্তৃচঃ। (Hymn 7)

6. অভিপ্লবষড়হস্যোক্থ্যেষু তৃতীয়সবনেঽচ্ছাবাকস্য ষট্স্তোত্রিয়ানুরূপযুগলেষু দ্বিতীয়স্মিন্যুগল 'আ শ্রুৎকর্ণেতি' তৃচোঽনুরূপঃ।

((Hymn. 10)

7. বিনিযোগস্তু মহাব্রতে নিষ্কেবল্যে কৃৎস্নং সূক্তং শংসনীয়ম্

(Hymn 11)

8. বিনিয়োগস্তু প্রাতরনুবাক আগ্নেয়ে ক্রতৌ গায়ত্রে ছন্দসি অগ্নিং দূতমিতি সূক্তম্। Hymn 12)

9. পবমানেষ্টৌ পাবকস্যাগ্নেরনুবাক্যা স নঃ পাবক দীদিব ইতি।

(Hymn. 12)

* পূর্ববর্তী বিনিয়োগগুলির মধ্যে ইহাদের উত্তর রহিয়াছে।

# Answers on terms of Sayana Bhasya

1. a) স্তোত্রাণি শস্ত্রাণি চ গুণকর্ম্মাণি উত প্রধান-কর্ম্মাণি? উভয়োঃ কঃ ফলভেদঃ?

b) সান্নায্যং নাম কিম্? তত্র কস্যাধিকারঃ?

c) সংযাজ্যা ইতি শব্দেন কিং গৃহ্যতে?

d) অন্বারম্ভণীয়েষ্টিঃ কুত্র ক্রিয়তে? কা তত্র দেবতা?

e) পত্নীসংযাজাঃ কুত্রানুষ্ঠীয়ন্তে? কাস্তত্র দেবতাঃ? অমী বিষয়কাঃ সাধু প্রতিপাদ্যতাম্।

a) স্তোত্রশস্ত্রানাং প্রধানকর্মত্বমুত গুণকর্মত্বমিতি মীমাংসায়ামনেকৈঃ সূত্রৈঃ বিচারিতং বিভিন্নবিভিন্নোদাহরণপুঃসরম্। তত্র স্তোস্ত্রাণি শস্ত্রাণি চ যাজ্যাপুরোঽনুবাক্যাবৎ দেবতাস্মারকত্বেন যজ্ঞাঙ্গী-ক্রিয়ন্তে তর্হি পূর্বোক্তগুণকর্মলক্ষণস্য প্রকৃতে সত্ত্বাৎ গুণকর্মত্বমেষাং সিধ্যতি ইতি পূর্ব্বপক্ষিণঃ আশয়ঃ। তত্রেদং সূত্রম্—"স্তুতশস্ত্রয়োস্তু যাজ্যাবদ্দেবতাভিধানত্বাৎ" ইতি। যথা যাজ্যামন্ত্রপঠনং দেবতা-ভিধানত্বাৎ সংস্কারকর্ম্ম ভবতি, তথৈব স্তুতশস্ত্রয়োরপি ইতি পূর্ব্ব-পক্ষিণো মতম্।

তত্র সিদ্ধান্তী বদতি—যদি সংস্কারকর্মত্বং স্তুতশস্ত্রয়োস্তর্হি মাহেন্দ্রং গৃহং গৃহ্নাতি ইতি বাক্যবিহিতযাগসন্নিধৌ শ্রুতস্য ইন্দ্রদেবতা-প্রকাশকস্য 'অভি ত্বা শূরো নোনুম দুগ্ধা ইব ধেনব' ইত্যাদের্মন্ত্রস্য প্রকৃতমহেন্দ্রদেবতাপ্রকাশনে সামর্থ্যাভাবাৎ যত্রেন্দ্রদেবতাকং কর্ম্ম ভবেত্তত্রাস্যোৎকষঃ স্যাৎ। প্রধানবাদিনো মম মতে তু দেবতা-প্রকাশনরূপপ্রয়োজনাভাবাৎ তস্য মন্ত্রস্য মহেন্দ্রগ্রহযাগে এব নিবেশো ভবিতুমর্হতি।

তদনন্তরং পূর্ব্বপক্ষী বশান্যায়েন স্তোত্রশস্ত্রয়োঃ গুণকর্ম্মত্বং সাধয়িতুমিচ্ছতি। কশ্চন পশুযাগঃ 'সা বা এষা সর্ব্বদৈবত্যা যদজা বশা বায়ব্যামালভেত ইতি বাক্যেন বায়ুদেবতাকো বশাদ্রব্যকো বিহিতঃ। দ্রব্যন্তু অস্মিন্ কর্মণি অজাবশারূপম্। মন্ত্রে তু ছাগস্য বপায়া মেদসোঽনুব্রূহীতি ছাগশব্দঘটিতঃ শ্রূয়তে। অত্র ছাগশব্দেনৈব বশাত্বগুণবিশিষ্টস্য দ্রব্যস্য বোধনমভীপ্সিতম্ যথা, তথৈব ইন্দ্রশব্দেনৈব মহেন্দ্রস্য বোধনং যদি ভবেত্তর্হি মহেন্দ্রস্যোৎকর্ষো ন সিধ্যতি। মহত্বশব্দযোগমাত্রেণ ইন্দ্রোঽনিন্দ্রো ন ভবতি। ইন্দ্রঃ মহেন্দ্রশ্চ এক এব। অতো গুণকর্ম্মত্বমেব স্তোত্রশস্ত্রাণাং বর্ত্ততামিতি।

অত্র সিদ্ধান্তী বদতি—মহেন্দ্রস্য দেবতাত্বং তদ্ধিতপ্রত্যয়সমধিগম্যমস্তি। 'মাহেন্দ্রং গ্রহং গৃহ্ণাতী'তি। মহেন্দ্রশব্দাদণ্ প্রত্যয়ঃ। অতো মহেন্দ্রো দেবতা। তামিমাং দেবতামিন্দ্রশব্দঃ কথং বোধয়িতুং সমর্থো ভবেৎ। অতএব যত্র ইন্দ্রো দেবতা তত্র ইন্দ্রদেবতাঘটিতস্যৈব মন্ত্রস্য পুরোঽনুবাক্যাত্বং যাজ্যাত্বং বা। যত্র চ মহেন্দ্রো দেবতা তত্র তচ্ছব্দঘটিতস্যৈব যাজ্যাপুরোঽনুবাক্যারূপত্বম্। বশান্যায়ে তু ছাগশব্দো বশাত্বগুণবিশিষ্টস্য দ্রব্যস্য বোধনে সমর্থঃ। বশা নাম বন্ধ্যা ইত্যর্থঃ। সা চ ছাগত্বজাতাবপি অস্তীতি ছাগশব্দেনৈব বক্তুং শক্যতে। ইন্দ্রপদং মহেন্দ্রপদং তু ন তথা। অতঃ প্রধানকর্ম্ম। কিঞ্চ, স্তৌতি, শংসতি ইতি ধাত্বোঃ শক্তিঃ গুণাভিধানে বর্ত্ততে, ন তু গুণিনঃ কীর্ত্তনে। এবং সতি অভিধেযার্থস্য গুণকীর্ত্তনস্য সংগ্রহো ভবতি প্রধানকর্ম্মত্বে।

বাক্ত্রামবর্তমানানা বর্ত্তমানানাং চ গুণানাং কীর্ত্তনং স্তোত্রমিতি লোকে ব্যবহারঃ। স্তবঃ স্তোত্রং স্তুতির্নুতিরিতি কোষঃ। এবং বেদেঽপি স্তোত্রশব্দেন গুণকীর্ত্তনমবগম্যতে। তত্তু দেবতাগতং গানযুক্তঞ্চ। তত্র তু বিনৈব গানেন গুণাঃ কীর্ত্যন্তে তত্রা শস্ত্রসংজ্ঞকং তদ্ ভবতি। সোমযাগে এব স্তোত্রাণাং শস্ত্রাণাঞ্চ সম্বন্ধো নান্যত্র। স্তোত্রাণি গানযুক্তত্বাৎ সামবেদীযৈরুদ্গাত্রাদিভিঃ ঋত্বিগ্ভিঃ গীয়ন্তে, শস্ত্রাণান্তু গানবিহীনঋঙ্মন্ত্রত্বাদৃগ্বেদীযৈর্হোত্রাদিভিরেব তেষাং শংসনং বিধাতব্যম্।

b) দর্শযাগে আগ্নেয়পুরোডাশযাগ ঐন্দ্রো দধিদ্রব্যকো যাগ ঐন্দ্রঃ পয়োদ্রব্যকো যাগ ইতি যাগত্রয়ং বিহিতম্। তত্র দধি পয়শ্চ পৃথক্ পৃথক্ সম্পাদ্য যাগকালে উভৌ সম্মেল্য সকৃদেব দ্বয়োযাগঃ ক্রিয়তে। দধিপয়সোঃ মিলিতয়োঃ সান্নায্যমিতি সংজ্ঞা যাজ্ঞিকানাম্। তদ্ দ্রব্যকো যাগো হি সান্নায্যযাগঃ।

সোমযাজিন এব সান্নায্যযাগানুষ্ঠানেঽধিকার ইত্যেকং মতম্। তদাঽসোমযাজিন (হবির্যাজিনা) তয়োঃ স্থানে ইন্দ্রাগ্নঃ পুরোডাশদ্রব্যকো যাগঃ কর্ত্তব্যতয়া বিহিতঃ। হবির্যাজিনোঽপি তত্রাধিকার ইত্যপরম্।

c) স্বিষ্টকৃদ্যাগসম্বন্ধিনৌ যৌ যাজ্যাপুরোঽনুবাক্যাত্মকৌ ঋচৌ তয়োরেব সংযাজ্যে ইতি সংজ্ঞা। সংযাজ্যে ইতি বচনং যত্র যত্রৈব ভবতি তত্র তত্রৈব যাজ্যাপুরোঽবাকায়োর্মন্ত্রয়োঃ স্বিষ্টকৃৎসম্বন্ধঃ নিশ্চিতঃ।

d) বেদোক্তপ্রক্রিয়য়া অরণিমন্থনপূর্বকং নিষ্পাদিতানামাহবনীয়াদীনাম্ অজস্রং ধারণং দ্বাদশদিনপর্যন্তং বাস্ততোঽনুষ্ঠায় অগ্নিহোত্রাখ্যহোমৌ সায়ং প্রাতরনুষ্ঠায় পর্বণি দর্শপূর্ণমাসাখ্যযাগয়োরারম্ভতঃ পূর্বমন্বারম্ভণীয়ানামা ইষ্টিরনুষ্ঠীয়তে। অস্যামিষ্টৌ পৌর্ণমাসানুষ্ঠানরীতিবদন্বাধানব্রতে অনুতিষ্ঠতি। অন্বাধানেহ কর্মণি প্রধানদেবতাঃ—অগ্নাবিষ্ণু, সরস্বতী, সরস্বান্, অগ্নির্ভগী ইতি।

e) সপ্তসংখ্যাকাঃ পত্নীসংযাজা দর্শপূর্ণমাসাঙ্গভূতাঃ। তত্র প্রৈষাশ্রাবণপ্রত্যাশ্রবণেষু যথাযথং কৃতেষ্বধ্বর্যুর্গার্হপত্যস্যোত্তরার্ধে জুহুয়াৎ। তত্র সোমঃ, ত্বষ্টা, দেবপত্ন্যঃ রাকা, সিনীবালী কুহূঃ অগ্নির্গৃহপতিরিতি দেবতা ভবন্তি। রাকাদীনাং তিসৃণাং হোমা নিত্যাঃ কাম্যাশ্চেতরেষাং নিত্যা এব। তত্র সর্ব্বত্রোদ্দেশ্যত্যাগো যজমানেন পত্ন্যা চ ইত্যুভাভ্যাং কর্ত্তব্যঃ।

**(২) আপ্রীসূক্তস্য প্রউগশস্ত্রস্য চ যথাযথং স্বরূপং বর্ণ্যতাম্।**

**আপ্রীসূক্তম্**—ঋগ্বেদে দশসু সূক্তেষু কিঞ্চিদ্বৈলক্ষণ্যং লক্ষ্যতে যেষাম্ আপ্রীসূক্তানীতি ব্যবহারঃ। আ সমন্তাৎ প্রিযো লোড্-লিঙ্-তব্যাদিপ্রৈষলিঙ্গযুক্তা মন্ত্রাঃ। তৈর্মন্ত্রৈঃ যুক্তং সূক্তমাপ্রীসূক্তমিতি ব্যাখ্যাতারঃ। দশানামেব সূক্তানামাপ্রীসূক্তত্বেঽপি তত্তদৃষিভেদাৎ সূক্তভেদোঽঙ্গীকর্ত্তব্যঃ। ঋষযশ্চ কণ্বঃ অঙ্গিরঃ অগস্ত্যঃ শুনকঃ, বিশ্বামিত্রঃ, অত্রিঃ বশিষ্ঠঃ কশ্যপঃ, বাধ্রিযশ্ব, জমদগ্নিঃ ইতি দশসু সূক্তেষু দশৈব। এতৈর্দশভিঃ ঋষিভিঃ দৃষ্টানি যানি সূক্তানি তান্যেব আপ্রীসূক্তানীতি জ্ঞাযন্তে। প্রতিসূক্তমত্রৈকাদশ দ্বাদশ বা মন্ত্রা ভবন্তি।

এতেষু সূক্তেষু প্রত্যৃচমগ্নির্দেবতা সমিদ্ধতনূনপাদাদিবিশেষরূপেণ স্তূযতে। যথা সর্বে দেবাঃ তেনৈব যজ্ঞস্থলে সমানেতব্যাঃ। চতুর্থ-পঞ্চমে বা মন্ত্রে ঋত্বিজো বর্হিবিস্তারণাযাহূযন্তে যথা দেবাস্তত্রপবিশ্য সুখেন নিষণ্ণাঃ স্যুঃ। ইলাসরস্বতীভারতীতি তিস্রো বহ্নিমূর্ত্তযো দেব্যোঽপ্যত্র স্তূযন্তে। প্রাযশ্চোপান্তিমো মন্ত্রো বনস্পতিনামানম্ অগ্নিমুদ্দিশ্যোচ্যতে। কিঞ্চ এতানি সূক্তানি তাবদগ্নীষোমীযে পশৌ একাদশ সংখ্যাকেষু প্রযাজযাগেষু বিনিযুক্তানি। তত্র যাগকর্ত্তৄণাং যজমানানাং গোত্রে অথবা প্রবরে এতেষু ঋষিষু য ঋষিরাগচ্ছতি তদার্ষং সূক্তং যজমানেন পঠনীযম্। যদি কোঽপি নাগচ্ছতি তর্হি আপ্রীসূক্তমেব ন পঠনীযম্। তদর্থং চ ব্যবস্থান্তরমস্তি।

অগ্নীষোমীযে পশুযাগে পঞ্চর্ত্বিজো ভবন্তি। ব্রহ্মাধ্বর্যুর্হোতা-মৈত্রাবরুণ আগ্নীধ্রশ্চেতি। তত্রাধ্বর্যুণা মৈত্রাবরুণঃ প্রেষ্যতে। অধ্বর্যু-প্রেষিতেন মৈত্রাবরুণেন হোতা প্রেষ্যতে। এবং প্রেষিতো হোতা একাদশসু প্রযাজেষু যথাক্রমং সূক্তগতান্ মন্ত্রান্ পঠেদিতি নিযমঃ।

**প্রউগশস্ত্রম্**—অগ্নিষ্টোমে সোমযাগে হোতুঃ প্রতিসবনং শস্ত্রদ্বযম্। শস্ত্রং নামাপ্রগীতমন্ত্রসাধ্যগুণিনিষ্ঠগুণাভিধানম্। তচ্চ ঋগ্বেদীযৈর্হোত্রা-

দিভিঃ শংস্যতে। তত্র প্রাতঃসবনে আজ্যং প্রউগমিতি চ। মাধ্যন্দিনে সবনে নিষ্কেবল্যং মরুত্বতীয়মিতি চ। তৃতীয়সবনে বৈশ্বদেবমাগ্নিমারুত-মিতি চ। তত্র প্রাতঃসবনগতদ্বিতীয়শস্ত্রে প্রউগাখ্যে সপ্ত দেবতাঃ স্তূয়ন্তে—(১) বায়ুঃ, (২) ইন্দ্রবায়ূ, (৩) মিত্রাবরুণৌ, (৪) অশ্বিনৌ, (৫) ইন্দ্রঃ, (৬) বিশ্বে দেবাঃ, (৭) সরস্বতী চেতি। প্রতিদেবতম্ ঋক্‌ত্রয়মুচ্যতে। তত্তদ্দেবতাগ্রহপাত্রস্থিত—সোমহোমাত্মকগ্রহানুষ্ঠানঞ্চ ভবতি।

### 3. কা নাম তুহ্যাদিপরিভাষা ? স্বিষ্টকৃদ্‌যাগে কা দেবতা ? দ্রব্যঞ্চ কিম্ ?

বৈদিকসূক্তানাং ছন্দোদেবতাঋষীনাং নির্ণয়ে পরিভাষেয়মনুক্রম-ণিকাগতা প্রবর্ততে। তস্যা অয়মর্থঃ। তু হি হ বৈ তৎ—ইতি পঞ্চ পদানি যথাসংখ্যং দ্বি-ত্রি চতুঃ-পঞ্চ-ষট্ সংখ্যানামবদ্যোতকানি ভবন্তি। ইমাশ্চ সংখ্যাঃ সূক্তগতানাং ছন্দসাং দেবতানামৃষীণাঞ্চ ভবন্তি। অর্থাৎ যত্র দ্বয়োঃ সূক্তয়োশ্ছন্দঃপ্রভৃতি কীর্ত্তনীয়ং ভবতি তত্র সূক্তকার'স্তু'-শব্দং প্রযুঙ্‌ক্তে। যথা, 'গায়ন্তি দ্বাদশানুষ্টুভং তু' ইত্যনুক্রান্তত্বাৎ 'গায়ন্তি ত্বেতি' দ্বাদশমন্ত্রাত্মকসূক্তস্য তথা তদুত্তরবর্ত্তিনঃ 'ইন্দ্রং বিশ্বে'তি অষ্টমন্ত্রাত্মকসূক্তস্য দ্বয়োরেব ছন্দোঽনুষ্টুবিতি বোধ্যম্। এবং দেবতায়া ঋষের্বা নির্দ্দেশোঽপ্যুপলভ্যতে। এবং যত্র ত্রিষু সূক্তেষু পূর্ব্বোক্তং কীর্ত্তনীয়ং ভবতি তত্র 'হি'শব্দং চতুর্ষু 'হ'শব্দং পঞ্চসু 'বৈ'শব্দং ষট্‌সু চ 'তদি'তি শব্দং প্রযুঙ্‌ক্তে সূত্রকারঃ। যত্ত্বেকাদশসু সূক্তেষু পূর্ব্বোক্তং কার্য্যং বিধাতব্যং তর্হি বৈতদিতি কীর্ত্তয়তি। বৈশব্দেন পঞ্চ তচ্ছব্দেন চ ষড়িতি সংখ্যা, উভয়োর্ম্মেলনেন বৈতদিত্যনেনৈকা-দশেতি সংখ্যাবগন্তব্যা। এবমন্যোঽপি সংখ্যায়া ন্যূনাধিক্যগ্রহো ভবতি।

যস্মিন্ যাগে প্রধানদেবতোদ্দেশেন হবিষঃ প্রদানাৎ পরম্ উপযুক্ত-হবিঃশেষেণাগ্ন্যুদ্দেশেন ক্রিয়মাণো যাগবিশেষঃ স্বিষ্টকৃচ্ছব্দেনোচ্যতে।

'অগ্নয়ে স্বিষ্টকৃতে অনুব্রূহি', 'অগ্নিং স্বিষ্টকৃতং যজ' ইতি হোত্রেঽধ্বর্যু-কর্তৃকপ্রৈষস্বরূপমন্ত্রোপলভ্যতে। যদ্যপি শ্রৌতসূত্রে স্বিষ্টকৃতঃ সমুল্লেখো নোপলভ্যতে তথাপি 'সংযাজ্যে ইত্যুক্তে সৌবিষ্টকৃতী প্রতীয়াদিতি পরিভাষয়া সংযাজ্যশব্দপ্রয়োগবলেন স্বিষ্টকৃৎসম্বন্ধো বোদ্ধব্যঃ।

**4. *পবমানেষ্টয়ঃ কতি? তত্র দ্রব্যং কিম্? দেবতা চ কা? ইমা কুত্র ক্রিয়ন্তে? দর্শপূর্ণমাসয়োঃ কতি প্রধান যাগাঃ? তেষাং নামানি কানি?***

আধানস্য পূর্ণাহুত্যা সমাপ্তির্হোমেন সমাপ্তিরিষ্ট্যা বা সমাপ্তিরিতি পক্ষত্রয়ম্। তত্রান্তিমে পক্ষে তিস্র ইষ্টয়োঽনুষ্ঠীয়ন্তে যাঃ পবমানেষ্টি-শব্দেন ব্যবহ্রিয়ন্তে। তিসৃষু পবমানেষ্টিষু প্রথমায়াঃ অগ্নিঃ পবমানো দেবতা দ্বিতীয়স্যা অগ্নিঃ পাবকস্তৃতীয়স্যা অগ্নিঃ শুচিঃ। সর্ব্বত্র অষ্টক-পালো পুরোডাশো দ্রব্যম্। পবমানেষ্টীনামাধানাঙ্গত্বমিতি কেচন মীমাংসকাঃ। তন্মতে সাঙ্গস্যৈব কর্মণঃ ফলজনকত্বাৎ পবমানেষ্টীনাম-নুষ্ঠানানন্তরমেবাগ্নীনাং সিদ্ধেস্তদনন্তরমেব অগ্নিহোত্রারম্ভঃ। কেচিত্তু নাধানপবমানেষ্টীনামঙ্গাঙ্গিভাবং স্বীকুর্বন্তি। পরমাধানবৎ পবমানেষ্টী-নামপি স্বত এবাহবনীযাদিসম্পাদকত্বম্।

দর্শপূর্ণমাসাভ্যাং 'স্বর্গকামো যজেত' ইতি বাক্যেন স্বর্গোদ্দেশেন দর্শপূর্ণমাসৌ যাগৌ বিহিতৌ। অত্র পূর্ণমাসে (১) আগ্নেয়যাগঃ—অগ্নির্দেবতা, পুরোডাশো দ্রব্যম্। ( ) উপাংশুযাগঃ—বিষ্ণুর্দেবতা, আজ্যং দ্রব্যম্। (৩) অগ্নীষোমীয়ঃ যাগঃ—অগ্নীষোমৌ দেবতে, পুরো-ডাশো দ্রব্যম্ ইতি ত্রয়ো যাগাঃ।

দর্শযাগেঽপি ত্রয়ঃ প্রধানযাগাঃ। আগ্নেয়পুরোডাশো যাগ, ঐন্দ্রো দধিদ্রব্যকো যাগঃ, ঐন্দ্রঃ প্রয়োদ্রব্যকো যাগঃ ইতি যাগত্রয়ং বিহিতম্।

5. ***অভিপ্লব-পৃষ্ঠ্যষড়হয়োঃ কিং স্বরূপম্? প্রাতরনুবাকঃ কুত্র কদা ক্রিয়তে? মহাব্রতমিতি কস্য সংজ্ঞা?***

সোমবল্ল্যা রসং নিষ্কাস্য তেন যাবদ্ভির্দিনৈর্যাগা অনুষ্ঠীয়ন্তে তাবদ্ভিরহোভিস্তে সোমযাগা ব্যপদিশ্যন্তে। তথা হ্যেকেন দিনেনানুষ্ঠান একাহো দ্বাভ্যাং দিনাভ্যাং দ্ব্যহঃ ত্রিভিস্ত্র্যহ ইত্যাদি। এবং ষড়্ভির্দিনৈর্যোঽনুষ্ঠীয়তে সোমেন যাগঃ স ষড়হসোমযাগ উচ্যতে। অনুষ্ঠানপ্রকারভেদেনাস্য ত্রৈবিধ্যমুপলভ্যতে—অভিপ্লবষড়হঃ পৃষ্ঠ্যষড়হঃ অভ্যাসঙ্গষড়হশ্চেতি। যস্মিন্ ষড়হে রথন্তরং বৃহৎ—ইতি সামদ্বয়ম্ একৈকস্মিন্ দিনে একৈকতয়া গীয়তে তস্যাভিপ্লব ইতি নাম। যস্মিংশ্চ রথন্তরং বৃহৎ বৈরূপং বৈরাজং শাক্বরং রৈবতমিতি ষণ্ণাং সাম্নাং গানম্ একৈকস্মিন্ দিনে একৈকতয়া ভবতি তস্য পৃষ্ঠ্য ইতি নাম। উক্তসাম্নাং পৃষ্ঠানীতি সংজ্ঞা। অতএব ষড়হোঽয়ং পৃষ্ঠ্য ইতি কথ্যতে।

তত্রাভিপ্লবষড়হে প্রথমং ষষ্ঠঞ্চ দিনমগ্নিষ্টোমসংস্থাকং দ্বিতীয়-তৃতীয়-চতুর্থ-পঞ্চমানি চোক্থ্যসংস্থাকানি। পৃষ্ঠ্যষড়হে আদ্যং দিনমগ্নিষ্টোমসংস্থাকম্। দ্বিতীয়মুক্থ্যসংস্থাকম্। তৃতীয়মপি তথা। চতুর্থং ষোড়শিসংস্থাকম্। পঞ্চমং ষষ্ঠঞ্চোক্থ্যসংস্থাকম্। গবাময়নে জ্যোতিষ্টোমবিকৃতিভূতে সংবৎসরসাধ্যে কর্মণি প্রথমে মাসি ৩২ দিনানি ভবন্তি। তত্র প্রথমাৎ প্রায়নীয়াদ্ দ্বিতীয়াৎ চতুর্বিংশতিদিনাৎ পরম্ অভিপ্লবষড়হাশ্চত্বারস্তদনন্তরং পৃষ্ঠ্যষড়হশ্চ একোঽনুষ্ঠীয়ন্তে ইতি সংক্ষেপঃ।

জ্যোতিষ্টোমযাগে প্রাতরনুবাকাভিধানমঙ্গমেকং বিহিতমস্তি। যস্মিন্ দিনে সোমস্য রসং নিষ্কাস্য হোমঃ ক্রিয়তে তস্মাৎ সুত্যাদিনাৎ পূর্ব্বস্যা রাত্রেরুত্তরার্ধে যদা ন জাগ্রতি বিহঙ্গাঃ জ্বলন্তি চ নভসি নক্ষত্রাণি তস্মিন্ কালে হোত্রা ঋত্বিজা পঠনীয়ত্বেন বিহিতো মন্ত্রসমুদায়ঃ প্রাতরনুবাক ইত্যুচ্যতে। অনূচ্যতে পঠ্যতে ইত্যনুবাকঃ। প্রাতর্বিহিতোঽনুবাকঃ প্রাতরনুবাক ইতি নির্বচনম্। তস্মিন্ মন্ত্র সমুদায়ে ভাগত্রয়মস্তি। আগ্নেয়ঃ ক্রতু রুষস্যঃ ক্রতুরাশ্বিনঃ ক্রতুশ্চেতি। ক্রতুশব্দস্য প্রায়েণ যজ্ঞ ইত্যর্থঃ।

গবামযনস্য সত্রস্য সংবৎসরসাধ্যস্য সোমযাগস্য সপ্তমে মাসি উপান্তিমমহর্মহাব্রতশব্দেনোচ্যতে। অনেকবিশেষযুক্তত্বাদস্য মহাব্রতত্বম্। ইদং হি পঞ্চবিংশতিস্তোমকম্। স্তোত্রকালে উদ্‌গাতা ঔডুম্বরীমাসন্দীনারুহ্যো পবিশ্য তত্র গাযেৎ।

6. (a) *গবাময়নস্য সত্রমিতি কুতঃ সংজ্ঞা? গবাময়নং কতিদিনসাধ্যম্? গবাময়নং কস্য বিকৃতিঃ? বিকৃতির্নাম কা?*

(b) *যাজ্যা-পুরোঽনুবাক্যয়োঃ কঃ ভেদঃ?*

(a) একষষ্ঠ্যধিকশতত্রয়দিনসাধ্যং গবামযনাখ্যং সংবৎসরসত্রম্। অর্থবাদে ক্রতুরয়ং গোভিরনুষ্ঠিত ইতি প্রশংসার্থমুক্তত্বাদ্ গবাময়নমিতি নামাস্য সম্পন্নম্। স ত্রিধা বিভক্তঃ—পূর্বপক্ষঃ, বিষুবান্, উত্তরপক্ষশ্চেতি। তত্র অশীত্যধিকশতদিনসাধ্যঃ (১৮০) পূর্বপক্ষঃ, অর্থাং তাবৎসংখ্যকাঃ সুত্যাঃ। তদনন্তমেকমহঃ যস্য বিষুবানিতি সংজ্ঞা। ততোঽশীত্যুত্তরশতদিনসাধ্যঃ (১৮০) উত্তরপক্ষঃ। সমুদিতস্য অস্য গবামযনমিতি সংজ্ঞা।

সর্ব্বেষাং সোমযাগানাং প্রকৃতিঃ জ্যোতিষ্টোমঃ। জ্যোতিষ্টোমাৎ দ্বাদশাহে অঙ্গানি গচ্ছন্তি। অতঃ দ্বাদশাহঃ জ্যোতিষ্টোমবিকৃতিঃ দ্বাদশাহাৎ গবাময়নে অঙ্গানি গচ্ছন্তি জ্যোতিষ্টোমাদপি। অত গবাময়ন জ্যোতিষ্টোমবিকৃতিঃ দ্বাদশাহবিকৃতিশ্চ।

যত্র যাগে প্রকৃতিবদঙ্গানাং সাকল্যেন নোপদেশঃ কৃতঃ তৎক বিকৃতিশব্দেন ব্যবহ্রিয়তে। অথবা যং যাগমনুকৃত্য যাগান্তরোঽনুষ্ঠীয়তে স যাগঃ প্রাগুক্তস্য বিকৃতিঃ।

(b) প্রতিযাগং দেবতাবিশেষমুদ্দিশ্য আহুতির্দীয়তে। তত্র হবিষা গ্রহণাবসরে যো মন্ত্রো হোত্রা পঠ্যতে সোঽনুবাক্যা পুরোঽনুবাক বেত্যুচ্যতে। পুরতো যাজ্যায়া উচ্যতে পঠ্যতে ইতি পুরোঽনুবাক্যা

হবিষাং প্রদানাবসরে হোত্রা যো মন্ত্রঃ পঠ্যতে সা যাজ্যেত্যুচ্যতে। যুজ্যতে অনয়েতি যাজ্যা। যাজ্যানুবাক্যে উভে অপি ঋগ্‌বেদীয়ৌ মন্ত্রৌ। আশ্রাবয়, অস্তু শ্রৌষট্, যজ, যে যজামহে, বৌষট্ ইতি বাক্যপঞ্চকেন সম্পূর্ণযজ্ঞপ্রক্রিয়োচ্যতে। তত্র যজ, যে যজামহে ইত্যনেন যাজ্যাপ্রক্রিয়োক্তা। অধ্বর্যুঃ বদতি--যজ, হোতা চ যে যজামহে ইত্যুক্ত্বা তাং পঠতি। অন্তে চোচ্চার্যতে বৌষড়িতি হোত্রা। প্রতি-যাগমেকাঽনুবাক্যা যাজ্যা চৈকেতি মন্ত্রদ্বয়মেব ভবতি।

*7. জ্যোতিষ্টোম-দ্বাদশাহ-গবাময়নানাং পরস্পরং কঃ সম্বন্ধঃ? ইতি পরিচয়ো দীয়তম্। সংস্থা নাম কা?*

সোমযাগঃ সোমবল্ল্যা রসং নিষ্কাস্য তেন দেবতোদ্দেশ্যেন যাগঃ। স চ জ্যোতিষ্টোমশব্দেন ব্যবহ্রিয়তে। তস্যাগ্নিষ্টোম ইতি নামান্তরম্। তস্য সোমযাগস্য সপ্ত অনুষ্ঠানপ্রকারভেদা ভবন্তি যে সোমসংস্থা শব্দেন ব্যবহ্রিয়ন্তে যাজ্ঞিকৈঃ। জ্যোতিষ্টোমে চেমে সপ্ত সংস্থা ভবন্তি— অগ্নিষ্টোমঃ, অত্যগ্নিষ্টোমঃ উক্থ্যঃ, ষোড়শী, অতিরাত্রঃ, আপ্তোর্যামঃ, বাজপেয়শ্চেতি।

দ্বাদশাহো দ্বিবিধঃ। অহীনাত্মকঃ, সত্রাত্মকশ্চেতি। অহীনলক্ষণস্য সত্রলক্ষণস্য চ সত্ত্বাৎ। একাহানামগ্নিষ্টোমো যথা প্রকৃতিভূতঃ এবম্ অহীনানাং সত্রাণাময়ং প্রকৃতিভূতঃ। অত্র দ্বাদশাহে দ্বাদশদিনানি দীক্ষাঃ। ততো দ্বাদশেষু দিবসেষু উপসদামনুষ্ঠানং ভবতি। উপসন্নামাপূর্ব্বা কাচন ইষ্টিঃ। তত্রাগ্নিঃ সোম বিষ্ণুরিতি প্রধানদেবতাঃ সর্ব্বত্রাজ্যং দ্রব্যম্। ততো দ্বাদশদিনেষু দ্বাদশ-সুত্যাশ্চ ভবন্তি। সুত্যা নাম সোমযাগঃ। এবং ষট্‌ত্রিংশদ্দিন-সাধ্যোঽয়ং ক্রতুঃ। তথাপি দ্বাদশাহ ইতি নাম সুত্যাদিনানি লক্ষীকৃত্য।

গবাময়নং নাম সংবৎসরসাধ্যঃ সোমযাগবিশেষঃ। সর্ব্বেষাং সোম-

যাগানাং প্রকৃতিঃ খলু জ্যোতিষ্টোমঃ. তত্র সর্ব্বেষামাঙ্গানামাম্নাতত্বাৎ। জ্যোতিষ্টোমাৎ দ্বাদশাহে অঙ্গাণি গচ্ছন্তি। অতঃ দ্বাদশাহঃ জ্যোতিষ্টোম-বিকৃতিঃ। গবাময়নে চ দ্বাদশাহাৎ অঙ্গাণ্যতিদিশ্যন্তে জ্যোতিষ্টোমাদপি। অতঃ গবাময়নং জ্যোতিষ্টোমবিকৃতিঃ দ্বাদশাহবিকৃতিশ্চ।

সংস্থা নাম স্তোত্রেণ ক্রতুপরমঃ, যেন স্তোত্রেণ ক্রতুঃ সমাপিতো ভবতি তন্নামা স ক্রতুর্ব্ব্যবহ্রিয়তে। অর্থাৎ যদি অগ্নিষ্টোমসংস্থায়াম্ অগ্নিষ্টোমাখ্যঃ স্তোত্রমন্তিমং ভবতি, তদা অগ্নিষ্টোমসংস্থাকো জ্যোতিষ্টোম ইতি ব্যবাহ্রিয়তে। অগ্নিষ্টোমস্তোত্রানন্তরমুক্থ্যস্তোত্রং কৃত্বা যদি স যাগঃ সমাপ্যতে তর্হি স যাগ উক্থ্যসংস্থাকো ভবতি। এবমেব ষোড়শীসংস্থাকাদয়ো ভবন্তি।

### ✓8. *মন্ত্রাণাং কতি প্রকারা বিনিয়োগা ভবন্তি? কে চ তে প্রকারাঃ? তেষামুদাহরণানি কানি?*

বিনিয়োগো নাম কর্মভিঃ সম্বন্ধঃ। তথা চোক্তম্—'অনেনেদং তু কর্ত্তব্যং বিনিয়োগঃ প্রকীর্ত্তিতঃ' ইতি। স চ দ্বিবিধঃ সামান্যতো বিশেষতশ্চ। কৃৎস্নায়াঃ সংহিতায়া আম্নাতক্রমেণৈব ব্রহ্মযজ্ঞাদৌ বিনিয়োগ আহুঃ। অন্তিমস্তু তত্তৎক্রতৌ সূত্রকারেণাশ্বলায়নেন প্রদর্শিতঃ। স চ ত্রিবিধঃ। সূক্তবিনিয়োগঃ তৃচাদিবিনিয়োগ একৈকস্যা ঋচো বিনিয়োগশ্চেতি। তত্র 'অগ্নিমীলে' ইতি সূক্তবিনিয়োগঃ। সোমযাগে যস্মিন্ দিনে সোমস্য রসং নিষ্কাস্য হোমঃ ক্রিয়তে তস্মাৎ সুত্যাদিনাৎ পূর্বাস্যা রাত্রেরুত্তরার্ধে পক্ষিণামারাবতঃ পূর্ব্বং মন্ত্রৈঃ ক্রিয়মাণা স্তুতিঃ প্রাতরনুবাকঃ। তত্রেদং সূক্তং বিনিযুজ্যতে। প্রাতরনুবাকে অগ্নি রুষা অশ্বিনৌ চেতি তিস্রো দেবতাঃ স্তূয়ন্তে। প্রতিদেবতং চ গায়ত্র্যাদি-সপ্তচ্ছন্দোযুক্তা অনেকে মন্ত্রাঃ পঠনীয়া ভবন্তি। স চায়ং প্রতিদেবতং স্তবঃ ক্রতুশব্দেনোচ্যতে। এবঞ্চাগ্নেঃ স্তবঃ আগ্নেয়ঃ ক্রতুঃ, উষসঃ স্তব

উষস্যঃ ক্রতুঃ, অশ্বিনোঃ স্তব আশ্বিনঃ ক্রতুঃ রিতি ভবতি। একৈকস্মিন্ ক্রতৌ প্রথমং ছন্দঃ পরিসমাপ্য ততো দ্বিতীয়ং ততস্তৃতীয়মিত্যনেন ক্রমেণানুবক্তব্যম্।

9. *নিম্নলিখিতানাং পদানামর্থনিরূপণেন তেষাং স্বরূপং প্রতিপাদ্যতাম্* -

a) ***প্রধানকর্ম্ম***—প্রধানযাগসম্বন্ধিদ্রব্যদেবতাদ্যনুদ্দিশ্য বিধীয়মানং কর্ম প্রধানকর্ম আরাদুপকারককর্মেতি বা উচ্যতে। যথা—"সমিধো যজতি, তনূনপাতং যজতি বর্হির্যজতি ইড়ো যজতি, স্বাহাকারং যজতি' ইতি প্রযাজাঃ, 'অনুযাজৈর্যজতি' ইত্যনুযাজাঃ। প্রধানকর্মসম্বন্ধিষু বাক্যেষু দ্রব্যং নাপতিষ্যতি দেবতা বা নাপতিষ্যতি। তথাচ, দ্রব্যস্য গুণভূতত্বাদিতি সূত্রেণ যৈঃ কর্মভিঃ প্রযাজানুযাজাপ্রভৃতিভির্দ্রব্যং সংস্কর্তুমুৎপাদয়িতুং বা নেষ্যতে দেবতাং বা স্মারয়িতুং নেষ্যতে তানি প্রধানভূতানি কর্মাণি, দ্রব্যস্য তত্র গুণভূতত্বাদিতি প্রধানকর্মণঃ স্বরূপং প্রতিপাদিতম্।

b) ***গুণকর্ম*** যাগীয়ং দ্রব্যং দেবতাং বা উদ্দিশ্য বিধীয়মানং যৎ কর্ম তৎ গুণকর্মশব্দেন ব্যবহ্রিয়তে। এতদেব জৈমিনিনা 'যৈস্তু দ্রব্যং চিকীর্ষ্যতে গুণস্তত্র প্রতীয়েত তস্য দ্রব্যপ্রধানত্বাদি' তি সূত্রং বিরচিতম্। যৈস্তু কর্মভিঃ যাগসমবেতস্য দ্রব্যস্য দেবতায়া বা চিকীর্ষা ভবতি তত্র কর্মগুণভূতমিতি প্রতীয়েত দ্রব্যস্য তস্য প্রাধান্যত্বাৎ। যথা ব্রীহীনবহন্তি, ব্রীহীন্ প্রোক্ষতি, যাজ্যাং পঠতি। ইত্যাদিষু বাক্যেষু অবহনন—প্রোক্ষণ—পঠনাদিকর্মভিঃ ব্রীহ্যাদীনি দ্রব্যানি অগ্ন্যাদয়শ্চ দেবতাঃ চিকীর্ষ্যন্তে স্মার্য্যন্তে চ। তত্র কর্মদ্রব্যাদেবতাদ্যপেক্ষয়া গুণভূতং ভবতি। অত এতাদৃশানি কর্ম্মাণি গুণকর্ম্মাণি ইত্যুচ্যন্তে।

c) ***ধায্যা*** ধীয়তে অনয়া সমিদিতি ধায্যা ঋক্। বস্তুতো হি দ্বয়োর্মন্ত্রয়োঃ মধ্যে পঠনীয়া ঋক্ ধায্যাশব্দেনোচ্যতে। তদ্যথা অগ্নিষ্টোমে বৈশ্বদেবশস্ত্রে সুরূপকৃত্নুমূতয়ে ইতি ধায্যা।

d) ***স্তোম***—স্তোমঃ স্তোত্রে অধ্বরে বৃন্দে ইতি। স্তোমশব্দস্য স্তোত্রার্থকত্বম্ ঋগ্‌বেদাদৌ উপলভ্যতে। স্তূয়তে অনয়েতি স্তোমঃ। ক্বচিৎ স্তোমশব্দস্য স্তোত্রগতা সংখ্যাপি বুধ্যতে। যথা স্তোমবৃদ্ধাবাবাপার্থানি সুরূপকৃত্নুমিত্যাদীনি ষট্ সূক্তানীত্যাদৌ। জ্যোতিষ্টোমে চ স্তোত্রেষু চতস্রঃ সংখ্যা বিহিতাঃ। কুত্রচিন্নবসংখ্যা কুত্রচিৎ পঞ্চদশ কুত্রচিৎ সপ্তদশ ক্বচিদেকবিংশঃ।

e) ***সবনম্***—সোমবল্ল্যা রসং নিষ্কাস্য তেন সামযাগা অনুষ্ঠীয়ন্তে। যস্মিন্ কালে সোমলতায়া অভিষবাদয়ঃ সংস্কারা ভবন্তি স কালঃ সবনশব্দেনোচ্যতে। সোমযাগসামান্যে ত্রিঃ সোমস্য সবনং ভবতি। প্রাতঃসবনং মাধ্যন্দিনসবনং তৃতীয়সবনঞ্চেতি। প্রতিসবনং নিষ্কাসিতেন রসেন অনুষ্ঠীয়মানা যাগা অপি সবনান্তঃপাতিত্বেন মন্যন্তে। অগ্নিষ্টোমে সোমযাগে হোতুঃ প্রতিসবনং শস্ত্রদ্বয়ং পঠনীয়ং ভবতি। আজ্যং প্রউগমিতি প্রাতঃসবনে, নিষ্কেবল্যং মরুত্বতীয়মিতি মাধ্যন্দিনসবনে, বৈশ্বদেবমগ্নিমারুতমিতি চান্ত্যসবনে। তদিতরেষাং মৈত্রাবরুণব্রাহ্মণাচ্ছংস্যচ্ছাবাকানাং প্রাতঃসবনে তৃতীয়সবনে চৈকৈকং শস্ত্রং ভবতি। সর্বাণি মিলিত্বা দ্বাদশ শস্ত্রাণি ভবন্তি।

f) ***পরিধানীয়া*** - যজ্ঞপ্রক্রিয়ায়াং সর্বান্তে উচ্চার্যমানো মন্ত্রঃ পরিধানীয়াশব্দেন ব্যবহ্রিয়তে। স্তোত্রং বা ভবতু শস্ত্রং বা ভবতু যৎ যৎ পঠ্যতে তত্রান্তে প্রযোজকত্বেন বিধীয়মানো মন্ত্র এতৎসংজ্ঞাভাক্। তথাহি আশ্বলায়নস্য সূত্রম্—সর্বত্রোত্তমাং পরিধানীয়াং বিদ্যাদিতি। তদ্যথা—হবির্ধানপ্রবর্তনে 'পরি ত্বা গির্বণো গিব' ইত্যেষা ঋক্ পরিধানীয়া।

g) ***সামিধেনী***—দর্শপূর্ণমাসেষ্টৌ সামিধেনীকর্ম্ম তাবদেকমঙ্গম্। তত্র প্রথমং হোতারং সংপ্রেষ্য স্বোপবেশার্থং কল্পিতে আসনে উপবিষ্টেন হোত্রা সামিধেনীসংজ্ঞকানামৃচাং পাঠে ক্রিয়মাণে অধ্বর্য্যুরাহবনীয়-

পশ্চিমদেশে প্রাঙ্‌মুখ আসীন ইধ্মকাষ্ঠানি আহবনীয়ে অভ্যাদধ্যাৎ। হোত্রা পঠ্যমানায়া ঋচোঽন্তে প্রণবোচ্চারণকালে এব সমিধামাধানং কর্ত্তব্যম্। সামিধেন্যোনাম সমিদাধানার্থা ঋগ্বিশেষাঃ।

h) *স্তোত্রিয় অনুরূপ–পর্য্যাস–*

ঋক্‌ত্রয়স্য মিলিতস্য তৃচ ইতি নাম ভবতি। যস্মিন্ স্তোত্রে শস্ত্রে চানেকৈ তৃচা ভবন্তি, তত্র প্রথমস্য তৃচস্য স্তোত্রিয়ং দ্বিতীযস্য অনুরূপং তৃতীয়স্য চ পর্য্যাস ইতি সঙ্জ্ঞা ভবতি। এতদুচ্যতে যদানেকৈর্দিনৈরগ্নষ্টোমা ভবন্তি সোমযাগাস্তদানীমভিপ্লবাদিষু যাগেষু মৈত্রাবরুণাদিঋত্বিগ্‌ভিঃ স্বীয়শস্ত্রশংসনাবসরে তদ্দিবসীয়ে উদ্‌গাতৄণাং স্তোত্রে সামগানার্থং যস্তৃচ উপাত্তস্তস্য শংসনং কর্ত্তব্যং ভবতি। স চায়ং তৃচঃ স্তোত্রিয়শব্দেনোচ্যতে। ততঃ পরস্মিন্দিনে যস্মিন্ তৃচে উদ্‌গাতৃভির্গানং করিষ্যতে তস্য তৃচস্য পূর্ব্বস্মিন্দিনে স্তোত্রিয়শংসনোত্তরং শংসনং কর্ত্তব্যং ভবতি। তস্য পরদিনীয়সামস্তোত্রিয়স্য তৃচস্য পূর্ব্বস্মিন্দিনেঽনুরূপশব্দেন ব্যবহারঃ ক্রিয়তে যাজ্ঞিকৈঃ। এবঞ্চ তৃতীয়দিনীয়সামস্তোত্রিযস্য পর্য্যাস ইতি নাম। উক্তং হি ব্রাহ্মণে—যঃ শ্বঃ স্তোত্রিয়স্তমনুরূপং কুর্বন্তি। ইতি। আশ্বলায়নোঽপি 'শ্বরনুরূপম্' ইতি সূত্রয়ামাস।

# Answer to "ঋগ্বেদভাষ্যোপক্রমণিকা"

1. *ঋগ্বেদস্যাভ্যর্হিতত্বেঽপি তদ্ব্যাখ্যানমাদাবকৃত্বা সায়ণাচার্য্যেণ যজুর্বেদব্যাখ্যানং কৃতমিতি তৎ কথং সমর্থিতব্যমিতি সযুক্তিকমুপপাদ্যতাম্।*

Or,

Why has Sāyanachārya commented first on the Yajurveda whereas everywhere in the enumeration of the Vedas it is the Ṛgveda which is named first of all ?

বিদ্বৎকুলশিরোমণিনা শ্রীসায়ণাচার্যপাদেন বেদচতুষ্টয়েষ্বেব মনোজ্ঞং ভাষ্যং বিরচয্য সাধারণানাং দুর্বোধস্য অতিগহনস্য চ বেদরাশেরববোধ-পন্থা নিষ্কণ্টকীকৃত ইতি হেতোঃ সর্ব্বেষামেব পণ্ডিতানাং সম্মানীয়ো হি সঃ। আদৌ তাবৎ তেন যজুর্বেদস্য ভাষ্যং প্রণীতম্। তদনন্তরং ঋগ্বেদস্য ততঃ সামবেদস্য, সর্ব্বান্তে চাথর্ববেদস্য। অত্র তাবৎ কেষাঞ্চিন্ম-নসি প্রশ্নো জায়তে—বৈদিকসাহিত্যে ঋগ্বেদ এব প্রাথম্যেন আম্নাতঃ। অনেন তস্য অভ্যর্হিতত্বমবগম্যতে। তস্মাদভ্যর্হিতং পূর্ব্বমিতি ন্যায়েন তস্যৈব ঋগ্বেদস্য ভাষ্যবিধানমাদৌ যুক্তং ন তু যজুর্বেদস্য। ন কেবলং পাঠপ্রাথম্যেন অভ্যর্হিতত্বং ঋগ্বেদস্য অপি তু যজ্ঞাঙ্গদার্ঢ্যহেতুত্বাৎ। তথা চ তৈত্তিরীয়সংহিতায়াং যজুর্বেদঃ স্বকণ্ঠত এব ঋগ্বেদস্য প্রয়োজনং স্বীকরোতি—'যৎ বৈ যজ্ঞস্য সাম্না যজুষা ক্রিয়তে শিথিলং তদ্, ঋচা

তদ্ দৃঢ়ম্' ইতি। বেদগতানি সর্ব্বাণি ব্রাহ্মণাণ্যপি স্বাভিহিতেঽর্থে বিশ্বাসদার্ঢ্যায় উদাহরন্তি ঋচমেব--'তদেতদ্ ঋচা অভ্যুক্তম্' ইতি। মন্ত্রভাগেষু অপি স্ফুটমেব। যজুর্বেদগতেষু মন্ত্রভাগেষু অধ্বর্যুণা প্রযোজ্যা বহব ঋচঃ আম্নাতাঃ। সাম্নাং তু সর্বেষাম্ ঋগাশ্রিতত্বম্ প্রসিদ্ধমেব। আথর্বণিকৈরপি স্বকীয়সংহিতায়াম্ ঋচ এব বাহুল্যোনাধীয়ন্তে। অতএব সর্বৈরণ্যৈর্বেদৈরাদৃতত্বাৎ ঋগ্বেদস্য অভ্যর্হিতত্বং প্রসিদ্ধম্। অতএব সর্বথা ঋগ্বেদস্য অভ্যর্হিতত্বাৎ ঋগ্বেদস্য ব্যাখ্যানম্ আদাবেব কর্ত্তব্যং নতু যজুর্বেদস্য ইতি পূর্ব্বপক্ষস্যাশয়ঃ।

তত্রৈবং প্রত্যুচ্যতে সায়ণাচার্যেণ সর্ব্বত্রৈব ব্রহ্মযজ্ঞজপাদৌ ঋগ্বেদস্য প্রাথম্যমস্তীতি সত্যম্। কিন্তু সর্ব্বত্রৈব ঋচাং প্রাধান্যং প্রতিপাদিতং ন ভবতি। মন্ত্রাণাম্ অর্থজ্ঞানং তু যজ্ঞানুষ্ঠানে প্রয়োজনমেব। তস্মিন্ অনুষ্ঠানে প্রয়োজনসাধনব্যাপারে যজুর্বেদস্যৈব প্রাধান্যাৎ আদৌ তস্য ব্যাখ্যানং যুক্তমেব। উক্তঞ্চ—

ঋচাং ত্বঃ পোষমাস্তে পুপুষ্বান্ গায়ত্রং ত্বো গায়তি শক্করীষু।
ব্রহ্মা ত্বো বদতি জাতবিদ্যাং যজ্ঞস্য মাত্রাং বিমিমীত উ ত্বঃ॥

ঋত্বিক্‌কর্মণাং বিনিয়োগমাচষ্টে ইতি নিরুক্তকারদর্শিতং তাৎপর্যমস্যা ঋচঃ। তত্র প্রথমপাদস্য অয়মর্থঃ—ত্বশব্দঃ একশব্দপর্যায়ো, হোতৃ-বিশেষণম্। হোতৃনামকঃ কশ্চিৎ ঋত্বিক্ যজ্ঞকালে স্বকীয়বেদগতানাম্ ঋচাং পুষ্টিং কুর্বন্নাস্তে। দ্বিতীয়পাদস্যার্থো যথা—উদ্‌গাতৃনামক এক ঋত্বিগ্ গায়ত্রশব্দাভিধেয়ং স্তোত্রং শক্করীশব্দাভিধেয়াষু ঋক্ষু গায়তি। অনেন সাম্নাম্ ঋগাশ্রিতত্বং প্রসিদ্ধমিতি সূচিতম্। তৃতীয়পাদস্য অর্থোঽয়ম্—ব্রহ্মা নামক এক ঋত্বিগ্ জাতে জাতে তদা তদা উৎপন্নে যজ্ঞে প্রস্তুতে প্রণয়নাদিকর্মণি বিদ্যাম্ অনুজ্ঞাং বদতি। বেদত্রয়োক্ত-সর্বকর্মাভিজ্ঞো ব্রহ্মা যোগ্যতাং দৃষ্ট্বা সর্বমনুজ্ঞাতুং প্রমাদে সতি সমধাতুং চ সমর্থঃ। চতুর্থপাদস্য অয়মেবার্থঃ—অধ্বর্যুনামক এক ঋত্বিগ্ যজ্ঞস্য মাত্রাং স্বরূপঃ বিমিমীতে বিশেষেণ নিষ্পাদয়তি। অধ্বরং যুনক্তীতি অধ্বর্যুঃ। অধ্বরস্য নেতা ইতি তাৎপর্যার্থঃ। এবং হি অধ্বর্যুসম্বন্ধিনি যজুর্বেদে নিষ্পন্নং যজ্ঞশরীরম্। তৎ শরীরম্ উপজীব্য স্তোত্রশস্ত্ররূপৌ

অবযবৌ ইতবেণ ঋক্‌সামাখ্যেন বেদদ্বযেন পূর্যোতে। তস্মাদুপজীব্যত্বাদ্ যজুর্বেদস্য এব আদৌ ব্যাখ্যানং যুক্তম্। তত্রাপি সাম্নাম্ ঋগাশ্রিতত্বাৎ যজুর্বেদব্যাখ্যানাবসরে ঋগ্বেদস্যৈব ব্যাখ্যা সমুচিতা, পশ্চাচ্চ তদাশ্রিতস্য সামবেদস্য। অতএব যজুর্বেদস্য আদৌ ব্যাখ্যানং সংগতমেব।

### ৩ অর্থবাদানাং প্রামাণ্যমাক্ষিপ্য যুক্তিনির্দেশ পুরঃসরং সমাদধত।

Or,

Refute the charge of unauthoritativeness as brought against Arthavāda.

বেদগতানাম্ অর্থবাদানাং প্রামাণ্যমস্তি ন বেতি সংশযে পূর্বপক্ষী মন্যতে— নাস্ত্যেব অর্থবাদবাক্যানাং প্রামাণ্যম্। অপুরুষার্থপ্রতিপাদকত্বাৎ। তথা চ পূর্বপক্ষসূত্রম্—'আম্নাযস্য ক্রিযার্থত্বাদানর্থক্যম্ অতদর্থানাং তস্মাদ-নিত্যমুচ্যতে' ইতি। আম্নাযো বেদঃ। তস্য দর্শপূর্ণমাসাদিক্রিযা-প্রতিপাদনমেব প্রযোজনম্, যতঃ ক্রিযানুষ্ঠানামেব পুরুষার্থঃ স্বর্গাদিরূপঃ সিধ্যতি। ন চ অর্থবাদাঃ ক্রিযাং প্রতিপাদযন্তি। তস্মাৎ আম্নাযস্য সর্বস্য ক্রিযাপ্রতিপাদনদ্বারা এব পুরুষার্থপর্যবসাযিত্বাৎ অক্রিযা-প্রতিপাদকানাম্ অর্থবাদবাক্যানাং নাস্তি কিঞ্চিৎ প্রামাণ্যম্ অযমাশযঃ—

পুরুষার্থপরত্বেনৈব বেদস্য প্রামাণ্যম্। পুরুষার্থশ্চ ক্রিযযৈব লভ্যতে। ন চ অর্থবাদবাক্যানি কিমপি কর্ম কর্তব্যতযা বোধযন্তি। তে চার্থবাদাঃ এবম্ আম্নাযন্তে "সোঽরোদীৎ তদ্রুদ্রস্য রুদ্রত্বম্" "স আত্মনো বপামুদখিদৎ"—যস্মাদীদৃশস্য বাক্যস্য বিবক্ষিতোঽর্থঃ কশ্চিদপি নাস্তি তস্মাদিদং বাক্যমনিত্যম্ উচ্যতে। যদ্যপি অনাদিত্বাৎ স্বরূপেণানিত্যত্বং নাস্তি তথাপি ধর্মাববোধলক্ষণস্য নিত্যকার্যস্যাভাবাৎ অনিত্যৈঃ কাব্যা-লাপৈঃ সমানত্বাৎ অপ্রমাণমিতি।

কিঞ্চ শাস্ত্রবিরোধঃ দৃষ্টবিরোধঃ শাস্ত্রদৃষ্টবিরোধশ্চ ইতি ত্রিবিধো

বিরোধঃ অর্থবাদেষু উপলভ্যতে। তদ্ যথা "স্তেনং মনোঽনৃতবাদিনী বাক্" ইত্যত্র শ্রূয়মাণং মানসং চৌর্য্যম্ বাচিকমনৃতবাদনঞ্চ প্রতিষেধ-শাস্ত্রেণ বিরুদ্ধম্। প্রতিষিদ্ধং হি চৌর্য্যম্ অনৃতভাষণঞ্চ। এবং "তস্মাৎ ধূম এবাগ্নের্দিবা দদৃশে" ইত্যত্র দৃষ্টবিরোধঃ, তথা "কোহি তদ্ বেদ যদ্যমুস্মিন্ লোকেঽস্তি ন বা" ইত্যত্র শাস্ত্রদৃষ্টবিরোধো ভবতি, যতঃ "স্বর্গকামঃ যজতে" ইত্যাদি শাস্ত্রবচনৈর্হি স্বর্গঃ সিদ্ধঃ। তস্মাদ্ বিরোধাৎ অর্থবাদবাক্যানাম্ অপ্রামাণ্যম্।

কিঞ্চ, কেষুচিৎ স্থলেষু অর্থবাদবোধিতস্য ফলস্যাভাবঃ দৃশ্যতে। কেষুচিৎ চ তৎফলে স্বীক্রিয়মাণে অন্যেষাং বিধীনামানর্থক্যং প্রসজ্যেত। যথা—অশ্বমেধপ্রকরণগতানাং শ্রুতিবাক্যানাং বেদনেন যৎ ফলং ভবতি অশ্বমেধানুষ্ঠানেনাপি তদেব ফলং ভবতীতি জ্ঞায়তে। তথা সতি "পণলভ্যং তু কো মূঢ়ঃ ক্রীণাতি দশভিঃ পণৈরিতি" ন্যায়েন অশ্ব-মেধবিষয়কশ্রুতিবেদনেন অল্পায়াসসাধ্যেন ফলে লব্ধে কোঽপি ন যতেত, তত্র ক্লেশস্য অতিভূয়স্ত্বাৎ।

এবং "ন পৃথিব্যামগ্নিশ্চেতব্যো নান্তরিক্ষে ন দিবি" ইত্যাদিনিষেধ-বোধকানি অর্থবাদবাক্যানি সর্বথা নিরর্থকান্যেব। এবমাদিভিঃ কারণৈঃ অর্থবাদানাং প্রামাণ্যমাস্থাতুং ন শক্যতে।

এবং পূর্ব্বপক্ষে প্রাপ্তে সমাধানমুচ্যতে—

বিধিবাক্যানামিব অর্থবাদবাক্যানামপি অস্ত্যেব প্রামাণ্যম্। তচ্চ ন স্বাতন্ত্র্যেণ, অপি তু বিধিবাক্যান্বিতেন। তদুক্তং জৈমিনিনা—"বিধিনা ত্বেকবাক্যত্বাৎ স্তুত্যর্থেন বিধীনাং স্যুঃ" ইতি। বিধিবাক্যানি পুরুষ-প্রবৃত্তিসম্পাদনার্থং বিধেয়স্য পদার্থস্য প্রশংসামপেক্ষন্তে। স্তুতিনিন্দাব-বোধকং বাক্যং হি অর্থবাদঃ। অতঃ বিধিঃ অর্থবাদসাপেক্ষঃ। এবমর্থ-বাদোঽপি ক্রিয়ার্থং বিধিসাপেক্ষঃ। ইত্থং বিধ্যর্থবাদয়োঃ পরস্পরসাপেক্ষ-তয়া একার্থপ্রতিপাদনপরত্বাৎ নষ্টাশ্বদগ্ধরথন্যায়েন সম্প্রয়োগাৎ পুরুষার্থ-পর্যবসায়িত্বম্। তস্মাদস্তি এব অর্থবাদানাং প্রামাণ্যম্।

কিঞ্চ, ইতরভাগবৎ অর্থবাদা অপি অনধ্যায়বর্জনাদিনিয়মপূর্বকং পঠ্যন্তে বেদত্বেন চ স্মর্য্যন্তে, তস্মাৎ নাস্তি তেষাম্ অবেদত্বম্। অতশ্চ

নাস্তি তেষাম্ অপ্রামাণ্যম্। ন হি বেদস্য একেনাপি বর্ণেন অপ্রমাণেন ভবিতব্যম্, কিং পুনর্নিয়তা পদসন্দর্ভেণ অর্থবাদরূপেণ।

যশ্চ শাস্ত্রদৃষ্টবিরোধাদিকঃ উক্তঃ সোঽপি ন সঙ্গতঃ, তাদৃশস্য অর্থস্য অবিধেয়ত্বাৎ অন্যত্র চ তাৎপর্য্যাৎ। তথাহি সর্বত্র অর্থবাদেষু অয়মেব নিয়মঃ যৎ বিধেয়স্য প্রশস্তত্বম্ অতএব কর্ত্তব্যত্বম্ তথা নিষিদ্ধস্য নিন্দনীয়ত্বম্। অতএব বর্জ্জনীয়ত্বম্ অর্থবাদবাক্যেন লক্ষণয়া বোধ্যতে। অনেনৈব ন্যায়েণ সর্বত্র অর্থবাদানাং তাৎপর্য্যং নিরূপনীয়ম্।

এবং কুত্রচিৎ গুণবাদত্বেন, কুত্রচিদ্বা অধিকারগতত্বেন, কুত্রচিদ্বা ফলস্য অল্পত্বভূয়স্ত্ববোধকত্বেন, কুত্রচিৎ আকালিকেপ্সয়া কুত্রচিদ্বা বিদ্যা-প্রশংসযা অর্থবাদানাং স্তুতিপরত্বম্ অভ্যুপগম্যতে ইত্যেবং সর্ববিধঃ বিরোধশ্চ পরিহ্রিয়তে।

যশ্চ "নান্তরিক্ষে ন দিবি" ইতি অপ্রসক্তপ্রতিষেধঃ উদাহৃতঃ। তথাপি অর্থবাদেন হস্তে হিরণ্যধারণবিধিঃ স্তোতুং শক্যতে, তত্র হস্তস্য প্রশংসার্থং বাগ্‌মনসোর্নিন্দা তথা নান্তরিক্ষ ইতি নিত্যানুবাদ এব। যদপি "ববরঃ প্রাবহণিঃ" ইত্যত্র দূষণমুক্তং তদপি ন সম্যক্, যতোঽত্র কশ্চিদনিত্যঃ চুরুষো মনুষ্যো ন বিবক্ষিতঃ, কিন্তু ববরধ্বনিযুক্তঃ প্রকর্ষেণ বহনশীলঃ বায়ুর্ব্যবহারদশায়াং নিত্য এব অর্থঃ বিবক্ষিতঃ।

তস্মাৎ সম্ভাবিতদোষাণাং পরিহৃতত্বাদ্ অস্ত্যেব অর্থবাদানাং প্রামাণ্যম্।

## 3. *কো নাম বেদঃ? বেদাঙ্গানি কতি? কানি চ তানি? কস্তেষাম্ উপযোগঃ?*

বেদশব্দো হি বিদ্‌ধাতোঃ করণপ্রত্যয়ে কৃতে নিষ্পন্নো ভবতি। বেদ্যন্তে প্রাপ্যন্তে ধর্ম্মাদিপুরুষার্থচতুষ্টয়োপায়া যেন স বেদ ইতি। অতএব চ ইষ্টপ্রাপ্ত্যনিষ্টপরিহারয়োরলৌকিকমুপায়ং যো গ্রন্থো বেদয়তি স বেদঃ ইতি সায়ণাচার্যৈঃ কৃষ্ণযজুর্ভাষ্যভূমিকায়াম্ ঐতরেয়ভাষ্যভূমিকায়াং

চোক্তম্। তত্নপোদ্বলকত্বেন—

"প্রত্যক্ষেণানুমিত্যা বা যস্তূপায়ো ন বুধ্যতে।

এতং বিদন্তি বেদেন তস্মাদ্বেদস্য বেদতা ॥—ইতি প্রমাণমপি প্রদর্শিতম্। এবং চ প্রত্যক্ষাদিভিঃ প্রমান্তারৈর্যোঽর্থোঽনবগতঃ, তাদৃশম্ অর্থং স্বর্গাদিরূপশ্রেয়ঃসাধনীভূতং যঃ শব্দরাশির্বেদয়তি স এব বেদশব্দার্থ ইতি নিশ্চেতব্যং ভবতি। অনেন চৈবাশয়েন "মন্ত্রব্রাহ্মণাত্মকঃ শব্দরাশির্বেদঃ, অলৌকিকমুপায়ং যো গ্রন্থো বেদয়তি স বেদঃ" ইত্যাদিনা শব্দসমুদায়স্যৈব বেদপদাভিধেয়তামভ্যুপগচ্ছন্তি প্রাচীনগ্রন্থকৃতঃ।

এতস্যাতিগম্ভীরস্য বেদস্য অর্থমবোধয়িতুং শিক্ষাদীনি ষড়ঙ্গানি প্রবৃত্তানি। অতএব তেষামপরবিদ্যারূপত্বং মুণ্ডকোপনিষদি আথর্বণিকা আমনন্তি—"দ্বে বিদ্যে বেদিতব্যে ইতি হ স্ম যদ্ ব্রহ্মবিদো বদন্তি, পরা চৈবাপরা চ। তত্রাপরা ঋগ্বেদো, যজুর্বেদঃ, সামবেদোঽথর্ববেদঃ, শিক্ষা, কল্পো, ব্যাকরণং নিরুক্তং ছন্দো জ্যোতিষামিতি। অথ পরা, যথা তদক্ষরমধিগম্যতে" ইতি। সাধনভূতধর্মজ্ঞানহেতুত্বাৎ ষড়ঙ্গসহিতানাং কর্মকাণ্ডানাম্ অপরবিদ্যাত্বম্। পরমপুরুষার্থভূতব্রহ্মজ্ঞানহেতুত্বাৎ উপনিষদাং পরবিদ্যাত্বম্। তত্র অপরবিদ্যামধ্যে বর্ণস্বরাদ্যুচ্চারণপ্রকারো যত্র উপদিশ্যতে সা শিক্ষা। তথা চ তৈত্তিরীয়া উপনিষদারম্ভে সমামনন্তি—"বর্ণঃ, স্বরঃ, মাত্রা, বলম্, সাম, সন্তান ইত্যুক্তঃ শিক্ষাধ্যায়ঃ" ইতি।

বর্ণোঽকারাদিঃ। শম্ভুমতে ত্রিষষ্টিশ্চতুঃষষ্টি র্বা বর্ণাঃ। উদাত্তঃ চানুদাত্তশ্চ স্বরিতশ্চ স্বরাস্ত্রয়ঃ। হ্রস্বো দীর্ঘঃ প্লুত ইতি মাত্রা। বলং স্থানপ্রযত্নৌ। তত্র "অষ্টৌ স্থানানি বর্ণানাম্" ইত্যাদিনা স্থানম্ উক্তম্। অচোঽস্পৃষ্টা যণস্ত্বীষদ্" ইত্যাদিনা প্রযত্নঃ উক্তঃ। সামশব্দেন সাম্যমুক্তম্। অতিদ্রুতাতিবিলম্বিতগীত্যাদিদোষরাহিত্যেন মাধুর্যাদিগুণযুক্তত্বেন উচ্চারণং সাম্যম্। সন্তানো হি সংহিতা। মন্ত্রে স্বরাণাং বর্ণানাঞ্চ প্রযোজনমেবমুক্তম্—

মন্ত্রো হীনঃ স্বরতো বর্ণতো বা মিথ্যাপ্রযুক্তো ন তমর্থমাহ।

স বাগ্‌বজ্রো যজমানং হিনস্তি যথেন্দ্রশত্রুঃ স্বরতোঽপরাধাৎ ॥ ইতি।

তস্মাৎ স্বরবর্ণাদ্যপবাধপরিহারায় শিক্ষাগ্রন্থোঽপেক্ষিতঃ।

কল্পস্তু আশ্বলায়নবৌধায়নাপস্তম্বাদিসূত্রম্, কল্প্যতে সমর্থ্যতে যাগপ্রয়োগোঽত্র ইতি ব্যুৎপত্তেঃ। কল্পসূত্রং মন্ত্রবিনিয়োগেন ক্রত্বনুষ্ঠানমুপদিশ্য উপকরোতি। তস্মাৎ শিক্ষেব কল্পোঽপি অপেক্ষিতঃ।

ব্যাকরণমপি প্রকৃতিপ্রত্যয়াদ্যুপদেশেন পদস্বরূপতদর্থনিশ্চয়ায় উপযুজ্যতে। তথা চ ঐন্দ্রবায়বগ্রহব্রাহ্মণে সমাম্নায়তে—"বাগ্ বৈ পরাচ্যব্যাকৃতাবদত্তে দেবা ইন্দ্রম্ অব্রুবন্ ইমাং নো বাচম্ ব্যাকুর্বিতি" ইতি। ইয়ং বাক্ ইদানীমপি পাণিন্যাদিমহর্ষিভিঃ ব্যাকৃতাঃ সর্বৈঃ পঠ্যতে। তস্য এতস্য ব্যাকরণস্য প্রয়োজনবিশেষো বররুচিনা বার্ত্তিকে দর্শিতঃ—"রক্ষোহাগমলঘ্বসন্দেহাঃ প্রয়োজনম্" ইতি। এতানি রক্ষাদিপ্রয়োজনানি প্রয়োজনান্তরাণি চ মহাভাষ্যে পতঞ্জলিনা স্পষ্টীকৃতানি। রক্ষার্থং বেদানামধ্যেয়ং ব্যাকরণমিতি।

অথ নিরুক্তপ্রয়োজনমুচ্যতে—

অর্থাববোধে নিরপেক্ষতয়া পদজাতং যত্রোক্তং তন্নিরুক্তম্। গৌ গ্মা ইত্যারভ্য দেবপত্ন্য ইত্যন্তো যঃ পদানাং সমাম্নায়ঃ সমাম্নতঃ তস্মিন্ গ্রন্থে পদার্থাববোধায় পরাপেক্ষা ন বিদ্যতে। এতন্নিরুক্তং ত্রিকাণ্ডম্—আদ্যং নৈঘণ্টিকং কাণ্ডং দ্বিতীয়ং নৈগমং তথা। তৃতীয়ং দৈবতঞ্চেতি সমাম্নায়স্ত্রিধা স্থিতঃ। ইতি পঞ্চাধ্যায়রূপকাণ্ডত্রয়াত্মকে এতস্মিন্ গ্রন্থে পরনিরপেক্ষতয়া পদার্থস্য উক্তত্বাৎ তস্য গ্রন্থস্য নিরুক্তত্বম্। একৈকস্য পদস্য সম্ভাবিতাঃ অবয়বার্থাঃ তত্র নিঃশেষেণ উচ্যন্তে ইতি ব্যুৎপত্তেঃ। কেষাঞ্চিৎ নির্ব্বচনানাং ব্যাকরণবলেন সিদ্ধাবপি ন সর্ব্বেষাং সিদ্ধিরস্তি। অতএব গ্রন্থকার আহ—"তদিদং বিদ্যাস্থানং ব্যাকরণস্য কার্ৎস্ন্যং স্বার্থসাধকঞ্চ" ইতি। তস্মাৎ বেদার্থাববোধায় উপযুক্তং নিরুক্তম্।

তথা ছন্দোগ্রন্থোঽপি উপযুজ্যতে, ছন্দোবিশেষাণাং তত্র তত্র বিহিতত্বাৎ। গায়ত্র্যুষ্ণিগনুষ্টুব্ বৃহতীপঙ্ক্তিত্রিষ্টুব্ জগতী ইত্যেতানি সপ্ত ছন্দাংসি। এতানি মন্ত্রে মন্ত্রে বিদ্যাদিতি শ্রূয়তে। তস্মাদ্ তদ্বেদনায় ছন্দোগ্রন্থ উপযুজ্যতে।

তথা জ্যোতিষস্য প্রয়োজনং তস্মিন্নেব গ্রন্থে বিহিতম্—"যজ্ঞ-

## 5. বেদাধ্যয়নস্য দৃষ্টার্থত্বমদৃষ্টার্থত্বং বিচারয়।

বেদানাং সর্ব্বেষামন্যতমস্য বা স্বপ্রজ্ঞানুসারেণ অধ্যয়নমুপনীতেন কর্ত্তব্যম্। তথাবোক্তং যাজ্ঞবল্ক্যেন—"বেদানধীত্য বেদৌ বা বেদং বাপি যথাক্রমম্" ইতি। তত্রৈকবেদাধ্যয়নপক্ষে স্বাধ্যায়োঽধ্যেতব্য ইতি নিয়মো বিহিতঃ। পিতৃপিতামহাদিপরম্পরাপ্রাপ্ত এব বেদোঽ-ধ্যেতব্য ইতি অভিপ্রেত্য "স্বাধ্যায়োঽধ্যেতব্য" ইত্যত্র স্বশব্দ আম্নাতঃ। তচ্চ অধ্যয়নং ন কাম্যং কিন্তু নিত্যম্। অতএব পুরুষার্থানুশাসনে বেদস্যাধ্যয়নং নিত্যমনধ্যয়নে পাতাৎ" ইতি।

ননু পূর্ব্বোক্তনিয়মেন যদ্বেদাধ্যয়নং বিহিতং তস্য কিং নাম প্রয়োজনম্? যমধিকৃত্য প্রবর্ত্তেত তৎ প্রয়োজনম্। বেদাধ্যয়নস্য প্রয়োজনঞ্চেন্নোক্তম্ তদা কোঽপি অধ্যয়নে প্রযত্নবান্ ন ভবতি। অধ্যয়নাৎ যদেব ফলমাপ্নোতি মানবস্তৎ দৃষ্টমুতাদৃষ্টমিতি জিজ্ঞাসা-য়ামেবাত্র অদৃষ্টমেবেতি বদতি পূবপক্ষী।

দৃষ্টফলসাধনে ভোজনাদৌ বিধ্যদর্শনাৎ বিহিতমপি অধ্যয়নম্ অদৃষ্টার্থমবগন্তব্যমিতি পূর্ব্বপক্ষিণামাশয়ঃ। তত্র পূর্ব্বপক্ষিণা বিশ্বজিন্ন্যায়ঃ রাত্রিসত্রন্যায়শ্চেতি ন্যায়দ্বয়মুপন্যস্তম্। প্রথমোক্তন্যায়স্য অয়মর্থঃ—'বিশ্বজিতা যজেত' ইত্যাম্নায়তে। ফলন্তু তস্য কর্ম্মণোঽপি ন কিমপ্যুক্তম্। পরন্তু কিমপি ফলং তত্র কল্পনীয়ং ভবতি। যদ্যপ্যত্র ফলশ্রুতিঃ ন বিদ্যতে তথাপি স্বর্গ এবাস্য ফলত্বেন কল্পনীয়ম্, স্বর্গস্য দুঃখমিশ্রিতত্বাভাবাৎ, নিরন্তরসুখাতিশয়াচ্চ সর্ব্বপুরুষাণাম্ ইষ্টত্বাচ্চ। এবং শ্রূয়মাণফলকে কর্মণি যৎ স্বর্গসুখং কল্প্যতে তৎ বিশ্বজিন্ন্যায়স্য বিষয়ঃ প্রকৃতে ফলস্য অশ্রুতৌ অপি বেদাধ্যয়নস্য বস্তুতঃ অনেন ন্যায়েন স্বর্গসুখমেব অপূর্ব্বফলমিতি বোধ্যম্।

অথবা রাত্রিসত্রন্যায়েনাপি তস্য স্বর্গরূপমদৃষ্টং ফলং গম্যতে। রাত্রিসত্রবিধেঃ ফলং ন শ্রুতম্, পরং তস্য স্তাবকেঽর্থবাদে ফলং শ্রূয়তে। "প্রতিতিষ্ঠন্তি হবা এতে, য এতা রাত্রিরুপযন্তি" ইতি

চ। এতদার্থবাদিকং ফলং প্রত্যাসন্নত্বাৎ রাত্রিসত্রবিধেঃ ফলত্বেন কল্পনীয়ম্ ইত্যুক্তং মীমাংসায়াম্। অতএব বিধিবাক্যস্য উপরিষ্টাদ বিদ্যমানাদর্থবাদাৎ কিঞ্চিৎ ফলং শ্রূয়তে চেত্তর্হি তদেব কর্ম্মণঃ ফলমিতি ন্যায়স্যার্থঃ। প্রকৃতে চ "স্বাধ্যায়োঽধ্যেতব্য" ইতি বিধি-বাক্যম্। অনন্তরম্ "যদৃচোঽধীতে পয়সঃ কুলস্যাস্য পিতৄন্ স্বধা অভিবহন্তি" ইত্যাদয়ঃ অর্থবাদাঃ উক্তাঃ। অর্থবাদাশ্চ ঘৃতকুল্যা-প্রবাহাদিরূপং ফলমিতি শ্রূয়তে। আচার্যস্য আচার্যত্বসিদ্ধিঃ এবাধ্যয়-নস্য প্রয়োজনমিতি কেচিৎ।

সিদ্ধান্তস্তু এবমুচ্যতে—

নহি বেদাধ্যয়নস্য অদৃষ্টং ফলং কিঞ্চ দৃষ্টমেব, তচ্চার্থাববোধরূপম্। তথাহি সাঙ্গো বেদোঽধ্যেতব্য ইতি নিয়মাৎ ষড়ঙ্গসহিতস্য বেদস্যা-ধ্যয়নাৎ বেদার্থবিষয়কং জ্ঞানমুৎপদ্যতে। তচ্চ জ্ঞানং সাধারণা-সাধারণতয়া বা ভবতি। প্রথমে কল্পে তাবৎ প্রাথমিকো বোধ এব উদেতি। তদনন্তরন্তু গ্রন্থাদিপর্যালোচনয়া তস্যৈব জ্ঞানস্য পরিপোষো ভবতি ইত্যেবম্ অর্থপরিজ্ঞানমেব বেদাধ্যয়নস্য প্রয়োজনম্, ন তু স্বর্গাদ্যামুষ্মিকমিতি সিদ্ধান্তঃ।

যত্তু কৈশ্চিৎ আচার্যত্বসিদ্ধিরেব প্রয়োজনমিত্যুক্তং তদপ্যসঙ্গতম্। ক্রিয়াফলয়োস্তত্র সামানাধিকরণ্যাভাবাৎ। সায়ণাচার্যাস্তু অক্ষর-গ্রহণমেবাত্র ফলং ন তু অর্থগ্রহণমিত্যাহুঃ। অক্ষরগ্রহণং নাম স্বর-সহিতেন বেদস্য উচ্চারণম্। তথাহি বেদে তাবৎ স্বরস্যৈব প্রাধান্যং বর্ত্ততে। স্বরভেদেন তত্র অর্থস্যাপি ভেদো জায়তে। অতএব মন্ত্রস্য স্বরসহিতোচ্চারণমেব বেদে প্রধানতয়া জ্ঞাতব্যম্। এতদভিপ্রেত্য গুরুমুখোচ্চারণম্ অধ্যয়নমিত্যুক্তম্।

### 6. *মন্ত্রাণাং বিবক্ষিতার্থত্বমবিবক্ষিতার্থত্বং বেতি বিচার্যতাম্।*

চতুর্ষ্বেব বেদেষু ভাগদ্বয়ং বর্ত্ততে—সংহিতাভাগঃ ব্রাহ্মণভাগশ্চ। তত্রাদ্যে মন্ত্রাণাং প্রতিপাদনমস্তি, অন্ত্যে চ বিধীনাম্ অর্থবাদানাঞ্চ

পর্যালোচনা কৃতা। অতএবোক্তং—মন্ত্রব্রাহ্মণাত্মকো হি বেদ ইতি। তত্র সংহিতাগতমন্ত্রাণাং কর্মানুষ্ঠানকালে এবোচ্চারণং ভবতি। তেষামুচ্চারণসহকৃতানি কর্মাণি কর্ত্তব্যত্বেন নির্দ্দিষ্টানি যাজ্ঞিকৈঃ।

মন্ত্রাণামুচ্চারণে ফলদ্বয়ং ভবিতুমর্হতি। দৃষ্টঞ্চাদৃষ্টঞ্চেতি। যত্র মন্ত্রাণামর্থে বিবক্ষা তত্রোচ্চারণং দৃষ্টং ফলং জনয়তি। যত্র চোচ্চারণমেব ফলং ন তু অর্থে বিবক্ষা তত্রাদৃষ্টং ফলম্। অথ যজ্ঞপ্রয়োজনভূতানাং মন্ত্রাণামর্থে বিবক্ষা ন বেতি সন্দেহে পূর্বপক্ষিণোঽয়মাশয়ঃ—

মন্ত্রাণামুচ্চারণমেব অদৃষ্টবিশেষমুৎপাদয়তি। এতেন অদৃষ্টবিশেষেণৈব কর্ম ফলযোগ্যং ভবতি। কিন্তু মন্ত্রস্য পদলভ্যোঽর্থঃ যজ্ঞাদিকর্মণো ন কিমপি প্রযোজনং সাধয়তি। যতো হি মন্ত্রস্য—অর্থো মন্ত্রেতরব্রাহ্মণেঽপি বিজ্ঞাপিতো ভবতি। তথাহি 'উরু প্রথস্ব' ইতি মন্ত্রেণ পুরোডাশপ্রথনম্ অভিধীয়তে। 'পুরোডাশং প্রথয়তি' ইতি ব্রাহ্মণেনাপি তদেব অভিধীয়তে। অত্র ব্রাহ্মণস্যানর্থক্যমিতি চেন্ন। বিধিপ্রধানো হি ব্রাহ্মণভাগঃ। স চ বিধিঃ সাক্ষাৎসম্বন্ধেন ধর্ম্মে প্রমাণম্। অতএব বিনিয়োগবোধনায় ব্রাহ্মণমুপযুক্তম্, মন্ত্রস্য অবিবক্ষিতার্থত্বঞ্চ।

দ্বিতীয়তঃ, 'অগ্নির্মূর্দ্ধা দিবঃ ককুদ্' ইত্যেবমেব বাক্যং পঠিতব্যমিতি মন্ত্রে নিয়মো বর্ত্ততে। অর্থপ্রত্যায়নং তু মূর্দ্ধাগ্নিরিত্যেবং ব্যুৎক্রমপাঠেঽপি যদ্যপি ভবত্যেব তথাপি ক্রমভঙ্গোঽয়ং ন সহনীয়ঃ। তস্মাৎ নিয়তপাঠক্রমসাফল্যায়োচ্চারণমেব মন্ত্রপ্রয়োজনম্। অতএব মন্ত্রাণামবিবক্ষিতার্থত্বং দুর্বারম্।

তৃতীয়তঃ, 'অগ্নীদগ্নীন্ বিহর' ইতি প্রৈষমন্ত্রঃ প্রয়োগকালে পঠ্যতে। তচ্চ অগ্নিবিহরণাদিকং অগ্নীধ্রেণ ঋত্বিজা অধ্যয়নকালে এব স্বকর্ত্তব্যত্বেন বুদ্ধম্। অস্য চ বুদ্ধস্যার্থস্য পুনর্মন্ত্রোচ্চারণেন শাসনমনর্থকমেব। এবং বুদ্ধশাসনাৎ মন্ত্রাণামানর্থক্যমিতি।

চতুর্থতঃ, 'চত্বারিশৃঙ্গা' ইত্যাদিকেষাঞ্চনমন্ত্রাণামর্থবিবক্ষা নাস্তি। যতো ন খলু চতুঃশৃঙ্গত্বাদ্যুপেতং কিঞ্চিৎ যজ্ঞসাধনং বিদ্যতে যৎ মন্ত্রপাঠেনানুস্মর্যেত।

পঞ্চমতঃ, 'ওষধে ত্রায়স্বৈনম্' 'শৃণোত গ্রাবাণ' ইত্যাদৌ সম্বোধনাদি-

রূপার্থস্য অচেতনদ্রব্যে সম্বন্ধাৎ বিবক্ষিতার্থস্যাভাবঃ।

ষষ্ঠতঃ, 'অদিতি র্দ্যৌঃ অদিতিবন্তবিক্ষমিত্যাদৌ' পরস্পববিরুদ্ধঃ অর্থঃ প্রতীযতে। অতএব অর্থবিপ্রতিষেধাৎ মন্ত্রাণামর্থে বিবক্ষা নাস্তীতি।

সপ্তমতঃ, পূর্ণিকা নাম কাচিৎ যোষিৎ যস্মিন্নেব সমযে অবঘাতং করোতি তদৈব স্বাধ্যাযগ্রহণকালে মাণবকেন পঠ্যমানোঽবঘাতমন্ত্রঃ যথা স্বার্থং ন প্রকাশযতি, তথৈব কর্মকালেঽপি উচ্চাবিতানাং মন্ত্রাণামর্থবিবক্ষা নাস্তীতি সিদ্ধম্।

ততঃ 'অম্যক্ স তা' ইতি, 'স্বণ্যেব জর্ভবী তুর্ফরী তু' ইত্যাদি-কেষাঞ্চন মন্ত্রাণামর্থাঃ অবিজ্ঞেযাঃ। এতেন কথং তেষামর্থবিবক্ষা ভবিতুমর্হতি ?

পুনশ্চ বহবো মন্ত্রা জননমবণশীলানিত্যদ্রব্যেন সংযোগবন্তঃ দৃশ্যন্তে। কেষুচিন্মন্ত্রেষু কীকটো নাম জনপদঃ, নৈচাশাখং নাম নগরম্, প্রমগন্দো নাম বাজা ইত্যেতে অর্থা অনিত্যা আম্নাতাঃ। তথা চ সতি প্রমগন্দাদেঃ পরমেব এতেষাং মন্ত্রাণামুৎপত্তেঃ অনিত্যতাপ্রসঙ্গঃ আগচ্ছতি। তস্মাৎ বেদস্যাপি অনিত্যত্বমাপততি। অতএব এতৈ স্তদর্থশাস্ত্রাদিভিঃ হেতুভিঃ মন্ত্রাণামর্থপ্রত্যাযনার্থত্বং নাস্তি কিন্তু উচ্চাবণাদ-দৃষ্টার্থা এব ইতি পূর্বপক্ষঃ।

*অথ সিদ্ধান্তী বদতি—*

'অবশিষ্টস্তু বাক্যার্থঃ' ইতি। অত্র তুশব্দঃ পূর্বপক্ষব্যাবৃত্তিসূচকঃ। ক্রিযাকাবকসম্বন্ধেন প্রতীযমানো বাক্যার্থো লোকবেদযোববিশিষ্টঃ। তথা সতি যথা লোকে অর্থপ্রত্যাযনাযৈব বাক্যমুচ্চার্যতে তথা বৈদিকে যাগ-প্রযোগেঽপি দ্রষ্টব্যম্। মন্ত্রেণ প্রকাশিতস্ত্বর্থঃ অনুষ্ঠাতুং শক্যতে, নতু অপ্রকাশিতঃ। তস্মাৎ মন্ত্রোচ্চাবণস্য অর্থপ্রকাশনং দৃষ্টমেব প্রয়োজনম্।

পূর্বপক্ষিণা 'তদর্থশাস্ত্রাদি' তি হেতুনা ব্রাহ্মণবাক্যে পুনরুল্লেখ-নাদ্ধেতোঃ মন্ত্রার্থস্য অবিবক্ষিতাত্বমিতি যদুক্তং তন্ন সম্যক্। অত্র

মন্ত্রার্থস্য ব্রাহ্মণে পুনরুল্লেখনং হি ক্বচিৎ গুণবিধানরূপপ্রয়োজনেন, ক্বচিচ্চ ইতরব্যাবৃত্তিরূপপ্রয়োজনেন, কচিদ্বা আশঙ্কিবিফলতানিবারণার্থকত্বেন সহ সম্বন্ধস্থাপকত্বেনোপযুজ্যতে। তথাহি 'তাং চতুর্ভিরভ্রিমাদত্তে' ইতি মন্ত্রস্য প্রতীতস্যৈবার্থস্য ব্রাহ্মণে যৎ পুনঃ শ্রবণং তদেতচ্চতুঃসংখ্যালক্ষণ-গুণবিধানার্থকত্বেন উপযুজ্যতে। এতস্য বিধানস্যাভাবে চতুর্ণাং মন্ত্রাণাম্ মধ্যে যেন কেনাপ্যেকেন অভ্রিরাদীয়েত।

'এবমিমামগৃভ্ণন্ রশনামৃতস্য ইত্যশ্বাভিধানীমাদত্তে' ইত্যাদিস্থলে গর্দভাভিধানীং নাদত্তেতি পরিসংখ্যার্থত্বেন ব্রাহ্মণবাক্যস্য প্রয়োজনমেব। এবম্ 'উরু প্রথস্ব' ইত্যত্র "যজ্ঞপতিমেব তৎ প্রথযতি" ইতি অর্থবাদেন সম্বন্ধায ব্রাহ্মণে বিধিঃ পঠ্যতে।

'অগ্নির্মূর্দ্ধা দিবঃ ককুদ' ইত্যত্র বাক্যনিযমাৎ অদৃষ্টার্থা মন্ত্রা ইতি যদুক্তং তৎপ্রতি উত্তরমিদম্ নিযমস্বীকারমাত্রেণ অর্থবোধকতাযা ন বাধঃ। অর্থপ্রতীতির্নিয়মেন উচ্চারিতৈর্বাক্যৈরেব ভবতি। অতএব নিয়মস্য ফলমদৃষ্টং ভবিতুমর্হতি নতু উচ্চারণস্য। তস্মাৎ মন্ত্রাণামর্থে বিবক্ষা অস্তি।

কিঞ্চ, অগ্নীদগ্নীন্ বিহর' ইত্যাদিস্থলে বুদ্ধশাস্ত্রস্যাপি পুনরুচ্চারণং প্রমাদবিস্মরণাদীনাং পরিহারায ভবত্যেব।

'চত্বারি শৃঙ্গা' ইত্যাদৌ অবিদ্যমানবচনাদিতি হেতোঃ যো দোষো দর্শিতঃ তস্যেদমুত্তরম্ অসতোঽর্থস্য অভিধায়কে বাক্যে গৌণস্যার্থস্য উক্তির্দ্রষ্টব্যা। তদ্যথা—চত্বারো হোত্রধ্বর্যূদ্গাতৃব্রাহ্মণোঽস্য কর্মণঃ শৃঙ্গাণি, প্রাতঃসবনাদয়স্ত্রয়ঃ পাদাঃ, পত্নীযজমানৌ দ্বে শীর্ষে, গায়ত্র্যাদীনি সপ্ত ছন্দাংসি হস্তা ইত্যেবম্। অতএব গৌণার্থবোধকত্বে মন্ত্রাণামর্থবিবক্ষা বর্ত্ততে।

এবম্ 'ওষধে ত্রাযস্ব' 'শৃণোত গাবাণ' ইত্যাদ্যচেতনসম্বোধনানি স্তুতিপরত্বেন যোজনীয়ানি। অত্র অচেতনসম্বোধনার্থা মন্ত্রাস্তত্তদভিমানি-দেবতানামেব প্রকাশকর্ত্তারঃ। অতএব বিরুদ্ধং ন কিঞ্চিদস্তি।

এবম্, 'ত্বমেব পিতা ত্বমেব মাতা' ইত্যাদৌ লৌকিকনিয়মাৎ অদিতির্দ্যৌরদিতিরন্তরিক্ষম্' ইত্যাদ্যর্থ বিরোধস্য পরিহারঃ সম্ভবঃ।

বেদবিদ্যাগ্রহণকালেঽর্থস্য যদবচনং যদ্‌যজ্ঞসংযোগাভাবাদুপপদ্যতে। ন হি পূর্ণিকাযা অবঘাতো যজ্ঞসংযুক্তঃ, নাপি মাণবকো যজ্ঞমনু- তিষ্ঠতি, অতো যজ্ঞানুপকাবাং ন তত্র অর্থবিবক্ষা।

অপি 'সৃণ্যেব জর্ভরী তুর্ফরী তূ' ইত্যাদীনামপি বাক্যানামর্থো বিদ্যতে। স চ নিগমনিরুক্তব্যাকরণাদিভ্যোঽবগন্তব্যঃ।

"যত্বুক্তং অনিত্যসংযোগাদিকং তত্রেদমুত্তরম্ যৎ কাঠককালাপকাদি- সমাখ্যানং তৎ প্রবচননিমিত্তম্। বীজাঙ্কুরন্যায়েণ প্রবাহনিত্যন্যায়েন চ ইমে সর্ব্বেঽপি পদার্থা রাজপর্ব্বতনদীপ্রভৃতয়ঃ বেদেষু বর্ণ্যমানা নিত্যাঃ কল্প্যন্তে। অতএব সর্ব্বেষাং মন্ত্রাণামর্থবিবক্ষা স্বীকরণীয়া" ইতি।

লিঙ্গদর্শনমপি মন্ত্রাণামর্থবোধকত্বে প্রমাণম্। 'আগ্নেয্যাগ্নীধ্রমুপ- তিষ্ঠেত' ইতি শ্রূয়তে। অত্র আগ্নেযী ইতি পদেন অগ্নির্দেবতা যস্য ঋচঃ সেয়মিতি বোধ্যতে। তস্মাদযমুপদেশস্তন্মন্ত্রবাক্যার্থবদিতি বোধয়তি।

মন্ত্রাণাং যদি অর্থে বিবক্ষা ন স্যাত্তর্হি বিকৃতিযাগেষু মন্ত্রাণাং য ঊহো দৃশ্যতে তন্ন স্যাৎ। তস্মাদূহোঽপি মন্ত্রার্থবিবক্ষিতত্বে প্রমাণম্।

মন্ত্রব্যাখ্যানরূপো ব্রাহ্মণগতঃ শব্দো বিধিশব্দ ইত্যুচ্যতে। স চৈব- মাম্নায়তে—'শতং হিমাঃ শতং বর্ষাণি জীব্যাঃ স্ম ইত্যেব এতদাহ' ইত্যত্র 'শতং হিমা' ইত্যেতদ্ ব্যাখ্যেয়মন্ত্রস্য প্রতীকম্। অবশিষ্টং তু তস্য তাৎপর্যব্যাখ্যানম্। মন্ত্রস্য অবিবক্ষিতার্থত্বে তু এতদ্ব্যাখ্যানং ন সম্ভবমেব।

অতএব এতদ্ জ্ঞাতম্—ন মন্ত্রা অবিবক্ষিতার্থাঃ। কিন্তু বিবক্ষিতা মন্ত্রাঃ প্রয়োগ-কালে স্বার্থপ্রকাশনায়ৈব উচ্চারয়িতব্যাঃ।

7. ***অপ্রমাণত্বেন অনুপযুক্তত্বাৎ ন হি বেদো ব্যাখ্যা- ঈতি ইতি পূর্ব্বপক্ষে ভাষ্যকারসিদ্ধান্তং প্রদর্শয় বা বেদস্য মন্ত্রভাগানাং প্রামাণ্যং প্রদর্শয়।***

মন্ত্রব্রাহ্মণাত্মকস্য বেদস্য লক্ষণসম্ভাবাৎ বেদাখ্যস্য কস্যচিৎ পদার্থস্য সদ্ভাবেঽপি নাস্তি তস্য প্রমাণযোগ্যতা। অতএব অপ্রমাণত্বেন অনুপ-

যুক্তত্বাৎ নাসৌ ব্যাখ্যানমর্হতি। বেদলক্ষণস্য তত্র দুঃসম্পাদত্বাৎ ন হি বেদঃ প্রমাণম্। সম্যগনুভবসাধনং প্রমাণম্। অনধিগতার্থগন্তৃ প্রমাণমিতি দ্বিবিধপ্রমাণলক্ষণেনাপি বেদমন্ত্রাণাং প্রামাণ্যং সিধ্যতি।

'অম্যক্ সা ত ইন্দ্রঃ ঋষ্টিঃ' ইতি, 'সৃণ্যেব জর্ভরী তুর্ফরী তূ' ইত্যাদিমন্ত্রে ন কশ্চিদপ্যর্থোঽববুধ্যতে। অতএব এতেষু অনুভব এব যদা নাস্তি তদা তৎসম্যক্ত্বং তদীয়সাধনত্বং দূরাপেতম্।

"অধঃস্বিদাসীদ্ উপরিস্বিদাসীদ্" ইতি মন্ত্রাণাং সন্দিগ্ধার্থবোধকত্বাৎ "ওষধে ত্রায়স্বৈনম্" ইত্যাদৌ অচেতনেষ্বপি ওষধ্যাদিষু চেতনবদ্ব্যবহারাৎ, "এক এব রুদ্রো ন দ্বিতীয়ায়াবতস্থে" ইতি রুদ্রস্য অদ্বিতীয়ত্বং প্রতিজ্ঞায় পুনঃ "সহস্রাণি সহস্রশো যে রুদ্রা অধিভূম্যাম্" ইতি প্রতিজ্ঞাবিরোধাৎ মন্ত্রেষু সম্যগনুভবসাধনত্বং নাস্তি। বিবাহকালে "শুভিকে শির আরোহ", ক্ষৌরকালে চ "আপ উন্দন্তু" ইতি পঠ্যমানয়োরনয়োর্মন্ত্রয়োঃ নাস্তি অনধিগতার্থগন্তৃত্বম্। ক্ষৌরকালে জলেন শিরসঃ ক্লেদনং তথা বিবাহকালে শুভিকাধারণমিত্যনয়োঃ মন্ত্রযোঃ লোকপ্রসিদ্ধাপ্রকাশনাৎ অনধিগতার্থগন্তৃত্বং নাস্তি। তস্মাৎ মন্ত্রভাগো ন প্রমাণমিতি পূর্ব্বপক্ষঃ।

অথ সিদ্ধান্তপক্ষ উচ্যতে—

অনাদিকালতঃ প্রসিদ্ধস্য মন্ত্রব্রাহ্মণাত্মকস্য বেদস্য বাচকত্বাৎ লোকবৎ যাগাদিপ্রয়োগে অপি যাগীয়দ্রব্যদেবতাদ্যর্থস্য প্রকাশকত্বাদস্তি মন্ত্রভাগানাং প্রামাণ্যম্।

অম্যগাদিমন্ত্রাণাং ব্যাখ্যা যাস্কেন নিরুক্তগ্রন্থে কৃতা। যে খলু তয়া ব্যাখ্যয়া ন পরিচিতা দোষস্তু তেষামেব, ন তু মন্ত্রাণামেব। উক্তঞ্চ ন্যায়বিদা—"নৈষ স্থাণোরপরাধঃ যদেনমন্ধো ন পশ্যতি" ইতি।

যদুক্তং মন্ত্রাণামর্থাবগমাভাবাৎ অনধিগতার্থগন্তৃত্বং নাস্তীতি তন্ন। "অধঃ স্বিদাসীদ্" ইত্যাদিমন্ত্রাণাং ন সন্দিগ্ধার্থত্বম্। জগৎকারণস্য পরবস্তুনঃ অতিগম্ভীরত্বং গুরুশাস্ত্রসম্প্রদায়রহিতে দুর্বোধত্বং চ অনয়া বচোভঙ্গ্যা উপন্যস্তম্।

ওষধ্যাদিমন্ত্রেষু নহি অচেতনাঃ ক্ষুরপাষাণাদয়ঃ সম্বোধ্যন্তে। তেন তেন নাম্না ক্ষুরাদ্যভিমানিদেবতা এব সম্বোধ্যন্তে।

এবমেকস্যাপি রুদ্রস্য স্বমহিম্না সহস্রমূর্ত্তিস্বীকারাৎ নাস্তি পরস্পরব্যাঘাতঃ। জলাদিদ্রব্যেণ শিবঃ ক্লেদনাদের্লোকপ্রসিদ্ধত্বেঽপি, তদভিমানিদেবতানুগ্রহস্য অপ্রসিদ্ধত্বাৎ তদ্বিষয়ত্বেন অজ্ঞাতার্থজ্ঞাপকত্বম্।

এবম্ অম্যগাদিমন্ত্রাণাং নিরুক্তপর্যালোচনেন অর্থাবগমাৎ সন্দিগ্ধত্বাদিদোষরাহিত্যাদস্তি সম্যক্ অনুভবসাধনত্বম্। "আপ উন্দন্তু" ইত্যাদি মন্ত্রাণাং জলাদ্যভিমানিদেবতানুগ্রহস্য অলৌকিকত্বাদস্তি অলৌকিকার্থবোধকত্বম্। অতএব উভয়লক্ষণসদ্ভাবাদস্তি মন্ত্রভাগানাং প্রামাণ্যম। তস্মাৎ প্রমাণভূতস্য বেদস্যাস্তি ব্যাখ্যানযোগ্যতা ইতি দিক্।

## (৪) *বিধিভাগানাং প্রামাণ্যমস্তি ন বেতি বিচার্যতাম্।*

দ্বিবিধং ব্রাহ্মণম্ -বিধিরর্থবাদশ্চেতি। বিধিরপি দ্বিবিধঃ। অপ্রবৃত্তপ্রবর্ত্তনম্ অজ্ঞাতজ্ঞাপনঞ্চেতি। তত্র বিধিভাগানাং প্রামাণ্যমস্তি নবেতি সন্দেহে পূর্ব্বপক্ষী মন্যতে যন্নাস্তি বিধিভাগানাং প্রামাণ্যম্, পরস্পরবিরোধাৎ। তথা চ কর্মকাণ্ডগতানাং "জর্ত্তিলযবাগ্বা বা জুহুযাদ্ গবীধুকযবাগ্বা বা" ইত্যাদিবিধীনাং নাস্তি প্রামাণ্যম্। প্রবর্ত্ত্যযোগ্যদ্রব্যবিধানেন সম্যগনুভবসাধনত্বাভাবাৎ। অযোগ্যত্বঞ্চ বাক্যশেষে সমাম্নাতম্—"অনাহুতির্বৈ জর্ত্তিলাশ্চ গবীধুকাশ্চ" ইতি। অত্র হি আরণ্যতিলানাম্ আরণ্যগোধূমানাঞ্চ আহুতিদ্রব্যত্বং নিষিদ্ধম্। অথচ পূর্ব্বত্র তয়োরেব আহুতি দ্রব্যত্বং বিহিতম্। তস্মাদ বাসিতো জর্ত্তিলাদিবিধিঃ অপ্রমাণম্, পরস্পর বিরোধাৎ। তথৈব "অতিরাত্রে ষোড়শিনং গৃহ্লাতি" ইতি বিধিঃ "নাতিরাত্রে ষোড়শিনং গৃহ্লাতি" ইতি নিষেধেন বাধ্যতে। কিঞ্চ যথোক্তফলাভাবাদপি অপ্রামাণ্যম্ তথাহি জ্যোতিষ্টোমাদিষু অনুষ্ঠানান্তরমেব স্বর্গাদিফলং নোপলভ্যতে। তস্মাৎ কর্মবিধিষু প্রামাণ্যম্ দুঃসম্পাদম্। এবম্ অজ্ঞাতজ্ঞাপকেষু ব্রহ্মবিধিষ্বপি পরস্পর-

2. যেন কর্মাণ্যপসো মনীষিণো যজ্ঞে কৃণ্বন্তি বিদথেষু ধীরাঃ।
যদপূর্বং যক্ষমন্তঃ প্রজানাং তন্মে মনঃ শিবসঙ্কল্পমস্তু ॥ 2।

বাজসনেয়িসংহিতায়াং শিবসঙ্কল্পসূক্তস্য দ্বিতীয়ো মন্ত্রোঽয়ম্। যেন কর্মাণ্যীতি। অস্মিন্ সূক্তে মনো দেবতা, ছন্দাস্ত্রিষ্টুপ্। বিনিয়োগশ্চ লৈঙ্গিকঃ অর্থাৎ লিঙ্গং সামর্থ্যং দৃষ্ট্বা সূক্তমিদং বিনিযুজ্যতে। যন্মনঃ সর্বকর্মসু অস্মাকং প্রেরকত্বেন বর্ত্ততে তন্মনঃ শান্তসঙ্কল্পম্ অস্তু ইতি প্রার্থনং ক্রিয়তে অস্মিন্ সূক্তে।

মনীষিণঃ মেধাবিণঃ যজ্ঞে যেন মনসা সতা কর্মাণি বৃণ্বন্তি কুর্বন্তি, কৃ করণে স্বাদিঃ, মনঃস্বাস্থ্যং বিনা কর্মাপ্রবৃত্তেঃ। কেষু সৎসু? বিদথেষু জ্ঞানেষু সৎসু। বিদ্যন্তে জ্ঞায়ন্তে তানি বিদথানি তেষু যজ্ঞসম্বন্ধিনাং হবিরাদি- পদার্থানাং জ্ঞানেষু সৎস্বিত্যর্থঃ। কীদৃশাঃ মনীষিণঃ? অপসঃ অপ ইতি কর্মনাম। অপো বিদ্যতে যেষাং তে অপস্বিনঃ কর্মবন্তঃ। অস্মায়ামেধাস্রজো বিনিরিতি বিন্প্রত্যযঃ। সদা কর্মনিষ্ঠা ইত্যর্থঃ। তথা ধীরাঃ ধীমন্তঃ ধীর্বিদ্যতে যেষাং তে ইত্যর্থঃ। যচ্চ অপূর্বং ন বিদ্যতে পূর্বং যস্য তৎ যদ্বা অপূর্ব্বমনপরম্ যচ্চ যথা পূজ্যম্। যচ্চান্তর্মধ্যে প্রজানামাস্তে তন্মে মনঃ শিবসঙ্কল্পমস্তু। শান্তসঙ্কল্পং ভবতু।

3. যৎপ্রজ্ঞানমুত চেতো ধৃতিশ্চ যজ্যোতিরন্তরমৃতং প্রজাসু।
যস্মান্ন ঋতে কিঞ্চন কর্ম ক্রিয়তে তন্মে মনঃ শিবসঙ্কল্পমস্তু ॥ 3 ॥

বাজসনেয়িসংহিতায়াং শিবসঙ্কল্পসূক্তস্য তৃতীয়ো মন্ত্রোঽয়ম্। যৎপ্রজ্ঞানমিতি। যন্মনঃ সর্বকর্মসু অস্মাকং প্রেরকত্বেন বর্ত্ততে তন্মনঃ শান্তসঙ্কল্পং শুভ্রং শুদ্ধমস্তু ইতি ঋষিকবেঃ প্রার্থনং ধ্বন্যতে অত্র।

যন্মনঃ প্রজ্ঞানং বিশেষপ্রতিপত্তিজ্ঞানম্। জ্ঞানেষু চ ত্রৈবিধ্যমস্তি—বিজ্ঞানম্, সংজ্ঞানম্, প্রজ্ঞানমিতি। সাধারণলৌকিকপদার্থানাং জ্ঞানং বিজ্ঞানম্। অনুশীলনপূর্বকং যৎ জ্ঞানং তৎ সজ্ঞানম্। প্রজ্ঞানং হি উৎকৃষ্টতমং জ্ঞানম্। এতস্মিন্ জ্ঞানে জাতে সর্বং জ্ঞাতং ভবতি। অস্মাকং মনশ্চ এবং প্রকৃষ্টজ্ঞানস্বরূপং তস্মিন্ জ্ঞানে জাতে সর্ব্বং জ্ঞাতং ভবতি। ন কিমপি দুর্জ্ঞাতং বিদ্যতে। উতাপি চ। তন্মনঃ চেতঃ সামান্যপ্রতিপত্তিচেতঃ। তথা ধৃতিশ্চ ধৈর্যমিতি লোকে প্রসিদ্ধম্। কিঞ্চ যন্মনঃ প্রজাসু সর্বপ্রাণিষু বিদ্যমানম্ অন্তর্জ্যোতি অলৌকিকত্বেন জ্যোতিঃস্বরূপম্। অমৃতঞ্চ অমৃতময়ং চিদানন্দস্বরূপঞ্চ। ইদমেব জ্যোতী-রূপং মনঃ সর্বপ্রাণিষু স্থিতং তান্ সর্বকর্মাণি প্রবর্ত্তয়তি। তদুক্তম্—যস্মান্ন ঋতে যেন চ বিনা ন কিঞ্চন কর্ম ক্রিয়তে। প্রাণিষু য এব যদেব কার্য্যং করোতি সর্বমেব মনসৈব ক্রিয়তে। ক্ষুদ্রং বা ভবতু বৃহদ্বা সর্ব্বত্রাপি কার্য্যসম্পাদনে মনসঃ সম্বন্ধঃ আবশ্যকঃ। তদ্বিনা কিমপি কার্য্যং কর্ত্তুং ন শক্যতে। দৃশ্যতে চাপি মনসা সম্বন্ধমেব সৎ ইন্দ্রিয়জাতং স্বকীয়কার্য্যসম্পাদনে প্রভবতি অন্যথা না। এবং মনস এব সর্ব্বেষু প্রাধান্যম্ অস্তি মহত্ত্বঞ্চাপি। তন্মে মনঃ শিবসঙ্কল্পমস্তু কল্যাণপ্রযত্নমস্তু।

4. ***যেনেদং ভূতং ভুবনং ভবিষ্যৎপরিগৃহীতমমৃতেন সর্বম্।***
***যেন যজ্ঞস্তায়তে সপ্তহোতা তন্মে মনঃ শিবসঙ্কল্পমস্তু*** ॥ 4 ॥

বাজসনেয়িসংহিতাগতস্য শিবসঙ্কল্পসূক্তস্য চতুর্থো মন্ত্রোঽয়ম্। অত্র ভূমিকা পূর্ববৎ।

যেন সর্ব্বপ্রাণিগতেন মনসা ইদং সর্ব্বং পরিগৃহীতম্ পরিতঃ সর্বতো জ্ঞাতম্। ইদং কিম্ভূতম্? ভূতকালসম্বন্ধি বস্তু। ভুবনং ভবতীতি

ভুবনম্। বর্ত্তমানকালসম্বন্ধি ইত্যর্থঃ। ভবিষ্যৎ ভাবিকালসম্বন্ধি চ। ত্রিকালসম্বন্ধিবস্তুষু মনঃ প্রবর্ত্তত ইত্যর্থঃ। শ্রোত্রাদীনি তু প্রত্যক্ষমেব গৃহ্ণন্তীতি তেভ্যো মহদ্‌বৈলক্ষণ্যং মনসঃ। পুনঃ কীদৃশেন মনসা ইত্যুচ্যতে সত্যেনেতি। সত্যেন অমৃতেন শাশ্বতেন মুক্তিপর্য্যন্তমিত্যর্থঃ। শ্রোত্রাদীনি নশ্যন্তি মনস্তু অনশ্বরমিত্যর্থঃ। যেন চ মনসা যজ্ঞোঽগ্নিষ্টোমাদিঃ তাংতে বিস্তার্যতে। কীদৃশো যজ্ঞ ইত্যুচ্যতে সপ্তহোতা সপ্তহোতারো দেবানামাহ্ব· তারো হোতৃমৈত্রাবরুণাদয়ো যস্ম স সপ্তহোতা। অগ্নিষ্টোমে হি সপ্তহোতারো ভবন্তি। যদ্বা চতুর্হোত দশহোতা সপ্তহোতা ইত্যাদয়ো মন্ত্রবিশেষানভিদধতি। তন্মে মনঃ ইত্যাদিব্যাখ্যানং পূর্ব্ববৎ।

5. *সুষারথিরশ্বানিব যন্মনুষ্যান্নেনীয়তেঽভীশুভি-*
*র্বাজিন ইব।*
*হৃৎপ্রতিষ্ঠং যদজিরং জবিষ্ঠং তন্মে মনঃ*
*শিবসঙ্কল্পমস্তু* ॥ 6 ॥

বাজসনেয়িসংহিতাভাগতস্য শিবসঙ্কল্পসূক্তস্য ষষ্ঠো মন্ত্রোঽয়ম্। ভূমিকা পূর্ব্ববৎ।

যৎ মনো মনুষ্যান্নরান্নীয়তে নেনীয়তে নয়তি। মনঃপ্রেরিতা এব প্রাণিনঃ প্রবর্ত্তন্তে। মনুষ্যগ্রহণং প্রাণিগ্রহণোপলক্ষকম্। তত্র দৃষ্টান্তঃ সুষারথিঃ অশ্বানিব শোভনঃ সারথিযন্তা যথা কশয়া অশ্বান্ নেনীয়তে। দ্বিতীয়ো দৃষ্টান্তঃ অভীশুভির্বাজিন ইব। যথা সুষারথিরভীশুভিঃ প্রগ্রহৈঃ বাজিনোঽশ্বান্ নেনীয়তে ইত্যনুষঙ্গঃ রশ্মিভির্নিযচ্ছতীতি শেষঃ। উপমাদ্বয়ং প্রথমায়াং নয়নং দ্বিতীয়ায়াং নিয়মনম্ তথা মনঃ প্রবর্ত্তয়তি নিযচ্ছতি চ নরানিত্যর্থঃ। যচ্চ মনঃ হৃৎপ্রতিষ্ঠং হৃদি প্রতিষ্ঠা স্থিতির্যস্য তৎ হৃদ্যেব মন উপলভ্যতে। যচ্চ মনঃ অজিরং জরারহিতম্ বাল্য-যৌবনস্থবিরেষু মনসস্তদবস্থত্বাৎ। যচ্চ জবিষ্ঠং অতিজবৎবেগবৎ জবিষ্ঠম্ ন বৈ বাতাৎ কিঞ্চাশীয়োঽস্তি ন মনসঃ কিঞ্চনাশীয়োঽস্তীতি শ্রুতেঃ। তন্মে মন ইতিব্যাখ্যানং পূর্ব্ববৎ।

# Atharva-Veda

## Varuna-Sukta

1. যস্তিষ্ঠতি চরতি যশ্চ বঞ্চতি যো নিলায়ং চরতি যঃ প্রতঙ্কম্ ।
দ্বৌ সন্নিষদ্য যন্মন্ত্রয়েতে রাজা তদ্বেদ বরুণস্তৃতীয়ঃ ॥ 2 ॥

অথর্ববেদে বরুণসূক্তান্তর্গতো মন্ত্রোঽয়ম্ । অভিচারকর্মণি ইদং সূক্তং বিনিযুক্তম্ । অভিচারো নাম শত্রুমারণানুকূলো ব্যাপারঃ । যদা শত্রুঃ গর্জতি তদবসরে, ইদং সূক্তং যদি পঠ্যতে তর্হি শত্রবঃ নিপীড়িতা ভবন্তি । বরুণদেবতাকত্বাৎ বরুণস্যৈব অত্র অধিষ্ঠাতৃত্বম্ । শত্রূণাং নিগ্রহণার্থং বরুণসূক্তং পঠনীয়ম্ ।

অত্রমন্ত্রে রাজারূপস্য বরুণস্য প্রশস্তির্গীতা ভবতি । রাজা নিয়ামকো বরুণঃ সর্ব্বমেব গুপ্তবিষয়ং জানাতি । যশ্চ বঞ্চতি কৌটিল্যেন প্রতারয়তি ; যঃ শত্রুঃ নিলায়ং চরতি নিলীয় নিলীয় প্রচ্ছন্নঃ চরতি, যথা মার্জারশ্চরতি তদ্বৎ । অদৃশ্যঃ সঞ্চরতি বা ; যঃ শত্রুঃ প্রতঙ্কম্ প্রকর্ষেণ কৃচ্ছ্রজীবনং প্রাপ্য চরতি বর্ত্ততে ; বরুণঃ এষাং শত্রূণাম্ অন্তিকাদিব পশ্যতি । দ্বৌ শত্রূ সন্নিষদ্য রহসি মিলিত্বা যৎকার্যং মন্ত্রয়তে গুপ্তং ভাষেতে তযোর্গুপ্তং ভাষণং তৃতীয়ো রাজ্যেশ্বরো বরুণঃ তৎসর্বং বেদ জানাতীত্যর্থঃ । যঃ শত্রুস্তিষ্ঠতি স্থাবররূপেণ অবস্থানং করোতি তস্যাপি সন্ধানং বরুণো বেত্তি । ষট্‌কর্ণো ভবত্যয়ং বরুণঃ । অতএব অকার্যচিন্তাবসরে এব তান্ নিগ্রহীতুং বরুণঃ শক্নোতীত্যর্থঃ ।

2. উতেয়ং ভূমির্বরুণস্য রাজ্ঞ উতাসৌ দ্যৌর্বৃহতী দূরেঽন্তা।
উতো সমুদ্রৌ বরুণস্য কুক্ষী উতাস্মিন্নল্প উদকে নিলীনঃ ॥ 3 ॥

'যস্তিষ্ঠতি চরতি যশ্চ' ইতি মন্ত্রে বরুণস্য জঙ্গমেষু পদার্থেষু সঞ্চরণং প্রতিপাদিতম্। অধুনা গিরিনদীপ্রভৃতিষু স্থাবরাত্মকেষু পদার্থেষু অস্য সঞ্চরণং প্রতিপাদ্যতে। পালকরূপত্বাং বরুণসম্বন্ধিনী ইয়ং ভূমিঃ। ভূম্যাং যথা তস্য সম্বন্ধো বর্ত্ততে তথা দিবি অপি।

'উত' অপি, 'ইয়' ভূমি'রপি 'রাজ্ঞঃ' ঈশ্বরস্য বরুণস্য বশে বর্ত্ততে। উতাপি চাসৌ 'বৃহতী' মহতী 'দূরেঽন্তা' দূরে বিপ্রকৃষ্টদেশে অন্তে অন্তিমে দেশে চ ভবতীতি দূরেঽন্তা। এবংরূপা দ্যৌশ্চ বরুণস্য রাজ্ঞঃ বশে বর্ত্ততে। দূরেঽন্তা ইতি দ্যাবাপৃথিব্যোর্নামসু পঠিতম্। 'উতো' অপি চ 'সমুদ্রৌ' পূর্ব-পশ্চিমৌ বরুণস্য রাজ্ঞঃ 'কুক্ষী' দ্বে উদরে। তস্মিন্নল্পেঽপি উদকে তটাকে নিলীনোঽন্তর্হিতো ভবতি। সর্ব্বব্যাপকোঽয়ম্। অতএব সর্ব্বত্র স্থাবরেষু পদার্থেষু সঞ্চরণশীলত্বাৎ শত্রূণাং সর্বাণি কার্য্যাণি অসৌ বরুণো জানাতি।

3. সর্ব্বং তদ্রাজা বরুণো বিচষ্টে যদন্তরা রোদসী যৎ পরস্তাৎ।
সংখ্যাতা অস্য নিমিষো জনানামক্ষানিব শ্বঘ্নী নিমিনোতি তানি ॥ 5 ॥

সর্বত্রাপি স্থাবরাত্মকেষু জঙ্গমাত্মকেষু চ বস্তুষু সঞ্চরন্ স শত্রূণাং গতিং জানাতি। সর্বব্যাপকত্বেন বর্ত্তমানস্যাস্য সর্বপ্রাণিষু অধিষ্ঠাতৃত্বং বর্ত্ততে। তদেব প্রতিপাদ্যতেঽনেন মন্ত্রেণ—সর্বং তদ্রাজেত্যাদিনা।

'রোদসী অন্তরা' দ্যাবাপৃথিব্যোর্মধ্যে যৎ প্রাণিজাতং বর্ত্ততে, তথা 'পুরস্তাৎ' স্বস্য পুরোভাগে যৎ প্রাণিজাতমস্তি তৎ সর্বং বরুণো রাজা 'বিচষ্টে' বিশেষেণ পশ্যতি। কথনার্থকোঽপি চক্ষিঙ্‌-ধাতুঃ দর্শনার্থকোঽত্র। তস্মাৎ তেষাং 'জনানাং' প্রাণিনাং 'নিমিষো' নিমেষণব্যাপারস্য তাস্য 'সংখ্যাতা' পরিমাণয়িতা বরুণস্তানি পাপিনাং শিক্ষাকর্মাণি তত্তৎ পাপানুসারেণ 'নিমিনোতি' নিক্ষিপতি। কিম্প্রকারেণ? অক্ষানিবেতি। 'শ্বঘ্নী' স্বঘ্নী স্বমাত্মানং স্বকীয়ং ধনং য হন্তীতি স্বঘ্নী। শ্বঘ্নী কিতব ইতি যাস্কঃ। যথা কিতবঃ অক্ষান্ আত্মজয়ার্থং নিক্ষিপতি তদ্বদিত্যর্থঃ। 'শ্বঘ্নী' ইত্যত্র বর্ণব্যত্যয়েন সকারস্য শকারঃ। কিতববৎ বরুণোঽপি সর্বেষাং প্রাণিনাং কর্মজাতং বিপশ্যন্ তেষাং শিক্ষার্থং পাপপুণ্যানুসারেণ যথাযথং কর্মাণি তেষামুপরি নিক্ষিপতি। এবং সর্বাধিষ্ঠাতৃত্বং তস্য।

4. ***যে তে পাশা বরুণ সপ্তসপ্ত ত্রেধা তিষ্ঠন্তি বিষিতা রুশন্তঃ।***
***ছিনন্তু সর্ব্বে অনৃতং বদন্তং যঃ সত্যবাদ্যতি তং সৃজন্তু॥ 6.***

—শত্রূণাং কৃতে অপকারকারিত্বং মিত্রাণাং কৃতেচ উপকারকারিত্বং বরুণস্য কার্য্যম্। স সর্বান্ ন হন্তি ইতি অস্য মন্ত্রস্যাশয়ঃ।

হে বরুণ! যে ত্বদীয়াঃ পাশাঃ 'সপ্তসপ্ত' উত্তমমধ্যমাধমভেদেন প্রত্যেকং সপ্তসংখ্যকাস্ত্রেধা ত্রিপ্রকারং 'বিষিতা'স্তত্র তৎ পাপিনাং নিগ্রহায় জালবৎ বদ্ধাঃ। 'রুশন্তঃ' তত্তৎপাপানুসারেণ পাপিষ্ঠান্ হিংসন্তঃ তিষ্ঠন্তি সর্বে তে পাশা অনৃতং বদন্তং পাপকৃতমস্মদীয়ং শত্রুং ছিনত্তু ছিন্দন্তু। যস্তু সত্যবাদী সত্যবদনশীলঃ পুণ্যকৃৎ তম্ অতি সৃজন্তু বিমুঞ্চন্তু। বরুণস্য পাশঃ অনৃতবাদিনং নাশয়তি, সত্যবাদিনস্তু পোষয়তি। তে চ পাশাঃ ত্রিধাঃ বদ্ধাঃ। তে হি জালরূপেণ শত্রূণামবহননায় সন্তি।

5. *শতেন পাশৈরভিধেহি বরুণৈনং মা তে*
*মোচ্যনৃতবাঙ্ নৃচক্ষঃ।*
*আস্তাং জাল্ম উদরং শ্রংশয়িত্বা কোশ ইবাবন্ধঃ*
*পরিকৃত্যমানঃ॥ 7॥*

শত্রুপীড়নাদৌ নিযুক্তোঽপি ধর্মদর্শনাদৌ চ স বরুণঃ প্রবৃত্ত ইতি সূচনায় মন্ত্রস্যাস্য প্রয়োগঃ।

হে বরুণ, শতেন শতসংখ্যকৈ স্তদীয়ৈঃ পাশৈঃ এনম্ অনৃতবাদিনং শত্রুমভিধেহি বধান, বদ্ধা নিগৃহাণেত্যর্থঃ। হে নৃচক্ষঃ, নৃণাং মনুষ্যাণাং সাধ্বসাধুচরিত্রাণাং বিবেকেন দৃষ্টঃ ঈদৃশঃ হে বরুণ, অনৃতবাক্ অনৃতং ব্রুবন্ পুরুষস্তে ত্বত্তো মা মোচি বিমুক্তো বিসৃষ্টো মা ভূৎ। কিন্তু জাল্মঃ অসমীক্ষ্যকারী স্বকীয়ম্ উদরং শ্রংশয়িত্বা স্রংসয়িত্বা জলোদররোগেণ স্রস্তাং কৃত্বা অবন্ধো বন্ধরহিতঃ কোশ ইব পরিকৃত্যমান আস্তাম্। ত্বৎপাশবদ্ধ এব বর্ত্ততাম্। অর্থাৎ তব খড়্গ উন্মুক্তকোশাদ্ বহির্নিগতঃ সন্ সর্বদা জাগরূকো বর্ত্ততাম্। বরুণো হি জলোদররোগস্য অধিষ্ঠাতা ইতি মন্ত্রেণানেন পরিজ্ঞাতম্।

---

Kala-Sukta.

1. *কালো অশ্বো বহতি সপ্তরশ্মিঃ সহস্রাক্ষো*
*অজরো ভূরিরেতাঃ।*
*তমা রোহন্তি কবয়ো বিপশ্চিতস্তস্য চক্রা*
*ভুবনানি বিশ্বা॥ 1॥*

অনেন সূক্তেন সর্বজগৎকারণভূতঃ কালরূপঃ পরমাত্মা স্তূয়তে। তত্র প্রথময়া কালোঽশ্বাত্মনা রূপ্যতে।

প্রথমতঃ, সপ্তরশ্মিঃ সপ্তসংখ্যকা রশ্ময়ো বহবো যস্য সঃ, সহস্রাক্ষঃ সহস্রলোচনঃ অজরো জরারহিতো নিত্যযুবা ভূরিরেতাঃ—রেতঃ শুক্ররূপঃ

সপ্তমো ধাতুঃ প্রভূতবীর্যঃ কালঃ কলয়িতাখ্যো বহতি স্বারোহকান্ অভিমতং দেশং প্রাপয়তি। তমশ্বং বিপশ্চিতঃ অশ্বাবরোহণারোহণাদিষু কুশলা অশ্বশাস্ত্রনিপুণাঃ কবয়ো ধীমন্ত আরোহন্তি। অস্য অশ্বস্য চক্রা চক্রাণি গন্তব্যানি স্থানানি বিশ্বা বিশ্বানি ভুবনানি, ইতি অশ্বপক্ষেঽর্থঃ।

দ্বিতীয়তঃ, অশ্নোঽশ্নুতে ব্যাপ্নোতি ভূতভবিষ্যৎ বর্ত্তমানকালবর্ত্তীনি বস্তূনীত্যশ্বঃ কালঃ কলয়িতা সর্বস্য জগতোঽনবচ্ছিন্নকালরূপঃ পরমেশ্বরঃ।

সপ্তরশ্মিঃ সপ্তর্ত্তুঃ, সহস্রাক্ষঃ সহস্রসংখ্যকাহোরাত্রযুক্তঃ অজরো জরারহিতঃ সর্বদৈকরূপঃ, ভূরিরেতাঃ সর্বজনসমর্থশক্তিসম্পন্নঃ এবংরূপঃ কালো বহতি প্রাণিজাতং স্বস্বকর্মসু প্রাপয়তি, তং কালং কবয়ঃ ক্রান্তদর্শিনঃ বিপশ্চিতঃ বিদ্বাংসঃ আরোহন্তি, স্বাধীনং কুর্বন্তি। তস্য কালাত্মকস্য রথস্য চক্রা চক্রাণি বিশ্বা বিশ্বাণি ভূতানি ভুবনানি ভূতজাতানি লোকানভিগচ্ছন্তীতি শেষঃ।

তৃতীয়তঃ, অত্র অশ্বশব্দেনাদিত্য উচ্যতে।

কালাত্মকোঽশ্বঃ সূর্য্যঃ সপ্ত-রশ্ময়ঃ প্রধানভূতা যস্য, সপ্তরশ্মিঃ সপ্তাশ্বঃ। সহস্রাক্ষঃ সহস্রকিরণঃ অজরঃ অবিনশ্বরঃ নিত্যঃ ভূরিরেতাঃ। পূর্বরূপ আহিতোঃ বহতি কালচক্রং ধারয়তি। তং কালাত্মকং সূর্য্যং বিদ্বাংস আরোহন্তি ভিত্ত্বোপগচ্ছন্তি। তস্য সূর্য্যস্য চক্রা চক্রাণি চংক্রমণানি ব্যাপ্তিস্থানানি জগন্তীতি।

(2.) *সপ্ত চক্রান্বহতি কাল এষ সপ্তাস্য নাভীরমৃতং ন্বক্ষঃ।*
*স ইমা বিশ্বা ভুবনান্যঞ্জৎ কালঃ স ঈয়তে প্রথমো নু দেবঃ* ॥ 2 ॥

অনেন সূক্তেন সর্বজগৎকারণভূতঃ কালরূপঃ পরমাত্মা স্তূয়তে। অনয়া ঋচা সংবৎসররূপকালচক্রং বর্ণ্যতে। অস্য সংবৎসরকালস্য চক্রাণি একং ত্রীণি পঞ্চ ষট্ সপ্ত দ্বাদশেতি তত্র তত্রাম্নায়তে। সপ্ত

যুঞ্জন্তি রথমেকচক্রম্। ত্রিনাভিচক্রম্ এষ সর্ব্বজগৎকারণত্বেনানুভূয়মানঃ কালঃ পরমাত্মা সপ্তচক্রা চক্রাণি সপ্তধাতূননু অনুক্রমেন বহতি ধারয়তি, অস্য সংবৎসরস্য সপ্তনাভীর্নাভয়ঃ। অস্যাক্ষো নু সন্ততং সূক্ষ্মমমৃতম-বিনশ্বরং তত্ত্বম্। স পূর্ব্বোক্তঃ সংবৎসররূপঃ প্রথমঃ সর্ব্বস্যাদিভূতঃ দেবো দ্যোতমানো নিত্যজ্ঞানরূপঃ কালঃ পরমাত্মা ইমা ইমানি নাম-রূপাত্মনা ব্যাকৃতানি বিশ্বা বিশ্বানি ভুবনানি ভুবনবন্তি চরাচরাত্মকানি জগন্তি অঞ্জৎ অঞ্জন্। স সংহরংশ্চ ঈয়তে গচ্ছতি সর্বমাবৃত্য বর্ত্ততে।

অস্যা ঋচোঽপরা ব্যাখ্যা অস্তি। যদ্বা, অধ্যাত্মপরত্বেন যোজ্যঃ—কালঃ কলয়িতা সর্বেন্দ্রিয়ব্যাপারকর্ত্তা শরীরাভিমানী দেবঃ বন্ধকা বিষয়া রূপাদয়ঃ, নু সূক্ষ্ম দুর্দ্দশ্যম্ অমৃতং চৈতন্যম্। সর্বেন্দ্রিয়েষু তদ্বিষয়েষু চানুগতম্। এবং সর্বপ্রাণিজাতানঞ্জন্ প্রেরয়ন্ ঈয়তে। স উপসংহরংশ্চ স কালঃ ঈয়তে তত্ত্বজ্ঞৈর্জ্ঞায়তে। ঈণ্ গতৌ—কর্মণি যক্প্রত্যয়ঃ।

3. *পূর্ণঃ কুম্ভোঽধি কাল আহিতস্তং বৈ পশ্যামো*
*বহুধা নু সন্তঃ।*
*স ইমা বিশ্বা ভুবনানি প্রত্যঙ্ কালং তমাহুঃ*
*পরমে ব্যোমন্* ॥ 4 ॥

অনেন সূক্তেন সর্বজগৎকারণভূতঃ কালরূপঃ পরমাত্মা স্তূয়তে। কালে জগৎকারণভূতে নিত্যে পরমাত্মনি স্বস্বরূপে, পুনঃ সর্বত্র ব্যাপ্তঃ কুম্ভঃ কুম্ভবৎ, সংবৎসরাদিরূপোঽনবচ্ছিন্নো জন্যঃ কাল আহিতো নিহিতো বর্ত্ততে। তং জন্যং কালং সন্তঃ সৎপুরুষা বহুধা নানাপ্রকার-মহোরাত্রভেদেন পশ্যামো নু অনুভবামঃ খলু। অথবা তং জন্যকালাধারং পরমাত্মানং বহুধা বহুভিঃ শ্রবণমননিদিধ্যাসনৈঃ পশ্যামঃ সন্তঃ সৎ-রূপব্রহ্মোপাসকা বয়ম্। স কাল ইমা ইমানি পরিদৃশ্যমানানি বিশ্বাণি ব্যাপ্তানি ভুবনানি ভূতজাতানি প্রত্যঙ্ প্রত্যক্ষেণ সর্বং জগৎ ব্যাপ্নোতি। তং কালং পরমে উৎকৃষ্টে ব্যোমন্ ব্যোমনি পরমানন্দপ্রদায়কে স্বস্বরূপে বর্ত্তমানমাহুর্বিদ্বাংসঃ।

**4. স এব সং ভুবনান্যা ভরৎ স এব সং ভুবনানি পর্যৈৎ।**
**পিতা সন্নভবৎপুত্র এষাং তস্মাদ্বৈ নান্যৎ পরমস্তি তেজঃ ॥ 4 ॥**

অনেন সূক্তেন সর্বজগৎকারণভূতঃ কালরূপঃ পরমাত্মা স্তূয়তে। স এব কালো ভুবনানি ভূতজাতানি সমাভরৎ আহরৎ আহরতি উৎপাদয়তি। স এব কালো ভুবনানি সংপর্যৈৎ, সম্যক্ পরিগচ্ছতি ব্যাপ্নোতি। স এব পিতা এষাং ভুবনানাং জনকঃ উৎপাদয়িতা সন্নেষাং পুত্রো ভবতি উৎপাদকরূপেণ জাতো ভবতি। কাল এব পিতৃত্বেন পুত্রত্বেন চ ব্যবহ্রিয়তে। যঃ পূর্বজন্মনি পিতৃত্বেন জাতঃ স এব অস্মিন্ জন্মনি পুত্রত্বেন ব্যবহ্রিয়তে। তস্মাৎ সর্বোৎপাদকত্বাৎ সর্বগতাৎ পুত্রাদিরূপেণ ভবিষ্যতশ্চ তস্মাৎ কালাৎ অন্যৎ পরমুৎকৃষ্টং তেজো নাস্তি।

**5. কালোঽমূং দিবমজনয়ৎ কাল ইমাঃ পৃথিবীরুত।**
**কালে হ ভূতং ভব্যং চেষিতং হ বি তিষ্ঠতে ॥ 5 ॥**

অনেন সূক্তেন সর্বজগৎ কারণভূতঃ কালরূপঃ পরমাত্মা স্তূয়তে। কালঃ পরমাত্মা অমূং বিপ্রকৃষ্টাং দিবং দ্যুলোকমজনয়ৎ উৎপাদিতবান্। উতাপি পুনরপি চ ইমাঃ পরিদৃশ্যমানাঃ সর্বপ্রাণ্যাধারভূতাঃ পৃথিবীঃ। ব্যত্যয়েন অত্র বহুবচনং প্রযুক্তম্। তথাচ মন্ত্রবর্ণঃ। কালরূপঃ পরমাত্মা স্বর্গস্য উৎপাদয়িতা পৃথিব্যাশ্চ জনয়িতা। দ্বিতীয়পাদে হশব্দঃ এবার্থে। পুনশ্চ কাল এব ভূতং ভূতকালে আধারেঽবচ্ছিন্নং ভব্যং ভবিষ্যচ্চেষিতমিষ্টমিষ্যমানং বর্তমানকালাবচ্ছিন্নং চ জগদ্বিতিষ্ঠতে বিশেষেণাশ্রিতং বর্ত্ততে। অত্র তিষ্ঠতে ইত্যত্র 'সমবপ্রবিভ্যঃ স্থঃ' ইত্যনেন পাণিনীয়সূত্রেণ আত্মনেপদম্।

6. *কালে মনঃ কালে প্রাণঃ কালে নাম সমাহিতম্।*
*কালেন সর্বা নন্দন্ত্যাগতেন প্রজা ইমাঃ* ॥ 7 ॥

সূক্তেনানেন সর্বজগৎকারণভূতঃ পরমাত্মা স্তূয়তে। কালে পরমাত্মনি মনঃ জগৎসিসৃক্ষানিমিত্তং ভূতং বর্ত্ততে। তস্মিন্নেব প্রাণঃ সূত্রাত্মা সর্বজগদন্তর্যামী বর্ত্ততে। কেষাঞ্চিন্মতে মনঃ ইতি শব্দো জাতাবেকবচনম্। সর্বেষাং প্রাণিনাং মনাংসি। প্রাণঃ পঞ্চবৃত্তিকঃ। প্রাণা অপি পরমাত্মন্যেব বর্ত্তন্তে। তথা নাম নামধেয়ং সর্বেষাং বস্তূনাং সংজ্ঞা অপি তত্রৈব সমাহিতম্। স্ত্রীপুরুষাদিসংজ্ঞাভিঃ কাল এব উচ্যতে ইত্যর্থঃ। যদ্বা, সর্বেষাং রূপাণি কৃত্বা তেষাং নামান্যপি স্বয়মেব ব্যবহরতীত্যেতদভি প্রায়েণ কালে নাম সমাহিতমিত্যুক্তম্। কালেন বসন্তাদিরূপেণ আগতেন সর্বা ইমাঃ প্রজা নন্দন্তি সন্তুষ্যন্তি, স্বস্বকার্যসিদ্ধেঃ।

7. *কালে তপঃ কালে জ্যেষ্ঠং কালে ব্রহ্ম সমাহিতম্।*
*কালো হ সর্ব্বস্যেশ্বরো যঃ পিতাসীৎ-*
*প্রজাপতেঃ* ॥ 8 ॥

অনেন সূক্তেন সর্ব্বজগৎকারণভূতঃ পরমাত্মা স্তূয়তে। কালে পরমাত্মনি তপঃ সর্ব্বজগৎসর্জ্জনবিষয়ং পর্য্যালোচনম্। তপঃ পর্য্যালোচনে। অস্মাদসুন্। তপসা চীয়তে ব্রহ্ম ইত্যাদৌ তপঃশব্দঃ পর্য্যালোচনার্থত্বেন ব্যাখ্যাতঃ। তথা জ্যেষ্ঠং সর্ব্বস্যাদিভূতং হিরণ্যগর্ভাখ্যম্। যদ্বা, তপঃ কৃচ্ছ্রচান্দ্রায়ণাদিকম্। তৎফলদাতৃত্বাত্তত্রৈব বর্ত্তনম্। একঃ কালশব্দঃ যৌগিকঃ। কলয়িতরি কালে জ্যেষ্ঠং ব্রহ্ম হিরণাখ্যম্। জ্যেষ্ঠং ব্রহ্ম শ্রেষ্ঠং ব্রহ্ম ইতি হি শ্রুত্যন্তরম্। ই-শব্দোঽবধারণে। কালঃ সর্ব্বস্য জগতঃ ঈশ্বরঃ স্বামী। যঃ কালঃ প্রজাপতেঃ প্রজানাং স্রষ্টুশ্চতুর্মুখস্য পিতা জনক আসীৎ।

✓৪ ***তেনেষিতং তেন জাতং তদু তস্মিন্‌প্রতিষ্ঠিতম্‌।***
***কালো হ ব্রহ্ম ভূত্বা বিভর্তি পরমেষ্ঠিনম্‌॥ 9 ॥***

অনেন সূক্তেন সর্ব্বজগৎকারণভূতঃ পরমাত্মা স্তূয়তে। তেন কালেনেষিতম্‌ ইষ্টং সর্ব্বং স্রষ্টব্যং জগৎ। কামিতমিত্যর্থঃ। তেনৈব কালেন উৎপাদিতং জগৎ। তৎ তজ্জগৎ। হশব্দোঽবধারণে তস্মিন্নেব কালে প্রতিষ্ঠিতম্‌। কালো হ কাল এব ব্রহ্ম দেশকালাবচ্ছিন্নং পরমার্থতত্ত্বং ভূত্বা পরমেষ্ঠিনং পরমে স্থানে সত্যলোকে তিষ্ঠন্তং চতুর্মুখং বিভর্ত্তি।

**Q. 1.** ***অথর্ব্ববেদোক্তকালসূক্তস্য তাৎপর্য্যং মাহাত্ম্যং চ বিবৃণুত।***

Ans ঃ অথর্ববেদে "কালো অশ্বো বহতী"তি সূক্তস্য কাল-প্রতিপাদকত্বাৎ কালসূক্তমিতি প্রসিদ্ধিঃ। কালো হ্যত্র পরমাত্মা। অতএব কালসূক্তেন সর্ব্বজগৎকারণভূতঃ কালরূপঃ পরমাত্মা স্তূয়তে।

কালস্তত্র প্রথমতঃ অশ্বাত্মনা রূপ্যতে। সহস্রাক্ষঃ সপ্তরশ্মিঃ প্রভূতবীর্যঃ অশ্বঃ স্বারোহকান্‌ অভিমতং দেশং প্রাপয়তি। তমশ্বম্‌ অশ্বাবরোহণারোহণাদিষু কুশলা ধীমন্ত আরোহন্তি, আরুহ্য চ স্বাধীনং কুর্বন্তি। তথৈব কালরূপঃ পরমাত্মা সপ্তর্তুযুক্তঃ সহস্রসংখ্যাকাহোরাত্রযুক্তঃ অজরঃ প্রভূতজগৎসৃষ্টিশক্তিসম্পন্নঃ প্রাণিজাতং স্বস্ব-কর্মসু প্রাপয়তি। তং কালং ক্রান্তদর্শিনো বিদ্বাংস আরোহন্তি। স্বাধীনকালাঃ কুর্বন্তীত্যর্থঃ। এষ সর্ব্বজগৎকারণত্বেনানুভূয়মানঃ কালঃ সপ্তর্তূন্‌ অনুক্রমেণ বহতি। কালোঽয়ং সর্ব্বস্য জগতঃ কলয়িতা সর্ব্বস্য আদিভূতঃ দেবঃ নিত্যজ্ঞানরূপঃ দুর্দ্দর্শশ্চৈতন্যস্বরূপঃ তত্ত্বৈঃ জ্ঞায়তে। স সর্ব্বত্র ব্যাপ্তঃ, বিশ্বানি ভূতজাতানি ব্যাপ্য বর্ত্তমানঃ অবিচ্ছিন্নঃ সর্বেষাং জন্যানামাধারভূতঃ। তং কালং সন্তঃ নানাপ্রকারম্‌

অহোরাত্রভেদেন অনুভবন্তি। বিদ্বাংসশ্চ তং সাংসারিকদুঃখদ্বন্দ্বাদি-দোষরহিতে পরমানন্দদায়কে বর্ত্তমানমাহুঃ কালং তমাহুঃ পরমে ব্যোমন্ ইতি।

এষ এব কালঃ সর্বেষাং ভূতজাতানামাধারতয়া সর্বেষাং জনকো জাতঃ। স এব এষাং ভুবনানাং পিতা সন্নেষাং পুত্রো ভবতি। কাল এব পিতৃত্বেন পুত্রত্বেন চ ব্যবহ্রিয়তে। যঃ পূর্বজন্মনি পিতৃত্বেন জাতঃ স এব অস্মিন্ জন্মনি পুত্রত্বেন জাতঃ অবচ্ছেদকালাধীনত্বাৎ সর্বস্য।

স কালঃ দ্যুলোকং সর্বপ্রাণ্যাধারভূতাং পরিদৃশ্যমানাং পৃথিবীং চাসৃজৎ। তদাশ্রয়ে এব সর্বং জগৎ বর্ত্ততে। স এব দেশকালা-বচ্ছিন্নং পরমার্থতত্ত্বং ভূত্বা সত্যলোকে তিষ্ঠন্তং চতুর্মুখং বিভর্ত্তি। সর্বেষাং প্রাণিনাং মনাংসি প্রাণা অপি কালরূপে পরমাত্মনি বর্ত্তন্তে, কালেন বসন্তাদিরূপেণ আগতেন সর্বাঃ প্রজা নন্দন্তি। অয়মেব কালসূক্তস্য সারঃ। ইত্থঞ্চ সূক্তমেনং পর্য্যালোচ্য জ্ঞায়তে যৎ কাল-রূপঃ পরমাত্মা নিত্যঃ অবিনাশী জরারহিতঃ সর্ব্বত্র ব্যাপ্তঃ ব্রহ্মণো-ঽপি স্রষ্টা আদিভূতঃ দেবঃ পরিদৃশ্যমানানি ভূতজাতানি স্বস্বকর্মসু প্রাপয়তীতি সংক্ষেপঃ।

# Aitareya-Brahmana

1. *দীক্ষণীয়েষ্ট্যাং দীক্ষিতস্য যে সংস্কারা ঐতরেয়-ব্রাহ্মণে আম্নাতাস্তে সংক্ষিপ্য লিখ্যন্তাম্।*

অথবা

*দীক্ষণীয়েষ্ট্যাং দীক্ষিতস্য সংস্কারবিশেষান্ বিধাতুম ঐতরেয়ব্রাহ্মণে আম্নাতান্ প্রকারান্ যথাভাষামুপবর্ণয়।*

অথবা

Bring out the symbolical significance of দীক্ষণীয়েষ্টি as given in the Aitareya-Brahmana.

অথবা

***পুনর্বা এতমৃত্বিজো গর্ভং কুর্বন্তি যং দীক্ষয়ন্তীতি' ব্রাহ্মণসন্দর্ভোঽয়ং ব্যাখ্যামুখেন সবিশেষং পরিস্ফুরণীয়ঃ।***

সোমযাগে প্রবৃত্তস্য যজমানস্য সংস্কারো দীক্ষণম্। তস্য চ সংস্কারস্য হেতুঃ কর্মবিশেষো দীক্ষণীয়াশব্দবাচ্যঃ। জ্যোতিষ্টোমে যজমানস্য সংস্কারার্থং প্রথমদিনে দীক্ষণীয়েষ্টির্বিহিতা। "আগ্নাবৈষ্ণবমেকাদশকপালং নির্বপেদ্দীক্ষিষ্যমাণঃ" ইতি অস্যা ইষ্টেরুৎপত্তিবাক্যম্। অত্রাগ্নাবিষ্ণুদেবতে একাদশকপালসংস্কৃতঃ পুরোডাশো দ্রব্যমিতি বোধ্যতে। অনয়া ইষ্ট্যা যজমানো দীক্ষিতো ভবতি। ইষ্টেরনুষ্ঠানানন্তরং যজমানস্য নবসংখ্যকাঃ সংস্কারা ঐতরেয়ব্রাহ্মণে বিহিতাস্তে চ সংস্কারা যজমানস্য দীক্ষিতত্বাবদ্যোতকা ভবন্তি। তত্র যে যে সংস্কারা বিধীয়ন্তে তৈঃ

সর্বৈঃ গর্ভগতশিশুসাদৃশ্যং যজমানস্য বোধনীয়ং ভবতি। অর্থাৎ যথা লোকে মাতাপিতৃভ্যাং গর্ভস্য পূতেন বৈদিককর্ম্মণা সংস্কারঃ ক্রিয়তে তথৈব অত্রাপি দীক্ষিতো যজমানো গর্ভকল্পঃ ঋত্বিগ্‌ভিঃ সংস্কারৈঃ পালনীয় ইতি গর্ভসাদৃশ্যং প্রতিপাদ্যতে। তত্র নবসংখ্যকেষু সংস্কারেষু প্রথমঃ সংস্কারঃ—অদ্ভিরভিষিঞ্চন্তীতি। অপ্‌সু স্নপয়ন্তীতার্থঃ। যজমানেন পূর্বং স্নানে কৃতেঽপি অদ্ভিরভিষেচনস্য বিধানমদৃষ্টার্থমঙ্গীকর্ত্তব্যম্। শাখান্তরেষু দেবা অপ্‌সু দীক্ষাতপসী প্রাবেশয়ন্ ইতি বিধানেন অপ্‌সু দীক্ষাবত্ত্বং প্রতীয়তে। অতএব অপামভিষেচনসাধনত্বমুপপন্নং ভবতি। কিঞ্চ অভিষেকসাধনীভূতা আপঃ রেতোরূপেণ প্রশংস্যন্তে। রেতসা সহ অপাঞ্চ কার্যকারণভাবসম্বন্ধাৎ তয়োরভেদবিবক্ষিতত্বাচ্চ গর্ভসাদৃশ্যম্।

অথ দ্বিতীয়ঃ সংস্কারঃ—নবনীতেনাভ্যঞ্জন্তীতি। ঋত্বিজো নবনীতেন যজমানমনুলিম্পন্তীত্যর্থঃ। আজ্যং ঘৃতমাযুতং নবনীতঞ্চেতি চত্বারো বিকারাঃ সর্পিষো ভবন্তি। তত্র আজ্যং দেবানাং ঘৃতং মনুষ্যাণাম্। ঈষদ্বিলীনং সর্পিরাযুতাখ্যানম্। তৎ পিতৃ‌ণাম্। নবনীতং তু গর্ভে প্রসিদ্ধং "নবনীতং গর্ভাণামিতি" ব্রাহ্মণোক্তেঃ। তেন নবনীতস্য গর্ভপরিপোষকত্বেন বর্ণিতত্বাদ্ যজমানোঽপি নবনীতাভ্যঞ্জনেন সংস্কর্ত্তব্যঃ। তথা সতি তয়োঃ সাম্যং সিধ্যতি।

ততোঽস্য দৃষ্টিশক্তিবর্দ্ধনায় নেত্রয়োরঞ্জনেন সংস্কারো বিহিতঃ—আঞ্জন্ত্যেনমিতি। অঞ্জনস্য দৃষ্টিপ্রসাদহেতুত্বমক্ষ্ণোস্তেজস্করত্বঞ্চ লোকে প্রসিদ্ধম্। প্রায়েণ মাতরঃ শিশোরপ্যেবমাচরন্তি, অতো গর্ভসাদৃশ্যম্। অপি চ যজমানেন নেত্রয়োরঞ্জনেন সংস্কারে কৃতে যে তস্য শত্রবস্তেষাং নেত্রাণি মাৎসর্যেণ বিলীনানি ভবন্তীত্যপি শাখান্তরে বর্ণিতমস্তি।

চতুর্থসংস্কারং বর্ণয়তি—একবিংশত্যা দর্ভপিঞ্জূলৈঃ পাবয়ন্তীতি। একবিংশতিসংখ্যকৈঃ কুশসংঘৈর্যজমানং মার্জয়িত্বা শুদ্ধং কুর্য্যুরিত্যর্থঃ। ইয়ঞ্চ শুদ্ধিরদৃষ্টার্থৈব। যদ্যপি যজমানোঽভিষেকেণৈব পূর্ব্বং শুদ্ধস্তথাপ্যতিশয়েন পবিত্রত্বসিদ্ধয়ে পুনরিদং পাবনং বিহিতম্। লোকেঽপি সীমন্তসংস্কারাবসরে এতাদৃশং পাবনমাচরন্তীত্যতো গর্ভসাদৃশ্যমুপলব্ধম্। অত্র চ পাবনসাধনতয়া একবিংশতিসংখ্যকা দর্ভাঃ সন্তি। শাখান্তরেষু

ত্রয়াণাং চতুর্ণামপি দর্ভাণাং পাবনত্বসাধনং প্রতিপাদিতম্।

অনন্তরসংস্কারঃ—দীক্ষিতবিমিতং প্রপাদয়ন্তীতি। জ্যোতিষ্টোমে দীক্ষিতস্য প্রবেশায় বিশেষেণ যা শালা নির্মীয়তে সা প্রাচীনবংশ-পদেনোচ্যমানা দীক্ষিতবিমিতশব্দেনাত্রাভিধীয়তে ; তাং শালাং দীক্ষিতং যজমানং প্রবেশয়ন্তীত্যর্থঃ। ইমাং শালাং প্রবিশ্য যজমানো ন বহিরন্যত্র নিষ্ক্রমেৎ। যানি চ কার্য্যাণি অনিবার্যাণি ভবন্তি তেষাং সম্পাদনার্থং যজমানস্য বহির্গমনমাবশ্যকমেব। তত্রাপি যদা আদিত্যঃ অভ্যুদেতি অস্ত বা গচ্ছতি ঋত্বিগ্ভির্বা আশ্রাবণং ক্রিয়তে তেষু কালেষু তৎস্থানং যজমানঃ সর্ব্বথা ন পরিত্যজেৎ। অস্য প্রাচীনবংশস্য যোনিত্বেনোপচারাৎ তেন প্রাচীনবংশপ্রবেশেন গর্ভস্থানস্য যজমানস্য স্বকীয়যোনিপ্রবেশঃ সংপাদ্যতে। যথা লোকে স্থিরে যোনিমধ্যে নব-সংখ্যকান্ মাসান্ গর্ভো ধার্য্যতে তথা গর্ভস্থানীয়স্য দীক্ষিতস্যাপি স্থিরে দেবযজনস্থানে যোনিরূপে উপবেশনং সঞ্চরণঞ্চ যুক্তমেব।

অনন্তরং বাসসা প্রোর্ণুবন্তীতি বস্ত্রেণ বেষ্টনরূপঃ যজমানস্য ষষ্ঠ-সংস্কারঃ। যজমানং বস্ত্রেণাচ্ছায়ন্তীতি সংস্কারস্য স্বরূপম্। গর্ভস্থানীয়ং দীক্ষিতং প্রত্যৌচিত্যেন বস্ত্রস্যোল্বত্বমত্রাভিপ্রেতম্। উল্বঞ্চ গর্ভবেষ্টনং চর্ম। অতো গর্ভসাদৃশ্যম্।

তদনন্তরং কৃষ্ণাজিনমুত্তরং ভবতীতি সপ্তমঃ সংস্কারঃ। বস্ত্রাদুপরি কৃষ্ণাজিনেন যজমানমাচ্ছাদয়েদিত্যর্থঃ। অতএব বহির্বেষ্টনত্বসাম্যেন কৃষ্ণা-জিনস্য জরায়ুরূপত্বাদ্ গর্ভসাদৃশ্যং প্রতিপাদ্যতে।

ততোঽষ্টমঃ সংস্কারঃ—মুষ্টী কুরুতে ইতি। যজমানঃ হস্তয়োর্মুষ্টীং কৃত্বা তিষ্ঠেদিত্যর্থঃ। মুষ্টিকরণং নামাঙ্গুলীনাং বন্ধনম্। ইদং মুষ্টিকরণং গর্ভসাদৃশ্যমবদ্যোতয়তি। যথা গর্ভস্থঃ শিশুর্মুষ্টিং কৃত্বৈব শেতে তথৈব যজমানোঽপি প্রাচীনবংশে মুষ্টীকৃত্য অবতিষ্ঠেত ইতি। ইদং মুষ্টিকরণং যজ্ঞস্য দেবতানাঞ্চ ধারণায় ভবতীতি ব্রাহ্মণভাগো বদতি।

তদূর্দ্ধং নবমঃ অন্তিমো বা সংস্কারঃ—উন্মুচ্য কৃষ্ণাজিনমবভৃথম-ভ্যবৈতি ইতি। যজমানো বস্ত্রাদুপরি বিদ্যমানং কৃষ্ণাজিনমুন্মুচ্য অবভৃথ-স্নানায় প্রাগ্বংশশালাতঃ বহির্নির্গচ্ছেদিত্যর্থঃ। যোনিস্থানীয়াদ্দেবযজন-

দেশান্নির্গত্যাবভৃথগমনং গর্ভরূপস্য দীক্ষিতস্য জন্মস্থানীয়ম্, জন্ম চ লোকে জরায়ুরূপস্য বেষ্টনস্য ছেদে সতি পশ্চাৎ সংপাদ্যতে। তস্মাদত্রাপি জরায়ুস্থানীয়স্য কৃষ্ণাজিনস্য উন্মোচনানন্তরং যজমানস্য জন্মস্থানীয়মবভৃথ-দেশগমনং ভবতীতি গর্ভসাদৃশ্যম্। বস্ত্রস্য চ উল্বস্থানত্বান্ন উন্মোচনং কর্ত্তব্যমিতি তাৎপর্য্যম্।

## 2. ঐতরেয় ব্রাহ্মণতো ভরতমাহাত্ম্যপ্রতিপাদকানাং শ্লোকানাং তাৎপর্য্যং প্রদর্শ্যং।

মমতাখ্যায়াঃ স্ত্রিয়াঃ পুত্রো দীর্ঘতমা-নামা মুনিঃ দুষ্যন্তপুত্রস্য ভরতস্যাভিষেকমকরোৎ। ভরতোঽপি দিগ্বিজয়েন পৃথিবীং পরীত্য অশ্বমেধযজ্ঞং কৃতবান্। ঐতরেয়ব্রাহ্মণস্য অত্রাংশে ভরতাভিষেকমাহাত্ম্যং দর্শয়িতুং পঞ্চ শ্লোকাঃ পরিগীয়ন্তে। নৃপঃ ভরতঃ সর্ব্বাভরনযুক্তান্ শরীরপুষ্ট্যাং বর্ণোৎকর্ষে সতি অত্যন্তং কৃষ্ণান্ শুক্লাভ্যাং দন্তাভ্যাং যুক্তান শতকোটি-রূপান্ সপ্তাধিকশতসংখ্যকান্ চ মৃগান্ ( অত্র গজান্ ) মষ্মারনামকে দেশে দত্তবান্। সচিগুণনামকে কস্মিংশ্চিদ্দেশে দুষ্যন্তপুত্রস্য ভরতস্য অগ্নি-চয়নমনুষ্ঠিতম্। যস্মিন্নগ্নিচয়নে সহস্রসংখ্যাকাঃ ব্রাহ্মণাঃ প্রত্যেকং শতকোটিসংখ্যাকানাং গবাং বিভাগং কৃতবন্তঃ। অতঃ ভরতরাজা অশ্বমেধযজ্ঞসম্পাদনার্থং পঞ্চাধিকপঞ্চাশৎ সংখ্যাকান্ হয়ান্ গঙ্গাতীরে বৃত্রঘ্ননামকে দেশে অবধ্নাৎ। গঙ্গাতীরে অনুষ্ঠিতে যজ্ঞে সোঽয়ং রাজা দৌষ্যন্তিঃ তাবদশ্বান্ যজ্ঞযোগ্যান্বিধ্যুক্তক্রমেণ বন্ধয়িত্বা অতিশয়েন মায়াবীসন্ স্বকীয়শত্রোর্মায়ামতিক্রান্তবান্। যথা নিষাদপঞ্চমাশ্চত্বারো-বর্ণাঃ মনুষ্যাঃ হস্তাভ্যাং স্বর্গং স্প্রষ্টুমশক্তাঃ ভবন্তি তদ্বৎ দৌষ্যন্তিকৃতং এবংবিধযজ্ঞং তস্য পিত্রাদয়ো পুত্রপৌত্রাদয়শ্চ কর্ত্তুং নাশক্নুবন্। সোঽয়ং মহাভিষেকস্য মহিমেত্যর্থঃ।

## 3. ঐতরেয় ব্রাহ্মণত ঐন্দ্রমহাভিষেক সম্বন্ধিনং বাসিষ্টসাত্যহব্যকথাং বর্ণয়।

ইন্দ্রসম্বন্ধিনং মহাভিষেকমাহাত্ম্যং দর্শয়িতুম্ ঐতরেয়ব্রাহ্মণে বাসিষ্ট-

সাত্যহব্যকথা অবতারিতা। বাসিষ্টসাত্যহব্যমুনিঃ অত্যারাতিনামকায় জনন্তপপুত্রায় মহাভিষেকং প্রোবাচ। তস্মাদেব কারণাৎ অয়ং জনন্তপিঃ স্বয়ংরাজাসন্ অভিষেকবিদ্যয়া জয়ং প্রাপ্তঃ পরিতো গতবান্। যথাভিষেকে শপথং কৃত্বা গুরুদ্রোহো ন কর্ত্তব্যঃ তস্মাৎ গুরুঃ অত্যরাতিং শিষ্যং উবাচ—হে অত্যরাতে ত্বং বিদ্যাসামর্থ্যাৎ পৃথিবীং জিতবানসি। অতো মাং গুরুং মহত্ত্বমৈশ্বর্য্যং প্রাপয়। ততঃ অত্যারাতিরেবমুবাচ—মা ভূদিদানীং তব মাহাত্ম্যম্। হে ব্রাহ্মণাচার্য, যদাহং হিমবতপর্বতস্য উত্তরকুরুনামকান্ উত্তরদেশান্ জয়েয়ং তদানীং ত্বমেব পৃথিব্যা রাজা ভব। অহং তু তদীয়ঃ সেনাপতিরেব ভবামি।

ততঃ গুরুরেবমুবাচ—হে অত্যরাতে, মেরোরুত্তরতো যদস্তি তদ্দেশ-ক্ষেত্রং মনুষ্যো জেতুং নৈবার্হতি। ত্বং তু মে দ্রোহং কৃতবানেব। মদপেক্ষিতং মহত্ত্বং দাতুমনিচ্ছুঃ সন্ বঞ্চনার্থং যৎ কিঞ্চিদুক্তবানসি। অতঃ শপথোল্লঙ্ঘিনো গুরুদ্রোহিণস্তব সামর্থ্যমপহরামীতি। ততঃ সামর্থ্য-হরণাদত্যারাতিং কশ্চিচ্ছত্রুতাপনঃ শিবিপুত্রঃ শুষ্মিণাখ্যো রাজা হতবান্। অধুনা কথিতায়াঃ আখ্যায়িকায়াঃ তাৎপর্য্যং বক্ষ্যতে। যস্মাদ্ গুরুদ্রোহে মহতী হানিরুক্তা তস্মাদেবংবিদুষে মহাভিষেকাভিজ্ঞায় ব্রাহ্মণাচার্য্যায ক্ষত্রিয়ো ন দ্রুহ্যেৎ। গুরুদ্রোহেণ শিষ্যানাং রাষ্ট্রান্ প্রাণাংশ্চ নশ্যেৎ। অয়ং চ আশয়ঃ

---

# Satapatha-Brahmana

1. Describe the Scheme of the order of creation as you notice in the Satapatha Brahmana.

OR

***শতপথব্রাহ্মণতঃ প্রজাসৃষ্টিপ্রতিপাদিকা আখ্যায়িকা বর্ণনীয়া।***

Ans: শতপথব্রাহ্মণে চতুর্মাস্যযাগস্য দ্বিতীয়পর্ব্বণঃ বৈশ্যদেবস্য প্রজাসৃষ্টি-হেতুতামাখ্যায়িকাদ্বারা প্রতিপাদয়তি। সৃষ্টেঃ পূর্বং ব্রহ্মা প্রজাপতিঃ এক এবাসীৎ। কার্যস্য জগতঃ কারণভূতে প্রজাপতৌ লীনত্বাৎ স এক এবাসীৎ। ততঃ স চিন্তয়ামাস— প্রচুরাঃ প্রজাঃ সৃজেয়মিতি। স প্রজোৎপত্তিকারণং তপস্তপ্ত্বা—প্রজাঃ স্রষ্টুমারেভে। প্রথমায়াং সৃষ্টৌ-বিহঙ্গাঃ জাতাঃ। তে জাতমাত্রেণ মৃতো অভবন্। এবমেব দ্বিতীয়ায়াং সৃষ্টৌ সরীসৃপাঃ, তৃতীয়স্যাং সৃষ্টৌ সর্পাশ্চ প্রজাপতিনা উৎপাদিতাঃ, সৃষ্টিমাত্রমেব তে মৃতা অভবন্। তদা ব্রহ্মা ইদং চিন্তয়ামাস—এতেষাং প্রাণিনাং বিনাশে কো হেতুরিতি? সম্যক্ বিচিন্ত্য স প্রজানাং মরণে আহারাভাবঃ কারণমিতি নিশ্চিতবান্। যদাহি প্রাণিনঃ জাতা স্তদৈব তে খাদিতুমিচ্ছন্তি। অতএব খাদ্যং প্রথমং সৃষ্ট্বা অনন্তরং প্রাণিনো যদি সৃজ্যন্তে তর্হি তে ন মৃতাঃ ভবেয়ু ইতি নিশ্চিত্য প্রজাপতিঃ আদৌ আহাররূপং পয়ঃ সৃষ্টবান্। তেন চ জাতা জন্তবঃ উৎপত্ত্যনন্তরং ন মৃতা অভবন্। এবমাহারং সৃষ্ট্বা তস্য জরণায় অগ্নিং বায়ুঞ্চ সসর্জ। তদনন্তরং সৃষ্টাঃ প্রজাঃ জরায়ুজা অভবন্। প্রথমদ্বিতীয়তৃতীয়সর্জনে অণ্ডজা এব প্রজা আসন্। অতএব তেষাং জীবনং চিরকালং নাভূৎ।

যদা প্রভৃতি জরায়ুজানামুৎপত্তিস্তদারভ্য প্রজানাং জীবনং চিরকালমভূৎ। তত্র চ কারণম্ আহাররূপং পয়ঃ। এবং প্রজাপতির্মনুষ্যাদ্যাঃ প্রজা অন্যা শ্চ প্রাণিনঃ সৃষ্ট্বা তান্ ররক্ষ। যেন প্রকারেন পুরা প্রজাপতিঃ প্রজা অসৃজত তেনৈব প্রকারেন ইমা মনুষ্যাদ্যাঃ প্রজাঃ প্রজায়ন্তে। জন্মগ্রহণান্তরং পয়োধরৌ (স্তনৌ) এব অভিপদ্য স্তন্যপানেন সন্তবন্তি প্রবর্দ্ধতে ন বিপদ্যন্তে। তত্র পয়োরূপমন্নমিতরান্ অপেক্ষয়া প্রধানম্ ইতি হেতোঃ প্রজাপতি স্তস্য মুখ্যত্বং প্রতিপাদয়তি

**2. *শতপথব্রাহ্মণাম্নাতো ঋষভোপাখ্যানম্ সংক্ষিপ্য লেখ্যম্।***

Or

***হবিষ্কৃদাহ্বানমুপজীব্য শতপথব্রাহ্মণে যদাম্নাতং তস্য স্বরূপং সংক্ষিপ্য প্রদর্শ্যম্।***

Or,

***শতপথব্রাহ্মণস্থ যজ্ঞপাত্রসমাহনন বিধায়কম্ আখ্যানং সংক্ষেপেন অভিধিয়তাম্।***

Or,

***শতপথব্রাহ্মণে হবিষ্কৃদাহ্বানপ্রসঙ্গেনোপস্থাপিতাখ্যায়িকা সামগ্র্যেণ বর্ণনীয়।***

Or,

***বর্ণভেদেন হবিষ্কৃদাহ্বানমন্ত্রভেদমুপবর্ণ্য শম্যায়া দৃশদুপলয়োঃ সমাহননম্ আখ্যায়িকা মুখেন বর্ণ্যতে।***

ব্রহ্মক্ষত্রাদিবর্ণভেদোপজীবনেন হবিষ্কৃদাহ্বানমন্ত্রে বিশেষমাহ। বৈশ্যস্য হবিষ্কৃদাগহীতি মন্ত্রঃ। ক্ষত্রিয়জাতের্হবিষ্কৃদাদ্রবেতি। আপস্তম্বস্তু রাজন্য-বৈশ্যয়োর্বৈপরীত্যোনাসূত্রয়ৎ। হবিষ্কৃদেহীতি ব্রাহ্মণস্য হবিষ্কৃদাগহীতি রাজন্যস্য হবিষ্কৃদাদ্রবেতি বৈশ্যস্য হবিষ্কৃদাধাবেতি শূদ্রস্যেতি। এহী-ত্যেতং খলু অতিশয়েন যজ্ঞার্হম্। আগহ্যাদ্রবাদেঃ সকাশাদেহীত্যেত-দেবাতিশয়েন শান্তম্। আগহ্যাদীনাং চ নিকৃষ্টপ্রেরণরূপত্বাচ্চেত্যর্থঃ।

পুরা খল্বেতদাহ্বানানন্তরাং হবিষ্কৃদভূৎ। ইদানীং জায়া বা অন্য কোঽপি ঋত্বিগ্ হবিষ্কৃৎ ভবতি। হবিষ্কৃদাহ্বানসময়ে দৃষদুপলয়োঃ শম্যয়া সমাহননং বিধত্তে। সমাহননজনিতাং বাচং প্রশংসিতুমনুবদতি। যজ্ঞায়ুধধ্বনের্যজ্ঞবিঘাতকাসুরাদিনিবৃত্তিহেতুতামুপপদয়িতুমিতিহাসমুদাহরতি। পুরা মনোঃ সম্বন্ধিনঃ ঋষভস্য প্রশ্বাসাদ্রবাচ্চ অসুররাক্ষসাদয়ঃ বাধ্যমানতাং গতাঃ। তে চ পরস্পরং মন্ত্রাণাং কৃতবন্তঃ। অয়মৃষভো অস্মাকং পাপং প্রাপয়তি কথং খলু ইমং হিংস্ম ইতি। এবং সংবাদে কৃতে কিলাতশ্চাকুলিতশ্চ দ্বাবাসুরপুরোহিতৌ বভূবতুঃ। তৌ অবদতাম্। আবামস্য মনোভিপ্রায়ং জানীবঃ। হে মনোত্বামনেন ঋষভেন যাজয়াব। এবং কৃতে সা ( বাক্ ) মনোরেব জায়াং মনাবীং প্রবিবেশ। যস্মিন্ দেশে বদন্ত্যাস্তস্যাঃ শব্দং শৃন্বন্তি তস্মাৎ স্থানাৎ অসুরাদয়ো বাধিতাঃ পলায়ন্তে ইত্যর্থঃ। ধ্বনিশ্রবণাৎ প্রাগস্মাকং নিকর্ষমাত্রং প্রাপ্তমিদানীং তু মনুষ্যশরীরান্নির্গতবাচঃ শ্রবনাদস্মাকমতিশয়িতং পাপং প্রাপ্নোতি। তির্য্যগ্বাচঃ সকাশাদ্ভূয়ো মানুষী বাগ্ বদতি। এতদাকর্ণ্য তৌ পুরোহিতৌ অস্যাপি প্রতিক্রিয়াং চক্রতুঃ অসুরঘ্নীবাক্ ক্রমেণ ঋষভেজায়ায়াং চাসীৎ। স তয়োর্হননান্নিরাশ্রয়া সতী যজ্ঞমেবাশ্রয়িতুং যজ্ঞপাত্রানি প্রবিবেশ। ততস্তেভ্যো যজ্ঞপাত্রেভ্যঃ বাচং নির্হর্ত্তুং নির্গময়িতুং ন শেকতুরসুরপুরোহিতৌ সেষা যজ্ঞপাত্রগতা বাক্ শম্যয়া সমাহননাদুদগচ্ছতি। বিহিতং সমাহননমনূদ্য মন্ত্রং বিধত্তে। সমাহন্তি কুক্কুটোঽসীতি। স খলু ঋষভো দেবানাং মধুজিহ্বো মধুরবাগাসীৎ। জয়হেতুত্বাৎ অসুরেভ্যস্তু বিষজিহ্বো বিষবাগাসীৎ পরাজয়হেতুত্বাৎ। অথ সমন্ত্রকং শূর্পাধানং বিধত্তে বর্ষবৃদ্ধমসীতি।

# Nirukta

1. "*তাস্ত্রিবিধা ঋচঃ পরোক্ষকৃতাঃ প্রত্যক্ষকৃতাঃ আধ্যাত্মিকাশ্চ*" *সোদাহরণং ঋচাং ত্রৈবিধ্যং প্রদর্শয়।*

Or,

*কতিবিধা ঋচঃ ইতি সোদাহরণং সোপপত্তিকং প্রদর্শ্যতাম্।*

প্রতিমন্ত্রং ঋষিদেবতাছন্দোবিনিয়োগশ্চেতি চতুর্বিধাঃ পদার্থাঃ প্রতিপাদ্যাঃ সন্তি। তদা কো মন্ত্রঃ কিং দৈবতঃ ইতি জিজ্ঞাসায়ামাহ 'যৎকাম ঋষির্যস্যাং দেবতায়ামার্থপত্যমিচ্ছন্ স্তুতিং প্রযুঙ্‌ক্তে স মন্ত্রঃ তদ্দৈবতঃ ভবতি' অস্যায়মভিপ্রায়ঃ। যৎ বস্তু স্বর্গাদিরূপং গবাদিরূপং বা কাময়মানঃ ঋষিঃ যস্যাং দেবতায়াম্ অভিষ্টুতায়াং সত্যাং স্বস্য আর্থপত্যং স্বামিত্বম্ ইচ্ছন্ স্তুতিং প্রযুঙ্‌ক্তে তস্য মন্ত্রস্য সা দেবতা ভবতি। অতঃ সা প্রাধান্যস্তুতিভাক্‌দেবতা প্রতিমন্ত্রং প্রতিপাদ্যতে। সা চ স্তুতিশ্চতুর্বিধঃ ক্বচিৎ নাম্না, ক্বচিৎ বন্ধুভিঃ, ক্বচিৎ কর্মণা ক্বচিচ্চ স্বরূপেন প্রতিপাদ্যন্তে। সাম্প্রতম্ ঋচঃ ভেদঃ প্রদর্শতে। তাঃ ঋচঃ ত্রিবিধাঃ পরোক্ষকৃতাঃ, প্রত্যক্ষকৃতাঃ, আধ্যাত্মিকাশ্চ।

যত্র সর্বৈঃ প্রাতিপতিকৈঃ সর্ব্বাভিঃ বিভক্তিভিশ্চ আখ্যাতস্য প্রথমপুরুষৈশ্চ ঋচঃ প্রযুজ্যন্তে তাঃ পরোক্ষকৃতাঃ বোদ্ধব্যাঃ। তত্র। প্রথমাবিভক্ত্যন্তস্য উদাহরণম্—ইন্দ্রো দিব ইন্দ্র ঈশে পৃথিব্যা ইত্যাদি অয়ম্ মন্ত্রঃ সূর্য্যাস্তুতৌ বিনিযুজ্যতে। কিঞ্চ নিষ্কেবল্যো নাম স্তোত্র সামগানে বিনিযুজ্যতে। অস্য চ অয়মর্থঃ। ইন্দ্র এব পৃথিব্যাঃ ভূমেরপি ঈশ্বরঃ ভবতি। ইন্দ্র দ্যুলোকস্য ঈষ্টে ঈশ্বরো ভবতি। এবম্ অপাম্ উদকানাম্ ঈশ্বরঃ। ইন্দ্রঃএব পর্বতানাং মেঘানাম্ ঈশ্বরঃ ইন্দ্রঃ এব মেধীরাণাং প্রজ্ঞাবতাং ধনবতাং বা ঈশ্বরঃ। ইয়ং ঋক্

পরোক্ষকৃতাঃ। এবম্ ইন্দ্রমিদ্গাথিনো বৃহদিত্যাদি। এবং সর্বাসু বিভক্তিষু উদাহরণং বোধ্যম্। ইন্দ্রস্য নু বীর্য্যানি প্রবোচ. যানি প্রথমানি বজ্রী ইত্যাদি। অত্র প্রত্যক্ষকৃতায়াঃ ঋচঃ লক্ষণমুদাহরণঞ্চ।

যে মন্ত্রাঃ মধ্যমপুরুষেণ সংযুক্তাঃ সন্তি কিঞ্চ ত্বমিত্যাদিযুষ্মৎ প্রকৃতির্যুবন্তে সংযুক্তা সন্তি তে মন্ত্রাঃ প্রত্যক্ষকৃতাঃ উচ্যন্তে। উদাহরণম্ —ত্বমিন্দ্র বলাদধি। অস্যায়মর্থঃ—হে ইন্দ্র ত্বং সাহসঃ পরসাম্ অভিভবনসমর্থাৎ বলাৎ অধি অধিপোঽসি। অপি চ ওজসঃ ওজগুণ-যুক্তাৎ বলাৎ জাতোঽসি। ত্বং কামানাং বর্ষিতা ভবামি। অত্র যুষ্মৎ-শব্দপ্রয়োগেন মন্ত্রোঽয়ং প্রত্যক্ষকৃতো বুধ্যতে। এবং 'বি ন ইন্দ্র মৃধো জহি' হে ইন্দ্রঃ ত্বং নঃ অস্মাকং মৃধ সংগ্রামস্থান শত্রূন্ বিজহি বিশেষেন বিনাশয়। ইদন্ত বোধ্যম্। যত্র স্তোতারঃ প্রত্যক্ষকৃতাঃ ভবন্তি স্তোত-ব্যানি চ পরোক্ষকৃতানি ভবন্তি তত্রাপি মন্ত্রাণাং প্রত্যক্ষকৃতত্বং বোধ্যম্। অস্য উদাহরণম্—মা চিদন্যদ্বিশংসত সখায়ো মা বিষণ্যত অস্যায়মর্থঃ—হে সখায়ঃ সমানজ্ঞানবন্তঃ স্তোতারঃ ইন্দ্রস্তোত্রাৎ অন্যৎ স্তোত্রং বিশংসত মা উচ্চারয়ত। অন্যদীয় স্তোত্রোচ্চারণেন আত্মনঃ হিংসাং মা কুরুত। হিংসাম্ মা অভিলষ্যত ইতি।

অস্মিন্ মন্ত্রে স্তোতারঃ ঋত্বিজঃ প্রত্যক্ষাঃ সন্তি স্তোতব্যঃ ইন্দ্রশ্চ পরোক্ষত্বেন বর্ত্ততে। অতঃ অয়মপি মন্ত্রঃ প্রত্যক্ষকৃতঃ বোধ্যঃ। অথ আধ্যাত্মিকায়া ঋচঃ লক্ষণম্ উদাহরণঞ্চ। আখ্যাতস্য উত্তমপুরুষ যোগেন অহমিতি সর্বনামনির্দ্দেশেন বা ঋচঃ অধ্যাত্মিক্যঃ বোদ্ধব্যাঃ। অত্র ত্রিবিধম্ উদাহরণম্। বৈকুণ্ঠী ঋক্ প্রথমম্ উদাহরণম্ বোধ্যম্। লবসূক্তং দ্বিতীয়ম্ উদাহরণম্। বাগাম্ভৃণীয়ং সূক্তং তৃতীয়ম্ উদাহরণম্। তদ্ যথা— অহং ভুবং বসুনঃ পূর্ব্ব্যস্পতিরহং ধনানি সংজয়ামি শাশ্বত.। অস্যায়মর্থঃ—অহম্ ইন্দ্রঃ বসুনো ধনস্য পূর্ব্বঃ অসাধারণঃ পতিঃ অস্মি। অহং শত্রোঃ ধনানি সংজয়ামি সম্যক্ জয়ামি ইত্যর্থঃ। অহং শত্রোঃ শত্রুসম্বন্ধঃ ধনানি জিতবানস্মি। কিঞ্চ মামেব যজমানাঃ হবন্তে আহ্বায়ন্তি। অহং দাশুষে হবির্দত্তবতে যজমানায় ভোজনং ধনং বা বিভজামি। এবং লবসূক্তমপি উদাহরণং বোধ্যম্। তৃতীয়ং বাগাম্ভৃণীয়-

সূক্তস্য উদাহরণম্—"অহং রুদ্রেভির্বসুভিশ্চরাম্যহমাদিত্যৈরুতবিশ্বদেবৈঃ। অহং মিত্রাবরুণোভাবিভর্ম্যহমিন্দ্রাগ্নী অহমশ্বিনোভা।" ইদমপ্যধেয়ম্—পরোক্ষকৃতাঃ প্রত্যক্ষকৃতাঃ চ ঋচঃ বহবঃ সন্তি। আধ্যাত্মিক্যঃ ঋচঃ অল্পাঃ সন্তি। ক্বচিৎ মন্ত্রে স্তুতিরেব দৃশ্যতে ন অশীর্ব্বাদঃ দৃশ্যতে। যথা—ইন্দ্রস্য নু বীর্যানি প্রবোচং যানি চকার প্রথমানি বজ্রী স্তুতিরেব। 'সুচক্ষা অহমক্ষীভ্যাং ভূয়াসম্' ইত্যাদৌ আশীরেব দৃশ্যতে। কচিৎ শপথো দৃশ্যতে অভিশাপো বা দৃশ্যতে। ক্বচিৎ পদার্থস্য 'আচিখ্যাস্য' মন্ত্রেষু দৃশ্যতে যথা 'ন মৃত্যুরাসীদমৃতং ন তর্হি। তম্ আসীত্তমসা গূল্হমগ্রে'। ক্বচিৎ পরিবেদনা দৃশ্যতে ন স্তুতিঃ যথা ন বিজানামি যদি বেদস্মী। ক্বচিৎ মন্ত্রে নিন্দাপ্রশংসে দৃশ্যতে যথা 'কেবলাঘো ভবতি কেবলাদী।'

2. ***নিরুক্তকারমতে কতি দেবতাঃ সন্তি ইতি মতভেদমুপন্যস্য সমাধীয়তাম্।***

পূর্ব্বম্ আত্মবিৎপক্ষে (বেদান্তদর্শনমতে) দেবতানাম্ ঐকাত্ম্যং প্রতিপাদিতম্। যাজ্ঞিকানাং মতে তু যাবতা অভিধানং তাবতা নানাত্বং অভিহিতম্। তৌ এতৌ পক্ষৌ আক্ষেপ্তুং নিরুক্তকারঃ স্বকীয়ং মতং প্রদর্শয়তি। 'তিস্র এবদেবতা ইতি নৈরুক্তা' এব শব্দঃ অবধারণার্থঃ, পূর্ব্বোক্তপক্ষৌ ব্যাবর্তয়িতুং স্থিতঃ। (১) অগ্নিঃ পৃথিবীস্থানঃ (২) বায়ুর্বা ইন্দ্রো ইতি অন্তরীক্ষস্থানঃ (৩) সূর্য্যো দ্যু স্থানঃ। নিরুক্তকারমতে স্থানভেদেন দেবতায়াঃ এয়ো ভেদাঃ দর্শিতাঃ পৃথিবীস্থানং যস্য অসৌ অগ্নিঃ প্রথমো দেবঃ। বায়ুর্বা ইন্দ্রো বা অন্তরীক্ষস্থানকঃ। অত্র নিরুক্তকারমতে একস্যৈব দেবস্য অন্তরীক্ষস্থানত্বাৎ ইন্দ্রশব্দেন বায়ুশব্দেন চ প্রতিপাদনং বোধ্যম্। সূর্য্যো দ্যুস্থানঃ। নন্ মধ্যমস্য দেবস্য কথং শব্দদ্বয়েন ইন্দ্রবায়ুরূপেন প্রতিপাদনম্। পার্থিবত্তমনয়োঃ দেবতয়োঃ একৈকেন শব্দেন চ ইতি জিজ্ঞাসায়াম্ উচ্যতে। মধ্যমস্য দেবস্য হি

দ্বৌ কর্মাত্মানৌ বিদ্যুদ্বয়াখ্যৌ স্তঃ। তয়োঃ অনিত্য দর্শন একো বিদ্যু-দাখ্যো দেবো অপবস্তু নিত্যদর্শনো বায়্বাখ্যঃ, স চ ত্বগিন্দ্রিয়েন প্রত্যক্ষঃ। ততশ্চ অমুখ্যোঽপি অয়ং দেবঃ মুখ্যেন ইন্দ্রেন দেবেন সহ বিকল্প্যতে ইতি।

নন্থ যদি পৃথিবীস্থানঃ একঃ এব অগ্নিদেব স্যাৎ জাতবেদো বৈশ্বানরো কুপিটোযোনিঃ ইত্যাদি বহ্বভিধানং কথং সঙ্গচ্ছতে ইতি জিজ্ঞাসায়াম্ উচ্যতে। তাসাং মাহাভাগ্যাৎ একৈকস্যাপি বহূনি নামধেয়ানি ভবন্তি। অয়মাশয়ঃ। তাসামেব পূর্বোক্তানাং তিসৃণাং দেবতানাং মহৈশ্বর্য্য-যোগাৎ আত্মানং অনেকধা বিকুর্বতীনাম্ একৈকস্যাঃ দেবতায়াঃ প্রতি-বিকারং জাতবেদা বৈশ্বানরো ইতি বরুণঃ রুদ্রঃ ইতি, অশ্বিনৌ ইতি, পুষা ইতি, বহূনি নামধেয়ানি ভবন্তি। কিঞ্চ প্রতিস্থানং স্বপ্রকৃত্যাঃ অভেদাৎ ঐকাত্ম্যং ন জহাতি। 'অপি বা কর্মপৃথকত্বাৎ' কিঞ্চ স্বং স্বং আত্মানম্ অবিকুর্বতীনাং দেবতানাং কর্মনঃ পৃথকত্বাৎ অনেককর্ম-যোগাৎ নামধেয়স্য ভেদ উপলভ্যতে। তত্র বৈদিক দৃষ্টান্তমাহ। যথা একস্য কর্ত্তুঃ ঋত্বিজঃ কর্মভেদেন হোতা, অধ্বর্য্যু ব্রহ্মা, উদ্গাতা ইত্যাদি বহূনি নামানি ভবন্তি ইতি নিরুক্তকারমতং পর্য্যবসন্নম্। সাম্প্রতম্ যাজ্ঞিকমতেন দেবতাভেদমাহ 'অপি বা পৃথগেব স্যুঃ' পৃথক্ হি স্তুতয়ো ভবন্তি। যাজ্ঞিকমতে হি দেবতাঃ পৃথক্ পৃথক্ অত্যন্তভিন্নাঃ এব উৎপত্তিকেন ভেদেন ভবন্তি। অগ্ন্যাদীনাং দেবতানাং পৃথক্ পৃথক্ স্তুতয়ো দৃশ্যন্তে তৎ যথা অগ্নিমীলে পুরোহিতম্ ইত্যাদিসূক্তম্ অগ্নিং স্তৌতি। 'নুনং জাতবেদসম্' ইত্যাদিসূক্তং জাতবেদসম্ স্তৌতি। 'হরিভ্যাম্' ইত্যাদিমন্ত্রঃ ইন্দ্রং স্তৌতি। এবং বিভিন্নস্তুতিদর্শনে দেবতাঃ অত্যন্তভিন্নাঃ ভবন্তি ইতি তাৎপর্যম্। কিঞ্চ অভিধানান্যপি ভিন্নানি সন্তি। অয়মাশয়ঃ—আগ্নেয়ং অষ্টাকপালং নির্বপতি ব্রহ্মবর্চ্চসকামঃ ইতি বিধিবাক্যং অগ্নিদেবতাকং অষ্টকপালদ্রব্যকং যাগং বিধত্তে। এবঞ্চ যেনৈব অভিধানেন বিধিবাক্যং যাগং বিদধাতি তেনৈব নির্বাপনাদাবভ্যঃ যাগঃ সমাপ্যতে।

অত্রেদং শঙ্ক্যতে যৎ পুনঃ এতদুক্তং কর্মপৃথকৃত্বাৎ নামধেয়ে ভেদঃ

উপলভ্যতে ইতি। স চ অনৈকান্তিকো দৃষ্টান্তঃ। তথাহি অনেকেষাং মানবানাং একস্মিন্ কর্ম্মণি যোগঃ দৃশ্যতে ইতি পুরুষানামেককর্ম্মনোঽপি নানাত্বপ্রসঙ্গঃ স্যাৎ ইতি। তত্রেদম্ সমাধানম্ তত্র স্বস্থানৈকত্বং সম্ভবৈকত্বং চ উপেক্ষিতব্যম্। অয়মাশয়ঃ তস্মিন্ পৃথকত্বে সতি সমান-স্থানতয়া দেবানাম্ একত্বং ভবিতুমর্হতি। অত্র বা পরস্পরোপকারিতয়া সমানকার্য্যতয়া বা একত্বং ভবিতুমর্হতি। যথা, পৃথিব্যাং মনুষাঃ পশবো দেবাশ্চ ইত্যেতেষাং সমানং স্থানং সমানঃ উপকার্য্যোপকারভাবশ্চ দৃশ্যতে তথৈব দেবানামপি ভবেৎ। তদা অত্যন্তভেদঃ সিদ্ধঃ এব। যথা 'পৃথিব্যাঃ পর্জন্যেন চ বায়্বাদিত্যাভ্যাং চ সম্ভোগোঽগ্নিনা' দৃশ্যতে। কিঞ্চ অন্তরিক্ষস্য দিবশ্চ অগ্নিনা সম্ভোগঃ দৃশ্যতে। তদেবং কার্য্যৈকত্বাৎ স্থানৈকত্বাৎ দেবতানাং ভক্তিং একত্বং ন নিষিধ্যতে। ইত্থঞ্চ ভেদাভেদ-বাদিনঃ উভয়েঽপি প্রমাণং ভবন্তি—আত্মবিৎ নৈরুক্তযাজ্ঞিকাশ্চ। তত্র দৃষ্টান্তমাহ 'তত্রৈতন্নররাষ্ট্রমিব' রাষ্ট্রম্ ইতি অভেদবুদ্ধ্যা ব্যবহ্রিয়তে। নরা ইতি চ ভেদবুদ্ধ্যা ব্যবহ্রিয়তে। এবং পৃথিব্যগ্নি ইতি ভেদঃ। জাতবেদা বৈশ্বনরঃ ইতি চ ভেদঃ। এবম্ আত্মা ইতি অভেদঃ। লোকাঃ লৌকিনঃ স্বর্গাদয়শ্চ ইতি ভেদঃ আরোপ্যতে।

## 3. *দেবতা পুরুষবিধা অপুরুষবিধা বা?*

Or

Whether Vedic Gods are possessed of physical forms.

যৎকামাঋষিঃ যস্যাং দেবতায়ামিত্যাদি সন্দর্ভেণ মন্ত্রৈঃ স্তূয়মানত্বং দেবতাত্বমিত্যেব প্রতিপাদিতম্। তত্র মন্ত্রৈঃ যাঃ দেবতাঃ স্তূয়ন্তে তাঃ কিং পুরুষবিধা অপুরুষবিধা বা ইত্যেব সংশয়ঃ। অয়ং ভাবঃ—দেবতা বিষয়ে মতত্রৈবিধ্যম্—আত্মবিন্মতম্, নৈরুক্তমতম্, যাজ্ঞিকমতঞ্চ। তত্র আত্মবিন্মতে নৈষঃ সন্দেহাবসরঃ। আত্মনঃ সর্ব্বশক্তিমত্বাৎ তাসাং

সর্ব্বাকৃতিমত্ত্বমনাকৃতিমত্ত্বঞ্চ সম্ভবতি। নৈরুক্তমতেঽপি সূর্য্যবায্বগ্নীনাং প্রত্যক্ষত্বেন অনাকৃতিমত্ত্বং হি তাসাং স্বীকৃতম্। তেন অস্মিন্ পক্ষেঽপি ন সংশয়ঃ। কিন্তু যাজ্ঞিকমতে এব এষ সংশয়ঃ সম্ভাব্যতে। আভিধানিকা দেবতা যাজ্ঞিকৈঃ মন্যতে। যাবদভিধানং দেবতানামস্তিত্বং শব্দভেদে চ দেবতা ভিদ্যন্তে ইত্যেব তেষামভিপ্রায়ঃ। তেন অগ্নিবায়ুসূর্য্যাভিধানানি প্রত্যক্ষার্থাভিসম্বন্ধীনি জাতবেদো রুদ্রেন্দ্রপর্জ্জন্যাভিধানানি অপ্রত্যক্ষাভিসম্বন্ধীনি সন্তি। শব্দানামাকৃতিপদার্থত্বম্ অনাকৃতিপদার্থত্বঞ্চ লোকে দৃশ্যতে। তেন রুদ্রেন্দ্রাদীনাং মন্ত্রেষু দৃষ্টানাম্ আকৃতিমত্ত্বমনাকৃতিমত্ত্বং বা ইত্যেব শঙ্ক্যতে।

অমী রুদ্রাদিশব্দা কিং মনুষ্যাদিবদাকারবতা অর্থেন অর্থবন্তঃ অথবা বায়্বাত্মাকাশাদিবৎ অনাকারবতা অর্থেন অর্থবন্তঃ ? তত্র এতাঃ পুরুষবিধা এব ইত্যেকপক্ষঃ। দেবতাঃ খলু পুরুষানামিব সবিগ্রহাঃ তত্র হেতুশ্চ চেতনাবদ্ধি স্তুতয়ো ভবন্তীতি। যস্মাৎ চেতনাবতামিব স্তুতয়ো মন্ত্রা অভিধায়কা, তস্মাৎ এতাঃ দেবতাঃ পুরুষবিগ্রহা বোধ্যাঃ। তথাহি সংবাদসূক্তেষু পরস্পরমভিধানানি উক্তপ্রত্যুক্তানি সম্বন্ধার্থানি দৃশ্যতে। তানি চ পুরুষানামিব চেতনাবতামেব সম্ভাব্যন্তে। কিঞ্চ পুরুষাণাং যানি অঙ্গানি সন্তি মুখবাহুপাদ প্রভৃতীনি তৈরেব অঙ্গৈঃ দেবতা অপি সংস্তূয়ন্তে। যথা "ঋত্বা ত ইন্দ্র স্থবিরস্য বাহূ"। "যৎ সঙ্গৃভ্না মঘবন্ কাশিরিত্তে ইত্যাদিষু মন্ত্রেষু বাহুমুষ্টি সম্বন্ধ দর্শনাজ্ জায়তে দেবতানাং পৌরুষবিধামিতি। কিঞ্চ পুরুষা যৈ দ্রব্যৈঃ ব্যাবহরন্তি তৈরেব দ্রব্যৈঃ সম্বন্ধভিধানাজ্ জ্ঞায়ত এতানাং পৌরুষবিধ্যমিতি। তথাহি—

"আ দ্বাভ্যাং হরিভ্যাম্ ইন্দ্রযাহি।
কল্যাণীর্জায়া সুরণং গৃহেতে॥" ইত্যাদিষু মন্ত্রেষু

গৃহজায়া স্বরথাদিসম্বন্ধাৎ পৌরুষবিধ্যমুপপন্নম্। কিঞ্চ পুরুষাণাং যানি কর্মাণি পানশ্রবণাদীনি তৈরপি কর্মভিঃ সংস্তূয়মানত্বাৎ দেবতানাং পৌরুষবিধ্যমুপপাদ্যতে। তদ্ যথা —

"অদ্ধীন্দ্র পিব চ প্রস্থিতস্য।"

"আশ্রুত্ কর্ণ শ্রুধী হবম্॥" ইত্যাদিষু পানশ্রবণাদীনাং ব্যবহারাজ্ জ্ঞায়তে দেবতাশ্চেতনা ইতি। এতাসাম্ অপৌরুষেয়-বিধেঽপি কেচিৎ হেতবঃ সন্তি। অগ্নিবায়্বাদিত্যপৃথিবীপ্রভৃতয়ঃ যেঽপি দেবা প্রত্যক্ষতো দৃশ্যন্তে, তেষাং অনাকৃতিমত্বং সর্বৈরুপ লভ্যতে। তেন অগ্নিবায়্বাদি দেবতা অপুরুষবিধা ইত্যেবম্ অভ্যুপগন্তব্যম্। 'সুখং রথং সুযুজে সিন্ধুরশ্বিনম্' ইত্যাদি নদীস্তুতৌ উদকাত্মিকায়া নদ্যাঃ প্রবহন্ত্যাঃ রথে অবস্থানং বর্ণিতম্। তেন যদ্যপি দেবতা চেতনারূপেণ অচেতনরূপেণ চ বর্ণিতাস্তথাপি ক্বাচিদৌপচারিকং স্বীকার্যম্। তেন অপৌরুষবিধিকৈরঙ্গৈঃ সংস্তূয়মানত্বাৎ অপুরুষবিধা পরুষবিধা বা ইত্যেব ন বক্তব্যম্। উভয়ত্রাপি চেতনাবত্ত্বং স্বীকার্যম্। যত্র অচেতনা অপি চেতনাবৎ স্তূয়ন্তে। তত্র উপচারিকমথবা তদ্গত দেবতায়াঃ চেতনা-ভূতায়াঃ অনাভিব্যক্তায়াঃ স্তূয়মানত্বং বোধ্যম্। তথাহি কুত্রচিৎ গ্রাবাণোঽপি পৌরুষবিধিকৈঃ কর্মভিঃ স্তূয়ন্তে। তত্র চেতনাবত্ত্বম্ ঔপচারিকম্ বোধ্যম্। অয়ং ভাবঃ তত্রেদং মন্ত্রত্বাৎ চতুর্ধা বিদ্যতে। (১) পৌরুষবিধ্যম্, (২) অপৌরুষবিধ্যম্ (৩) কর্মাত্মমুভয়বিধ্যং (৪) নিত্যমুভয়বিধ্যঞ্চ। তত্র যাজ্ঞিকপক্ষেঽপি সর্বাসামপি দেবতানাং শক্তি-মত্ত্বাৎ অমূর্তা মূর্তা একধা, দ্বিধা, বহুধা চ সম্ভবন্তি। মন্ত্রদ্রষ্টা ঋষিণা যথা বর্তমানং দৃষ্টং তথৈব সর্বেষ্বপি মন্ত্রেষু বর্ণিতম্। তেন ন হি কুত্রচিদপি অনুপপত্তিরিতি দিক্।

4. ***"ন নির্বদ্ধা উপসর্গা অর্থান্নিরাহুরিতি শাকটায়নঃ।***
***নামাখ্যাতয়োস্তু কর্মোপসংযোগদ্যোতকা ভবন্তি॥***
—Explain.

Or,

***উপসর্গঃ অর্থবান্ অনর্থকো বা অর্থবত্ত্বেঽপি বাচকো দ্যোতকো বা ইতি নিরুক্তকাররীত্যা সম্যক্ বিব্রিয়তাম্।***

প্রথমং শাকটায়নমতেন উপসর্গস্য অনর্থকত্বং প্রতিপাদ্যতে "ন নির্বদ্ধা

উপসর্গা অর্থান্নিরাহুরিতি শাকটায়নঃ" উপসর্গ শব্দস্য অয়মর্থঃ—আখ্যাতং উপগৃহ্য তস্যৈব অর্থবিশেষং যে সৃতাস্তি তে উপসর্গাঃ প্রাদয়ঃ। তে নিষ্ক্রিম্য নামাখ্যাতমধ্যাৎ পৃথকভূয়বদ্ধাঃ পদবাক্যরূপেণ রচিতাঃ সন্তঃ অর্থান্ নিশ্চয়েন ন আহু ইতি আচার্যাস্য শাকটায়নস্য মতম্। তদা উপসর্গাঃ কিং কুর্ব্বন্তি ইতি জিজ্ঞাসায়ামাহ—"নামাখ্যাতয়োস্তু কর্মোপ-সংযোগদ্যোতকা ভবন্তি। অস্যায়মর্থঃ—নামাখ্যাতয়ো যোঽর্থঃ ক্রিয়ারূপঃ তস্যাং ক্রিয়ায়ামেব বিশেষণম্ উপযুজ্য তদ্বলেন বিশেষম্ অর্থং দ্যোতয়ন্তি ব্যঞ্জয়ন্তি ইতি হেতোঃ তে উপসর্গাঃ উপসংযোগদ্যোতকাঃ ভবন্তি। কিন্তু স্বাতন্ত্র্যেণ কমপি অর্থং অভিধেয়া ন প্রকাশয়ন্তি। তস্মাৎ অনর্থকাঃ পৃথক্ অবস্থিতাঃ উপসর্গাঃ ইত্যেতাবং শাকটায়নস্য মতম্।

সাম্প্রতম্ গার্গ্য-মতম্ উপনস্যতে—উচ্চাবচাঃ পদার্থা ভবন্তীতি গার্গ্যঃ। অস্যায়মর্থঃ—উচ্চাবচাঃ বহুপ্রকারাঃ উপসর্গপদানাম্ অর্থাঃ ভবন্তি, নামাখ্যাতাভ্যাম্ বিযুক্তানামপি তেষাম্ ইতি আচার্য্যঃ গার্গ্যঃ মন্যতে। অয়মভিপ্রায়ঃ—গার্গ্যমতে এষাম্ প্রাদীনাম্ উপসর্গানাম্ মধ্যে একৈকোঽপ্যুপসর্গঃ অনেকার্থঃ ভবতি। যথা প্র শব্দ শক্তি তৃপ্তি-শুদ্ধি-কৃতি ইচ্ছাষু অর্থেষু বর্ত্তন্তে। এবম্ আঙ্ ক্বচিৎ ঈষদর্থবোধকঃ। এবম্ অন্যেঽপি ভবন্তি। যত্তু কেনাপ্যুক্তম্ উপসর্গাঃ বর্ণবৎ অনর্থকাঃ ভবন্তি ইতি। তদযুক্তম্। মৃদোবয়বেষু মৃন্ময়ঘটাদি নির্মাণশক্তিঃ অস্ত্যেব। এবং বর্ণেষ্বপি সামান্যাভিধানশক্তিঃ অস্ত্যেব। সা চ শক্তিঃ পদত্বেন সমুদিতানাং বর্ণানাং অর্থবিশেষে পর্যবস্যতে। উৎপন্নে ঘটে ঘটারম্ভশক্তিঃ অভিব্যঞ্জতে। সৈব শক্তিঃ মৃৎসু অনভিব্যক্তা তিষ্ঠতি। অন্যথা অনর্থকৈঃ বর্ণৈঃ আরভ্যমানং পদং বাক্যং বা অর্থ-বোধকং ন স্যাৎ। অতঃ বর্ণাঃ অর্থবন্তঃ ইতি বয়ং বিশ্বাসিমঃ। কিঞ্চ কেচিৎ উক্তবন্তঃ উপসর্গা প্রদীপবৎ অনর্থকাঃ ভবন্তি ইতি ঘটাদি নির্মানে প্রদীপঃ ন কিঞ্চিৎ কারণং ভবতি। তস্মাৎ প্রদীপো যথা অনর্থকঃ তথা বর্ণঃ অপি অনর্থকঃ। তদপি ন যুক্তম্। প্রদীপোঽপি প্রকাশ-রূপে কার্য্যে অর্থবানেব। প্রদীপস্য সত্যাপি অর্থবত্বে প্রকাশ্যং ঘটাদিকম্ আধারীকৃত্য প্রকাশয়তি, আত্মানঞ্চ প্রকাশয়তি স্বনিষ্ঠং শক্তিঞ্চ অভি-

ব্যঞ্জয়তি। এব উপসর্গাঃ অর্থবন্তোঽপি সন্ত বহুবিধাং স্বার্থাভিধান-শক্তিং আধারভূতে নামাখ্যাতে বোধয়িত্বা অভিব্যঞ্জয়েয়ুঃ।

শাকটায়নমতস্য তু অয়মভিপ্রায়ঃ। উপসর্গাঃ নামাখ্যাতাভ্যাং পৃথকভূতাঃ ন কঞ্চিৎ অর্থম্ অভিদধতি। কিন্তু নামাখ্যাতোপসং-যোগেন তমেব ক্রিয়াবিশেষং অভিব্যঞ্জয়ন্তি। সর্বথা অর্থবাচকতাশক্তিঃ নাস্তি উপসর্গেষু। তস্মাৎ শাকটয়নমতে উপসর্গানাং 'অর্থবং' সূত্রেন প্রাতিপদিক সংজ্ঞা ন প্রাপ্নোতি অর্থবত্তাভাবাৎ। কিন্তু 'কৃৎতদ্ধিতসমাসাশ্চ' ইতি সুত্রস্থ 'চ' শব্দবলেন অনর্থকানামপি তেষাং প্রাতিপদিক সংজ্ঞা সিধ্যতি।

বৈয়াকরণাস্তু উপসর্গাঃ দ্যোতকাঃ ইতি মন্যন্তে ন তু বাচকাঃ। তেষাম্ অয়মভিপ্রায়ঃ স্ব-সমভিব্যাহৃতপদনিষ্ঠশক্ত্যুদ্বোধকত্বং দ্যোতকত্বম্। অস্যোদাহরণম্—অনুভবতি। অত্র ভূ-ধাতোরেব অর্থদ্বয় নিরূপিতা-শক্তিরস্তি। ভবতীত্যুক্তে সত্তারূপার্থ নিরূপিতাশক্তিঃ উদ্বুদ্ধা। অনুভবরূপার্থ-নিরূপিতাশক্তিঃ অনুদ্বুদ্ধা চ তিষ্ঠতি। অনু ইতি উপ-সর্গস্য যোগে অনুদ্বুদ্ধা শক্তিঃ উদ্বুদ্ধা ভবতি অর্থাৎ অনুভবতি ইত্যস্য জানাতি ইত্যর্থঃ। বৈয়াকরণমতে অর্থঃ ত্রিবিধঃ— বাচ্য, লক্ষ্য, ব্যঙ্গ্য-শ্চেতি দ্যোতকব্যঞ্জকশ্চেতি পর্যায়ঃ॥ দ্যোতকার্থমাদায় এব তস্য প্রাতি-পদিক সংজ্ঞা সিধ্যতি। উপসর্গানাং দ্যোতকত্বে প্রমাণং তু 'লঃ কর্ম্মাণি ভাবে চাকর্ম্মকেভ্যঃ' ইতি সূত্রমেব। তথাহি সকর্মকেভ্যঃ ধাতুভ্যঃ কর্মণি কর্ত্তরি চ লকারাঃ বিধীয়ন্তে। ভূ-ধাতোঃ সত্তারূপেঽর্থে অকর্মকত্বাৎ ভাবে প্রত্যয়ঃ স্যাৎ ন তু কর্মণি। তদা অনুভূয়তে সুখং দেবদত্তেন ইত্যাদৌ কর্মণি লকারঃ ন স্যাৎ। যদা তু ধাতোঃ অনুভবোঽর্থঃ স্বীক্রিয়তে 'অনু' উপসর্গস্তু তস্যার্থস্য দ্যোতকঃ ভবতি। তদা ভূ-ধাতোঃ সকর্মকত্বাৎ কর্মণি লকারঃ সিধ্যতি। এবং সাক্ষাৎ ক্রিয়তে গুরুঃ ইত্যাদৌ সাক্ষাৎ ইত্যাদি অবয়বস্য দ্যোতকত্বং বোধ্যম্। এবং নমস্ক্রিয়তে পিতা ইত্যাদৌ নমঃ শব্দঃ দ্যোতকো বোধ্যঃ।

(1) ভাবপ্রধানমাখ্যাতম্, সত্ত্বপ্রধানানি নামানি ॥
—Explain.

যাস্কাচার্য্যেন তদীয় নিরুক্তে নৈঘণ্টুকাণ্ডে পদানাং নির্বচন প্রসঙ্গে তেষাং বিভাগঃ কৃতঃ। চত্বারি পদজাতানীতি নামাখ্যাতেচোপসর্গনিপাতাশ্চ। তত্রাপি লক্ষণং বিবক্ষুনা তেন প্রোক্তম্—ভাব প্রধানমাখ্যাতমিতি।

যদি পদবিভাগকালে নাম্ন উল্লেখঃ পূর্ব্বং কৃতস্তথাপি আখ্যাতস্য প্রাধান্যং দ্যোতয়িতুং প্রথমমাখ্যাতস্যৈব লক্ষণং প্রদর্শিতম্ আখ্যাতং তিঙন্তপদম্ ভাবপ্রধানং ভবতি। ভাবঃ প্রধানং যস্য এবম্ভূতম্। ব্যাপারো-ভাবনা ক্রিয়া উৎপাদনা প্রভৃতয়ঃ একার্থবাচকাঃ শব্দাঃ। তথাচোক্তং বৈয়াকরণভূষণে "ব্যাপারো ভাবনাচৈব চৈব সৈবোৎপাদনা চ ক্রিয়া" ইত্যাদি। যদ্যপি "লঃ কর্ম্মণি চ ভাবে চাকর্ম্মকেভ্যঃ" ইতি পাণিণীয় সূত্রেণ লকারবাচ্যং কর্ত্তাকর্ম্মভাবশ্চেতি ত্রিতয়মুক্তম্। তথাপি ধাত্বর্থভাবস্যৈব প্রাধান্যং স্বীকর্ত্তব্যম্। অন্যথা দেবদত্তঃ পচতীত্যাদৌ পাকানুকূলা যা কৃতিস্তদ্বান্ দেবদত্তঃ ইত্যাদি প্রকারেণ প্রথমান্ত বিশেষ্যকঃ শব্দবোধঃ স্যাৎ। বৈয়াকরণমতে নিরুক্তমতে চ দেবদত্তকর্ত্তৃকো বর্ত্তমানকালকঃ পাকঃ ইত্যেব শব্দবোধঃ। তত্র পাকস্য প্রধান্যম্ অনুভূয়তে। পাকরাগপ্রভৃতয়ো ঘঙন্ত শব্দ ভাবার্থকা এব। কিঞ্চ কিং করোতীতি পৃষ্টে পচতীতি প্রতিবচনং শ্রুয়তে। নতু দেবদত্তঃ ওদনং বা। প্রশ্নোত্তরয়োঃ সমানার্থকত্বাৎ ব্যাপারপ্রাধান্যমাখ্যাতস্য অবশ্যমেব স্বীকর্ত্তব্যম্। তেন যুক্তিপ্রমাণসিদ্ধতয়া প্রথমপুরুষৈকবচনে পরস্মৈপদান্তস্য পচতীতি আখ্যাতশব্দস্য ভাবপ্রাধান্যমুপপন্নম্। যদ্যপি আখ্যাতেষু দ্রব্যস্যাপি প্রতীতির্ভবতি তথাপি তস্য প্রতীয়মানস্যাপি অবিবক্ষয়া তস্যাপ্রাধান্যং ভাবস্য চ প্রাধান্যং স্বীকর্ত্তব্যম্।

তদনন্তরং নামানি কীদৃশানি ইতি জিজ্ঞাসায়ামুক্তম্ - সত্ত্বপ্রাধানানীতি। সত্ত্বং লিঙ্গ সংখ্যান্বিতং দ্রব্যং তৎ প্রধানং যেষু তানি। সীদতঃ লিঙ্গসংখ্যে যত্র, তৎ সত্ত্বম্। তেন যস্মিন্ লিঙ্গসংখয়োরন্বয়ো ভবতি তৎ সত্ত্বমিতি জ্ঞেয়ম্। প্রাতিপদিকাখ্যেষু নামসু সত্ত্বানাং দ্রব্যানাং প্রাধান্যং স্বকর্ত্তব্যম্।

নমন্তি আখ্যাতশব্দে গুণভাবেন বর্ত্তন্তে ইতি নামানি। যদ্বা নময়ন্তি স্বমর্থমাখ্যাতশব্দবাচ্যে গুণভাবেনেতি নামানি। ইত্থং নামশব্দবুৎপত্ত্যা অপি নামসু সত্বপ্রাধান্যং লব্ধম্। যথৈব হ্যাখ্যাতে বিদ্যমানমপি দ্রব্যমবিবক্ষিতম্ এবমিহাপি বিদ্যমানাপি ক্রিয়া অবিবক্ষিতা দ্রব্যপরত্বাৎ সত্ত্বশব্দস্য কিন্তু গুণীভূতা বোধ্যা। যথা পাচকঃ পাঠকঃ ইত্যাদি-শব্দেষু পচ্ধাত্বর্থঃ পঠ্ধাত্বর্থশ্চভাবোগুণীভূতঃ। কিন্তু প্রত্যয়ার্থস্য দ্রব্যস্যৈব তত্র প্রাধান্যম্। পাচক-পাঠকাদিশব্দৈঃ দেবদত্তঃ প্রভৃতি প্রথমান্তপদানাং সামান্যাধিকরণ্যং প্রতীয়মানং দৃশ্যতে। তেন নাম্নঃ সত্বপ্রাধান্যং স্বীকর্ত্তব্যম্।

যথাচোক্তং কেনচিদাচার্য্যেণ—"শব্দেন উচ্চারিতেনেহ যেন দ্রব্যং প্রতীয়তে তদক্ষরবিধৌ যুক্তং নামেত্যাহুর্মনীষিণঃ" ইতি। যত্র পুনঃ বাক্যে নামাখ্যাতে উভাবপি স্তঃ তত্র কস্য প্রাধান্যমিতি জিজ্ঞাসায়ামুক্তং নিরুক্তকারেণ "ভাবপ্রধানমাখ্যাতং সত্বপ্রধানানি নামানি তদ্যত্রোভে ভাবপ্রধানে ভবতঃ।" যস্মিন্ বাক্যে নামাখ্যাতে স্যাতাং তত্র ভাবস্যৈব প্রাধান্যং স্বীকর্ত্তব্যম্। বাক্যে আখ্যাতস্য প্রাধান্যম্।

2. ***পূর্ব্বাপরীভূতং ভাবমাখ্যাতেনাচষ্টে - ব্রজতি পচতীত্যুপক্রমপ্রভৃত্যপবর্গপর্য্যন্তম্ ॥***—Explain.

"ভাবপ্রধানমাখ্যাতম্, সত্বপ্রধানানি নামানি" ইত্যুক্তং পূর্ব্বম্। ভাবঃ ক্রিয়া তৎপ্রধানমাখ্যাতম্। অধুনা আখ্যাতস্য নিগূঢ়ার্থং নির্বক্তুমাহ—"পূর্ব্বাপরীভূতম্..........." ইত্যাদি। ভাবঃ ক্রিয়া ইত্যুক্তমেব। সর্ব্বাসু ক্রিয়াসু বহবো ব্যাপারাঃ সন্তি; ব্যাপারেষু পুনঃ সর্ব্বেষু পরস্পরং কাল-পৌর্ব্বাপর্যং বিদ্যতে। অস্মাচ্চ কাল-পৌর্ব্বাপর্য্য নিবন্ধনাৎ ব্যাপারাণাং ভাবঃ (ক্রিয়া) "পূর্ব্বাপরীভূতম্" ইতি বিশেষণেন বিশেষিতঃ। বস্তুতস্তু সর্ব্বদা এব ক্রিয়া একৈব।

যদ্যেবং তর্হি তস্মিন্ পৌর্ব্বাপর্য্যভাবঃ কথং সম্ভবেৎ। অস্যাঃ শঙ্কায়াঃ নিরাসায় "পূর্ব্বাপরীভূতম্" ইতি পদম্ "অভূততদ্ভাবে চ্বি" ইতি প্রত্যয়েন নিষ্পাদিতম্। অয়মাশয়ঃ—সা ক্রিয়া ন পৌর্ব্বাপর্য্য-বিশিষ্ট ক্রমস্বরূপা, কিন্তু অপূর্ব্বমনপরং সন্তমেকত্বাৎ পূর্ব্বাপরীভূতং পূর্বাপরমিবাবস্থিতম্; ব্যাপারাশ্চ ক্রিয়ায়াঃ তস্যা অবয়বা এব। তদুক্তং স্কন্দস্বামিনা—

"সর্বেষু দর্শনেষু একত্বাৎ ক্রিয়ায়াং ন পৌর্ব্বাপর্য্যমস্তি। যে তু ব্যঞ্জকা বোৎপাদকা তদর্থা বা অবয়বভূতা বা অধিশ্রয়ণাদয়স্তেষাং পৌর্বাপর্য্যাৎ স্বয়মপূর্বঞ্চ ন পরঞ্চ সৎং পূর্বাপরীভূতং সাধ্যসাধন-রূপভাবং লোক আখ্যাতেনাচষ্টে। ঘটপটাদি নির্মাণকালে অয়মবয়বঃ পূর্বং করণীয়ঃ, অযঞ্চ উত্তরকালে করণীয় ইতি নাস্তি। কোঽপি বিহিতো নিয়মঃ, কিন্তু ক্রিয়ায়াঃ অবয়বেষু (ব্যাপারেষু) সুনির্দ্দিষ্টঃ পৌর্বাপর্য্যনিয়মোঽবশ্যমেব বিদ্যতে। তদুক্তং কলাপে "সা চ ক্রিয়া পূর্বাপরীভূতাবয়বৈব" ইতি। ইহাক্রমস্য ক্রমপ্রাপ্তিঃ চ্বিপ্রত্যয়েনোচ্যতে ইত্যুক্তং প্রাগেব। এতদেব দৃষ্টান্তেন স্পষ্টীকরোতি—

"ব্রজতিপচতীত্যুপক্রমপ্রভৃত্যপবর্গপর্য্যন্তম্।" ইতি ব্রজতি ক্রিয়ায়াং গমনকর্ত্তুঃ পাদুকাদিপরিধানম্, প্রথমঃ পাদবিক্ষেপঃ, পথি আহার-শয়ন-বিশ্রামাদিঃ অন্তিমঃ পাদবিক্ষেপশ্চ এতে ব্যাপারাঃ সন্তি। এবঞ্চ পচতীত্যুক্তে তণ্ডুলধাবনং, চুল্ল্যাং স্থাল্যারোপনং, স্থাল্যাং তণ্ডুলপ্রদানং, চুল্ল্যাং অগ্নিসংযোজনম্, তণ্ডুলানাং বিক্লিত্তি-ভবনম্, স্থাল্যাবরোপনঞ্চেতে সর্ব এব ব্যাপারা বোধ্যন্তে। এবমন্য-ত্রাপি। তস্মাদুপপন্নমনেকক্রিয়াভির্নির্বর্ত্তমানো ভাব আখ্যাতেন উচ্যতে ইতি।

আহ চ—"ক্রিয়াসু বহ্বীষ্বভিসংশ্রিতে যঃ পূর্ব্বাপরীভূত ইবৈক এব।" ক্রিয়াভির্নিবৃত্তিবশেন সিদ্ধম্ আখ্যাতশব্দেন তমর্থমাহুঃ।

তথা চোক্তং হরিণাপি—

"গুণভূতৈরবয়বৈঃ সমূহঃ ক্রমজন্মনাম্।
বুদ্ধ্যা প্রকল্পিতাভেদঃ ক্রিয়েতি ব্যপদিশ্যতে॥" ইতি।

তত্র সমূহব্যবহারো বৌদ্ধ এব ন বাস্তব ইতি সূচয়িতুমেব একঃ শব্দঃ প্রযুক্তঃ ইতি দিক্।

## (3) ইন্দ্রিয়নিত্যং বচনম্ ঔদুম্বরায়ণঃ ॥—Explain.

নামাখ্যাতোপসর্গনিপাতরূপং যৎপদচতুষ্টয়মুক্তম্, তদেব ন সম্ভবতি শব্দস্য অনিত্যত্বাৎ। ইত্যেবং শব্দনিত্যত্ববাদিনঃ ঔদুম্বরায়ণনামকস্য আচার্যস্য মতং প্রদর্শ্যতে ইন্দ্রিয়নিত্যমিত্যাদিনা।

উদুম্বরস্যাপত্যমৌদুম্বরিঃ, তস্যাপত্যমৌদুম্বরায়ণঃ। তন্নামকঃ কশ্চিৎ ঋষিঃ। বচনম্ বাক্যম্, ইন্দ্রিয়নিত্যং ইন্দ্রিয়ে বাগিন্দ্রিয়ে শ্রোত্রেন্দ্রিয়েচ নিয়তমিতি মন্যতে। ইন্দ্র আত্মা, স যেন ঈয়তে লিঙ্গ্যতে অনুমীয়তে চ তদিন্দ্রিয়ম্। আত্মা অস্তীত্যনুমানে চক্ষুরাদীন্দ্রিয়ং করণম্। ইন্দ্রিয়ং সকর্তৃকং করণত্বাৎ কুঠারাদিবৎ যদ্ যৎ করণং তত্তৎ সকর্তৃকমিতি ব্যাপ্তেঃ করণস্য সকর্তৃকত্বনিয়মো হ্যভ্যুপেয়তে। ইন্দ্রিয়াণামপি করণত্বেন কশ্চিৎ কর্ত্তা অস্তীতি অনুমীয়তে। স এব আত্মা। তেন আত্ম-লিঙ্গত্বাৎ ইন্দ্রিয়স্য ইন্দ্রিয়ত্বমভ্যুপগন্তব্যম্। ইন্দ্রিয়মিন্দ্রলিঙ্গমিন্দ্রদৃষ্ট-মিন্দ্রজুষ্টমিত্যাদিপাণিনীয়সূত্রেণ ইন্দ্রশব্দাৎ ঘঞ্ প্রত্যয়েন নিষ্পন্নম্। অত্র হি ইন্দ্রিয়-শব্দেন বাগ্রূপং শ্রোত্ররূপঞ্চ গৃহ্যতে।

অয়ং ভাবঃ—পদসমূহাত্মকং বাক্যং বাগিন্দ্রিয়ে শ্রোত্রেন্দ্রিয়ে চ যাবদবতিষ্ঠতে তাবদেব তদস্তিত্বেন গৃহ্যতে। বক্তা যাবৎপর্য্যন্তং বদতি শ্রোতা যাবৎপর্য্যন্তং শৃণোতি; তাবদেব বাক্যস্য অস্তিত্বং প্রতীয়তে। যদা বাগিন্দ্রিয়স্য শ্রোত্রেন্দ্রিয়স্য চ ব্যাপারাভাবঃ, তদা বাক্যম্ অস্তীতি কথমপি প্রত্যেতুং ন শক্নুয়াৎ। তেন বাক্যমনিত্যমিত্যেব তদীয়ং তাৎপর্যম্। তত্র কা ক্ষতিঃ ইত্যুচ্যতে—"তত্র চতুষ্ট্বং নোপপদ্যতে" ইত্যাদিনা গ্রন্থসন্দর্ভেন যাস্কাচার্য্যেণ যদা বাক্যস্যানিত্যত্বং স্বীক্রিয়তে তদা চত্বারি পদজাতানীতি যৎপদানাং চতুষ্ট্বমভ্যুপেতম্, তৎ নোপপদ্যতে তথাহি যদা আখ্যাতমুচ্চর্য্যতে, তদা নাম্নো বিনষ্টত্বাৎ তয়োর্গৌণপ্রাধান্য

ভাবো ন স্যাৎ। বিনষ্টাবিনষ্টয়োঃ যুগপদবস্থানাসম্ভবাৎ। এবঞ্চ "শাস্ত্রকৃতোযোগশ্চ" নোপপদ্যতে শাস্ত্রে দৃষ্টো যঃ শব্দস্য শব্দান্তরেণ সম্বন্ধঃ সোঽপি ন স্যাৎ। যদা ধাতুরুচ্চারিতঃ তদা উপসর্গো বিনষ্টঃ। তেন কথং উপসর্গঃ ধাতুনা ধাতুশ্চ প্রত্যয়েন সম্বধ্যেত। নহি বিনষ্টা-বিনষ্টয়োঃ সম্বন্ধঃ কদাচিদপি উপলব্ধুং শক্যতে। তেন নামাখ্যাতয়োঃ যঃ ইতরেতরঃ গুণপ্রধানভাব উপসর্গনিপাতানাং নামাখ্যাতাভ্যাঞ্চ সম্বন্ধঃ। সর্ব্বোঽপি অনুপপন্নঃ স্যাদেতস্মিন্ মতে। তর্হি কিং সমাধানমিতি জিজ্ঞাসায়ামুক্তম্—"ব্যাপ্তিমত্ত্বাত্তু শব্দস্য" ইতি।

অয়ং ভাবঃ—শব্দানামনিত্যত্বে পদচতুষ্ট্বং নোপপদ্যেত, তস্মাৎ শব্দানাং নিত্যত্বমভ্যুপেয়ম্। তস্মিন্ হেতুস্তু ব্যাপ্তিমত্ত্বম্। শব্দো নিত্য ব্যাপ্তিমত্ত্বাৎ ইত্যেবানুমানেন শব্দানাং নিত্যত্বং স্বীকার্য্যম্। শব্দা হি খলু আকাশবৎ সর্ব্বত্র ব্যাপ্তাঃ, স্থানাদ্যভিঘাতসংযোগেন তে হি অভি-ব্যজ্যন্তে—ন তু উৎপাদ্যন্তে। হৃদয়াকাশে স্থিতাঃ শব্দাঃ বায়ুনা তাল্বাদিসংযোগৈঃ প্রকাশ্যন্তে। তেন ব্যাপ্তিমত্ত্বাৎ শব্দানাং বাক্যানাঞ্চ নিত্যত্বং স্বীক্রিয়তে। অস্মিন্ স্বীক্রিয়মানে পদচতুষ্ট্বং নোপপদ্যতে ইতি যা অনুপপত্তিঃ প্রদর্শিতা সা নিরাকৃতেতি দিক্।

(4) ষড়্ভাববিকারা ভবন্তীতি বার্ষায়ণিঃ ॥ Explain.

ভাবস্তাবৎ দ্বিবিধঃ—কার্যরূপঃ কারণরূপশ্চ। তত্র দ্রব্যগুণকর্ম্মাদ্যা যে খলু দৃশ্যমানাঃ পদার্থাঃ তে তু কার্যরূপাঃ। তেষাং বাচকং দ্বিবিধং —তিঙন্তপদং কৃদন্তপদঞ্চ। তিঙন্তপদেন সাধ্যরূপঃ ভাবোঽভিধীয়তে। কৃদন্তপদেন চ সিদ্ধরূপ এব ভাবঃ। এতে তু কার্যরূপ-ভাবাৎ ঘটপটাদি-স্বরূপা অনিত্যভূতাঃ। এতে ভাবা যদা তু স্বকীয়করণরূপে ভাবে বিলীয়ন্তে, তদা কেবলং স্বেনৈব রূপেন ভবনমাত্রেণ বিলসন্তোঽবতিষ্ঠন্তে প্রলয়কালে। প্রলয়কালে তু প্রহীনসর্বাবস্থঃ কারণরূপভাবঃ ভবনমাত্রেণ প্রতীয়মানঃ স্বরূপেঽবতিষ্ঠতে। স তু ভাবঃ কারণরূপঃ সাংখ্যোক্ত-

প্রকৃতেঃ অতিরিচ্যমানঃ বিরাজতে। অস্মিন্ মতে সাংখ্যোক্তৌ প্রকৃতি-পুরুষৌ উভাবপি অনিত্যৌ। তয়োঃ সোপপদপ্রযুজ্যমানত্বাৎ। প্রযুজ্যতে হি প্রকৃতিভাবঃ পুরুষভাব ইত্যাদিরূপেণ বেদান্তপ্রতিপাদ্যব্রহ্মণোঽপি শ্রেষ্ঠোঽয়ং ভাবঃ তস্য নিরুপপদত্বেন প্রতীয়মানত্বাৎ। ব্রহ্মাদয়স্তু সোপ-পদেন প্রযুজ্যন্তে যথা ব্রহ্মভাবঃ ইতি। কিন্তু ন কদাপি প্রযুজ্যতে ভাবাভাব ইতি। তস্মাৎ সর্ব্বেভ্যোঽপি অতিরিচ্যমানত্বাৎ কারণরূপভাবঃ প্রলয়কালে স্বরূপেঽবতিষ্ঠমানো বিরাজতে। স এব ভাবঃ যদা কার্য্য-রূপেণ বিপরিণমতে তদৈব কার্য্যভাব উচ্যতে। তস্যৈব ষড়্‌বিকারাঃ সন্তি ইতি বার্ষায়ণিনামকঃ কশ্চিৎ আচার্য্যঃ প্রতিপাদয়তি। যে খলু কার্যরূপা বৃক্ষাদয়ো ভাবাঃ সন্তি তে তু ভাববিকারা এব। তেষাং ভেদষট্‌কত্বাৎ ষড়্‌ভাববিকারা ইত্যুক্তম্।

তত্র প্রথমো ভাববিকারঃ 'জায়তে' ইতি। জনিধাতোঃ প্রাদুর্ভাবঃ ইত্যর্থঃ। 'জায়তে' ইত্যনেন প্রাদুর্ভবতি ইতি প্রতীয়তে। স তু প্রতীয়মানো ভাবঃ ষণ্ণাং ভাববিকারাণাং পূর্বম্ তত্র 'জায়ত' ইত্যনেন পূর্বাবস্থা প্রকাশ্যতে। উপক্রমপ্রভৃত্যপবর্গপর্য্যন্তং ভাবশব্দবাচ্যম্। কিন্তু তস্যামবস্থায়াম্ [illegible]পাদ্যাবস্থা যদ্যপি সন্তি তথাপি তাসাং প্রতীয়মানত্বা-ভাবাৎ পূর্বভাবস্য [illegible]দ্যাবস্থা এব প্রকাশ্যতে। ন পরভাবঃ প্রকাশ্যতে। ন তু অপরভাবস্য প্রতিষেধোঽপি তত্র প্রতীয়তে। অয়ং ভাব বিদ্যমানস্য এব বস্তুনঃ প্রাদুর্ভাবো ভবতি। যদা তু 'জায়ত' ইত্যুচ্যতে, তদা যদ্যপি বস্তুনঃ বিদ্যমানতা অস্ত্যেব তথাপি সা ন প্রতীয়তে, অন্তর্লীনত্বাৎ। এবংপ্রকারেণ দ্বিতীয়ো ভাববিকারঃ অস্তীতি। জায়মানস্যৈব বস্তুনোঽস্তীতি শব্দেন ব্যবহারো ভবতি। যদা অস্তীতি ব্যবহ্রিয়তে তদা তৃতীয়ো ভাববিকারঃ বিপরিণমত ইতি প্রতীয়তে। নাপি চ নিষিধ্যতে। এবং প্রকারেণ যদা বিপরিণমতে ইতি ব্যবহ্রিয়তে তদা বর্দ্ধত ইতি ন প্রতীয়তে। ইত্থম্ বৃদ্ধি-অপক্ষয়-বিনাশাত্মকেষু ত্রিবিধেষপি ভাব-বিকারেষু পূর্বস্য প্রত্যয়ো ন অপরস্য চ নিষেধ ন ইতি বোধ্যম্। জায়মানো হি পদার্থঃ অস্তীতি ব্যবহ্রিয়তে। য এব অস্তীতি ব্যবহ্রিয়তে স এব বিপরিণমতে। বিপরিণামং বিনা বৃদ্ধেরসম্ভবঃ। বৃদ্ধেরপি

ক্ষয়ং বিনা সম্ভবো নাস্তি। তেন য হি বৰ্দ্ধতে স এব অপক্ষীয়তে। অপক্ষয়শ্চ বিনাশং বিনা ন সম্ভবতি। যস্য ক্ষয়ঃ তস্য বিনাশোঽবশ্যম্ভাবী। তেন ষড়েব ভাববিকারাঃ সন্তি ইতি বার্ষ্যায়ণিমতম্। যদ্যপি অন্যোঽপি বিকারা সম্ভবন্তি তথাপি তেষাং এষু ষট্স্বেব অন্তর্ভাবা ইতি বোধ্যম্।

5. *উচ্চাবচাঃ পদার্থা ভবন্তীতি গার্গ্যঃ*। Explain.

যাস্কাচার্যেণ নামাখ্যাতোপসর্গনিপাতাশ্চেতি চত্বারি পদজাতানি প্রদর্শিতানি। তত্র নামাখ্যাতয়োঃ লক্ষণং প্রদর্শ্য উপসর্গার্থং নিরূপয়িতুং প্রারব্ধম্। তত্র উপসর্গাণাং বাচকত্বাবাচকত্ববিষয়ে মতদ্বয়ং বিদ্যতে—শাকটায়নমতং গার্গ্যমতঞ্চ। তত্র শাকটায়নমতে উপসর্গাণাং বাচকত্বং নাস্তি, কিন্তু দ্যোতকত্বমেব। গার্গ্যমতে তু উপসর্গাণাং বাচকত্বমভ্যুপেয়তে। তদুক্তং যাস্কাচার্যেণ—'উচ্চাবচাঃ পদার্থা ভবন্তীতি গার্গ্যঃ'। উচ্চাশ্চ অবচাশ্চ উচ্চাবচাঃ বহুপ্রকারা ইত্যর্থঃ। নামাখ্যাতাভ্যাং বিযুক্তানামপি উপসর্গাণাং স্বকীয়া অর্থাঃ সন্তি ইত্যেব তদীয়ং তাৎপর্য্যম্। প্রাদীনামেকৈকমপি অনেকার্থা লোকে দৃষ্টাঃ। যথা—প্র-পরা ইত্যেতস্য প্রতিলোমাম্, অভীতস্য আভিমুখ্যম্ ইত্যাদি। অয়ং হি তদীয়াশয়ঃ। যদি প্রাদীনাং স্বকীয়ঃ কশ্চিদর্থঃ ন স্যাৎ, তদা নামাখ্যাতাভ্যাং সংযোগেঽপি কথং সোঽর্থঃ প্রতীয়েত। অন্বিত্যেতস্য আনর্থক্যাৎ অনুভব ইত্যাদৌ যোঽনুশব্দো দৃশ্যতে, তস্যাপি আনর্থক্যং স্বীকার্যম্। তেন অনুভবার্থকতা অনুভবতীত্যস্য ন স্যাৎ।

শাকটায়নেন যদুক্তং—যথা ঘটাদীনাং শব্দানাং একৈকস্য ঘকারাদিবর্ণস্য অর্থবত্বং নাস্তি, কিন্তু ঘটাদীনাং সমুদয়ানামর্থবত্বং প্রতীয়তে, তথৈব প্রত্যেকমুপসর্গাণামর্থবত্বাভাবেঽপি নামাখ্যাতসংযুক্তানাং তেষাং বিশেষার্থদ্যোতকতা স্বীকার্যা ইতি। তত্তু ন সমীচীনম্। যদেকস্য বর্ণস্যার্থবত্বং ন স্যাৎ তদা সমুদিতানামপি বর্ণাণাং কথমর্থবত্বং ভবেৎ। (১) নহি

হ্যগুক্লৈস্তন্তুভিরারভ্যমানঃ পটঃ কদাচিদপি শুক্লো ভবতি। (২) এবঞ্চ অচক্ষুষ্মতাং জনানাং সমুদায়ঃ নহি চক্ষুষ্মান্ ভবতি। (৩) অবয়বধর্মা এব অবয়বিনি দৃশ্যন্তে অবয়বেষু অবিদ্যমানা ধর্মা ন কদাচিদপি অবয়বিষু জায়মানা দৃষ্টাঃ। পরম্ অবয়বেষু তিরোহিতো ধর্ম এব অবয়বিষু অভিব্যজ্যতে। (৪) অতঃ সামান্যা হি বর্ণেষ্বভিধানশক্তিরস্ত্যেব। মৃৎসু অনভিব্যজ্যমানাপি জলাহরণশক্তিঃ তদারব্ধঘটেষ্বভিব্যজ্যমানা প্রতীয়তে। (৫) না সতো বিদ্যতে ভাব ইতি ন্যায়াদসদ্‌ধর্মাণাং কদাচিদপি বিদ্যমানত্বং ন শক্যতে অধিগন্তুং, তেন উপসর্গাণাং প্রত্যেকমপি স্বকীয়োঽর্থঃ অভ্যুপগন্তব্য ইতি।

6. *অথ নিপাতা উচ্চাবচেষ্বর্থেষু নিপতন্তি।*

—Explain.

যাস্কাচার্যেণাদৌ নামাখ্যাতোপসর্গনিপাতাশ্চেতি চতুর্বিধানি পদজাতানি ভবন্তি ইত্যুক্তম্। তত্র নামাখ্যাতোপসর্গাণামর্থং নিরূপ্য নিপাতার্থত্ব-প্রতিপাদনকালে উক্তমিদং নিপাতস্য লক্ষণম্। অতঃ নিপাতা উচ্চাব-চেষ্বর্থেষু নিপতন্তীতি। নিপতন্তি এষু ইতি নিপাতাঃ। কেষু নিপতন্তি ইতি জিজ্ঞাসায়ামুক্তম্—উচ্চাবচেষু অর্থেষু ইতি। উচ্চাবচাঃ নানাবিধাঃ। তেষু বিবিধপ্রকারেষু অর্থেষু নিপাতনশীলত্বাৎ এতে নিপাতা ইত্যুচ্যন্তে। তথাহি ক্বচিৎ উপমার্থে ক্বচিৎ কর্মোপসংগ্রহার্থে ক্বচিৎ পাদপূরণার্থে এব প্রযুজ্যন্তে।

ইব, ন, চিৎ, নু, এতে চত্বারো নিপাতা উপমার্থে প্রযুক্তা ভবন্তি যথা অগ্নিরিব ইত্যত্র ইব-শব্দ উপমাদ্যোতকঃ।

ন-ইতি নিপাতস্য প্রতিষেধার্থ উপমার্থশ্চ। নিষেধার্থং পূর্বং প্রযুজ্যতে উপমার্থশ্চ পশ্চাৎ প্রযুজ্যতে। যথা, নেন্দ্রং দেবমমংস্ত ইত্যত্র নিষেধার্থকো ন ইত্যস্য পূর্বপ্রয়োগঃ। বেদে ন ইত্যস্য নিষেধার্থ উপমার্থশ্চ। কিন্তু ভাষায়াং কেবলং নিষেধার্থে প্রযুজ্যতে।

চিং—ইত্যস্য বহবোঽর্থাঃ—পূজায়াম্, উপমার্থো, নিন্দার্থে চ। যথা আচার্যশ্চিদিদং ব্রূয়াদিতি পূজায়াম্। দধিচিদিত্যুপমার্থে। কুল্মাষাংশ্চিদা-হর ইতি নিন্দার্থে।

নু—ইত্যস্য হেতুদ্যোতকত্বে অনুপৃচ্ছাদ্যোতকত্বে, উপমার্থে চ প্রয়োগা ভবন্তি। যথা—ইদং নু করিষ্যতি ইতি হেত্বপদেশে। যথা উদাহরতি —কস্মাদদ্য দেবদত্তঃ প্রাতরেব ভুঙ্‌ক্তে ইত্যুক্তে যদা উচ্যতে গ্রামং নু গমিষ্যতি ইতি তদা গ্রামগমনস্য হেতুত্বং গম্যতে। যস্মাদ্ গ্রামং গমিষ্যতি তস্মাৎ প্রাতর্ভুঙ্‌ক্তে ইতি তস্যাপদেশে নু শব্দ ইতি। কথং নু করিষ্যতি ইত্যনুপৃষ্টে। বৃক্ষস্য নু তে পুরুহূত বয়াঃ ইতি উপমার্থে ইত্যাদীনি উদাহরণানি।

1. *অথ যস্যাগমাদর্থপৃথকত্বমিহ বিজ্ঞায়তে ন ত্বৌদ্দেশিকমিব বিগ্রহেণ পৃথকত্বাৎ স কর্মোপসংগ্রহঃ।*

—Explain.

তত্র ভবতা নিরুক্তকারেণ যাস্কাচার্যেণ তাবৎ 'উচ্চাবচেষু অর্থেষু নিপতন্তি' ইতি নিপাতা ইত্যুক্তম্। ততস্তেষাং বিবিধপ্রকারেষু অর্থেষু নিপতন-শীলত্বং দর্শয়িতুং প্রথমমুপমার্থকান্ নিপাতানুল্লিখ্য অনন্তরং কর্মোপ-সংগ্রহার্থকান্ নিপাতান্ প্রদর্শয়তি। যস্যাগমাৎ প্রয়োগাদ্ অধ্যাহারাৎ বা অশ্রূয়মাণস্যৈব নিপাতস্য সরূপবিরূপৈকশেষাদর্থতো বা পৃথক্ ভাবো বিজ্ঞায়তে স কর্মোপসংগ্রহার্থো নিপাতঃ। অয়ম্ভাবঃ—সরূপাণামেকশেষে বিরূপাণামেকশেষে চ দেবদত্তযজ্ঞদত্তৌ, পিতরৌ ইত্যাদৌ দ্বৌ শব্দৌ শ্রূয়েতে কিন্তু ন তয়োরর্থপৃথকত্বং চকারাধ্যাহারং বিনা বুধ্যতে। ইদমর্থপৃথকত্বং তু ঔদ্দেশিকমিব ন, অর্থাৎ যথা ঔদ্দেশিকা উদ্দেশ্যবিষয়ীভূতাঃ স্বকীয়মর্থ-পৃথকত্বং বোধয়ন্তি ন তথেত্যর্থঃ যথা প্রত্যেকমুদ্দিশ্যমানানাং গাঃ অশ্বান্ পুরুষান্ পশূন্ ইত্যাদিক্রমেণোচ্চারিতানামর্থভেদো জ্ঞায়তে। একশেষে তু বিগ্রহেণ বিশ্লেষেণ চশব্দাধ্যাহারাদেব অর্থপৃথকত্বং জ্ঞায়তে যথা দেবদত্তশ্চ

যজ্ঞদত্তশ্চ দেবদত্তযজ্ঞদত্তৌ ইতি, মাতা চ পিতা চ পিতরৌ ইতি। স এষ পৃথক্ত্বেন নিমিত্তনোপলক্ষ্যমানঃ অর্থদ্বয়মর্থবহুত্বং বা একস্মিন্ কর্মণি উপসংগ্রহয়তীতি কর্মোপসংগ্রহ ইত্যুচ্যতে। ইদং ব্যাখ্যানং দুর্গাচার্যস্য।

8. *"তে নিগন্তব এব সন্তো নিগমনান্নিঘণ্টব উচ্যন্তে।"*
--Explain.

গবাদি দৈবপত্ন্যান্তঃ শব্দসমুদায়ঃ ঋষিভিঃ মন্ত্রার্থপরিজ্ঞানায় উদাহরণভূতঃ পঞ্চাধ্যায়ীসংগ্রহরূপে একস্মিন্নাম্নায়ে আচার্যৈঃ নিঘণ্টব ইত্যুচ্যতে। কথং নিঘণ্টুরিতি সংজ্ঞা ইতি জিজ্ঞাসায়াম্ উচ্যতে—এতাঃ শব্দজাতয়ঃ নিয়মেন মন্ত্রার্থস্য গময়িতারো ভবন্তি। বেদার্থজ্ঞানঞ্চ এতেষাং শব্দানাম্ অর্থজ্ঞানমপেক্ষতে। নিশ্চয়েনাধিকং বা নিগূঢ়ার্থা এতে পরিজ্ঞাতাঃ সন্তো মন্ত্রার্থান্ গময়ন্তি। যস্মাৎ মন্ত্রার্থপ্রতিপত্তেঃ তদর্থজ্ঞানপ্রতিবদ্ধত্বাৎ তদর্থজ্ঞানার্থম্ এবৈতে ছন্দোভ্যঃ সমাহৃত্য সমাম্নাতা এব। অতএব তে অর্থনিগময়িতৃত্বাৎ নিগন্তবো ভবন্তি। ততশ্চ নিগন্তবঃ অতিপরোক্ষ-বৃত্তিনা নিঘণ্টব উচ্যন্তে। বর্ণব্যাপত্তিদ্বারেণ পৃষোদরাদিত্বাৎ গকারস্থানে ঘকারঃ, তকারস্থানে চ টকারঃ।

নিঘণ্টুশব্দস্য ব্যুৎপত্তিং প্রদর্শ্য টীকাকারেণ দুর্গাচার্যমহোদয়েন প্রত্যক্ষ-পরোক্ষ-অতিপরোক্ষ রূপা ত্রিবিধা শব্দব্যবস্থা প্রদর্শিতা। তথাহি শব্দশ্চ ত্রিবিধঃ -প্রত্যক্ষবৃত্তিঃ, পরোক্ষবৃত্তিঃ, অতিপরোক্ষবৃত্তিশ্চ। তত্রোক্তক্রিয়ঃ প্রত্যক্ষবৃত্তিঃ, অন্তর্লীনক্রিয়ঃ পরোক্ষবৃত্তিঃ, অতিপরোক্ষ-বৃত্তৌ চ অবিজ্ঞাতব্যুৎপত্তিত্বাৎ নির্বচনাভ্যুপায়ঃ। তথাচ – নিঘণ্টব ইতি অতিপরোক্ষবৃত্তিঃ, নিগন্তব ইতি পরোক্ষবৃত্তিঃ, নিগময়িতার ইতি প্রত্যক্ষ-বৃত্তিঃ। অতিপরোক্ষবৃত্তিঃ শব্দঃ পরোক্ষবৃত্তিতামাপাদ্য প্রত্যক্ষবৃত্তিনা শব্দেন নির্বক্তব্যঃ। নিঘণ্টুশব্দস্য ব্যুৎপত্তৌ চাপি নাস্তি কশ্চিৎ নিয়ম-ব্যত্যয়ঃ। যস্মাৎ নিগময়িতার এতে শব্দা অতো নিগন্তব ইতি নিঘণ্টব ইত্যুচ্যন্তে।

অত্রাপি নিঘণ্টু শব্দে বর্ণবিপর্যয়ব্যাপত্তিলক্ষণম্। এতে নিগন্তবঃ সন্তো নিঘণ্টব উচ্যন্তে ইত্যেবম্ অতিপরোক্ষবৃত্তয়ো নির্বক্তব্যাঃ। প্রায়েণ চ উণাদিষু পরোক্ষবৃত্তয়ঃ শব্দাঃ চিন্ত্যন্তে। অপরিসমাপ্তা হি উণাদয়ঃ ইতি চ লক্ষণবিদঃ প্রতিজানতে। সর্ব্বথাপি লক্ষণাসম্ভবে পৃষোদরাদি-পাঠসিদ্ধিরেব দ্রষ্টব্যা।

৭. *মাহাভাগ্যাদ্ দেবতায়া এক আত্মা বহুধা স্তূয়তে।* Explain.

'মাহাভাগ্যাদ্ দেবতায়া এক আত্মা বহুধা স্তূয়তে'। ভজ্যতে সেব্যতে অসৌ ভাগঃ ঐশ্বর্য্যম্। মহান্ ভাগঃ যস্যাঃ সা মহাভাগঃ তস্যাঃ ভাবঃ মাহাভাগ্যম্। তস্মাৎ হেতোঃ তস্যাঃ মহৈশ্বর্য্যবত্বাৎ ইত্যর্থঃ। একোঽপি দেবতাত্মা বহুধা স্তূয়তে। ক্বচিৎ প্রকৃতি ভেদেন ক্বচিৎ অপ্রকৃতিভেদেন বা বর্তমানঃ আত্মা বহুধা স্তূয়ন্তে। তত্র প্রমাণং ঋক্ মন্ত্রোঽপি "রূপং রূপং মঘবা বোভবীতি মায়াঃ কৃণ্বানস্তন্বং পরিস্যাম্। ত্রির্যদ্দিবঃ পরিমুহূর্তমাগাৎ স্বৈর্মন্ত্রৈরনৃতুপা ঋতবা"।[1] কিঞ্চ 'ইন্দ্রং মিত্রং বরুণমগ্নিমাহু' ইত্যাদি। অয়মভিপ্রায়ঃ। যথা বেদান্তদর্শনে সচ্চিদানন্দাত্মকং ব্রহ্ম শুদ্ধচৈতন্যং একমেব কিন্তু উপাধিভেদেন ঈশ্বরঃ হিরণ্যগর্ভঃ সূত্রাত্মা, বিরাট্ ইতি বহুবিধং তৎ প্রতীয়তে। কিঞ্চ প্রমাতৃ, প্রমিতি, প্রমাণ, প্রমেয় ভেদেন তদেবং বহুধা ভিদ্যতে যথা অন্তকরণাবচ্ছিন্নং চৈতন্যং প্রমাতৃ, অন্তকরণবৃত্তিবিশিষ্টং চৈতন্যং প্রমাণং ঘটাদ্যবচ্ছিন্নং চৈতন্যং প্রমেয়ং, নিরবচ্ছিনং চৈতন্যং প্রমিতিঃ ইত্যুচ্যতে। তথৈব ঋগ্বেদেঽপি এক আত্মা উপাধিভেদেন বহুধা ভিদ্যতে। প্রকৃতে 'ইন্দ্রং মিত্রং বরুণং অগ্নিমাহু' ইত্যাদৌ একদেবতাত্মা অনেকাভিঃ উপাধিভিঃ ভিদ্যতে। যথা ইন্দ্রস্য উপাধিঃ রসাদানং বলকৃতিশ্চেতি। অগ্নেঃ উপাধিঃ ভৌমপদার্থঃ, অন্তরীক্ষস্থস্য অগ্নেঃ উপাধিঃ মণ্ডলাত্মা আদিত্যঃ ইত্যাদি। প্রকৃতে নিরুক্তকারমতে একস্যাপি দেবতাত্মনঃ

ত্রিভিঃ ভাগৈঃ বিভাজিতত্বাৎ তিস্রঃ দেবতাঃ উচ্যন্তে। অতঃপরং বহ্বীভিঃ উপাধিভিঃ বহবঃ দেবতাঃ প্রতীয়ন্তে। সাম্প্রতম্ দেবতায়াঃ অঙ্গং প্রত্যঙ্গঞ্চ উচ্যতে। মাহাভাগ্যাদ্ একস্য দেবতাত্মনঃ প্রকৃতি-ভেদেন অপ্রকৃতিভেদেন চ চেতনাচেতনবিকারধর্ম্মিত্বাৎ আত্মানং বিকুর্ব্বতঃ। অস্য দেবস্য অন্যদেবাঃ প্রত্যঙ্গানি ভবন্তি। যথা অগ্নির্দেবো মুখ্যঃ জাতবেদাঃ বৈশ্বানরঃ ইত্যাদীনি প্রত্যঙ্গানি ভবন্তি। অপি চ সত্ত্বানাং অশ্বাদীনাং প্রকৃতি বহুত্বেন বিকারাঃ অপি প্রকৃতিতো বিভজ্যন্তে।

তে দেবাঃ ইতরেতরজন্মানঃ ভবন্তি ইতরেতরপ্রকৃতিশ্চ ভবন্তি মহৈশ্বর্য্যবত্বাৎ। তথাহি মনুষ্যাণাং মধ্যে পিতা পুত্রং জনয়তি ইত্যতঃ পিতা প্রকৃতিঃ, ন পুনঃ ইচ্ছন্ অপি পুত্রঃ পিতরং জনয়তি। দেবানাং তু অয়ং নিয়মো নাস্তি। তৎ যথা অগ্নেঃ সূর্য্যো অজায়ত সূর্য্যাচ্চাগ্নিঃ সায়ং জায়তে। তস্মাৎ অগ্নিঃ সূর্য্যস্য প্রকৃতিরূপঃ বিকৃতিরূপশ্চেতি। অতঃ কিমর্থং ঈশ্বরঃ সন্তো দেবাঃ জায়ন্তে ইতি জিজ্ঞাসায়ামাহ— তে দেবাঃ কর্ম্মজন্মনঃ। কর্ম্মনে জন্ম যেষাং তে কর্মজন্মনঃ, কর্মফলস্য স্বর্গাদেঃ সিদ্ধয়ে অগ্নিঃ বায়ুঃ সূর্য্যঃ জায়ন্তে। নহি অগ্নিবায়ুসূর্য্যান্ বিনা লোকস্য কর্মফলসিদ্ধিঃ স্যাৎ। কিঞ্চ তে দেবা আত্মজন্মনো ভবন্তি। সৃষ্টিকালে যস্মাত্রো দেবঃ ষোঢ়া আত্মানং বিভজ্য জগদ্ভাবং বিভর্ত্তি। তত্র আত্মৈব উপাদানকারণং নিমিত্তকারণঞ্চেতি বোদ্ধব্যম্। কিঞ্চ আত্মৈব এষাং দেবতানাং আয়ুধং ভবতি। আত্মা ঈশ্বরো ভবতি। সর্বমপি এতৎ জগৎ দ্যোতমানস্য দেবস্য আত্মনঃ স্বরূপমেব। তস্মাৎ একস্যা দেবতায়াঃ মহৈশ্বর্য্যবত্বাৎ বহূনি নামধেয়ানি ভবন্তি। অতএব যৎ কামঋষির্যস্যাং দেবতায়ামার্থপত্যমিচ্ছন্ স্তুতিং প্রযুঙ্‌ক্তে স মন্ত্রো তদ্দৈবতকো ভবতি ইতি যৎ পূর্ব্বম্ উক্তং তৎ সমঞ্জসং ভবতি।

# কঠোপনিষদ্

যমনচিকেতঃ সংবাদে নচিকেতসা প্রার্থিতস্য তৃতীয়বরস্য স্বরূপমুল্লিখ্য সতাৎপর্য্যং বিশদীক্রিয়তাম্।

Or,

Discuss the Nature and Significance of the boon referred to in the following text:—

"যোঽয়ং বরো গূঢ়মনুপ্রবিষ্টো নান্যং তস্মান্নচিকেতা বৃণীতে।"

বাজশ্রবসঃ ঋষেঃ নচিকেতা নাম তরুণঃ পুত্রঃ কদাচিৎ বিশ্বজিন্নামকে যজ্ঞে দক্ষিণাদানরতং পিতরং 'কস্মৈ ঋত্বিজে মাং দাস্যসি' ইতি পরীপৃচ্ছামানঃ ক্রোধবশগেন পিত্রা 'মৃত্যবে বৈবস্বতায় ত্বং প্রদত্ত' ইত্যভিহিতোঽভবৎ। তদনুসারেণ নচিকেতাঃ পিতৃবাক্যপালনায় যমসদনং গত্বা তত্র যমমপশ্যন্ দিনত্রয়মুপবাসেন তস্থৌ। ততঃ প্রবাসাদাগতঃ যমঃ ব্রাহ্মণোঽতিথিঃ গৃহমাগতঃ অনাদৃতঃ সন্ গৃহিণাম্ অকল্যাণং সাধয়তীতি চিন্তয়ন্ নচিকেতসমুপগম্য পূজাপুরঃসরং তস্মৈ ত্রীন্ বরান্ প্রদাতুমৈচ্ছৎ। ততঃ নচিকেতাঃ যমসকাশে আদ্যেন বরেণ পিতুঃ পরিতোষণং দ্বিতীয়েন চ স্বর্গ্যাগ্নিস্বরূপজ্ঞানং প্রার্থিতবান্। তৃতীয়বরেণ চ পরলোকতত্ত্বং জিজ্ঞাসুঃ নচিকেতাঃ যমমাহ—

যেয়ং প্রেতে বিচিকিৎসা মনুষ্যে অস্তীত্যেকে নায়মস্তীতি চৈকে।
এতদ্বিদ্যাম্ অনুশিষ্টস্ত্বয়াহং বরাণামেষ বরস্তৃতীয়ঃ॥

যমস্তু দেবৈরপি বিচিকিৎসিতম্ আত্মতত্ত্বং কিং নচিকেতাঃ জ্ঞাতুমর্হতি ইত্যেতৎপরীক্ষার্থং নচিকেতসং প্রলোভয়ন্ তস্মৈ প্রভূতং হিরণ্যরত্নাদি, দীর্ঘজীবনং বিস্তীর্ণসাম্রাজ্যম্ ইত্যাদীনি দিব্যানি মানুষাণি চ কাম্যবস্তূনি

প্রদাতুম্ ঐচ্ছৎ। দৃঢ়নিশ্চয়ঃ নচিকেতাস্তু যমেন এবং প্রলোভ্যমানোঽপি মহাহ্রদবদক্ষোভ্য অনিত্যফলত্বাদন্যৎ সর্বং প্রত্যাখ্যায় পূর্বপ্রার্থিতমেব বরং পুনরপি যাচিতবান্—

"যোঽয়ং বরো গূঢ়মনুপ্রবিষ্টো নান্যং তস্মান্নচিকেতা বৃণীতে"।

এবং পরীক্ষ্য নচিকেতসঃ বৈরাগ্যম্ আত্মবিদ্যাগ্রহণযোগ্যতাঞ্চ অনুভূয় আত্মতত্ত্বম্ উপদিদিক্ষুঃ যমঃ প্রথমং শ্রেয়ঃপ্রেয়সোঃ বিদ্যাবিদ্যয়োঃ গুণদোষৌ বর্ণিতবান্; শ্রেয়ো হি মোক্ষসাধকং প্রেয়শ্চ অভ্যুদয়দায়কম্। তাভ্যাং বিদ্যাবিদ্যাভ্যাং হি আত্মকর্ত্তব্যতয়া প্রযুজ্যতে সর্বঃ পুরুষঃ। শ্রেয় এব কেবলম্ আদদানস্য পুরুষস্য শিবং ভবতি, যস্তু প্রেয়ো বৃণীতে স ভবপাশৈঃ এব বদ্ধো ভবতি। অতঃ যো বিবেকী স গুণাতিশয়ং দৃষ্ট্বা শ্রেয়ো গৃহ্লাতি; অবিবেকী তু আপাতরমণীয়ং প্রেয় এব গৃহ্লাতি। পরন্তু সহস্রেষু কশ্চিদেব এবং শ্রেয়োঽর্থী আত্মবিদ্ ভবতি, অন্যে তু অসংস্কৃতাত্মানঃ শৃণ্বন্তোঽপি তম্ আত্মানং ন বিজানন্তি। অস্য বক্তাঽপি অনেকেষু কশ্চিদেব আশ্চর্যঃ ভবতি। শ্রুত্বাঽপি অনেকেষু কশ্চিদেব কুশলঃ অস্য আত্মনঃ লব্ধা ভবতি, লব্ধ্বাঽপি কশ্চিদেব অস্য বোদ্ধা জায়তে ইতি দুর্জ্ঞেয়ং দুর্লভং চ আত্মতত্ত্বম্। প্রাকৃতবুদ্ধিনা আচার্যেণ ব্যাখ্যাতোঽপি অয়মাত্মা অস্তি নাস্তি কর্ত্তা অকর্ত্তা ইত্যাদ্যনেকপ্রকারেণ প্রতীয়মানো ন সুবিজ্ঞেয়ো ভবতি। কেবলম্ অপৃথগ্দর্শিনা আচার্যেণ প্রতিপাদ্য-ব্রহ্মাত্মভূতেন প্রোক্তে সতি অয়মণীয়ান্ অতর্ক্যঃ আত্মা জ্ঞানবিষয়ীভূতঃ জায়তে। অয়ং হি আত্মা অতিসূক্ষ্মত্বাৎ দুর্দর্শঃ, অনভিব্যক্তস্বরূপত্বাৎ গূঢ়ঃ, প্রেরকতয়া জগদন্তঃ প্রবিষ্টঃ, বুদ্ধিগম্যঃ। রাগদ্বেষাদ্যনর্থসংকুলে দেহে স্থিতশ্চ। সনাতনং স্বপ্রকাশঞ্চ তম্ আত্মানম্ আত্মবিষয়কসমাধিযোগেন বিজানন্ ধীরঃ জনঃ হর্ষশোকাদিময়াৎ সংসারান্মুচ্যতে—

তং দুর্দর্শং গূঢ়মনুপ্রবিষ্টং
গুহাহিতং গহ্বরেষ্ঠং পুরাণম্।
অধ্যাত্মযোগাধিগমেন দেবং
মত্বা ধীরো হর্ষশোকৌ জহাতি ॥

তথা চ ইদম্ আত্মতত্ত্বং শরীরাদেঃ জড়বর্গাৎ পৃথগ্‌ভূতং, শাস্ত্রোক্ত-ধর্মাধর্মাতীতং কার্যকারণবিলক্ষণং কালত্রয়ব্যতিরিক্তঞ্চ। সর্বে বেদাঃ তৎ তত্ত্বম্ অবিরোধেন প্রতিপাদয়ন্তি, তপাংসি সর্বাণি তৎপ্রাপ্তয়ে বিহিতানি. তৎপ্রাপ্ত্যর্থমেব ব্রহ্মচর্যম্ অনুষ্ঠীয়তে। তদেতৎ তত্ত্বম্ ওম্-শব্দবাচ্যম্ ওম্-প্রতীকঞ্চ। এতৎ ওঙ্কাররূপমক্ষরং পরমাত্মাখ্যং ব্রহ্ম এব। ততঃ আত্মনঃ স্বরূপমুচ্যতে—

ন জায়তে ম্রিয়তে বা বিপশ্চি-
ন্নায়ং কুতশ্চিন্ন বভূব কশ্চিৎ।
অজো নিত্যঃ শাশ্বতোঽয়ং পুরাণো
ন হন্যতে হন্যমানে শরীরে॥ ইতি।

আত্মা খলু স্বরূপতঃ সর্ববিকাররহিতঃ; নায়ম্ উৎপদ্যতে বিনশ্যতে বা। ন হ্যয়ং কুতশ্চিৎ কারণান্তরাৎ বভূব, ন বা আত্মনঃ বভূব কশ্চিদর্থান্তরভূতঃ। অতোঽয়ম্ অজো নিত্যঃ শাশ্বতঃ সদাতনশ্চ। শরীরধ্বংসে জাতেঽপি আত্মনো বিনাশো নাস্তি। অণোরপি অণীয়ান্ তথা আকাশাদেরপি মহীয়ান্ অয়মাত্মা ব্রহ্মাদিস্তম্বপর্যন্তস্য প্রাণিজাতস্য হৃদয়ে নিয়তং স্থিতঃ, বীতরাগস্য পুরুষস্যৈব নির্মলে মনসি আত্মনঃ মহিমা প্রকাশিতো ভবতি। সর্বাত্মত্বাদয়মাত্মা বিরুদ্ধধর্মবান্, একত্রাব-স্থিতোঽপি সন্ দূরং ব্রজতি, শয়ানশ্চ সর্বতো যাতি। দেশতঃ কালতঃ গুণতশ্চ অপরিচ্ছিন্নঃ সর্বব্যাপী স্বয়ং শরীরনিমিত্তকবিকাররহিতশ্চ আত্মা অনিত্যেষু শরীরেষু তিষ্ঠতি। অয়ম্ আত্মা শাস্ত্রাধ্যয়নেন স্বকীয়প্রজ্ঞাবলেন বা ন জ্ঞেয়ো ভবতি, পরন্তু আত্মকামস্য সাধকস্য সমীপে আত্মা স্বকীয়ং যাথাত্ম্যং স্বয়মেব প্রকাশয়তি।

4. *শ্রেয়শ্চ প্রেয়শ্চ মনুষ্যমেত-*
*স্তৌ সম্পরীত্য বিবিনক্তি ধীরঃ।*
*শ্রেয়ো হি ধীরোঽভি প্রেয়সো বৃণীতে,*
*প্রেয়ো মন্দো যোগ-ক্ষেমাদ্ বৃণীতে॥*

কঠোপনিষদি প্রথমাধ্যায়ে দ্বিতীয়বল্ল্যন্তর্গতোঽয়ং মন্ত্রঃ। ব্রহ্ম-

বিদ্যাপ্রতিপাদনপরায়াম্ অস্যাম্ উপনিষদি উশন্ হ বৈ ইত্যাদিনা বিদ্যাস্তুত্যর্থা কাচিদাখ্যায়িকা উপনিবদ্ধা। তত্র পিতৃবাক্যপালনার্থং যমসদনং গত্বা নচিকেতাঃ যমেন কৃতাতিথ্যঃ সন্ যমসকাশে আত্মতত্ত্বং জ্ঞাতুমৈচ্ছৎ। যমস্তু পরীক্ষ্য নচিকেতসঃ বৈরাগ্যম্ আত্মবিদ্যাগ্রহণ-যোগ্যতাঞ্চ অনুভূয় আত্মতত্ত্বম্ উপদিদিক্ষুঃ প্রথমং শ্রেয়ঃপ্রেয়সোঃ বিদ্যাবিদ্যয়োঃ গুণদোষৌ বর্ণয়ন্ অনন্তরং বিদ্বদবিদুষোঃ শ্রেয়ঃপ্রেয়-গ্রহণপ্রভেদমাহ অনেন মন্ত্রেণ—শ্রেয়শ্চ প্রেয়শ্চেতি।

শ্রেয়ঃ ব্রহ্মজ্ঞানং প্রেয়শ্চ প্রিয়তমং দারাপত্যাদিকাম্যমানং বস্তু; স্বরূপতঃ ফলতশ্চ তয়োরুভয়োর্মহদন্তরমস্তি। বিদ্যাবিদ্যারূপত্বাত্তয়োঃ বিরুদ্ধতয়া অন্যতরাপরিত্যাগেন একেন পুরুষেণ সহানুষ্ঠাতুমশক্যত্বং তয়োঃ। তত্র যঃ পুরুষো ব্রহ্মবিদ্যামুপাস্তে তস্য সংসারবন্ধনমোচন-রূপফললাভো ভবতি, যস্তু অদূরদর্শী প্রেয়ো বৃণীতে স পারমার্থিকাৎ পুরুষার্থাৎ বিযুজ্যতে। এতে দ্বেঽপি পুরুষেণ কর্তুং স্বায়ত্তে, তথাপি জনঃ প্রেয় এব বাহুল্যেন আদত্তে। তত্র চ কারণং তেষামবিবেকিত্বম্। তে শ্রেয়ঃপ্রেয়সী যদা পুরুষসকাশে প্রাপ্নুতস্তদা ধীমান খলু হংসঃ যথা অম্ভসঃ পয়ঃ আদত্তে তদ্বদেব শ্রেয়ঃপ্রেয়ঃশব্দিতৌ বিদ্যাবিদ্যারূপৌ সম্যক্ পর্যালোচ্য শ্রেয়ঃ মোচকম্ প্রেয়ঃ বন্ধকমিতি নিশ্চনোতি। এবং বিবিচ্য চ প্রেয়সোঽভ্যর্হিতত্বাৎ শ্রেয়সঃ প্রিয়তমান্ দারাপত্যাদিকামান্ অবজ্ঞায় ব্রহ্মবিদ্যামেব বৃণীতে। যস্তু অল্পবুদ্ধিঃ স সদসদ্বিবেকসামর্থ্যাৎ যোগক্ষেমনিমিত্তং ধনপুত্রাদিলক্ষণং প্রেয় এব বৃণীতে। যোগঃ খলু অপ্রাপ্তকামপ্রাপ্তিঃ, ক্ষেমশ্চ প্রাপ্তস্য পরিরক্ষণম্। অবিবেকী আপাত-রমণীয়ং দৃষ্ট্বা এতদুভয়নিমিত্তং প্রেয় এব গৃহ্নাতি। বিবেকী তু গুণাতিশয়হেতোঃ শ্রেয়ো গৃহ্নাতি।

2. ***ন সাম্পরায়ঃ প্রতিভাতি বালং***
***প্রমাদ্যন্তং বিত্তমোহেন মূঢ়ম্।***
***অয়ং লোকো নাস্তি পর ইতি মানী***
***পুনঃ পুনর্বশমাপদ্যতে মে ॥***

কঠোপনিষদি প্রথমাধ্যায়ে দ্বিতীয়বল্ল্যন্তর্গতোঽয়ং মন্ত্রঃ। ব্রহ্ম-

বিদ্যাপ্রতিপাদনপরায়াম্ অস্যাম্ উপনিষদি উশন্ হ বৈ ইত্যাদিনা বিদ্যাস্তুত্যর্থা কাচিদাখ্যায়িকা উপনিবদ্ধা। তত্র পিতৃবাক্যপালনার্থং যমসদনং গত্বা নচিকেতাঃ যমেন কৃতাতিথ্যঃ সন্ যমসকাশে আত্মতত্ত্বং জ্ঞাতুমৈচ্ছৎ। যমস্তু পরীক্ষ্য নচিকেতসঃ বৈরাগ্যম্ আত্মবিদ্যাগ্রহণ-যোগ্যতাঞ্চ অনুভূয় আত্মতত্ত্বম্ উপদিদিক্ষুঃ প্রথমং শ্রেয়ঃপ্রেয়সোঃ বিদ্যাবিদ্যয়োঃ গুণদোষৌ বর্ণয়ন্ ফলপ্রদর্শনেন প্রেয়সঃ নিন্দাং করোতি অনেন মন্ত্রেণ—ন সাম্পরায় ইতি।

অবিদ্যাপরপর্য্যায়প্রেয়ঃ অভিলষন্ মানবঃ কদাপি অস্মাৎ পার্থিব-লোকাৎ মুক্তিং ন লভতে। অন্ধেন নীয়মানা অন্ধা যথা মার্গভ্রষ্টাঃ পরিতঃ কেবলং পরিভ্রমন্তি তথৈব অবিদ্যায়ামন্তরে বর্তমানাঃ কামভোগেন মোহিতাঃ মূঢ়াঃ জনা জন্মান্তরেষু আবর্ত্তন্তে। মূঢ়ত্বাৎ সাম্পরায়স্তৎ সমীপে ন প্রতিভাতি। সম্ সম্যক্ পরা পরাক্‌কালে দেহপাতাদূর্দ্ধমেব ঈয়তে গম্যতে ইতি সম্পরায়ঃ পরলোকঃ। তৎপ্রাপ্তিপ্রয়োজনঃ সাধন-বিশেষঃ শাস্ত্রীয়ঃ সাম্পরায়ঃ। স চ অবিবেকিনঃ সমীপে ন প্রকাশতে। অবিবেকী জনো হি বিত্তমোহেন সমাচ্ছন্নঃ সন্ শ্রেয়ঃপ্রাপ্তিবিষয়ে অনবধানো বর্ত্ততে। জ্ঞানালোকরহিতস্য তস্য জনস্য পরমজ্ঞানং প্রতীতি-বিষয়ীভূতং ন ভবতি। এবংবিধো জনো হি যোঽয়ং দৃশ্যমানঃ স্ত্র্যন্ন-পানাদিবিশিষ্টঃ পার্থিবলোক এব নিত্যঃ, আমুষ্মিকঃ স্বর্গাদিলোকশ্চ কোঽপি নাস্তি ইত্যেবং মন্বানঃ পুনঃ পুনরত্র জায়তে যমযাতনামনুভবন্ চ মৃত্যুবরণং করোতি। জননমরণাদিলক্ষণদুঃখপ্রবন্ধারূঢ়া এব ভবন্তি এবং-বিধা অবিবেকিনঃ জনা ইতি সরলার্থঃ। প্রায়েণ হি এবংবিধ এব লোকঃ।

(3) ***তং দুর্দ্দর্শং গূঢ়মনুপ্রবিষ্টং***
***গুহাহিতং গহ্বরেষ্ঠং পুরাণম্।***
***অধ্যাত্ম-যোগাধিগমেন দেবং***
***মত্বা ধীরো হর্ষশোকৌ জহাতি॥***

কঠোপনিষদি প্রথমাধ্যায়ে দ্বিতীয়বল্ল্যন্তর্গতোঽয়ং মন্ত্রঃ। ব্রহ্মবিদ্যা-প্রতিপাদনপরায়াম্ অস্যাম্ উপনিষদি উশন্ হ বৈ ইত্যাদিনা বিদ্যাস্তুত্যর্থা

কাচিদাখ্যায়িকা উপনিবদ্ধা। তত্র পিতৃবাক্যপালনার্থং যমসদনং গত্বা নচিকেতাঃ যমেন কৃতাতিথ্যঃ সন্ যমসকাশে আত্মতত্ত্বং জ্ঞাতুমৈচ্ছৎ। যমস্তু পরীক্ষ্য নচিকেতসঃ বৈরাগ্যম্ আত্মবিদ্যাগ্রহণযোগ্যতাঞ্চ অনুভূয় আত্মতত্ত্বম্ উপদিদিক্ষুঃ প্রথমং শ্রেয়ঃপ্রেয়সোঃ বিদ্যাবিদ্যয়োঃ গুণদোষৌ বর্ণয়ন্ অনন্তরং দেহব্যতিরিক্তাত্মদর্শিনঃ ফলকথনেন প্রশংসতি—তং দুর্দ্দর্শমিতি।

যম্ আত্মানং নচিকেতাঃ জ্ঞাতুমিচ্ছতি। যন্নিমিত্তং ধনপুত্রাদিকং সর্বং কাম্যবস্তু তেন অবজ্ঞায়তে তস্য আত্মনঃ স্বরূপজ্ঞানং নহি আয়াসসাধ্য। স আত্মা দুর্দ্দর্শঃ অতিসূক্ষ্মত্বাৎ প্রযত্নাতিশয়েন জ্ঞাতুং শক্যঃ। স অনভিব্যক্তস্বরূপঃ প্রেরকতয়া সর্বজগদন্তঃপ্রবিষ্টশ্চ। অপি চ তৎ আত্মতত্ত্বং গুহাহিতং গুহায়াং প্রাণিবুদ্ধৌ আহিতং সংস্থিতম্। তত্রোপলভ্যমানত্বাৎ। তচ্চ গহ্বরেষ্ঠং গহ্বরে রাগদ্বেষাদ্যনর্থসংকুলে দেহে তিষ্ঠতীতি। যতোঽসৌ আত্মা গূঢ়মনুপ্রবিষ্টঃ গুহাহিতশ্চ অতোঽসৌ গহ্বরেষ্ঠঃ, অতো দুর্দ্দর্শঃ। অত্র গূঢ়ত্বমনুপ্রবিষ্টত্বং গুহাহিতত্বঞ্চ গহ্বরেষ্ঠত্বে হেতুঃ, তচ্চ দুর্দ্দর্শত্বে হেতুরিতি জ্ঞেয়ম্। এবংস্বরূপঃ সনাতনঃ স্বপ্রকাশঃ দ্যোতমানঃ আত্মা অধ্যাত্মযোগাধিগমেনৈব জ্ঞাতব্যঃ, নান্যথা। বিষয়েভ্যঃ চেতঃ প্রতিসংহৃত্য আত্মনি তস্য যৎ সমাধানম্ সোঽধ্যাত্মযোগঃ, তদাশ্রয়েণ ধীরো জনঃ আত্মানং বিজানাতি, জ্ঞাত্বা চ হর্ষশোকাদ্যনুভূতিবৈপরীত্যং বিজহাতি। আত্মন উৎকর্ষাপকর্ষয়োরভাবাৎ সুখদুঃখপ্রদায়কত্বমপি নাস্তি।

(4) *অণোরণীয়ান্ মহতো মহীয়ান্*
*আত্মাস্য জন্তোর্নিহিতো গুহায়াম্।*
*তমক্রতুঃ পশ্যতি বীতশোকো*
*ধাতুপ্রসাদান্মহিমানমাত্মনঃ॥*

কঠোপনিষদি দ্বিতীয়বল্ল্যন্তর্গতেঽস্মিন্ মন্ত্রে আত্মস্বরূপবর্ণনপ্রসঙ্গেন বিপশ্চিতঃ জনস্য আত্মদর্শনপ্রকারং কথয়তি—অণোরণীয়ান্

ইতি। আত্মতত্ত্বং খলু অতীব দুর্জ্ঞেয়ম্, যতোঽয়মাত্মা পরমাণুপ্রভৃতেঃ সূক্ষ্মপদার্থাৎ সূক্ষ্মতরঃ, তথা মহতঃ আকাশাদেরপি মহৎপরিমাণাৎ অয়ং মহত্তরঃ সর্বনামরূপবস্তূপাধিকত্বাৎ। স চাত্মা অস্য জন্তোঃ ব্রহ্মাদিস্তম্বপর্যন্তস্য সর্বস্য প্রাণিজাতস্য গুহায়াং হৃদয়ে নিহিতঃ নিয়তং আত্মভূতঃ স্থিতঃ ইত্যর্থঃ। সর্বস্মিন্ নিহিতোঽপি অয়মাত্মা সর্বৈঃ প্রাণিভিঃ ন দ্রষ্টুং শক্যতে। যস্তু অক্রতুঃ অকামঃ, নাস্তি ক্রতুঃ সঙ্কল্পঃ কামনা যস্য সঃ, দৃষ্টাদৃষ্টবাহ্যবিষয়েভ্যঃ উপরতবুদ্ধিরিত্যর্থঃ স এব ধাতুপ্রসাদাৎ মনআদিকরণাদি ধাতবঃ, এষাং ধাতূনাং প্রসাদাৎ নৈর্মল্যাৎ বীতশোকঃ বিগতদুঃখশ্চ সন্ চিত্তনৈর্মল্যাৎ অয়মহমস্মি ইতি আত্মনঃ মহিমানং বিজানন্ বিগতশোকো ভূত্বা আত্মনে মহিমানং কর্মনিমিত্তবৃদ্ধিক্ষয়রহিতং পশ্যতি সাক্ষাৎ করোতি ইত্যর্থঃ॥ বিমলে দর্পণে যথা প্রতিবিম্বং দৃশ্যতে এবং প্রসন্নে চিত্তে এব আত্মতত্ত্বমুপলভ্যতে ইতি যাবৎ॥

5. ***নায়মাত্মা প্রবচনেন লভ্যো***
***ন মেধয়া ন বহুনা শ্রুতেন।***
***যমেবৈষ বৃণুতে তেন লভ্য-***
***স্তস্যৈষ আত্মা বিবৃণুতে তনুংস্বাম্॥***

কঠোপনিষদি দ্বিতীয়বল্ল্যন্তর্গতেঽস্মিন্ মন্ত্রে আত্মনো দুর্বিজ্ঞেয়ত্বেঽপি সুবিজ্ঞানোপায়মাহ—নায়মিতি।

অয়মাত্মা প্রবচনেন শাস্ত্রাধ্যয়নেন ব্যাখ্যানেন বা ন লভ্যঃ জ্ঞেয়ঃ ভবতি। নাপি মেধয়া স্বকীয়প্রজ্ঞাবলেন ন বা বহুনা শ্রুতেন শাস্ত্রশ্রবণেন লভ্যঃ ভবতি। তর্হি আত্মা কেন লভ্যঃ ইতি প্রশ্নে উত্তরমপি দীয়তে—এষঃ মুমুক্ষুঃ সাধকঃ যমেব স্বস্বরূপম্ আত্মানং বৃণুতে প্রাপ্যতয়া প্রার্থয়তে তেনৈবাত্মনা বরিত্রা স্বয়মাত্মা লভ্যো জ্ঞায়ত ইত্যেতৎ। নিষ্কামশ্চাত্মানমেব প্রার্থয়তে; আত্মনৈবাত্মা

লভ্যত ইত্যর্থঃ। অথবা এষঃ ঈশ্বরঃ ভক্ত্যারাধিতঃ সন্ যম্ এব সেবকং বৃণুতে আত্মদর্শনায় যস্মৈ প্রসীদতীতি যাবৎ তেনৈব বৃতেনৈব লভ্যঃ দর্শনীয়ঃ ভবতি। যত এষ, আত্মা স্বাং স্বকীয়াং পারমার্থিকীং তনূং মূর্ত্তিং স্বকীয়ং যাথাত্ম্যমিত্যর্থঃ তস্য সাধকস্য সমীপে বিবৃণুতে প্রকাশয়তি।

6. *ঋতং পিবন্তৌ সুকৃতস্য লোকে*
*গুহাং প্রবিষ্টৌ পরমে পরার্দ্ধে।*
*ছায়াতপৌ ব্রহ্মবিদো বদন্তি*
*পঞ্চাগ্নয়ো যে চ ত্রিণাচিকেতাঃ ॥*

কঠোপনিষদি তৃতীয়বল্ল্যন্তর্গতোঽয়ং মন্ত্রঃ। ইতঃ প্রাক্ আত্ম-স্বরূপং বর্ণয়ন্ অধুনা প্রাপ্যপ্রাপকবিবেকার্থং পরমাত্ম-জীবাত্মনোঃ স্বরূপভেদমাহ ঋতং পিবন্তৌ ইতি।

লোকে অস্মিন্ শরীরে সুকৃতস্য কর্মণঃ ঋতম্ অবশ্যম্ভাবিত্বাৎ সত্যং ফলম্ সুখদুঃখাদিকম্ পিবন্তৌ ভুঞ্জানৌ; যদ্যপি একস্তত্র কর্মফলং পিবতি ভুঙ্‌ক্তে নেতরঃ, তথাপি পাতৃসম্বন্ধাৎ পিবন্তৌ ইত্যুচ্যেতে ছত্রিন্যায়েন। গুহাং গুহায়াং বুদ্ধৌ প্রবিষ্টৌ পরমে বাহ্যাকাশাপেক্ষয়া উৎকৃষ্টে পরার্দ্ধে পরস্য ব্রহ্মণোঽর্দ্ধং স্থানং পরার্দ্ধং হৃদয়াকাশে, তত্র হি পরং ব্রহ্ম উপলভ্যতে। ততঃ তস্মিন পরমে পরার্দ্ধে হার্দ্দাকাশে প্রবিষ্টৌ ইত্যর্থঃ। তৌ চ দ্বৌ আত্মানৌ ছায়াতপাবিব বিলক্ষণৌ সংসারিত্বাসংসারিত্বেন ইতি ব্রহ্মবিদো বদন্তি কথয়ন্তি। ন কেবলমকর্মিণ এব বদন্তি; পরন্তু যে চ পঞ্চাগ্নয়ঃ গার্হপত্যাহবনীয়দক্ষিণাগ্নিসভ্যাবসথ্যাঃ পঞ্চ অগ্নয়ো যেষাং তে; দ্যুপর্জন্যপৃথিবীপুরুষস্ত্রীরূপ-পঞ্চাগ্নিবিদ্যানিষ্ঠা বা গৃহস্থাঃ, তথা ত্রিণাচিকেতাঃ ত্রিঃকৃত্বঃ নাচিকেতোঽগ্নিশ্চিতো যৈঃ তে ত্রিবারকৃতনাচিকেতাগ্নয়ঃ যে, তে চ বদন্তি। 'ব্রহ্মবিদঃ' ইত্যনেন জ্ঞানিনাম্, পঞ্চাগ্নয়ঃ

ইত্যনেন উপাসকানাম্। ত্রিণাচিকেতা ইত্যনেন কর্মিণাং বা পৃথগেব উদ্দেশঃ কৃত ইতি বোদ্ধব্যম্ ইতি। অত্র জীবঃ সাক্ষাৎ পিবতি, পরমাত্মা তু স্বয়ম্ অপিবন্ অপি জীবং পায়য়তি, অতঃ চ পান-প্রয়োজকস্যাপি তস্য কর্তৃত্বম্ উপযুজ্যতে ইত্যাশয়ঃ।

7. *আত্মানং রথিনং বিদ্ধি শরীরং রথমেব তু।*
*বুদ্ধিন্তু সারথিং বিদ্ধি মনঃ প্রগ্রহমেব চ॥*

কঠোপনিষদি প্রথমাধ্যায়ে তৃতীয়বল্ল্যন্তর্গতোঽয়ং মন্ত্রঃ। পিতৃবাক্য-পালনার্থং যমসদনং গত্বা নচিকেতাঃ যমেন কৃতাতিথ্যঃ সন্ যমসকাশে আত্মতত্ত্বং জ্ঞাতুমৈচ্ছৎ। যমস্তু পরীক্ষ্য নচিকেতসঃ বৈরাগ্যম্ আত্ম-বিদ্যাগ্রহণযোগ্যতাঞ্চ অনুভূয় আত্মতত্ত্বম্ উপদিদিক্ষুঃ প্রথমং বিদ্যাবিদ্যয়োঃ বিরুদ্ধফলত্বম্ উপন্যস্য অধুনা তৃতীয়বল্ল্যাং বিদ্যাবিদ্যাবশাৎ সংসার-মোক্ষলাভসাধনং শরীরং রথরূপককল্পনয়া আহ—আত্মানমিত্যাদিনা শ্লোকেন।

বিদ্যয়া মোক্ষঃ অবিদ্যয়া চ সংসারঃ গম্যতে, তত্র তদুভয়গমনে সাধনো রথঃ কল্প্যতে। শরীরঞ্চ স রথঃ। শরীরাধিষ্ঠাতা জীবাত্মা খলু রথস্বামী বোদ্ধব্যম্। রথবদ্ধহয়স্থানীয়ৈঃ ইন্দ্রিয়ৈঃ আকৃষ্যমাণত্বাৎ শরীরস্য রথকল্পনম্। নিশ্চযাত্মকম্ অন্তঃকরণম্ অস্য শরীরাত্মকরথস্য চালকঃ বুদ্ধিনেতৃপ্রধানত্বৎ শরীরস্য; সারথিনেতৃপ্রধান ইব চ রথঃ। আত্মনঃ রথস্বামিত্বেঽপি ন তস্য চালকত্বম্। বুদ্ধিপ্রভাবেন হি শরীর-রূপরথঃ কর্মসু নীযতে। সর্বং হি দেহগতং কার্যং বুদ্ধি কর্তব্যমেব প্রায়েণ। অপি চ রথচালনে অশ্বাদীনাং সংযমনার্থং রশনা গৃহ্যতে। দেহরথচালনে চ সংকল্পবিকল্পাদিলক্ষণং মনঃ প্রগ্রহত্বেন বোদ্ধব্যম্। মনসা হি প্রগৃহীতানি শ্রোত্রাদীনি করণানি প্রবর্তন্তে, যথা রশনয়া অশ্বাঃ।

৪. *ইন্দ্রিয়াণি হয়ানাহুর্বিষয়াংস্তেষু গোচরান্।*
*আত্মেন্দ্রিয়মনোযুক্তং ভোক্তেত্যাহুর্মনীষিণঃ॥*

কঠোপনিষদি প্রথমাধ্যায়ে তৃতীয়বল্ল্যন্তর্গতোঽয়ং মন্ত্রঃ। পিতৃবাক্য-

পালনার্থং যমসদনং গত্ব নচিকেতাঃ যমেন কৃতাতিথঃ সন্ যমসকাশে আত্মতত্ত্বং জ্ঞাতুমৈচ্ছৎ। যমস্তু পরীক্ষ্য নচিকেতসঃ বৈরাগ্যম্ আত্মবিদ্যাগ্রহণযোগ্যতাঞ্চ অনুভূয় আত্মতত্ত্বম্ উপদিদিক্ষুঃ প্রথমং বিদ্যাবিদ্যয়োঃ বিরুদ্ধফলত্বম্ উপন্যস্য অধুনা তৃতীযবল্ল্যাং বিদ্যাবিদ্যাবশাৎ সংসারমোক্ষসাধনং শরীরং রথরূপককল্পনয়া আহ—ইন্দ্রিযাণীত্যাদিনা।

বিবেকজ্ঞানসম্পন্নাঃ রথকল্পনাকুশলাশ্চ মনীষিণঃ জনাঃ চক্ষুকর্ণাদীনি ইন্দ্রিযাণি অশ্বতুল্যানি মন্যন্তে শরীববথাকর্ষণসামান্যাৎ। অশ্বৈঃ যথা রথাদয়ঃ বাহ্যন্তে ইন্দ্রিয়াণ্যপি তথা শরীরকার্যসম্পাদনেন শবীরং বহন্তি ইব ইত্যেতেষাং সাদৃশ্যম্। অশ্বাঃ খলু রথমাদায় মার্গেষু বিচরন্তি; ইন্দ্রিয়াশ্বানাঞ্চ রূপরসগন্ধস্পর্শশব্দাদযঃ বিষযভূতাঃ সঞ্চবণদেশস্থানীযাঃ। এতৈঃ শরীরেন্দ্রিযমনোভির্যুক্ত আত্মা চ অস্মিন্ সংসারে ভোক্তা সুখদুঃখানুভবকর্ত্তেতি বা কথ্যতে। আত্মা খলু শরীরেন্দ্রিয়মনোভিযুক্তোঽপি তেভ্যঃ পৃথগ্‌ভূতঃ। নহি কেবলস্য নিত্যশুদ্ধবুদ্ধচৈতন্যস্বভাবস্য আত্মনঃ ভোক্তৃত্বমস্তি। শরীরেন্দ্রিযমনোভির্যদা আত্মনঃ সংযোগো জায়তে তদৈব বুদ্ধাদ্যুপধিকৃতমেব তস্য ভোক্তৃত্বমায়াতি। শ্রুত্যন্তবেঽপি 'ধ্যায়তীব লেলায়তীব' ইত্যাদিনা কেবলস্য আত্মনো ভোক্তৃত্বরাহিত্যমেব প্রদর্শিতম্।

9. ***উত্তিষ্ঠত জাগ্রত প্রাপ্য বরান্ নিবোধত।***
***ক্ষুরস্য ধারা নিশিতা দুরত্যয়া দুর্গং পথস্তৎ***
***কবয়ো বদন্তি***

কঠোপনিষদি তৃতীয়বল্ল্যন্তর্গতে অস্মিন্ মন্ত্রে আত্মদর্শনোপায়ং দর্শয়ন্ মুমুক্ষূন্ প্রত্যুপদেশঃ দীয়তে—উত্তিষ্ঠত ইতি। হে মুমুক্ষবঃ সাধকাঃ, যূয়ম্ উত্তিষ্ঠত নানাবিধবিষয়চিন্তাং পরিত্যজ্য আত্মজ্ঞানোন্মুখা ভবত। জাগ্রত অজ্ঞানমোহনিদ্রাং সর্ব্বানর্থবীজভূতাং মুঞ্চত। বরান্ প্রকৃষ্টান্ আচার্যান্ তদ্বিদঃ প্রাপ্য উপগম্য তদুপদিষ্টং সর্ব্বান্তরমাত্মানম্ 'অয়মহমস্মি' ইতি নিবোধত অবগচ্ছত। তত্র সাবধানেন ভবিতব্যং ন হ্যুপেক্ষিতব্যমিত্যত আহ—ক্ষুরস্যেতি।

নিশিতা তীক্ষ্ণীকৃতা দুরত্যয়া দুঃখেন অত্যেতুম্ অতিক্রমিতুং শক্যা দৃঢ়তরসাধনং বিনা অত্যেতুমশক্যা ইত্যর্থঃ। ক্ষুরস্য কেশনিকৃন্তন-সাধনস্য ধারা প্রান্তভাগমিব দুর্গং দুর্গমং দুঃখেন গন্তুং শক্যমিতি যাবৎ তৎ তং পথঃ পন্থানং তত্ত্বজ্ঞানলক্ষণম্ কবয়ঃ ক্রান্তদর্শিনঃ বিবেকিন ইতি যাবৎ বদন্তি কথয়ন্তি। জ্ঞেয়স্যাতি-সূক্ষ্মত্বাৎ তদ্বিষয়স্য জ্ঞানমার্গস্য দুঃসম্পাদ্যত্বং বদন্তীত্যভিপ্রায়ঃ।

10. *পরাঞ্চি খানি ব্যতৃণৎ স্বয়ম্ভূ-*
*স্তস্মাৎ পরাঙ্ পশ্যতি নান্তরাত্মন্।*
*কশ্চিদ্ধীরঃ প্রত্যগাত্মানমৈক্ষ-*
*দাবৃত্ত চক্ষুরমৃতত্বমিচ্ছন্॥*

কঠোপনিষদি দ্বিতীয়েঽধ্যায়ে প্রথমবল্ল্যন্তর্গতোঽয়ং মন্ত্রঃ। ব্রহ্মবিদ্যা-প্রতিপাদনপরায়াম্ অস্যাম্ উপনিষদি 'উশন্ হ বৈ' ইত্যাদিনা বিদ্যা-স্তুত্যর্থা কাচিদাখ্যায়িকা উপনিবদ্ধা। তত্র আত্মবিদ্যাং শুশ্রূষমাণস্য নচিকেতসঃ তদ্বিদ্যাগ্রহণযোগ্যতাং পরীক্ষ্য তস্মৈ আত্মতত্ত্বোপদেশপ্রদান-কালে আত্মনো দুর্ধিগমত্বকারণং বক্তুমুপক্রমতে—পরাঞ্চীত্যাদিনা মন্ত্রেণ।

স্বয়ম্ভূঃ পরমেশ্বরঃ স্বয়মেব স্বতন্ত্রো ভবতি সর্বদা, ন পরতন্ত্র ইতি। খানি শ্রোত্রাদীনি ইন্দ্রিয়াণি খানি ইত্যুচ্যন্তে পরাঞ্চি পরাণি বাহ্যবস্তূনি অঞ্চন্তি গচ্ছন্তি ইতি পরাঙ্মুখানি। ইন্দ্রিয়াণি পরাঞ্চ্যেব শব্দাদিবিষয়প্রকাশনায় প্রবর্ত্তন্তে। যস্মাদেবং স্বভাবকানি তানি ব্যতৃণৎ হিংসিতবান্ হননং কৃতবান্ ইত্যর্থঃ। তস্মাৎ কারণাৎ জীবঃ পরাঙ্ বাহ্যান্ বিষয়ান্ অনাত্মভূতান্ শব্দাদীন্ পশ্যতি উপলভতে। ন অন্তরাত্মন্ অন্তরাত্মানং বাহ্যজ্ঞানকরণৈঃ ইন্দ্রিয়ৈঃ দ্রষ্টুমুপলব্ধুং বা ন শক্নোতি। এবংস্বভাবেঽপি সতি লোকস্য কশ্চিদেব ধীরো জ্ঞানী অমৃতত্বমিচ্ছন্ মুক্তিং কাময়মানঃ আবৃত্তচক্ষুঃ চক্ষুরিতি অন্যেষামিন্দ্রিয়াণাম্ উপলক্ষণম্। আবৃত্তং ব্যাবৃত্তং চক্ষুঃ শ্রোত্রাদিকমিন্দ্রিয়জাতম্ অশেষ-বিষয়াদ্ যস্য স আবৃত্তচক্ষুঃ বিষয়েভ্যঃ প্রত্যাহৃত সর্বেন্দ্রিয়ঃ সন্

প্রত্যগাত্মানং প্রত্যক্ চাসাবাত্মা চেতি প্রত্যগাত্মা তং স্বং স্বভাবং ব্রহ্মস্বরূপম্ আত্মানম্ ঐক্ষৎ ঐক্ষত সাক্ষাৎ পশ্যতীত্যর্থঃ।

11. *পরাচঃ কামাননুযন্তি বালা-*
*স্তে মৃত্যোর্যন্তি বিততস্য পাশম্।*
*অথ ধীরা অমৃতত্বং বিদিত্বা*
*ধ্রুবমধ্রুবেষ্বিহ ন প্রার্থয়ন্তে॥*

কঠোপনিষদি তৃতীয়ায়াং বল্ল্যাম্ আত্মনঃ দুরধিগমত্বকারণং বিবক্ষন্ অস্মিন্ মন্ত্রে আত্মতত্ত্বং জিজ্ঞাসুঃ জনঃ সর্ব্বথা অপ্রমাদী স্যাদিত্যাহ-পরাচঃ ইতি।

যে বালাঃ বালবৎ অবিবেকিনঃ অল্পপ্রজ্ঞা ইতি যাবৎ। পরাচঃ বাহ্যান্ কামান্ স্রক্-চন্দন-বনিতাদিকাম্যবিষয়ান্ অনুযন্তি অনুগচ্ছন্তি তে বিততস্য বিস্তীর্ণস্য সর্ব্বতো ব্যাপ্তস্য মৃত্যোঃ অবিদ্যাকামকর্মসমুদায়স্য পাশম্—পাশ্যতে বধ্যতে যেন তং পাশম্, বন্ধনম্—দেহেন্দ্রিয়াদিসংযোগ-বিয়োগলক্ষণম্ তৎকৃতজননমরণাদিক্লেশম্ ইত্যর্থঃ যন্তি প্রাপ্নুবন্তি। যত এবম্ অথ তস্মাৎ ধীরাঃ বিবেকিনঃ অমৃতত্বং মোক্ষম্ প্রত্যগাত্ম-স্বরূপাবস্থানলক্ষণম্ ধ্রুবং কূটস্থং বিদিত্বা। দেবাদ্যমৃতত্বং হ্যধ্রুবম্, ইদন্তু প্রত্যগাত্মস্বরূপাবস্থানলক্ষণং ধ্রুবম্ "ন কর্মণা বর্দ্ধতে, নো কনীয়ান্" ইতি শ্রুতেঃ। তদেবম্ভূতং কূটস্থম্ অবিচাল্যম্ অমৃতত্বং বিদিত্বা ইহ সংসারেঽনর্থপ্রায়ে অধ্রুবেষু সর্বপদার্থেষু অনিত্যেষু বিত্তাদিবিষয়েষু ন প্রার্থয়ন্তে কিঞ্চিদপি, প্রত্যগাত্মদর্শনপ্রতিকূলত্বাৎ। অমৃতস্বরূপং জ্ঞাত্বা বিবেকিনঃ প্রাজ্ঞাঃ পুত্র-বিত্ত-লোকৈষণাভ্যো ব্যুত্তিষ্ঠন্ত্যেবেত্যভিপ্রায়ঃ।

12. *হংসঃ শুচিষদ্বসুরন্তরিক্ষস-*
*দ্ধোতা বেদিষদতিথির্দুরোণসৎ।*
*নৃষদ্বরসদৃতসদ্ব্যোমসদব্জা গোজা ঋতজা*
*অদ্রিজা ঋতং বৃহৎ॥*

কাঠকোপনিষদি আত্মতত্ত্বপ্রতিপাদনাবসরে তস্যৈব আত্মনঃ সর্ব্ব-পুরসম্বন্ধিত্বমাহ অস্মিন্ মন্ত্রে—হংসঃ ইতি।

আত্মা নহি একপুরবর্ত্ত্যেব, কিন্তু সর্ব্বপুরবর্ত্তী। কথমিতি অয়ং মন্ত্রঃ প্রারভ্যতে। হংসঃ হন্তি গচ্ছতি সর্ব্বং ব্যাপ্নোতীতি হংসঃ পরমাত্মা সূর্যশ্চ। স এব শুচিষৎ শুচৌ দিবি আদিত্যাত্মনা সীদতি বসতীতি। স এব বসুঃ বাসয়তি সর্বমিতি বসুঃ সর্বলোকস্থিতিহেতুঃ। অন্তরিক্ষসৎ বায়্বাত্মনা অন্তরিক্ষে সীদতীতি অন্তরিক্ষগঃ ইত্যর্থঃ। হোতা অগ্নিঃ, 'অগ্নির্বৈ হোতা' ইতি শ্রুতেঃ। যদ্বা জুহোতি শব্দাদি-বিষয়ান্ অত্তি অনুভবতীতি-ইন্দ্রিয়াদিস্থঃ। বেদিষৎ বেদ্যাং পৃথিব্যাং পূজ্যতয়াস্তীতি বেদিষৎ। 'ইয়ং বেদিঃ পরোঽন্তঃ পৃথিব্যাঃ' ইতি মন্ত্রবর্ণাৎ। অতিথিঃ সোমঃ সন্ দুরোণসৎ দুরোণে সোমরসপাত্রে কলসে সীদতীতি দুরোণসৎ। নৃষৎ নৃষু মনুষ্যেষু সীদতীতি নৃষৎ বরসৎ বরেষু ব্রহ্মাদিদেবেষু সীদতীতি বরসৎ। ঋতসৎ ঋতং সত্যং যজ্ঞো বা, তস্মিন্ সীদতীতি ঋতসৎ। ব্যোমসৎ ব্যোম্নি আকাশে সীদতীতি ব্যোমসৎ। তথা অব্জা অপ্সু শঙ্খ-শুক্তিমকরাদিরূপেণ জায়ত ইতি অব্জাঃ। গোজাঃ গবি পৃথিব্যাং ব্রীহিযবাদিরূপেণ জায়ত ইতি গোজাঃ। ঋতজাঃ সত্যফলযজ্ঞাদিরূপেণ জায়ত ইতি ঋতজাঃ অদ্রিজাঃ অদ্রিভ্যো পর্বতেভ্যো নদ্যাদিরূপেণ জায়ত ইতি অদ্রিজাঃ সর্ব্বাত্মাপি সন্ ঋতম্ অবিতথস্বভাব এব। বৃহচ্চ মহান্ সর্বকারণাৎ অত্র পরমাত্মপক্ষে সূর্যপক্ষে চ সর্বাণি বিশেষণানি যথাসম্ভবং যোজ্যানি যদ্যপ্যাদিত্য এব মন্ত্রেণোচ্যতে, তদাপ্যস্যাত্মস্বরূপত্বমাদিত্যস্যাঙ্গীকৃতমিতি ব্রহ্মপরব্যাখ্যানেঽপ্যবিরোধঃ। সর্বথা এক এবাত্মা জগতো নাত্মভেদ ইতি মন্ত্রার্থঃ।

13 ***অগ্নির্যথৈকো ভুবনং প্রবিষ্টো***
***রূপং রূপং প্রতিরূপো বভূব।***
***একস্তথা সর্বভূতান্তরাত্মা***
***রূপং রূপং প্রতিরূপো বহিশ্চ॥***

কঠোপনিষদি দ্বিতীয়াধ্যায়ে দ্বিতীয়বল্ল্যান্তর্গতোঽয়ং মন্ত্রঃ। আত্ম-স্বরূপপ্রতিপাদনাবসরে দেহভেদেঽপি আত্মন একত্বং প্রতিপাদয়িতুমস্মি

শ্লোকে সদৃষ্টান্তমাহ—অগ্নিরিতি।

অগ্নির্যথা এক এব প্রকাশাত্মা সন্ ভুবনং ভবন্ত্যস্মিন্ ভূতানীতি ভুবনম্ অয়ং লোকঃ, তমিমং প্রবিষ্টোঽনুপ্রবিষ্টঃ সন্ রূপং রূপং প্রতি কাষ্ঠাদিদাহ্যভেদানুসারেণ ইত্যর্থঃ প্রতিরূপস্তত্র তত্র প্রতিরূপবান্ দাহ্যভেদেন বহুবিধো বভূব। তথা সর্বভূতান্তরাত্মা সর্ব্বেষাং ভূতানাম্ অভ্যন্তরস্থ আত্মা এক এব সন্ রূপং রূপম্ প্রতিদেহম্ অতিসূক্ষ্মত্বাৎ দার্বাদিম্বিব সর্বদেহং প্রতি প্রবিষ্টত্বাৎ প্রতিরূপঃ তত্তদ্‌দেহপাধ্যনুরূপঃ বভূবন্ অপি বহিশ্চ সর্ব্বভূতেভ্যঃ পৃথক্ এব, স্বয়মবিকৃত এব আকাশবৎ তিষ্ঠতীত্যাশয়ঃ।

√14. ***বায়ুর্যথৈক········ প্রতিরূপো বহিশ্চ।***

12 নং-এর অনুরূপ; কেবল অগ্নিস্থানে বায়ু লিখিতে হইবে।

15 ***ন তত্র সূর্যো ভাতি ন চন্দ্রতারকং***
***নেমা বিদ্যুতো ভান্তি কুতোঽয়মগ্নিঃ।***
***তমেব ভান্তমনুভাতি সর্বং***
***তস্য ভাসা সর্বমিদং বিভাতি॥***

কাঠকোপনিষদি দ্বিতীয়াধ্যায়ে দ্বিতীয়বল্ল্যাং বর্ত্ততেঽয়ং মন্ত্রঃ। আত্মরূপপ্রতিপাদনাবসরে অস্মিন্ মন্ত্রে অনির্দেশ্যস্বরূপস্য আত্মবিজ্ঞানখস্য অপরপ্রকাশ্যত্বমাহ—ন তত্রেতি।

তত্র তস্মিন্ স্বপ্রকাশানন্দস্বরূপে আত্মনি সূর্যঃ সর্ব্বাবভাসকোঽপি ভাতি ন প্রকাশয়তি, তদ্ ব্রহ্ম ন প্রকাশয়তীত্যর্থঃ। তথা চন্দ্রতারকং চন্দ্রঃ তারকাসঙ্ঘশ্চ ইমাঃ দৃশ্যমানা বিদ্যুতঃ ন ভান্তি, কুতোঽয়ম্ অস্মদ্দৃষ্টিগোচরোঽগ্নিঃ। কিং বহুনা, যদিদমাদিত্যাদিকং সর্ব্বং ভাতি, তৎ তমেব পরমেশ্বরং ভান্তং দীপ্যমানম্ অনুভাতি অনুদীপ্যতে। যথা লোল্মুকাদি অগ্নিসংযোগাদগ্নিং দহন্তমনুদহতি, ন স্বতঃ তদ্বৎ তস্যৈব ভাসা দীপ্ত্যা সর্ব্বমিদং সূর্যাদি বিভাতি। যত এবং তদেব ব্রহ্ম

সূর্যাদিজ্যোতিঃস্বরূপেণ ভাতি চ বিভাতি চ। কার্যগতেন বিবিধে ভাসা তস্য ব্রহ্মণো ভারূপত্বং স্বতোঽবগম্যতে। ন হি স্বতো বিদ্যমান ভাসনমন্যস্য কর্তুং শক্যম্।

16 ঊর্দ্ধমূলোঽবাক্‌শাখ এষোঽশ্বত্থঃ সনাতনঃ।
তদেব শুক্রং তদ্‌ব্রহ্ম তদেবামৃতমুচ্যতে।
তস্মিঁল্লোকাঃ শ্রিতাঃ সর্ব্বে তদু নাত্যেতি কশ্চন
এতদ্বৈ তৎ॥

কাঠকোপনিষদি দ্বিতীয়াধ্যায়ে তৃতীয়বল্ল্যাম্ অন্তর্ভূতোঽয়ং মন্ত্রঃ আত্মতত্ত্বপ্রতিপাদনাবসরে সংসারকার্যবৃক্ষাবধারণেন তন্মূলং ব্রহ্ম প্রস্তৌ ঊর্দ্ধমূল ইত্যাদিনা।

এষঃ অশ্বত্থঃ শ্বঃ আগামিনি দিবসেঽপি ন স্থাতা ইতি অশ্বত্থ তদাখ্যঃ বৃক্ষঃ, অত্র অব্যক্তাদিস্থাবরান্তঃ সংসারবৃক্ষ ইত্যর্থঃ। বৃক্ষ ব্রশ্চনাৎ বিনশ্বরত্বাৎ। ঊর্দ্ধমূলঃ ঊর্দ্ধং সর্ব্বোচ্চতমং ব্রহ্ম মূ (আদিকারণম্) যস্য সঃ ঊর্দ্ধমূলঃ অবাক্‌শাখঃ অবাঞ্চঃ অধোবর্ত্তিঃ শাখাঃ দেবাসুরমনুষ্যাদিরূপঃ বিস্তারঃ যস্য সঃ। সনাতনঃ অনা ত্বাচ্চিরপ্রবৃত্তঃ। যদস্য সংসারবৃক্ষস্য মূলম্, তদেব শুক্রং শুভ্রং শু জ্যোতিষ্মৎ চৈতন্যাত্মজ্যোতিঃস্বভাবম্। তদেব ব্রহ্ম সর্বমহত্ত্বাৎ, তদে মৃতম্ অবিনাশস্বভাবম্ উচ্যতে কথ্যতে সত্যত্বাৎ। তস্মিন্ পরম সত্যে ব্রহ্মণি লোকা মায়াসদৃশাঃ পরমার্থদর্শনাভাবাবগম্যমানাঃ শ্রি আশ্রিতাঃ সর্ব্বে সমস্তা উৎপত্তিস্থিতিলয়েষু; তদু তদ্‌ব্রহ্ম নাত্যে নাতিবর্ত্ততে মৃদাদিকমিব ঘটাদিকার্যং কশ্চন কশ্চিদপি বিকারঃ এতদ তৎ॥

# শুদ্ধিপত্র

Press-এর দারুণ ত্রুটির জন্য বইখানির মধ্যে যে সকল ভুল ধরা পড়িয়াছে তাহা যথাসাধ্য ভাবে শুদ্ধিপত্রে সংশোধন করা হইল। ছাত্র-ছাত্রীরা যেন শুদ্ধি-পত্রের দিকে বিশেষ লক্ষ্য রাখেন।

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| Contents | শেষ লাইন | Kathapanisada | Kathopanisad |
| ১ | ১৬ | ব্রহুব্রীহি | বহুব্রীহি |
| ২ | ২২ | চেতন্য | চেতান্য |
| ২ | ৮ | দাশ্বাংশং | দাশ্বাংসং |
| ৩ | ৬ | সোম | সোমঃ |
| ৩ | ২৪ | সমীপ | সমীপং |
| ৪ | ১৩ | সামর্থে্নো | সামর্থ্যেনো |
| ৪ | ২২ | বর্ধয়িতা | বর্ধয়িতা |
| ৫ | ৯ | সম্বুদ্ধ্যাস্তানি | সম্বুদ্ধ্যাস্তানি |
| ৫ | ২৫ | চ | Omit |
| ৮ | ১০ | ত্বমাস্মিন্ | ত্বমস্মিন্ |
| ৯ | ৪ | তদয়ে | তদাগ্নয়ে |
| ১০ | ৭ | মতুপোবত্বম্ | মতুপো বত্বম্ |
| ১০ | ২৩ | ত্যাপ্রিয় | ত্বাপ্রিয় |
| ১০ | ২৪ | র্গস্তাং | র্গ্যস্তাং |
| ১১ | ৭ | কৃত্ব | কৃত্ব্ |
| ১১ | ১৫ | আস্মান | অস্মান |
| ১২ | ৫ | স্তুতবা | স্তুতবান্ |
| ১২ | ৮ | তস্যাম দ্বযয়কং | তস্য মদ্বিষয়কং |
| ১৪ | ১৪ | স্নিজন্তাং | স্নিগ্ধস্তাং |
| ১৫ | ৫ | হুব্বাস্তোঽয় | হুব্বাস্তোঽয়ং |
| ১৫ | ১১ | ছান্দাসো | ছান্দসো |

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| ১৫ | ১০ | ঈকারসা | ঈকাবসা |
| ১৫ | ২০ | আম্ভিহসেবস্তুক | আড্জ.সবস্তুক |
| ১৬ | ৯ | স্ত্বাং | স্ত্বং |
| ১৮ | ১২ | প্রসংস্তুম | প্রসরস্তুম |
| ১৯ | ৫ | অকাবান্তং | আকারান্তং |
| ২১ | ৪ | বৃত্তাসুরেণ | বৃত্রাসুরেণ |
| ২১ | ৬ | স্বকীয়াবশ্মি | স্বকীয়রশ্মি |
| ২১ | ২২ | বাজ্রিণো | বজ্রিণো |
| ২২ | ২৩ | সানাসঃ | সমাসঃ |
| ২৩ | ৫ | স্বয়মেক | স্বয়মেকঃ |
| ২৪ | শেষ লাইন | অর্শাদিভাদচ | অর্শাদিভ্যদচ |
| ২৫ | ২০ | সুতবান্ | সুতবান্ |
| ২৫ | ২১ | সুননা | সুনৃতা |
| ২৭ | ২১ | মন্দ্রো | মন্দ্রো |
| ২৯ | ১৭ | যক্ষমাণ্ড্য | যক্ষমানস্য |
| ৩০ | ২০ | শ্ৰঃ | শৃমং |
| ৩২ | . | [illegible] | [illegible] |
| ৩২ | ৭ | অত্র | •ত্র |
| ৩৩ | ২ | প্রার্থনা | Omit |
| ৩৩ | ১০ | সন | সর্ব |
| ৩৪ | ১০ | শচাত্র | শচাত্র |
| ৩৪ | ১১ | তাদশদ্ধং | তাদৃশরূং |
| ৩৫ | ১০ | আশ্চংকর্ণোতি | আশ্রুং কর্ণা |
| ৩৫ | শেষলাইন | হোর্মিঃ | হের্মিঃ |
| ৩৬ | ৯ | রক্ষণামিতি | রক্ষণমিতি |
| ৩৬ | ১৩ | গোমন্তী | গোমন্তো |
| ৩৭ | ৮ | ভূতানং | ভূতানাং |
| ৩৭ | ১০ | যস্কাচাৰ্যেণ | যাস্কাচাৰ্যেণ |
| ৩৮ | ১৩ | হমবীক্তিঃ | হবীমভিঃ |
| ৪০ | ৯ | স্থানেষু | স্থানেষু |

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| ৪৬ | ৫ | আদিত্য | আদিত্যঃ |
| ৪৬ | ২০ | ঋষি | ঋষিঃ |
| ৪৭ | ২৩ | অস্যং | অন্যং |
| ৪৮ | ১৩ | দীর্ঘতামা | দীর্ঘতমা |
| ৪৮ | ২০ | নিগূঢ়ং | নিগূঢ়ম্ |
| ৪৯ | শেষলাইন | ষড়েযোক্তাঃ | ষড়েবোক্তাঃ |
| ৫০ | ঐ | প্রথম | প্রথমা |
| ৫০ | ঐ | দ্বাদশক্ষর | দ্বাদশাক্ষর |
| ৫১ | ৩ | মধ্যমাদিনে | মধ্যমদিনে |
| ৫৫ | ৯ | বিশ্বেস্য | বিশ্বস্য |
| ৫৬ | ৩ | স্তবয়ন্তীতি | স্তবয়ন্তীতি |
| ৫৭ | ১৪ | শু | শুঃ |
| ৫৮ | ১৮+২৪ | শসিবসিমসীণাঞ্চ | শাসিবসিঘসীণাঞ্চ |
| ৫৯ | ১৫ | আত্মনেপদী | আত্মনেপদে |
| ৬০ | ১৮ | বিসর্গো | বিসর্গে |
| ৬১ | ৮ | ভাবপঃ | ভাবপরঃ |
| ৬২ | ১০ | স্থিতি | স্থিতে |
| ৬৩ | শেষলাইন | ইতিঃ | ইতি |
| ৬৪ | ৭ | ভিত্ত্ব | ভিত্ত্বা |
| ৬৪ | ১৩ | যুস্পদ্ | যুষ্মন |
| ৬৬ | ১১ | সম্পাদাদিভ্যঃ ক্বিপ্ | সম্পদাদিভ্যঃ ক্বিপ্ |
| ৬৬ | ১৬ | আদি— | অদি— |
| ৬৭ | ১ | উধাদেশে | উঠাদেশে |
| ৬৭ | ২৩ | অন্তভাবিত | অন্তর্ভাবিত |
| ৬৮ | ৫ | তেতি | নেতি |
| ৬৮ | ৮ | উত্তরূপম্ | উক্তরূপম্ |
| ৬৮ | ১০ | হেধি | হেধি |
| ৬৮ | ১৫ | ব্যত্যয়ন | ব্যত্যয়েন |
| ৭১ | ৮ | অসিদ্ধত্বম্ | অসিদ্ধত্বান্ন |

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| ৭৩ | ৩ | সংহিতায়াদীং ইর্ঘত্বেঃ। | সংহিতায়াং দীর্ঘত্বে ইত। |
| ৭৪ | ৬ | স্বরিতাস্বির | স্বরিতঃ স্বরঃ |
| ৭৪ | ১৮ | পাদাদাব্বর্ত্তমানস্থ | পাদাদাববর্ত্তমানস্থ |
| ৭৫ | ২৩ | খঃ | যঃ |
| ৭৮ | ১০ | ড্রমিপ্ | ড্রাঁপ |
| ৮০ | ৮ | পাতোর্বিচ্ | ধাতোর্বিচ্ |
| ৮১ | ১৮ | অস্নদন্তাং | অস্নদান্তং |
| ৮৫ | ১৮ | মতি | সতি |
| ৮৬ | ৮ | অভাগমে | অচাগমে |
| ৮৭ | ৪ | বিশেঃ | বিশেঃ |
| ৮৭ | ৫ | ক্তিন | ক্তিন্ |
| ৮৭ | শেষলাইন | বিকল্পত্তে | বিকল্পাস্তে |
| ৯০ | ২ | ক্রতৌ | ক্রতৌ |
| ৯০ | ৮,৯ | স্থতা | স্থতা |
| ৯১ | ১ | ক্রতো | ক্রতৌ |
| ৯১ | ১৬ | আহুতী | আহুতি |
| ৯১ | ১৯ | যাজ্ঞাযা | যাজ্ঞায়ঃ |
| ৯২ | ১৭ | ফালিতো | ফলিতো |
| ৯২ | ১৯ | পঠনীয়া | পঠনীয় |
| ৯৪ | ১৭ | চত্বার | চত্বারঃ |
| ৯৫ | ১১ | প্রায়নীয়ম্ | প্রায়ণীয়ম্ |
| ৯৫ | ১১ | অন্তিম | অন্তিম |
| ৯৬ | ১৫,১৬ | ঋক | ঋক্ |
| ৯৭ | ৩ | নামঃ | নাম |
| ৯৮ | ৩ | তৎ | তে |
| ১০০ | ৯ | কষ্ঠিক্রা | কর্ষ্ঠিক্রা |
| ১০৫ | ১৭ | আত্রগচ্ছন্তি | অত্রাগচ্ছন্তি |
| ১০৫ | ১৮ | বিগ্রাড়ি | বিভ্রাড়ি |

| পৃষ্ঠা | লাইন | শুদ্ধ | অশুদ্ধ |
|---|---|---|---|
| ১০৭ | ১৯ | গৃহং | গ্রহং |
| ১০৮ | ৪ | ছাগশ্চ | ছাগস্চ |
| ১০৮ | ২৪ | তত্রতু | যত্র তু |
| ১০৮ | ২৪ | তত্রা | তত্র |
| ১০৮ | ২৭ | শত্রাণাস্ত | শস্ত্রাণাস্ত |
| ১০৯ | ৭ | সোমযাজিন | সোমযাজিনা |
| ১০৯ | ৭ | ইন্দ্রাগ্নঃ | ঐন্দ্রাগ্নঃ |
| ১০৯ | ৮ | বিহিতঃ | বিহিতঃ |
| ১১০ | ৮ | জমদাগ্নিঃ | জামদগ্নিঃ |
| ১১০ | ১৩ | মন্ত্রে | মন্ত্রে |
| ১১১ | ৯ | দ্র্যবঙ্ক | দ্রব্যঙ্ক |
| ১১১ | ২৪ | যস্মিন্ | Omit |
| ১১২ | ১৬ | তস্মতে | তন্মতে |
| ১১২ | ১৩,১৫ | পবমানেষ্ঠী | পবমানেষ্টী |
| ১১৪ | ১৩ | তদনন্তমেক | তদনন্তরমেক |
| ১১৫ | ৯ | দীয়তম্ | দীয়তাম্ |
| ১১৭ | শেষলাইন | কুত্র | কুত্র |
| ১১৮ | ১৭ | যন্ত্রঃ | মন্ত্রঃ |
| ১১৯ | ৬ | অনেকৈ | অনেকে |
| ১১৯ | ১৬ | আশ্বনায়ন | আশ্বলায়ন |
| ১২০ | ৯ | বিরচয্য | বিরচয্য |
| ১২১ | ২১ | সামানাম্ | সাম্নাম্ |
| ১২১ | ২১ | শ্রিতত্বং | শ্রিতত্ত্বং |
| ১২২ | ৯ | প্রামাণ্যমস্তি | প্রামাণ্যমস্তি |
| ১২২ | ১১ | তদর্থানাম্ | অতদর্থানাম্ |
| ১২৩ | ২০ | দ্বিত্বেন | দ্বিতত্ত্বেন |
| ১২৪ | ৬ | বর্জণীয়ত্বম্ | বর্জনীয়ত্বম্ |
| ১২৪ | ১৩ | তথাপি | তত্রাপি |
| ১২৫ | ৬ | প্রমাণান্তরে | প্রমাণান্তরৈ |

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| ১২৫ | ১৪ | জ্যোতিষামিতি | জ্যোতিষমিতি |
| ১২৫ | ২৫ | যুক্তেন | যুক্তেন |
| ১২৬ | ১৭ | নৈঘুন্টিকং | নৈঘুণ্টুকং |
| ১২৮ | ১৩ | সবত্র | সর্বত্র |
| ১২৮ | ১৪ | শক্তিমত্তা | শক্তিমত্তা |
| ১২৮ | ২৪ | বেদাধ্যায়ন | বেদাধ্যয়ন |
| ১২৯ | ৩ | যথাক্রমম্ | যথা ক্রমম্ |
| ১২৯ | ২০ | সুত্তাতি | সুথাতি |
| ১৩২ | শেষলাইন | ক্ষিত্যাত্মি | ক্ষিত্যত্মি |
| ১৩৩ | ১৩ | র্বাকেরেব | র্বাক্যৈরেব |
| ১৩৫ | ২৩ | যদেনমস্রো | যদেনমস্মো |
| ১৩৯ | ৬ | কর্মাণ্যাতি | কর্মাণীতি |
| ১৩৯ | ৬ | ছন্দা | ছন্দ |
| ১৩৯ | ২৪ | বাজসনেনি | বাজসনেয়ি |
| ১৩৯ | শেষলাইন | ধ্বস্তে | ধ্বন্তে |
| ১৪১ | ৮ | চতুর্হোত | চতুর্হোতা |
| ১৪২ | ১৪ | অস্তি | অস্তি |
| ১৪৫ | ২১ | কালোংশা | কালোংশা··· |
| ১৫২ | ৮ | মৃত্তিজঃ | মৃত্বিজঃ |
| ১৫২ | ৮ | গভং | গর্ভং |
| ১৫২ | ১৩ | বিষ্ণ | বিষ্ণু |
| ১৫৩ | ১২ | লিপ্সন্তী | লিপ্সন্তী |
| ১৫৭ | ১০ | মৃত্যো | মৃত্যা |
| ১৫৮ | ১৩ | অভিধিয়তাম্ | অভিধীয়তাম্ |
| ১৫৮ | ১৫ | সামগ্রেণ | সামগ্র্যেণ |
| ১৫৮ | ১৫ | বর্ণণীয় | বর্ণণীয়া |
| ১৫৯ | ৪ | পাদম্বিতুম্ | পাদম্বিতুম্ |
| ১৫৯ | ৬ | মন্ত্রাণাং | মন্ত্রাণাং |
| ১৫৯ | ৯ | মনোস্কাম··· | মনো স্কাম··· |

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| ১৫৯ | ১৩ | নির্গতবাচঃ | নির্গতা বাচঃ |
| ১৫৯ | ১৬ | ঋষভেজায়ায়াং | ঋষভে জায়ায়াং |
| ১৫৯ | ১৮ | সেষা | সৈষা |
| ১৬০ | ৫ | বিনিয়োগশ্চেতি | বিনিয়োগাশ্চেতি |
| ১৬০ | ৮ | ভবতি | ভবতীতি |
| ১৬০ | ১৩ | প্রদর্শতে | প্রদর্শ্যতে |
| ১৬০ | ১৫ | প[illegible]কৈঃ | পদিকৈঃ |
| ১৬০ | ১৬ | তত্রা | তত্র |
| ১৬১ | ১ | ক ত্বা | …কৃত্বা |
| ১৬১ | ২০ | অধ্যাত্মিক্যঃ | আধ্যাত্মিক্যঃ |
| ১৬২ | ১০ | ইতি | বেতি |
| ১৬২ | ২ | এয়ো | এয়ো |
| ১৬৭ | ২ | [illegible] | [illegible] |
| ১৬৭ | ৮ | নিঃক্রম্য | নিষ্ক্রম্য |
| ১৬৭ | ১১ | উপনস্যতে | উপন্যস্যতে |
| ১৬৭ | ২৭ | সত্যাপি | সত্যপি |
| ১৬৮ | ৭ | সঙ্গা | সংজ্ঞা |
| ১৬৮ | ৭ | কংতদ্ধিত | [illegible]ংতদ্ধিত |
| ১৬৮ | ১৬ | বাঙ্গ্য | ব্যঙ্গ্য |
| ১৬৮ | ১৮ | কর্ম্মাণি | কর্মণি |
| ১৬৮ | ২০ | ভু-ধাতোঃ | ভূ-ধাতোঃ |
| ১৬৯ | ৫ | নৈঘণ্টুকাণ্ডে | নৈঘণ্টুককাণ্ডে |
| ১৬৯ | ৬ | খ্যাতসৈব | খ্যাতস্যৈব |
| ১৬৯ | ৯ | চৈব | Omit |
| ১৬৯ | ১২,১৫ | প্রবাণ্যম্ | প্রাধাণ্যম্ |
| ১৬৯ | ১৬ | ষড়স্ত শব্দ | ষএস্তশব্দাঃ |
| ১৬৯ | ১৭ | শ্রুয়তে | শ্রূয়তে |
| ১৬৯ | ২৩ | প্রাধানানীতি | প্রধানানীতি |
| ১৬৯ | শেষলাইন | স্বকর্ত্তব্যম্ | স্বীকর্ত্তব্যম্ |

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| ১৭২ | ৪ | চতুষ্টয়ম্ | চতুষ্টয়ম্ |
| ১৭২ | ১৫ | পানিণীয় | পাণিনীয় |
| ১৭২ | শেষলাইন | মূচ্চর্য্যাতে | মূচ্চার্য্যতে |
| ১৭৩ | ৮,১০,১১ | মন্ত্রাত্ত্ব | মন্ত্রাত্ত্ব |
| ১৭৪ | ৬ | ভাবাভাব | ভাবভাব |
| ১৭৪ | ১৮ | অয়ং ভাব | অয়ং ভাবঃ — |
| ১৭৫ | ৯. | তত্র | Omit |
| ১৭৫ | ২২,২৪,২৫ | অর্থবস্তুং | অর্থবস্তুং |
| ১৭৫ | শেষলাইন | নহি | ন |
| ১৭৮ | ২ | দৈবপত্ন্যাস্তুঃ | দেবপত্নস্তুঃ |
| ১৭৮ | ১৯ | নির্বাচনাভ্যুপায়. | নির্বাচনানভ্যুপায়ঃ |
| ১৮০ | ১ | বিক্রুর্ব্বতঃ । অস্য | বিকুর্ব্বতঃ অস্য |
| ১৮০ | ৫ | প্রত্যঙ্গানি | প্রত্যাঙ্গাণি |
| ১৮০ | ৮ | প্রকৃতিশ্চ | প্রকৃতয়শ্চ |
| ১৮০ | ৯,২১ | বস্ত্বাং | বস্ত্বাং |
| ১৮০ | ২২ | যং কামঋষি | যংকাম ঋষি |
| ১৮১ | ১ | নচিকেতসা | নচিকেতসা |
| ১৮১ | ৮ | বৈবস্বতায় | বৈবস্বতীয় |
| ১৮২ | ৫ | অক্ষোভ্য | অক্ষোভ্যঃ |
| ১৮৪ | ১৮ | প্রেয়সোহভাহিতত্ত্বাৎ শ্রেয়সঃ | শ্রেয়সোহভ্যাহিতত্বাৎ প্রেয়সঃ |
| ১৮৬ | ৮ | আয়াসসাধ্য | আয়াসসাধ্যম |
| ১৮৭ | শেষলাইন | শ্চাত্মনৈমেব | শ্চাত্মানমেব |
| ১৯০ | ১ | গত্ব | গত্বা |
| ১৯১ | ৩ | দুখেন | দুঃখেন |
| ১৯৪ | ১১ | ১২নং | ১৩নং |

* 90 পৃষ্ঠা হইতে 119 পৃষ্ঠার মধ্যে Titleএ যেখানে যেখানে Saiyana বা Sayana ছাপা হইয়াছে, ঐ সকলস্থানে Sāyana হইবে ।

# সংস্কৃত ব্যাকরণ

## এম, এ, দ্বিতীয় পত্র

অধ্যাপক, ব্যানার্জি ও হালদার

প্রাপ্তিস্থান :

জে, এন, ঘোষ এণ্ড সন্স

৬ বঙ্কিম, চাটার্জি ষ্ট্রীট

কলিকাতা-১২

**প্রকাশনায় ঃ**

শ্রীপ্রভাকর রায়চৌধুরী
গোবরডাঙ্গা হিন্দু কলেজ
২৪ পরগণা ।

ও

শ্রীমঞ্জু হালদার, এম. এ.
জয়গাছি, টাবাবেড়িয়া
২ ১ ৯ গণা ।

প্রথম সংস্করণ ১৩৭৬ সাল ।
মূল্য ১০·০০

**মুদ্রাকর ঃ**

ব্যবসা ও বাণিজ্য প্রেস
৯/৩ রমানাথ মজুমদার ষ্ট্রীট
কলিকাতা—৯

# : ভূমিকা :

বহু প্রচেষ্টার পর সংস্কৃত এম. এ. দ্বিতীয় পত্র (বা[illegible]) প্রকাশিত হইল। পাণ্ডিত্য প্রকাশের জন্য এই গ্রন্থ লিখিত হয় নাই। ছাত্র-ছাত্রীদের প্রয়োজনের দিকে দৃষ্টি রাখিয়া ইহা লিখিত হইয়াছে। এই গ্রন্থে কলিকাতা বিশ্ববিদ্যালয়ের গত দশ বৎসরের প্রশ্নপত্রের ও সম্ভাব্য প্রশ্নের উত্তর দেওয়া হইয়াছে। সংস্কৃত এম. এ. পরীক্ষার্থী-গণের ব্যাকরণ পত্রের উত্তর সংগ্রহ করা নিতান্ত কঠিন ব্যাপার। বিশেষত. যাহারা প্রাইভেট পরীক্ষা দেন তাহাদের নিকট ব্যাকরণের প্রত্রট একটি নিদারুণ সমস্যার সৃষ্টি করে। ছাত্র-ছাত্রীদের শ্রম লাঘব করিবার জন্য গ্রন্থকারদ্বয়ের এই প্রচেষ্টা। পুস্তকখানি ছাত্র-ছাত্রী মহলে সমাদর লাভ করিলে গ্রন্থকারদ্বয় নিজদিগকে ধন্য মনে করিবেন।

এই পুস্তক রচনার ব্যাপারে যে সব গ্রন্থ হইতে প্রত্যক্ষ বা পরোক্ষ সাহায্য গ্রহণ করা হইয়াছে, গ্রন্থশেষে তাহার একটি তালিকা দেওয়া হইল। ঐ সমস্ত গ্রন্থ হইতে কখন কখন অংশ বিশেষও প্রয়োজন মত গ্রহণ করা হইয়াছে।

ইতি—

**গ্রন্থকারদ্বয়।**

## : বিষয় সূচী :


| বিষয় | পৃষ্ঠা |
| --- | --- |
| **পূর্ব্বার্দ্ধ :** | |
| ১। সূত্র ব্যাখ্যাঃ | ১—৩৯ |
| ২। পদসাধনানি | ৪০—৭৭ |
| ৩। ফক্কিকা ব্যাখ্যাঃ | ৭৮—১১১ |
| **উত্তরার্দ্ধ :** | |
| ১। সূত্রব্যাখ্যা: | ১১৫—১৪৭ |
| ২। ফক্কিকা ব্যাখ্যাঃ | ১৪৮—১৭১ |
| ৩। পদসাধনানি | ১৭২—২১৫ |
| মহাভাষ্যম | ২১৮—শেষ |

# পূৰ্ব্বার্দ্ধ

জায়তে। সূত্রেঽস্মিন্ গব্যম্, নাব্যম্ ইত্যাদৌ পদত্বেন 'লোপঃ শাকল্যস্য' ইত্যনেন বকারস্য লোপঃ কথং নেতি চেন্ন, 'বান্ত' ইত্যত্র বকারপ্রশ্লেষেণ শ্রূয়মাণবকারাদেশবিধানাৎ।

**অনচি চ** ( ৮।৪।৪৭ )—'সুধী + উপাস্য' ইত্যস্য 'ইকো যণচি' ইতি সূত্রবলাৎ যণাদেশে 'সুধ্ য্ + উপাস্যঃ' ইতি স্থিতে, 'অনচি চ' ইতি সূত্রেণ ধকারস্য দ্বিত্বং বিহিতম্। অত্র সূত্রে 'যরোঽনুনাসিকেঽনুনাসিকো বা' ইত্যতঃ 'যরঃ' ইতি ষষ্ঠ্যন্তং 'বা' ইতি চানুবর্ত্ততে। 'অচো রহাভ্যাং দ্বে' ইত্যতঃ 'অচঃ' ইতি পঞ্চম্যন্তং 'দ্বে' ইতি চানুবর্ত্ততে। ন অচ্ অনচ্, তস্মিন্ অনচীতি ন পর্য্যুদাসঃ। তথা সতি 'নঞিবযুক্তমন্যসদৃশে তথা হ্যর্থগতিঃ' ইতি ন্যায়েন অভিন্নে হলীত্যর্থঃ স্যাৎ। তথা সতি লাঘবাদ্ হলীত্যেব বদেৎ। রামাৎ ইত্যাদ্যবসানেষু চ দ্বিত্বং ন স্যাৎ। অত° অচি ন ভবতীত্যসমর্থসমাসমাশ্রিত্য প্রতিষেধপরং বাক্যান্তরম্। তদুক্তম্—অচঃ পরস্য যরো দ্বে বা স্তো ন ত্বচি। অনেন সূত্রেণ ধকারস্য দ্বিরুচ্চারণমিত্যর্থঃ। ধকারস্য উকারাদচঃ পরত্বাদচ্‌পরকত্বাভাবাচ্চেতি ভাবঃ। অনেন সূত্রেণ—'সু ধ্ ধ্ য্ + উপাস্যঃ' ইতি ভবতি।

**স্বং রূপং শব্দস্যাশব্দসংজ্ঞা** ( ১।১।৬৮ )—ইদং সংজ্ঞাসূত্রম্। অস্মিন্ সূত্রে বোধ্যমিতি পদম্ অধ্যাহ্রিয়তে। তদা সূত্রস্যায়মর্থঃ—ব্যাকরণসূত্রে বার্ত্তিকে বা শব্দস্য স্বকীয়ং রূপং সংজ্ঞি ইতি বোধ্যম্। যথা, উদাহরণম্ 'অগ্নের্ঢক্'। অস্মিন্ সূত্রে অগ্নিশব্দস্য স্বকীয়ং রূপং বোধ্যতে নতু অগ্নিশব্দস্য বহ্নিরূপোঽর্থঃ বোধ্যতে। এতৎসূত্রাভাবে তু 'অগ্নের্ঢক্' ইত্যত্র অগ্নিশব্দেন বহ্নিরূপোঽর্থ উপস্থিতঃ। অর্থে প্রত্যয়বিধানরূপকার্য্যস্য অসম্ভবাৎ তদর্থবোধকানাং সর্ব্বেষাং শব্দানাং গ্রহণং স্যাৎ। ইত্থঞ্চ অগ্নিশব্দাৎ ঢকি যথা আগ্নেয় ইতি রূপং সিধ্যতি, তথা বহ্নিশব্দাৎ ঢকি বাহ্নেয় ইতি অশুদ্ধরূপং স্যাৎ।

তন্নিবারণায় ইদং সূত্রম্ আবশ্যকম্। সূত্রেঽস্মিন্ অশব্দসংজ্ঞা ইত্যংশো বর্ততে। তস্যার্থস্তু অয়ম্—শব্দে ব্যাকরণশাস্ত্রে যা সংজ্ঞা তত্র সংজ্ঞাবাচকশব্দে স্বরূপগ্রহণং ন ভবতি। অত্র বৃদ্ধিগুণাদিশব্দ-স্বরূপস্য গ্রহণং ন ভবতি, তেষাং ব্যাকরণে সংজ্ঞাপরত্বাৎ। অত্র গুণবৃদ্ধিপদেন 'অদেঙ্ গুণঃ' 'বৃদ্ধিরাদৈচ্' ইতি সূত্রদ্বয়মেব গ্রহণীয়ম্। বৃদ্ধিগুণশব্দার্থ স্যৈবাত্র গ্রহণমিতি। কিঞ্চ 'উপসর্গে ঘোঃ কিঃ' ইত্যত্র ঘু ইত্যনেন ঘু-ধাতোঃ গ্রহণং ন ভবতীতি বর্তুলিতোঽর্থঃ।

***স্থানিবদাদেশোঽনল্‌বিধৌ*** ( ১।১।৫৬ )—গুরুস্থানাপন্নে গুরুপুত্রাদৌ স্থানাপত্ত্যা তদ্ধর্মলাভো লোকতঃ সিদ্ধঃ। কুশাদি-স্থানাপন্নেষু শরাদিষু চ বৈদিকন্যায়সিদ্ধঃ। ইহ তু শাস্ত্রে স্বং রূপং শব্দস্যেতি বচনাৎ স্থানিধর্মা আদেশেষু ন প্রাপ্নুয়ুরিতি তৎ প্রাপ্ত্যর্থং স্থানিবদাদেশ ইত্যারব্ধম্। 'আদেশঃ স্থানিবৎ স্যাৎ ন তু স্থান্যলা-শ্রয়বিধৌ' ইতি বৃত্তিঃ। স্থানিবদাদেশো ভবতি স্থান্যাশ্রয়েষু কার্যেষু অনলাশ্রয়েষু স্থান্যলাশ্রয়ানি কার্যানি বর্জয়িত্বা। স্থানং প্রসঙ্গঃ। যস্য স্থানে অন্যৎ বিধীয়তে তৎস্থানি। যেন বিধীয়মানেন অন্যৎ প্রসক্তং নিবর্ততে স আদেশঃ। স্থানিনা তুল্যঃ স্থানিবৎ। আদেশঃ স্থানিনা তুল্যো ভবতি। স্থানিধর্মকো ভবতি। অলিতি সমাহারো বর্ণমাত্রবাচী। বিধীয়তে ইতি বিধিঃ কার্যম্। অলাশ্রয়ো বিধিঃ অল্‌বিধিঃ। ন অল্‌বিধিঃ অনল্‌বিধিঃ। অনল্‌বিধিঃ অনেকাল্‌বিধিঃ ইতি কাশিকা। অলাশ্রয়ভিন্নে কার্যে কর্তব্যে ইতি প্রতীয়মানোঽর্থঃ। অলাশ্রয়কার্যে কর্তব্যে স্থানিবৎ ন ভবতীতি ফলিতোঽর্থঃ। উদাহরণং 'রামায়' ইতি। অত্র ঙের্যাদেশে কৃতে স্থানিবদ্ভাবেন সুপ্‌ত্বমাদায় 'সুপি চ' ইতি দীর্ঘো ভবতি।

***তুল্যাস্যপ্রযত্নং সবর্ণম্*** ( ১।১।৯ )—তুল্যশব্দঃ সদৃশপর্যায়ঃ। আস্যে মুখে ভবমাস্যং কণ্ঠতাল্বাদিস্থানম্। প্রকৃষ্টঃ যত্নঃ প্রযত্নঃ স্পৃষ্ট-

তাদির্বর্ণগুণঃ। আস্যঞ্চ প্রযত্নশ্চ ইতি আস্যপ্রযত্নৌ। তুল্যৌ আস্যপ্রযত্নৌ যস্য তৎ তুল্যাস্যপ্রযত্নম্ অক্ষরম্ ইতি শেষঃ। সূত্রস্যায়মর্থঃ—তাল্বাদিস্থানম্ আভ্যন্তরপ্রযত্নশ্চ ইত্যেতদ্ দ্বয়ং যস্য যেন তুল্যং তন্মিথঃ সবর্ণসংজ্ঞং স্যাৎ। অর্থাৎ তুল্য আস্যে প্রযত্নো যস্য বর্ণস্য যেন বর্ণেন সহ স সমানজাতীয়ং প্রতি সবর্ণসংজ্ঞো ভবতি। চত্বারঃ আভ্যন্তরাঃ প্রযত্নাঃ সবর্ণসংজ্ঞায়ামাশ্রীয়ন্তে। স্পৃষ্টতা, ঈষৎস্পৃষ্টতা, সংবৃততা, বিবৃততা চেতি কাশিকাকারঃ। সূত্রস্যোদাহরণম্—ক, খ ইত্যাদীনাং পঞ্চানাং বর্ণানাং পরস্পরং সবর্ণসংজ্ঞা ভবতি। এষাং কণ্ঠঃ স্থানং, স্পৃষ্টঃ আভ্যন্তরপ্রযত্নশ্চ তুল্যৌ বর্ততে। অতঃ সবর্ণসংজ্ঞা সিদ্ধা। বাহ্যপ্রযত্নস্য বৈষম্যসত্ত্বেঽপি সবর্ণসংজ্ঞা সিদ্ধ্যতি। যথা ক-খ ইত্যনয়োঃ বাহ্যপ্রযত্নঃ ভিন্নঃ। তথাপি সবর্ণসংজ্ঞা ভবতি।

***ঈদূদেদ্ দ্বিবচনং প্রগৃহ্যম্*** ( ১।১।১১ )—ঈৎ, ঊৎ এৎ ইত্যেবমন্তং দ্বিবচনং শব্দরূপং প্রগৃহ্যসংজ্ঞং ভবতি। ঈদূদেদিতি দ্বিবচনবিশেষণত্বাৎ তদন্তবিধিঃ। ঈকারান্তম্ ঊকারান্তম্ একারান্তং যৎ দ্বিবচনম্, তৎ প্রগৃহ্যসংজ্ঞং স্যাদিতি। দ্বিবচনমিত্যনেন তু প্রত্যয়ত্বে অপি ন তদন্তং গৃহ্যতে, 'সংজ্ঞাবিধৌ প্রত্যয়গ্রহণে তদন্তগ্রহণং নাস্তি' ইতি তন্নিষেধাৎ। হরী+এতৌ ইত্যত্র ঈকারস্য পরাদিবত্ত্বাশ্রয়ণাদ্ দ্বিবচনম্। তস্য প্রগৃহ্যসংজ্ঞায়াম্ প্রকৃতিভাবে চ কৃতে হরী+এতৌ ইতি সিধ্যতি। প্রগৃহ্যত্বে সতি 'প্লুতপ্রগৃহ্যাঃ' ইতি প্রকৃতি ভাবান্ন যণ্। বিষ্ণূ+ইমৌ ইত্যত্রাপ্যেবম্। 'মনী বোষ্ট্রস্য' ইত্যত্র মণী+ইবেতি ঈকারস্য প্রগৃহ্যত্বে সতি প্রকৃতিভাবে সবর্ণদীর্ঘো ন, কিন্তু ইবার্থে বশব্দো বাশব্দো বা বোধ্যঃ।

***এত্যেধত্যূঠ্সু*** (৬।১।৮৯)—অবর্ণাৎ এজাদ্যোঃ এত্যেধত্যোঃ ঊঠি চ পরে বৃদ্ধিরেকাদেশো ভবতি। যথা উপৈতি, উপৈধতে, প্রষ্ঠৌহ ইত্যাদিষু বৃদ্ধৌ কৃতায়াম্ রূপাসিদ্ধিঃ। এচীত্যনুবর্ত্ততে, অত্র এজাদ্যো-

রিতি ইন্‌ধাতোঃ এধ্‌ধাতোশ্চ বিশেষণম্‌, ন তু উঠঃ, অসংভবাৎ, যদি এজাদ্যোরিতি বিশেষণং ন দীয়েত, তদা উপ ইতঃ, প্র ইদিধৎ ইত্যাদাবপি বৃদ্ধিঃ স্যাৎ। তদ্বারণার্থম্‌, এজাদ্যোরিতি বিশেষণম্‌। তত্র এজাদিত্বাভাবাৎ বৃদ্ধেরভাবেন আদ্‌গুণ ইত্যনেন গুণে কৃতে উপৈত মা ভবান্‌, মা ভবান্‌ প্রেদিধৎ ইত্যাদিপ্রয়োগসিদ্ধির্ভবতি। সূত্রেঽস্মিন্‌ 'আদ্‌গুণ' ইত্যত আদিতি পঞ্চম্যন্তমনুবর্ত্ততে, বৃদ্ধিরপ্যত্রাগচ্ছতি। অতএব "আৎ এত্যেধত্যূঠ্‌সু এচি পূর্বপরয়োঃ একো বৃদ্ধিঃ" ইতি পূর্ণং সূত্রশরীরম্‌। অর্থশ্চ —'আৎ' অবর্ণাৎ পরম্‌ 'এত্যেধত্যূঠ্‌সু' স্থিতো য এচ্‌ তস্মিন্‌ সতি পূর্বপরয়োরেকোঃ বৃদ্ধিঃ আদেশঃ স্যাদিতি। এত্যেধত্যোরেব এচ্‌ সম্ভবতি ন উঠি, তথাপি যদূঠ্‌ গৃহ্যতে তেন জ্ঞাপ্যতে উঠি পরে অসত্যপি এচি বৃদ্ধিঃ স্যাদিতি। এত্যেধত্যোঃ 'এঙি পররূপম্‌' ইত্যনেন উপ এতি উপ এধতে ইত্যাদীনাং পররূপে প্রাপ্তে বৃদ্ধি বিধীয়তে।

✓*শি তুক্‌* (৮।৩।৩১)—'নশ্চ' ইতি সূত্রাৎ 'ন' ইতি পঞ্চম্যন্তমনুবৃত্তমিহ ষষ্ঠ্যন্তমাশ্রীয়তে, শব্দাধিকারাশ্রয়ণাৎ পদস্যেত্যধিকৃতম্‌, অবয়বষষ্ঠ্যন্তমাশ্রীয়তে। 'হে মপরে বা' ইত্যতো 'বা' ইত্যনুবৃত্তম্‌। সর্বম্‌ একীকৃত্য দীক্ষিতপাদেন উক্তম্‌—পদান্তস্য নস্য শে পরে তুগ্‌ বা স্যাৎ। 'সন্‌ শম্ভুঃ' ইতি স্থিতে 'শি তুক্‌' ইতি নকারস্যান্তাবয়বে তুকি অনুবন্ধলোপে 'শশ্ছোঽটি' ইতি শস্য ছত্বে 'স্তোঃ শ্চুনা শ্চুঃ' ইতি তকারস্য চুত্বে পুনঃ 'স্তোঃ শ্চুনা শ্চুঃ' ইতি নকারস্য চুত্বেন ঞকারে 'ঝরো ঝরি সবর্ণে' ইতি চলোপে 'সঞ্‌ছম্ভুঃ' ইতি।

✓***পুমঃ খয্যম্পরে*** (৮।৩।৬)—রুগ্রহণম্‌ অনুবর্ত্ততে। অম্‌পরো যস্মাদিতি বহুব্রীহিসমাসস্য বিগ্রহঃ। অম্‌পরে খয়ি পুম্‌ শব্দস্য রুঃ স্যাৎ। পুমিত্যেতস্য রুর্ভবতি অম্‌পরে খয়ি পরত ইতি কাশিকা। 'পুম্‌ কোকিলঃ' ইতি স্থিতে পুমো মকারস্য রুত্বে 'অত্রানুনাসিকঃ পূর্বস্য তু

পূর্বগ্রহনসামর্থ্যাৎ উত্তরপদস্য অসম্বন্ধ ইতি কৃত্বা ন কাচিৎ হানিঃ। যত্র উত্তরপদং কিমপি নাস্তি তত্রাপি পূর্বমাত্রস্য অণঃ অনেন দীর্ঘো ভবতি। তেন সিধ্যতি—অজর্ঘাঃ।

***উঞি চ পদে*** ( ৮।৩।২১ )—"ভোভগোঅঘোঅপূর্বস্যযোঽশি" ইত্যতঃ অপূর্বস্যেত্যনুবর্ততে। অনেনৈব প্রকারেণ সূত্রান্তরেভ্যঃ পদস্যেতি, ব্যোরিতি, লোপ ইতি চানুবর্ততে। তেন অবর্ণপূর্বয়োঃ পদান্তয়োর্যবয়োর্লোপ উঞি পরে ইতি ফলতি। উদাহরণং যথা— স উ একাগ্নিঃ। অত্র বিসর্গস্যাসিদ্ধত্বাৎ সস্ উ ইতি স্থিতে, সস্য 'সসজুষো রুঃ' ইত্যনেন রুত্বে সর্ উ ইতি জাতে। 'ভোভগো—' ইত্যপূর্বত্বাদ্ যত্বে সয্ উ ইতি প্রাপ্তম্। অত্র 'লোপ শাকল্যস্য' ইতি বিকল্প-নিবৃত্ত্যর্থম্ ইদং সূত্রম্। তেন যকারস্য নিত্যং লোপঃ স্যাদিতি। প্রত্যুদাহরণং যথা—তন্ত্রযুতম্। অত্র 'পদে' গ্রহণস্য কিং প্রয়োজন-মিতি তদ্দর্শয়তি। 'পদে' ইত্যস্য অগ্রহণে 'তন্ত্র য্ উতম্' ইতি স্থিতৌ উঞ্ পরত্বাৎ যলোপাপত্তিঃ, তদ্বারণায় পদেগ্রহণমাবশ্যকম্। সতি চ তস্মিন্ উঞ্পরত্বেঽপি তস্য পদত্বাভাবাৎ পদাঙ্গমাত্রত্বাচ্চ নাত্র যলোপাপত্তিঃ।

***উদঃ স্থাস্তম্ভোঃ পূর্বস্য*** (৮।৪।৬১)—উদঃ পরয়োঃ স্থাস্তম্ভোঃ পূর্বসবর্ণঃস্যাৎ। যথা উত্থানম্ উত্তম্ভনম্ ইত্যাদি। তৎ উদ্স্থানম্ উদ্স্তম্ভনম্ ইত্যবস্থায়াম্ 'তস্মাদিতুত্তরস্য' 'আদেঃ পরস্য' ইতি সূত্রদ্বয়সহকারেণ বিবারশ্বাসাঘোষমহাপ্রাণপ্রযত্নবতঃ সকারস্য স্থানে থকারে কৃতে 'খরিচ, ইত্যনেন দকারস্থানে তকারে 'ঝরো ঝরি সবর্ণে' ইত্যনেন থকার লোপে উত্থানম্ উত্তম্ভনঞ্চ সিধ্যতঃ।

***কৃত্তদ্ধিতসমাসাশ্চ*** ( ১।২।৪৬ )—অস্মিন্সূত্রে পূর্বসূত্রাৎ প্রাতি-পদিকমিত্যনুবর্ততে, বহুবচনান্ততয়া বিপরিণম্যতে। "প্রত্যয়গ্রহণে

যস্মাৎ যঃ বিহিতঃ তদাদেস্তদন্তস্য গ্রহণমি”তি পরিভাষয়া কৃৎপদেন কৃদন্ততদাদেঃ উপস্থিতিঃ, তদ্ধিতপদেন তদ্ধিতান্তাদেঃ উপস্থিতিঃ। সূত্রস্যায়মর্থঃ—অর্থবোধকং যৎ কৃদন্তং তদাদিতদ্ধিতান্তং তদাদিশব্দস্বরূপং সমাসশ্চ তৎ প্রাতিপদিকসংজ্ঞকং ভবতি। কৃদন্তস্য উদাহরণম্—পাচক ইত্যাদি। তদ্ধিতান্তস্য উদাহরণম্—উপগব ইত্যাদি। সমাসস্য উদাহরণম্—রাজপুরুষ—ইত্যাদি। অত্র সূত্রে সমাসগ্রহণং নিয়মার্থমিতি উক্তং দীক্ষিতপাদৈঃ। অয়ং ভাবঃ—‘প্রত্যয় গ্রহণে যস্মাৎ য বিহিতস্তদাদেস্তদন্তস্য গ্রহণম্’ ইতি পরিভাষয়া ‘রাজন্ ঙস্ পুরুষ সু’ ইতি সমুদায়ঘটক রাজন্ ঙস্ ইত্যস্য পুরুষ সু ইত্যস্য চ প্রত্যয়ান্ততদাদিত্বেঽপি রাজন্ ঙস্ পুরুষ সু ইতি সমুদায়স্য প্রত্যয়ান্ততদাদিভিন্নত্বাৎ ‘অর্থবদধাতুরপ্রত্যয়ঃ প্রাতিপাদিকম্’ ইতি সূত্রেনৈব প্রাতিপদিকসংজ্ঞাসিদ্ধৌ সমাসগ্রহণং ব্যর্থং সৎ যত্র সমুদায়ে পূর্বো ভাগঃ পদং তস্য সমুদায়স্য প্রাতিপদিকসংজ্ঞা চেত্তর্হি সমাসস্যৈবেতি নিয়ময়তি। তেন গামানয়েতি বাক্যস্য প্রাতিপদিকসংজ্ঞা ন ভবতীতি ফলম্।

✓*সরূপানামেকশেষ একবিভক্তৌ* ( ১।২।৬৪ )—প্রাতিপদিকার্থগতদ্বিত্বাদিবিবক্ষায়াং প্রাতিপদিকস্য দ্বিত্র্যাদিপ্রয়োগপ্রাপ্তাবিদং সূত্রম্। একবিভক্তৌ ইতি সরূপানামিত্যত্রান্বেতি। সমানং রূপং যেষাং তানি সরূপাণি। তেষাং তুল্যমূর্ত্তীনামিত্যর্থঃ। একস্যাং বিভক্তৌ পরতঃ সরূপাণামেব দৃষ্টানাং মধ্যে একঃ শিষ্যতে ইতি ফলতি। ইহ রূপে গ্রহঃ ন তু অর্থে, ভিন্নেঽপি অর্থে ভবতি। তথা চ পাদা ইতি কিরণেঽপি চরণেঽপি যুগপদেব, ‘একশেষঃ’ ইত্যত্র একশব্দঃ অসহায়বাচী। অনেকেষু অপি সম্প্রাপ্তেষু একঃ শিষ্যতে ইত্যর্থঃ। ‘একবিভক্তৌ’ ইত্যত্র তুল্যবাচী, এতেন রাম রাম ঔ ইত্যত্র রাম ঔ ইতি শেষঃ। ততঃ বৃদ্ধৌ রামৌ ইতি রূপম্। ‘প্রথময়োঃ পূর্বসবর্ণঃ’ ইত্যনেন বৃদ্ধের্বাধঃ ‘নাদিচি’ ইত্যনেন বাধ্যতে। অতো বাধে গতে সতি বৃদ্ধিঃ প্রবর্ততে।

**অতো গুণে** ( ৬।১।৯১ )—'এঙি পররূপম্' ইত্যতঃ পররূপমিত্যনুবর্ত্ততে। 'উস্যপদান্তাৎ' ইত্যতঃ অপাদান্তাদিত্যনুবর্ত্ততে। 'একঃ পূর্বপরয়োঃ' ইত্যধিকৃতম্। অত ইতি পঞ্চমী। 'তপরস্তৎকালস্য' ইতি সূত্রবলাৎ হ্রস্বান্তমিতি বোধ্যম্। তেন অপাদন্তাদকারাদ্ গুণে পরে পূর্বপরয়োঃ স্থানে পররূপমেকাদেশঃ স্যাদিত্যর্থঃ। উদাহরণং যথা—পচন্তি, ভবন্তি। ভব অন্তি ইতি স্থিতে 'অকঃ সবর্ণে দীর্ঘঃ' ইতি সবর্ণদীর্ঘে প্রাপ্তে তদপবাদত্বেন 'অতো গুণে' ইতি দ্বয়োরকারয়োঃ পররূপে কৃতে 'ভবন্তি' ইতি রূপং নিষ্পন্নম্। সূত্রমিদম্ 'অকঃ সবর্ণে দীর্ঘ' ইতি সবর্ণদীর্ঘস্যাপবাদভূতম্। অতো যত্র উভয়োঃ সূত্রয়োঃ প্রাপ্তি র্ভবতি তত্র তং সবর্ণদীর্ঘং বাধিত্বা অপবাদত্বাৎ পররূপমিদং প্রবর্ত্ততে ইতি দিক্।

**সর্বাদীনি সর্বনামানি** ( ১।১।২৭ )—সর্বঃ সর্বশব্দ আদিঃ প্রথমো যেষাং তানি সর্বাদীনি সর্বাদিশব্দস্বরূপানি ইত্যর্থঃ। সর্বশব্দঃ স্বরূপপরঃ। নপুংসকবশাৎ শব্দরূপানীতি বিশেষ্যমধ্যাহার্যম্। 'স্বং রূপং শব্দস্যাশব্দসংজ্ঞা' ইত্যনেনাপি শব্দস্য স্বং রূপমেবগৃহ্যতে। তেন সর্বস্যৈব সর্বনামতা, ন তু তদর্থকস্য সকলদীনামপি। সর্বশব্দ আদির্যেষাং তানীমানি সর্বাদীনি সর্বনামসংজ্ঞানি ভবন্তি। সর্ব আদিরাস্থাবয়বো যেষাং তানীতি বিগ্রহে তদ্গুণসংবিজ্ঞানো বহুব্রীহিরয়ম্। উদ্ভূতাবয়বভেদঃ সমুদায়ঃ সমাসার্থ ইতি বহুবচনম্। সর্বঃ, বিশ্বঃ, উভঃ, উভয়ঃ ডতরঃ, ডতমঃ, অন্যঃ, অন্যতরঃ, ইতরঃ, ত্বৎ, ত্ব নেমঃ, সমঃ, সিম—ইত্যেতাঃ সর্বাদয়ঃ শব্দাঃ। 'ন বহুব্রীহৌ', 'দ্বন্দ্বে চ' ইত্যাদৌ সর্বনামসংজ্ঞানিষেধাৎ জ্ঞায়তে যৎ দ্বন্দ্বান্তানাং সর্বাদিশব্দানামপি সর্বনামতা অস্ত্যেব। অতএবাত্র তদন্তবিধিঃ বিহিতঃ। তেন সপ্তম্যন্তাৎ সর্বনাম্নো বিধীয়মানঃ ত্রল্ সর্বনামন্তস্যাপি ভবেৎ। এবং 'পরমসর্বত্র' ইত্যত্র ত্রল্ স্যাদেব।

**যচিভম্** ( ১।৪।১৮ )—'স্বাদিষ্বসর্ব্বণামস্থানে' ইতি সম্পূর্ণং সূত্রমনুবর্ত্ততে। 'যস্মিন্ বিধিস্তদাদিঃ' ইতি পরিভাষয়া যচিপদেন যকারাদৌ অজাদৌ চ ইত্যর্থো লভ্যতে। ইদং ভসংজ্ঞাবিধায়কং সূত্রম্। তদা সূত্রস্যায়মর্থঃ—স্বাদিষু সর্ব্বনামস্থানভিন্নেষু যকারাদিষু অজাদিষু চ কপ্ প্রত্যয়াবধিষু পরেষু পূর্ব্বস্যাঃ প্রকৃতেঃ ভসংজ্ঞা ভবতি। ইয়ং ভসংজ্ঞা পদসজ্ঞায়া বাধিকা। আকড়ারাদেকা সংজ্ঞা ইতি সূত্রেণ একস্য সংজ্ঞিনঃ একৈব সংজ্ঞা বিধীয়তে। তেন ভসংজ্ঞা পদসংজ্ঞায়াঃ বাধঃ অনবকাশত্বাৎ কচিৎ সাবকাশত্বেঽপি পরত্বাৎ সংজ্ঞায়াঃ বাধ্য-বাধকভাবঃ। যথা ধনুষা বিধ্যতি ইত্যত্র ধনুশব্দস্য অবধিত্বাৎ প্রাপ্তায়াঃ অপাদানসংজ্ঞায়াঃ পরাৎ করণসংজ্ঞয়া বাধঃ ক্রিয়তে। তেন ধনুষা ইত্যত্র তৃতীয়া ভবতি। সূত্রস্যাস্য উদাহরণম্—দতঃ, দন্তশব্দস্য দ্বিতীয়া বহুবচনে দন্ত্ আদেশে কৃতে ভসংজ্ঞায়াং জশত্বং ন ভবতি পদত্বাভাবাৎ।

✓**ন লুমতাঙ্গস্য** ( ১।১।৬৩ )—'প্রত্যয়লোপে প্রত্যয়লক্ষণম্' ইতি পূর্বসূত্রমত্রানুবর্ততে। পূর্বেণাতিপ্রসক্তং প্রত্যয়লক্ষণমিতি বিশেষে প্রতিষেধ উচ্যতে। লুমতাশব্দেন লুপ্তে প্রত্যয়ে যদঙ্গং তস্য প্রত্যয়-লক্ষণং কার্যং ন ভবতি। লু ইত্যেকদেশোঽস্যাস্তীতি লুমান্—লুক্শব্দঃ শ্লুশব্দঃ লুপ্শব্দশ্চ। তেন শব্দেন প্রত্যয়লোপে বিহিতে সতি প্রত্যয়নিমিত্তকম্ অঙ্গকার্যং ন স্যাদিত্যর্থঃ। 'অঙ্গস্য' ইত্যনুক্তৌ পঞ্চ, সপ্ত ইত্যাদৌ 'সুপ্তিঙন্তম্' ইতি পদসংজ্ঞা ন স্যাৎ, জশ্শসোর্লুকা লুপ্তত্বাৎ। ততশ্চ 'ন লোপঃ প্রাতিপদিকান্তস্য' ইতি নলোপো ন স্যাৎ। অতোঽঙ্গস্য ইত্যুক্তম্। এবং চ জসি লুকা লুপ্তে প্রত্যয়লক্ষণাভাবাদ্ জসি চ' ইতি গুণো ন ভবতীত্যভিপ্রেত্য উদাহরতি—কতি, কতিভি-রিত্যাদয়ঃ।

**ময় উঞো বো বা** ( ৮।৩।৩৩ ) ময় ইতি প্রত্যাহারঃ। ময় ইতি পঞ্চমী। উঞ ইতি ষষ্ঠী। 'ঙমো হ্রস্বাদচি ঙমুণ্ নিত্যম্'

ইত্যস্ত অচীত্যনুবর্ততে। তেন ময়ঃ পরস্য উঞো বো বা স্যাদচি ইত্যর্থো লভ্যতে। উদাহরণং যথা—কিম্ উক্তম্, কিম্বুক্তম্। কিমু উক্তমিতি স্থিতে মকারাত্নকারস্য উঞো 'নিপাত একাজনাঙ্' ইতি নিত্যং প্রগৃহ্যত্বাৎ প্রকৃতিভাবাদ্ যণভাবে প্রাপ্তে সতি বত্ববচনমিদম্। যদ্যেবং তর্হি 'ইকো যণচি' ইত্যনন্তরমেব 'ময় উঞো বো বা' ইতি সূত্রং পঠনীয়ম্। বগ্রহণাভাবেন লাঘবাৎ। ত্রিপাদ্যাং পাঠে বগ্রহণস্যাপি কর্ত্তব্যত্বেন গৌরবাদিতি প্রাপ্তে উচ্যতে—যদি ষষ্ঠাধ্যায়স্য প্রথমে পাদে 'ইকো যণচি' ইত্যত্রৈব 'ময় উঞো যণাদেশবিকল্পো বিধীয়েত, তর্হি 'কিম্বুক্তম্' ইত্যত্র 'মোহনুস্বারঃ' ইতি মকারস্য বকারে পরে অনুস্বারঃ স্যাৎ। বত্বস্যাসিদ্ধত্বমেব পাণিনেরাচার্যস্য অভিপ্রেতম্। অতঃ সূত্রমিদম্ অসিদ্ধকাণ্ডে পঠিতম্। ত্রিপাদ্যাং বত্ববিধৌ তু তস্যাসিদ্ধত্বান্নানুস্বারঃ। ত্রিপাদ্যামনুস্বারবিধ্যপেক্ষয়া বত্ববিধেঃ পরত্বাদিতি ভাবঃ।

***তস্মাচ্ছসো নঃ পুংসি*** (৬।১।১০৩)—অত্র 'প্রথময়োঃ পূর্বসবর্ণঃ' ইতি পূর্বসূত্রকৃতঃ সংনিহিতঃ পূর্বসবর্ণদীর্ঘঃ তস্মাদিত্যনেন পরামৃশ্যতে। পরস্যেত্যধ্যাহার্যম্। শস ইত্যবয়বষষ্ঠী, স চাবয়বঃ পরত্বেন বিশেষ্যতে। অত্র সকার এবাবয়বো গ্রাহ্যঃ অন্যস্যাসম্ভবাৎ। তেন কৃতপূর্বসবর্ণদীর্ঘাৎ পরো যঃ শসঃ সকারস্তস্য নঃ স্যাৎ পুংসি ইত্যর্থঃ পর্য্যবস্যতি। অতঃ রামাস্ ইত্যত্র সস্য নকারে কৃতে রামান্ ইতি ভবতি। কৃতপূর্বেতি কিম্? দীর্ঘাৎ পরস্য শসবয়বস্যেত্যুক্তৌ তু এতান্ গাঃ পশ্যেত্যত্র গোশব্দাৎ শসঃ সস্যাপি ণত্বপ্রসঙ্গঃ স্যাৎ। অতঃ কৃতপূর্বসবর্ণদীর্ঘাদিত্যুক্তম্। গা ইত্যত্র চ ঔতোম্শসোরিত্যাকার একাদেশঃ, ন তু পূর্বসবর্ণদীর্ঘঃ ইতি ততঃ পরস্য ন নত্বমিতি ভাবঃ। শসঃ কিম্? রামাঃ। অত্র তু জসি সস্য নত্বং ন স্যাৎ। প্রকৃতে চ নত্বে রামান্ ইতি রূপং সিধ্যতি।

**আদেশ প্রত্যয়য়োঃ** ( ৮।৩।৫৬ )—অত্র 'অপদান্তস্য মূর্ধন্যঃ' ইত্যস্যাধিকারো বর্ততে। 'ইণ্‌কোঃ' ইত্যধিকৃতম্। 'সহেঃ সাডঃ সঃ' ইতি সূত্রাৎ 'সঃ' ইতি ষষ্ঠ্যন্তং পদমনুবর্ততে। ততশ্চ ইণ্‌কবর্গাভ্যাং পরয়োরপদান্তয়োরাদেশাত্মকপ্রত্যয়াবয়বাত্মকয়োঃ সকারয়ো মূর্ধন্যঃ স্যাদিত্যর্থঃ। অত্র আদেশস্য প্রত্যয়াবয়বস্য চ সকারস্য মূর্ধন্যঃ স্যাদিতুক্তম্। যদি আদেশ বিষয়ে অপি অবয়বষষ্ঠী প্রবর্ত্তেত অর্থাৎ আদেশাবয়বস্য সস্য ষঃ স্যাদিতুচ্যমানে তিস্রঃ তিসৃণামিত্যাদৌ ষত্বাপত্তিদুর্বারা ইতি কেবলমাদেশবচনম্। অত্র মূর্ধন্যত্বম্ ঋটুরষেষ্ববিশিষ্টম্। 'ঋ-টু-র-ষাণাং মূর্দ্ধা' ইতি বিহিতত্বাৎ। তেষাং মধ্যে বিবৃতত্বরূপাভ্যন্তরপ্রযত্নবতঃ অঘোষরূপবাহ্য প্রযত্নবতশ্চ সকারস্য তদুভয়াত্মকঃ ষকার এব ভবতি। ঋকারটকারয়োস্তু বাহ্যাভ্যন্তর প্রযত্নভেদাৎ সকারস্থানে প্রবৃত্তির্ন ইতি বিধীয়তে। উদাহরণং—যথা—রামেষু। রামশব্দাৎ সুপি 'রাম সুপ্' ইতি স্থিতে 'হলন্ত্যম্' ইত্যনেন পকারস্যেৎসংজ্ঞালোপয়োঃ কৃতয়োঃ, 'বহুবচনে ঝল্যেৎ' ইত্যেত্বে চ কৃতে 'রামে সু' ইতি জাতে প্রকৃতসূত্রেণ ষকারে 'রামেষু' ইতি সিদ্ধম্। প্রত্যুদাহরণং যথা—রামস্য। অত্র সকারস্য ষত্বং ন ভবতি ইণ্‌কবর্গাভ্যাং পরত্বাভাবাৎ।

**জরায়া জরসন্যতরস্যাম্** ( ৭।২।১০২ ) অত্র 'অষ্টন্ আ বিভক্তৌ' ইত্যতঃ 'বিভক্তৌ' ইত্যনুবৃত্তম্ 'অচি র ঋতঃ' ইত্যতোঽনুবৃত্তেন অচীত্যনেন বিশেষ্যতে। অতএব 'অচি বিভক্তৌ' ইতি জাতম্। অত উক্তম্ জরা ইত্যেতস্য জরসিত্যয়মাদেশো ভবতি, অন্যতরস্যাম্ অজাদৌ বিভক্তৌ পরতঃ। 'যস্মিন্ বিধিঃ—'ইতি তদাদিবিধিঃ। ননু জরাশব্দস্য বিধীয়মানো জরসাদেশঃ কথং নির্জরশব্দস্য ভবেদিত্যত আহ—'পদাধিকারে অঙ্গাধিকারে চ যস্য যদ্‌বিহিতং তৎ তস্য তদন্তস্য চ বোধ্যম্' ইত্যনেন জরসাদেশশ্চায়মঙ্গাধিকারস্থত্বাদ্ জরাশব্দস্য তদন্তস্য চ ভবতি। তেন নির্জর ইত্যত্রাপি 'জর' ইত্যস্য জরসাদেশঃ। ননু

জরাশব্দান্তস্য বিধীয়মানো জরসাদেশো নির্জরশব্দস্য কৃৎস্নস্য স্যাৎ অনেকাল্ত্বাদিত্যাক্ষিপ্য সমাধত্তে—'অনেকাল্ত্বাৎ সর্বাদেশে প্রাপ্তে নির্দিশ্যমানস্যাদেশা ভবন্তি' ইতি—'জরা' শব্দস্যৈব জরসাদেশঃ ন তু সর্বস্য নির্জরশব্দস্য। ননু নির্জরশব্দস্য জরাশব্দস্বরূপাভাবাৎ কথমিহ জরসাদেশঃ ইত্যত আহ—একদেশবিকৃতস্য অনন্যত্বাৎ জরশব্দস্য 'জরস্।' 'ছিন্নেঽপি পুচ্ছে শ্বা শ্বা এব ন চাশ্বো ন চ গর্দভ' ইতি ন্যায়েন 'জর' ইত্যস্য আকারহীনত্বে অপি জরাস্বরূপত্বাৎ জরসাদেশঃ স্যাদেব। তেন অজাদৌ বিভক্তৌ প্রথমাদ্বিতীয়য়োর্দ্বি-বচনে বহুবচনে চ নির্জরসৌ নির্জরস ইতি বা ভবেৎ।

***ন বহুব্রীহৌ*** ( ১।১।২৯ )—অত্র 'সর্বাদীনি সর্বনামানি' ইতি সূত্রমনুবর্ততে। চিকীর্ষিতে ইতি পদমধ্যাহরণীয়ম্। তদা সূত্র-স্যায়মর্থঃ—বহুব্রীহিসমাসে চিকীর্ষিতে সতি সর্বাদীনি সর্বনামসংজ্ঞানি ন ভবন্তি। অস্য উদাহরণম্—ত্বৎকপিতৃকঃ, মৎকপিতৃকঃ। ত্বকং পিতা যস্য, অহকং পিতা যস্য ইতি লৌকিকবিগ্রহবাক্যে যুষ্মদ্ সু পিতৃ সু, অস্মদ্ সু পিতৃ সু ইতি অলৌকিকবিগ্রহবাক্যে বহুব্রীহি-সমাসে কৃতে ত্বৎকপিতৃকঃ, মৎকপিতৃকঃ ইতি রূপং সিধ্যতি। অত্র লৌকিকবিগ্রহবাক্যে সর্বনামসংজ্ঞা ন নিষিধ্যতে। তস্যাং স্থিতৌ বহুব্রীহেঃ চিকীর্ষাভাবাৎ অলৌকিকবিগ্রহবাক্যে তু সমাসস্য চিকীর্ষিতত্বাৎ সর্বনামসংজ্ঞা নিষিধ্যতে। বহুব্রীহিসমাসে সর্বনামসংজ্ঞানিষেধস্য ন কিঞ্চিৎ ফলম্, 'সংজ্ঞোপসর্জনীভূতাস্তু ন সর্বাদয়ঃ' ইত্যনেনৈব সর্বনাম-সংজ্ঞানিষেধসিদ্ধৌ। অতএব সূত্রে চিকীর্ষিতম্ ইতি পদম্ অধ্যাহ্রিয়তে। যদি বহুব্রীহিসমাসে কৃতে সতি সর্বনামসংজ্ঞানিষেধঃ স্যাৎ তদা পূর্বং জাতস্য অকচ্ প্রত্যয়স্য সমাসেঽপি শ্রবণং প্রসজ্যেত। তৎ মা ভূৎ ইতি অলৌকিকবিগ্রহবাক্যে সর্বনামসংজ্ঞা নিষিধ্যতে। অত্র ব্যতিরেকদৃষ্টান্তমাহ—ভবকন্তম্ অতিক্রান্তঃ অতিভবকান্ ইত্যত্র ভবৎশব্দস্য পূর্বং সর্বনামসংজ্ঞাসত্ত্বেন জাতঃ অকচ্ প্রত্যয়ঃ সমাসেঽপি

শ্রূয়তে। কিন্তু সমাসে জাতে উপসর্জনত্বাৎ সর্বনামসংজ্ঞা. ন ভবতি। অতঃ অলৌকিকবিগ্রহবাক্যে সর্বনামসংজ্ঞানিষেধে ক-প্রত্যয়ে কৃতে ত্বকৎপিতৃকঃ, মকৎপিতৃকঃ ইতি রূপদ্বয়ং সিধ্যতি।

✓ ***অচ্চ ঘেঃ*** ( ৭।৩।১১৬ ) 'ঙেরাম্ নদ্যাম্নীভ্যঃ' ইত্যতঃ ঙেরিত্যনুবর্ত্ততে। 'ইদুদ্‌ভ্যাম্' ইতি 'ঔৎ' ইতি সূত্রদ্বয়স্যানুবর্ত্তনমপ্যস্ত্যত্র। তথা চ দীক্ষিতকৃতা বৃত্তিঃ—ইদুদ্‌ভ্যাম্, উত্তরস্য ঙেঃ ঔৎ স্যাৎ ঘে অন্ত্যাদেশশ্চ অকারঃ, অতঃ হরিশব্দাৎ সপ্তম্যেকবচনে হরি+ঙি ইতি স্থিতে 'শেষো ঘ্যসখি' ইতি ঘিসংজ্ঞায়াং প্রাপ্তায়াং 'ঘের্ঙিতি' ইতি গুণে প্রাপ্তে তং প্রবাধ্য অচ্চঘেঃ ইতি ঙেরৌত্বে ঘিসংজ্ঞকস্যাকারান্তাদেশে চ কৃতে, হর+ঔ ইতি স্থিতে 'বৃদ্ধিরেচি' ইতি বৃদ্ধৌ 'হরৌ' ইতি পদং সিদ্ধম্।

***এরনেকাচোঽসংযোগপূর্বস্য*** ( ৬।৪।৮২ )—'ই' রিতি শব্দস্য ষষ্ঠ্যেকবচনে এরিতি পদম্। 'এঃ' ইতি পদস্য 'ইবর্ণস্য' ইত্যর্থঃ। পূর্বসূত্রে 'শ্নুধাতুভ্রুবাম্' ইতি দ্বন্দ্বনির্দেশেঽপি 'ধাতো' রিতি পৃথক্ কৃত্য ষষ্ঠ্যন্তমনুবর্ততে। 'ইণো যণ্' ইতি সূত্রাৎ 'যণ্' ইতি পদস্য অনুবৃত্তিরস্তি! এরিতি চ ধাতোরিতি ষষ্ঠ্যন্তস্য বিশেষণম্। অনেকাচ ইতি পদম্ অঙ্গবিশেষণম্। ধাতোরিতি পদম্ 'অসংযোগপূর্বস্য' ইত্যস্য সংযোগাংশে অন্বেতি। অতঃ ফলিতোঽর্থঃ—ধাত্ববয়বসংযোগপূর্বো ন ভবতি যঃ ইবর্ণস্তদন্তো যো ধাতুস্তদন্তস্য অনেকাচোঽঙ্গস্য যণ্ স্যাদজাদৌ প্রত্যয়ে পরে। ধাত্ববয়বো যঃ সংযোগঃ সংযুক্তবর্ণঃ সঃ পূর্বো যস্মাৎ সঃ তাদৃশঃ ন ভবতি য ইবর্ণ ইত্যর্থঃ। এবং যণি সতি ঔবিভক্তৌ কুমারী ঔ ইতি স্থিতে 'অচি শ্নুধাতু—' ইত্যাদিনা প্রাপ্তমিয়ঙং বাধিত্বা অনেন সূত্রেণ 'কুমার্যৌ' ইতি। এবং কুমারী অস্ কুমার্য্যঃ।

'যস্যেতি চ' ইত্যকারলোপঃ। গৌরীত্যত্র বর্ণবাচিত্বেঽপি ফিট্স্বরেণ অন্তোদাত্তত্বাদ্ 'অন্যতো ঙীষ্' ইত্যপ্রাপ্তেরিহ বিধিঃ। অনডুহশব্দস্য গৌরাদিগণে পাঠাৎ ঙীষি প্রাপ্তে 'অনডুহঃ স্ত্রিয়াম্ আম্ বা' ইতি-বর্ত্তিকেন আমি, যণাদেশে বিভক্ত্যাদিকার্যে 'অনড্বাহী', আমভাবে 'অনডুহী' ইতি চ বোধ্যম্। গৌরাদির্যথা—গৌর, মনুষ্য, মৎস্য, শৃঙ্গ, হয়, গবয়, ঋষ্য, পট, দ্রুণ, দ্রোণ, হরিণ, কাকন, পটর ইত্যাদয়ঃ।

**অন্তর্বৎপতিবতোর্নুক্** ( ৪।১।৩২ )—অন্তর্বৎপতিবৎশব্দয়োঃ স্ত্রিয়াম্ নুগাগমঃ স্যাৎ। অত্র কিত্ত্বসামর্থ্যাদয়মাগমো ন তু প্রত্যয় ইতি ভাবঃ। 'আদ্যন্তৌ টকিতৌ' ইতি কিত্ত্বাদন্তাবয়বঃ। অন্তর্বৎ ন, পতিবৎ ন ইতি স্থিতে 'ঋন্নেভ্যো ঙীপ্' ইত্যনেন ঙীপি 'অন্তর্বত্নী' 'পতিবত্নী' ইতি রূপদ্বয়ং নিষ্পন্নম্। বিশেষমাহ বার্তিককারঃ—গর্ভিণ্যাং জীবদ্ভর্তৃকায়াং চ স্ত্রিয়াম্ 'অন্তর্বৎ' 'পতিবৎ' ইতি প্রকৃতি-ভাগৌ নুক্সন্নিযোগেন নিপাত্যেতে, তয়োর্মধ্যে 'অন্তর্বৎ' ইত্যত্র অন্তরস্ত্যস্যাং গর্ভ ইতি বিগ্রহে অপ্রাপ্তো মতুব্ নিপাত্যতে। পতিবত্নী ইত্যত্র তু পতিরস্যা অস্তীতি বিগ্রহে 'তদস্যাস্ত্যস্মিন্নিতি মতুপ্' ইতি মতুপো মকারস্য মাদুপধাৎ পরত্বাভাবেন 'মাদুপধায়াশ্চ—' ইতি বত্বমপ্রাপ্তং নিপাত্যত ইত্যর্থঃ। পতিমতী পৃথিবী ইতি হি প্রত্যুদা-হরণম্। প্রভুবিশিষ্টা পৃথিবীত্যর্থঃ। জীবদ্ভর্তৃকায়ামেব বত্বনিপাতনা-দিহ বত্বাভাব ইতি ভাবঃ।

**কর্তুরীপ্সিততমং কর্ম** ( ১।৪।৪৯ )—কারকে ইত্যনুবৃত্তং প্রথময়া বিপরিণম্যতে। ঈপ্সিততমমিত্যস্য আপ্তুমিষ্যমাণমীপ্সিত-মিত্যর্থঃ। অতিশয়েন ঈপ্সিতম্ ইতি হি সারঃ। ধাতূপাত্তব্যাপারাশ্রয়ঃ কর্তা। কেনাপ্তুমিত্যাকাঙ্ক্ষায়াং কর্তৃবিশেষণভূতব্যাপারেণ ইত্য-র্থাল্লভ্যতে। অতএব দীক্ষিতপাদৈরুক্তম্—কর্তুঃ ক্রিয়য়া আপ্তুমিষ্টতমং কারকং কর্মসংজ্ঞং স্যাৎ। সূত্রেঽস্মিন্ ঈপ্সিততমগ্রহণং

ন কর্তব্যম্। অর্থাৎ কর্তুরুদ্দেশ্যং কর্ম এতেনৈব গ্রামং গচ্ছতি, হরিং ভজতি ইত্যাদৌ কর্মসংজ্ঞাসিদ্ধিঃ। উত্তরয়তি—যদি ঈপ্সিততমগ্রহণং ন ক্রিয়তে তদা পয়সা ওদনং ভুঙ্‌ক্তে ইত্যত্র কৃতভোজনঃ বালঃ পয়োলাভার্থং তল্লোভেন যত্র ভুঙ্‌ক্তে তত্র পয়োঽপি কর্তুরুদ্দেশ্যম্। তস্মাৎ কর্মসংজ্ঞায়া আপত্তিঃ স্যাৎ। তদর্থম্ ঈপ্সিতগ্রহণং কর্তব্যম্। পয়ঃ যদ্যপি অত্র ঈপ্সিতং তথাপি ন ঈপ্সিততমম্। অতএব ন কর্মসংজ্ঞায়া আপত্তিঃ।

কিন্তু তমপ্‌গ্রহণাভাবে অগ্নেঃ মাণবকং বারয়তি ইত্যত্র অগ্নেরপি ঈপ্সিতত্বাৎ তস্মাদপি দ্বিতীয়াপত্তিঃ। যদি চ অনবকাশত্বাৎ বারণার্থানাম্ ঈপ্সিত ইত্যনেন পঞ্চমী স্ত্রয়াৎ তদা তুল্যযুক্ত্যা মাণবকাদপি পঞ্চম্যা আপত্তিঃ। তমপ্‌গ্রহণে কৃতে তু অতিশয়ে অর্থে তমপ্‌প্রত্যয়ো ভবতি। তেন অতিশায়নে ইচ্ছাবিষয়ীভূতঃ অর্থস্তু মাণবক এব। তেন কর্মসংজ্ঞা। যশ্চ ঈপ্সিতঃ অগ্নিঃ তস্য অপাদানসংজ্ঞা ইতি অগ্নিপদাৎ পঞ্চমী ইতি ব্যবস্থা সিদ্ধা ভবতি। তমব্‌গ্রহণাভাবে সা ব্যবস্থা ন স্যাদিতি দিক্।

***অকথিতং চ*** ( ১।৪।৫২ )—অপাদানাদিবিশেষৈরবিবক্ষিতং কারকং কর্মসংজ্ঞং স্যাৎ। অপাদানং সংপ্রদানম্ অধিকরণং কর্ম করণং কর্তা হেতুরিতি কারকসপ্তকম্। তদেতদ্ যদা অপাদানত্বাদিবিশেষাত্মনা ন বিবক্ষিতং কিন্তু সংবন্ধসামান্যাত্মনৈব তদা তৎকর্মসংজ্ঞকমিত্যর্থঃ। ননু তর্হি 'শত্রূন্ হন্তি রণে' ইত্যত্র অধিকরণত্বস্য অবিক্ষয়া শত্রূন্ হন্তি রণম্ ইতি ভবতু। 'নটাৎ গাথাং শৃণোতি' ইত্যত্র চ নটস্য অপাদানত্বে অবিবক্ষিতে অনেন কর্মত্বমস্তু। মা এবম্। ইয়ং সংজ্ঞা ক্বচিদেব প্রবর্ততে, ন সর্বত্র। তদুক্তম্—'দুহ্যাচ্‌পচ্‌দণ্ডরুধিপ্রচ্ছি' ইত্যাদিনা। বার্ত্তিকার্থসংগ্রহশ্লোকোঽয়ম্। "দুহাদীনাং দ্বাদশানাং তথা নীপ্রভৃতীনাং চতুর্ণাং কর্মণা যদ্ যুজ্যতে তদেবাকথিতং কর্ম" ইতি পরিগণনং কর্ত্তব্যমিত্যর্থঃ। অত্রোদাহরণম্—গাং দোগ্ধি

পয়ঃ। পয়ঃ ইতি প্রধানং কর্ম। গোঃ ইত্যপাদানস্য অবিবক্ষয়া গামিত্যপ্রধানম্। গামিতি অকথিতং কর্ম। বলিং যাচতে বসুধাম্। অত্র বসুধামিতি প্রধানং কর্ম। বলিমিত্যবিবক্ষিতমপাদানমপ্রধানম্, ইদং হি অকথিতং কর্ম। এবমন্যত্র। অর্থনিবন্ধেয়ং সংজ্ঞা। ন কেবলং দুহাদীনামেব অকথিতং কর্ম, অপি তু তৎ সমানার্থকানামপি ধাতূনাম্। তেন ভিক্ষ্‌ভাষ্‌প্রভৃতয়োঽপি দ্বিকর্মকাঃ।

✓*অভিনিবিশশ্চ* (১।৪।৪৭)—কর্ম ইত্যনুবর্ত্ততে আধারস্তু অনুবৃত্ত এব। অভিনীতি সংঘাতগ্রহণম্। অভিনীত্যেতৎসংঘাতপূর্বস্য বিশতেরাধারঃ কর্ম স্যাদিতি হি সূত্রস্যার্থঃ। অভিনিবশতে সন্মার্গম্। 'নিবিশতে যদি শূকশিখাপদে' ইত্যত্র সংঘাতগ্রহণাভাবাৎ কর্মত্বং ন। ক্বচিত্তু অভিনীত্যস্য প্রয়োগেঽপি আধারস্য কর্মত্বং ন। যথা, পাপেঽভিনিবেশঃ। অত্র 'পরিক্রয়ণে সম্প্রদানমন্যতরস্যাম্' ইতিসূত্রাৎ 'অন্যতরস্যাম্' ইতি বিকল্পবোধকস্য শব্দস্য গ্রহণমনুবর্ত্ত্য বিকল্পঃ। তর্হি অভিনিবশতে সন্মার্গম্ ইত্যত্রাপি বিকল্পঃ স্যাদিত্যত আহ— ব্যবস্থিতবিভাষাশ্রয়ণাৎ ক্বচিন্ন। 'ব্যবস্থিতায়াঃ' নির্দ্দিষ্টবিষয়ায়াঃ 'বিভাষায়াঃ' বিকল্পস্য 'আশ্রয়ণাৎ' গ্রহণাৎ, ইহ আধার এব, ইহ কর্ম এব ইতি বিষয়বিভাগকল্পনাৎ অনিষ্টং পরিহ্রিয়তে। ননু 'পরিক্রয়ণে সংপ্রদানমন্যতরস্যাম্', 'আধারোঽধিকরণম্', 'অধিশীঙ্‌স্থাসাং কর্ম' 'অভিনিবিশশ্চ' ইতি হি সূত্রক্রমঃ। তত্র 'পরিক্রয়ণে—' ইতি 'অভিনিবিশশ্চ' ইত্যেতয়োর্মধ্যে পতিতেষু 'আধারোঽধিকরণম্', ইত্যাদিষু সূত্রেষ্বপি ব্যবস্থিতবিভাষা প্রসজ্যতে। তদাহ—'মণ্ডূকপ্লুত্যা অনুবর্ত্ত্য' ইতি। মণ্ডূকা যথা মধ্যে পদানি সন্তমপ্রক্ষিপন্ত এঃ উৎপ্লুত্য গচ্ছন্তি তদ্বদনুবর্ত্ত্য ইত্যর্থঃ। 'এম্বর্থেষু অভিনিবিষ্টানাম ইতি ভাষ্যপ্রয়োগোঽত্র মানম্। তথা চ মাঘঃ—স্বহস্তদত্তে মুনিমাসনে মুনিশ্চিরন্তনস্তাবদভিন্যবীবিশৎ।

✓**অনুর্লক্ষণে** ( ১।৪।৮৪ )—লক্ষ্যলক্ষণভাবসংবন্ধে দ্যোত্যে অনুঃ কর্মপ্রবচনীয়সংজ্ঞো ভবতি। লক্ষ্যতে অনেন জ্ঞায়তে অনেনেতি লক্ষণম্, তচ্চ হেতুভূতং বিবক্ষিতম্। ন তু বৃক্ষং প্রতি বিদ্যোততে বিদ্যুদিতিবৎ চিহ্নমাত্রম্। তথা সতি 'লক্ষণেত্থম্ভূত—' ইত্যেব সিদ্ধেরিতি। গত্যুপসর্গসংজ্ঞাপবাদোঽয়ম্, কিংতু কর্মপ্রবচনীয়সংজ্ঞো ভবতি। অনেন ক্রিয়াযোগ এব কর্মপ্রবচনীয়সংজ্ঞেতি সূচিতম্। 'কর্ম-প্রবচনীয়াঃ' ইতি মহাসংজ্ঞাকরণসামর্থ্যাদন্বর্থত্বম্। কর্মপ্রবচনীয়াঃ ক্রিয়ামেব ন দ্যোতয়ন্তি কিন্তু ক্রিয়ানিরূপিত সংবন্ধবিশেষং দ্যোতয়ন্তি। এবং চ অনুপ্রত্যাদিষু ক্রিয়ানিরূপিতসম্বন্ধস্য দ্যোত্যত্বেন কর্মপ্রবচনীয়-ত্বম্। অন্যথা গত্যুপসর্গসংজ্ঞয়োঃ প্রাপ্তির্ভবতি। জপমনুপ্রাবর্ষ-দিত্যত্র কদা পর্জন্যোঽবর্ষদিতি প্রশ্নে উত্তরমিদম্। অত্র 'অনুর্লক্ষণে' ইত্যনেন কর্মপ্রবচনীয়সংজ্ঞায়াং 'কর্মপ্রবচনীয়যুক্তে দ্বিতীয়া' ইত্যনেন দ্বিতীয়ায়াং জপমনু ইতি বাক্যঘটকজপমিত্যস্য সিদ্ধিঃ। সম্বন্ধশ্চাত্র লক্ষ্যলক্ষণভাবঃ। অত্রোদাহরণে অনুনা ন ক্রিয়াবিশেষো দ্যোত্যতে, অনুভূয়তে সুখমিত্যাদৌ যথা। নাপি অনুশব্দেন সম্বন্ধ উচ্যতে দ্বিতীয়য়ৈব তস্য উক্তত্বাৎ। প্রাদেশং বিপরিলিখতি ( বিমায় পরিলিখতি ) ইত্যাদিবৎ অনুশব্দেন ইহ ক্রিয়ান্তরং ন আক্ষিপ্যতে। কিন্তু জপসম্বন্ধি বর্ষণম্ ইতি দ্বিতীয়য়া অবগতঃ সম্বন্ধঃ এব অনুনা ইহ বিশেষেণ অবস্থাপ্যতে।

✓**সাধকতমং করণম্** ( ১।৪।৪২ )—ক্রিয়াসিদ্ধৌ প্রকৃষ্টোপ-কারকং কারকং কর্মসংজ্ঞং স্যাৎ। কর্ত্রা ক্রিয়ায়াং জনয়িতব্যায়াং যৎ সহায়ভূতং তদুপকারকমিত্যুচ্যতে। সাধকতমমিতস্য ব্যাখ্যানমেতৎ। অতিশয়িতং সাধকং সাধকতমমিতি ভাবঃ। যদ্ব্যাপারানন্তরং চ ফল-নিষ্পত্তিস্তদেব প্রকৃষ্টম্। উক্তঞ্চ—"ক্রিয়ায়াঃ ফলনিষ্পত্তির্যদ্ ব্যাপারাদনন্তরম্। বিবক্ষ্যতে যদা যত্র করণং তৎ তদা স্মৃতম্॥" ইতি। বিবক্ষ্যতে ইত্যনেন স্থাল্যাদীনামপি করণত্বমস্তীতি সূচিতম্।

নমু সূত্রে অস্মিন্ 'সাধকং করণমি'ত্যেবোচ্যতাম্; কারকাধিকারাৎ ইহ কারকমিতি বর্ত্ততে। সাধকং কারকং হি পর্য্যায়ঃ। তথা চ উভয়োপাদানেন প্রকর্ষঃ লভ্যতে, প্রকৃষ্টং সাধকমিতি বিজ্ঞায়তে। অতঃ সূত্রে তমব্‌গ্রহণং ব্যর্থমিতি আহ—তমব্‌গ্রহণং কিমিতি। অত্রোচ্যতে—সত্যং বিনাপি তমপ্‌ প্রত্যয়েন করণে ইষ্টসিদ্ধিঃ কিন্তু অধিকরণে অনিষ্টপ্রসঙ্গঃ। আধারোঽধিকরণম্‌ ইত্যুক্তম্‌। আধ্রিয়তে যস্মিন্ স এব আধারঃ। স চ আধারস্ত্রিবিধঃ—ঐকদেশিকঃ, ঔপশ্লেষিকঃ, বৈষয়িকশ্চেতি। গৌণমুখ্যয়োঃ মুখ্যে এব কার্যসম্প্রত্যয়ঃ ইতি যো ন্যায়ো বিদ্যতে স এতৎসূত্রাদন্যত্র ন প্রবর্ত্ততে ইতি জ্ঞাপনায় ইহ তমব্‌গ্রহণম্‌। অন্যথা আধারোঽধিকরণমিতি সূত্রেঽপি প্রযুক্তত্বাৎ তস্মাদেব ন্যায়াৎ তিলেষু তৈলম্, দধ্নি সর্পিরিত্যাদৌ মুখ্যাধারস্যৈব অধিকরণত্বং স্যাৎ, গঙ্গায়াং ঘোষ ইত্যাদৌ লাক্ষণিকে ঐকদেশিকে চ অধিকরণতা ন জায়তে। অস্য বারণায় এব তমব্‌-গ্রহণং কৃতম্‌।

*ক্রিয়ার্থোপপদস্য চ কর্মণি স্থানিনঃ* (২।৩।১৪)—ক্রিয়ার্থা ক্রিয়া উপপদং যস্য তস্য স্থানিনোঽপ্রযুজ্যমানস্য তুমুনঃ কর্মণি চতুর্থী স্যাৎ। যথা, ফলেভ্যো যাতি ইত্যত্র ফলানি আহর্তুং যাতীত্যর্থঃ। নমস্কুর্মো নৃসিংহায় ইত্যত্র নৃসিংহমনুকূলয়িতুমিত্যর্থঃ। এবং স্বয়ংভুবে নমস্কৃত্য ইত্যত্রাপি। ক্রিয়া অর্থঃ প্রয়োজনং যস্যাঃ সা ক্রিয়া উপপদং যস্য তস্য ইত্যর্থঃ। পদস্য সমীপম্‌ উপপদমিত্যর্থঃ। অত্র যদ্যপি ক্রিয়ায়াঃ উপপদত্বং ন সম্ভবতি তথাপি স্ববাচকশব্দদ্বারা তদ্ বোধ্যম্‌। স্থানিনঃ ইত্যস্য অপ্রযুজ্যমানস্য ইত্যর্থঃ। 'যুষ্মদ্যুপপদে সমানাধিকরণে স্থানিন্যপি মধ্যমঃ' ইতি সূত্রেঽপি তথাদর্শনাৎ ইতি ভাবঃ, তুমুন্ ইতি তুমুন্নন্তস্য ধাতোরিত্যর্থঃ। তুমুন্নন্তার্থাধ্যাহারং দর্শয়তি—নৃসিংহমনুকূলয়িতুমিতি। ন চাত্র 'নমঃস্বস্তি—' ইত্যেব চতুর্থী সিদ্ধেতি বাচ্যম্‌। "উপপদবিভক্তেঃ কারকবিভক্তির্বলীয়সী" ইতি বচনাৎ। অপ্রযুক্তায়া-

স্বমুন্নন্তায়াঃ-ণ্‌লন্তায়া বা ক্রিয়ায়াঃ কর্মণি চতুর্থী স্যাদিতি চ সূত্রার্থো জাতঃ। তথা 'ণ্‌লন্তস্য উদাহরণম্—'সতঃ পালকঃ অবতরতি' ইত্যর্থে 'সদ্ভ্যঃ অবতরতি' ইতি।

***তাদর্থে চতুর্থী***—তাদর্থ্যে চতুর্থী বাচ্যা ইতি বার্ত্তিককারবচনম্। তস্মৈ কার্যায় ইদং তদর্থম্। অর্থেন নিত্যসমাসঃ। তস্য ভাবঃ তাদর্থ্যম্। ব্রাহ্মণাদিত্বাৎ ষ্যঞ্। তন্নিমিত্তমিত্যর্থঃ। তাদর্থ্য-শব্দেন উপকার্য্যোপকারকভাবসম্বন্ধঃ বিবক্ষিতঃ। যদর্থং কিঞ্চিজ্জাতঃ তত্র চতুর্থী বিভক্তির্ভবতি। হরিভজনং মুক্ত্যর্থমিতি মুক্তয়ে ইতি চতুর্থী। নিমিত্তং চ দ্বিবিধম্। তেন যৎ প্রয়োজনং প্রাপ্তুমিষ্টং তস্মাৎ চতুর্থী স্যাৎ। যচ্চ প্রয়োজনং নির্বর্তয়িতুমিষ্টং তস্মাদপি চতুর্থী স্যাৎ। উদাহরণং যথা—কুণ্ডলায় হিরণ্যম্, পিপাসায়ৈ জলমিত্যাদি।

***বারণার্থানামীপ্সিতঃ*** (১।৪।২৭)—প্রবৃত্তিবিঘাতো বারণম্ অর্থাৎ প্রবৃত্তিবিমুখাকরণং বারণম্। বারণার্থানাং ধাতূনাং প্রয়োগে ঈপ্সিতোঽর্থঃ অপাদানং স্যাৎ। যবেভ্যো গাং বারয়তি ইত্যত্র যবেষু প্রবর্তিতুকামাং গাং প্রবৃত্তিবিমুখী করোতীত্যর্থঃ। ঈপ্সিতঃ ইতি-কর্তুরীপ্সিতঃ। যবেভ্য ইত্যত্র যবা ঈপ্সিতাঃ, নোচেৎ কথং তেভ্যো বারয়তি ? গৌশ্চ ঈপ্সিতা অন্যথা কথং তামেব বারয়তি ? বারণক্রিয়াদ্বারা প্রাধান্যেন গৌরেব ব্যাপ্তা। অতএবাত্র 'কর্তুরীপ্সিতা যবাঃ, গৌস্তু ঈপ্সিততমা। তেন যবা অপাদানং, গৌস্তু কর্ম 'কর্তুরীপ্সিত-তমং কর্ম' ইত্যনেন। অগ্নের্মাণবকং বারয়তীত্যাদৌ অপি এবম্। 'ঈপ্সিতঃ' ইতি কর্মণা ঈপ্সিত ইতি ব্যাখ্যানে তু 'অগ্নের্মাণবকং বারয়তি—' 'কূপাদন্ধং বারয়তীতি' ইতি ভাষ্যোক্তমুদাহরণদ্বয়ং ন সিদ্ধম্। ভাষ্যে তু বুদ্ধি-কল্পিতসংযোগবিশ্লেষকৃতমপাদানত্বমাশ্রিত্য প্রত্যাখ্যাতমিদং সূত্রম্।

চ—কৃষ্ণস্য কৃতিঃ। জগতঃ কর্তা কৃষ্ণঃ ইতি। অত্র যথাক্রমং 'কৃষ্ণেন চক্রে' ইতি 'জগৎ চকার কৃষ্ণঃ' ইতি চ দ্বিতীয়াপবাদঃ ষষ্ঠী। গুণকর্ম ইতি অপ্রধানং কর্ম। কৃদন্তদ্বিকর্মকধাতুযোগে অপ্রধানকর্মণি ষষ্ঠী-বিকল্প ইষ্যত ইত্যর্থঃ। প্রধানকর্মণি তু নিত্যৈব ষষ্ঠী। 'অকথিতং চ' ইত্যত্র ভাষ্যে স্থিতমেতৎ। নেতা অশ্বস্য স্রুঘ্নস্য স্রুঘ্নং বা ইত্যুদাহরণে অশ্বঃ প্রধানকর্ম, স্রুঘ্নস্তু গুণকর্ম্ম ইতি জ্ঞেয়ম্। ননু ইহ ক্রিয়াযোগে কর্তৃতা কর্মতা চোপজায়তে, তৎ 'কর্তৃকর্মণোঃ' ইত্যেতাবতৈব ক্রিয়া-যোগো গম্যতে। ক্রিয়া চ ধাতৌ তিঙ্যোগাৎ কৃদ্যোগাচ্চ লভ্যতে নান্যথা। তত্র তিঙ্যোগে কটং করোতীত্যাদৌ 'ন লোকাব্যয়—' ইতি প্রতিষেধেন ভাব্যম্। ততশ্চ পরিশেষাৎ কৃদ্যোগ এব ষষ্ঠী ভবিষ্যতি। তস্মাৎ কিং কৃদ্গ্রহণেন ইতি প্রশ্নঃ। উত্তরমাহ—তদ্ধিতে মা ভূদিতি। কৃদন্তগর্ভতদ্ধিতান্তস্য অনুক্তে কর্তরি কর্মণি চ ষষ্ঠী মা ভূদিতি বোধনায় কৃদ্গ্রহণম্। অত্রোদাহরণং দর্শয়তি—কৃতপূর্বী কটমিতি।

***কৃত্যানাং কর্তরি বা*** ( ২।৩।৭১ )—কৃত্যানাং কর্তরি ষষ্ঠী বা স্যাৎ। তব্যানীয়ৌ ণ্যদ্ যৎ ক্যপ্—এতেষাং পঞ্চসংখ্যকানাং কৃত্য-প্রত্যয়ানামিত্যর্থঃ। 'অনভিহিতে' ইত্যধিকৃতমস্তি। কৃত্যপ্রত্যয়ানাং প্রয়োগে অনভিহিতে কর্তরি ষষ্ঠী বা স্যাৎ। 'কর্তৃকর্মণোঃ কৃতি' ইতি নিত্যং প্রাপ্তা ষষ্ঠী ইহ বিকল্প্যতে। উদাহরতি চ—মম সেব্যো হরিঃ ময়া বা। বিকল্পস্তু কর্তরি এব, কর্মণি নিত্যৈব ষষ্ঠী। অতঃ গেয়ঃ সাম্নাম্, ন তু সামান্যপি। ননু 'নেতব্যা ব্রজং গাবঃ কৃষ্ণেন' ইত্যত্র কৃত্যসংজ্ঞকতব্যপ্রত্যয়যোগাৎ 'উভয়প্রাপ্তৌ' ইতি বাধিত্বা কৃষ্ণাৎ ষষ্ঠীবিকল্প স্যাৎ। ব্রজাত্তু 'কর্তৃকর্মণোঃ কৃতি' ইতি নিত্যং ষষ্ঠী স্যাদিত্যত আহ—অত্র যোগো বিভজ্যত ইতি। যোগবিভাগাৎ 'কৃত্যানাম্' ইত্যেকং সূত্রম্। অনুবৃত্ত্যা সহ 'উভয়প্রাপ্তৌ ন কৃত্যানাম্' ইতি ভবতি। কৃত্যানাং যোগে কর্তা কর্ম চ উভয়ং যদি অনুক্তং

ভবতি তদা ন কর্ত্তরি ষষ্ঠী নাপি কর্মণি ইতি তস্যার্থঃ। উদাহরণে 'নেতব্যা' ইতি 'প্রধানে নীহৃকৃষ্‌বহাম্' ইতি বচনাৎ প্রধানে কর্মণি তব্যঃ। তেন 'গাবঃ' ইতি উক্তম্। 'কৃষ্ণেন' ইত্যনুক্তঃ কর্তা। ব্রজমিতি পদং চ অনুক্তগুণকর্ম। উভয়ত্রানেন ষষ্ঠীনিষেধঃ। 'নেতব্যা' ইত্যত্র যদি কৃত্যপ্রত্যয়ো ন প্রযুজ্যতে, তর্হি ব্রজং ব্রজস্য ইতি দ্বয়মপি ভবতি। 'কৃত্যানাম্' ইতি সূত্রপ্রণয়নানন্তরং 'কর্তরি বা' ইত্যংশে 'উভয়প্রাপ্তৌ ন' ইত্যস্য ন সম্বন্ধঃ। তেন কৃত্যপ্রত্যয়ানাং প্রয়োগে কর্ত্তরি ষষ্ঠী বা স্যাদিত্যর্থঃ প্রাপ্তঃ।

***পঞ্চমী বিভক্তে*** ( ২।৩।৪২ )—বিভাগো বিভক্তম্। নির্ধার্য্যমাণস্য যত্র ভেদ এব তত্র পঞ্চমী স্যাৎ ইতি দীক্ষিতবিবরণম্। বিভক্তমিতি নপুংসকে ভাবে ক্তঃ। কৃদভিহিতো ভাবো দ্রব্যবৎ প্রকাশতে ইতি বচনাৎ বিভক্তমিত্যস্য বিভাগঃ ভেদ ইত্যর্থঃ। অত্র বালমনোরমা —'নির্ধারণাবধিভূতানাং মনুষ্যাদীনাং নির্ধার্য্যমাণানাং দ্বিজানাং চ সামান্যাত্মনা অভেদো বিশেষাত্মনা ভেদশ্চ স্থিতঃ। এবঞ্চ নির্ধারণে সর্বত্র কথঞ্চিদ্ভেদস্য সত্ত্বাৎ বিভক্ত ইত্যনেন ভেদ এবেত্যর্থো বিবক্ষিতঃ।' পূর্বসূত্রাৎ 'যতশ্চ নির্ধারণম্' ইত্যনুবর্ততে। নির্ধার্য্যমাণয়োর্ভিন্নয়োঃ দ্বয়োঃ যস্মাৎ বিভাগঃ (উৎকর্ষোঽপকর্ষো বা ) বিবক্ষ্যতে। তত্র প্রাগ্‌-বিহিতয়োঃ ষষ্ঠীসপ্তম্যোরপবাদঃ পঞ্চমী স্যাদিতি সূত্রার্থঃ। পৃথক্কৃতে একদেশে সর্বত্র নির্ধারণে ভেদঃ প্রতীয়তে। যত্র তু পৃথক্করণাৎ প্রাগপি ভেদঃ এব স ইহ বিষয়ঃ। মাথুরাঃ পাটলিপুত্রকেভ্য আঢ্যতরা ইতি উদাহরণে মথুরাদেশীয়ত্বপাটলীপুত্রদেশীয়ত্বয়োঃ গোত্বাশ্বত্ববদ্বিরোধাৎ কথঞ্চিদপি তদ্রূপেণ নাভেদ ইতি নির্ধারণাবধেঃ পঞ্চমীতি ভাবঃ।

***নক্ষত্রে চ লুপি*** ( ২।৩।৪৫ )—অত্র সপ্তম্যধিকরণে চ ইত্যতো মণ্ডূকপ্লুত্যা 'অধিকরণে' ইত্যনুবর্ততে। 'নক্ষত্রে' ইতি ভাবে সপ্তমী।

নক্ষত্র ইত্যনন্তরং প্রকৃত্যর্থে সতীতি শেষঃ। লুপ্‌শব্দেন লুপ্‌সংজ্ঞয়া লুপ্তপ্রত্যয়ার্থো বিবক্ষিতঃ। নক্ষত্রবাচিনী প্রকৃতিঃ, লুপ্তস্য লুপ্‌সংজ্ঞয়া প্রত্যয়ঃ তেন যোঽর্থো জাতঃ তস্মিন্নর্থে বর্ত্তমানাৎ শব্দাৎ অধিকরণে তৃতীয়াসপ্তম্যৌ স্তঃ। অত্রোদাহরণম্—মূলেনাবহেৎ দেবীং শ্রবণেন বিসর্জয়েৎ। অত্র মূলে শ্রবণে ইতি বা। মূলেনেতি মূলনক্ষত্রযুক্ত-কাল ইত্যর্থঃ। মূলশ্রবণশব্দাভ্যাং 'নক্ষত্রেণ যুক্তঃ কাল' ইত্যণ্‌। তস্য 'লুববিশেষে' ইতি লুপ্‌। নক্ষত্র ইতি কিম্? পঞ্চালেষু তিষ্ঠতি। ইহ জনপদে লুপ্‌ ন নক্ষত্রে। তেনাত্র সপ্তম্যেব ন তৃতীয়া।

***সমর্থঃ পদবিধিঃ*** (২।১।১)—পদানাং বিধিঃ 'পদবিধিঃ' পদ-সম্বন্ধী বিধিঃ। স হি সমাসাদিঃ। পরিভাষেয়ম্। ইহ ব্যাকরণশাস্ত্রে যঃ কশ্চিৎ পদবিধিঃ শ্রূয়তে, স সমর্থাশ্রিতো বোধ্যঃ। সূত্রে সমর্থ-শব্দঃ সমর্থাশ্রিতে লাক্ষণিকঃ। বর্ণবিধৌ সন্ধৌ তু সমর্থপরিভাষা মা ভূৎ ইত্যেতদর্থং সূত্রে পদগ্রহণং কৃতম্। তথা চ তিষ্ঠতু দধ্যানয় তক্রম্ ইত্যত্র সংহিতায়াং সামর্থ্যাভাবেঽপি যণ্‌ স্যাদেব। পশ্যতি কৃষ্ণং শ্রিতো দেবদত্তমিত্যত্র তু কৃষ্ণশ্রিত ইতি সমাসো ন স্যাৎ সামর্থ্যাভাবাৎ। সমর্থ ইত্যত্র অর্থশব্দঃ প্রয়োজনপরঃ। তুল্য-প্রয়োজন ইতি যাবৎ। 'রাজ্ঞঃ পুরুষ' ইতি রাজস্বামিকং কঞ্চিৎ পুরুষং বোধয়তি। অত্র 'রাজ্ঞ' ইতি পদং যথা সপ্রয়োজনং পুরুষ ইত্যপি তথা। শব্দদ্বয়স্য তুল্যপ্রয়োজনম্, তৌ চ পরস্পরসাপেক্ষৌ। এবং সমর্থো হি সাপেক্ষঃ। সমর্থস্য ভাবঃ সামর্থ্যং, সাপেক্ষতা ব্যপেক্ষা ইতি পর্য্যায়বচনানি। সামর্থ্যমিহ দ্বিবিধম্—ব্যপেক্ষাভিধম্ একার্থী-ভাবলক্ষণঞ্চ। স্বার্থে পর্য্যবসায়িনাং পদানাম্ আকাঙ্ক্ষাযোগ্যতা-সত্তিবশাৎ যঃ পরস্পরসম্বন্ধঃ তদ্ ব্যপেক্ষাভিধং সামর্থ্যম্। বিশিষ্টা অপেক্ষা ব্যপেক্ষা; সম্বন্ধার্থঃ সমর্থ ইতি বুৎপত্তেঃ। অপেক্ষায়াং সত্যাং যো যঃ সন্নিহিতো যোগ্যশ্চ তেন তেন সম্বন্ধো ব্যপেক্ষয়া অভ্যুপেয়তে। ইদঞ্চ সামর্থ্যং বাক্যে এব ভবতি। যথা, রাজ্ঞঃ পুরুষ ইত্যত্র রাজ্ঞ

ইত্যুক্তে রাজ্ঞঃ কিমিতাকাঙ্ক্ষায়াং সন্নিহিতো যোগ্যশ্চ শব্দঃ পুরুষ ইত্যনেন অন্বয়ো ভবতি। এবঞ্চ, রাজ্ঞঃ পুরুষঃ অশ্বশ্চ ইত্যত্র বাক্যে। একার্থীভাবলক্ষণসামর্থ্যন্তু প্রক্রিয়াদশায়াং পৃথগর্থবত্ত্বেন গৃহীতানাং পদানাং সমুদায়শক্ত্যা বিশিষ্টৈকার্থপ্রতিপাদকতারূপম্। সঙ্গতার্থঃ সমর্থঃ সংশ্লিষ্টার্থঃ সমর্থ ইতি বা ব্যুৎপত্তেঃ। একীভূত ইত্যর্থঃ। ইদং চ সামর্থ্যং রাজপুরুষ ইত্যাদিবৃত্তাবেব। অতএব রাজপুরুষ ইত্যত্র রাজ্ঞি ঋদ্ধস্য ইতি বিশেষণং ন অন্বেতি রাজশব্দস্য তত্র পদার্থৈক-দেশত্বাৎ। তথাহি রাজপুরুষমানয় ইত্যুক্তে ন কেবলং রাজানম্ আনয়তি ন বা কেবলং পুরুষম্ পরন্তু রাজাধীনপুরুষবিশেষমানয়তীতি বিশিষ্টোঽর্থঃ প্রতিপাদ্যতে।

**সহসুপা** ( ২।১।৪ )—'সুবামন্ত্রিতে' ইত্যতঃ 'সুপ্' ইত্যনুবর্ততে। সুবন্তেন সহ সমর্থং সমস্যতে। তথাহি ভূতপূর্ব্ব ইত্যত্র পূর্ব্বং ভূত ইতি লৌকিকবিগ্রহে পূর্ব্ব অম্ ভূত সু ইতি অলৌকিকবিগ্রহে চ পূর্ব্বম্ ইতি সমর্থং ভূত ইতি সুবন্তেন চ সহ সমস্যতে। সমাসত্বাৎ কৃত্তদ্ধিতসমাসাশ্চ ইত্যনেন প্রতিপাদিকসংজ্ঞায়াং 'সুপো ধাতুপ্রাতি-পাদিকয়োঃ' ইত্যনেন প্রতিপাদিকাবয়বস্য সুপো লুকা অম্ ইত্যস্য সু ইত্যস্য চ লোপে পুনঃ একদেশবিকৃতমনন্যবৎ ইতি ন্যায়েন সমুদায়াৎ সুপ্ উৎপদ্যতে। 'ভূতপূর্ব্বে চরট্' ইতি নির্দেশাৎ ভূতশব্দস্য পূর্ব্ব-নিপাতশ্চ ভবতি। সহ ইতি যোগো বিভজ্যতে। তেন কচিৎ তিঙন্তেনাপি সহ সমস্যতে যথা অনুব্যচলৎ ইত্যাদি। অত্র বি—শব্দস্য 'অচলৎ' ইত্যনেন, ততো অনুশব্দস্য ব্যচলৎ ইত্যনেন সম্বন্ধঃ। 'সহ' ইতি যোগো বিভজ্যতে চেৎ 'সুপা' ইতি শিষ্যতে। ততোঽনুবৃত্ত্যা সহ জাতং—সুপ্ সুপা সমস্যতে ইতি। সুবন্তং পদং সমর্থেন সুবন্তেন সহ সমস্যতে ইত্যর্থঃ। 'সুপ্' ইত্যেকবচনং 'সুপা' ইতি চ একবচনম্। তেন একমেব পদমেকনৈব পদেন সমস্যতে ইতি বহূনাং সমাসো

প্রায়েণ ন। দ্বন্দ্ববহুব্রীহ্যোস্তু 'অনেকম্' ইতি বিশিষ্যোক্তেঃ বহুপদত্বং ন দোষায়।

***চতুর্থী তদর্থার্থবলিহিতসুখরক্ষিতৈঃ*** ( ২।১।৩৬ )—সূত্রেঽস্মিন্ 'প্রাক্‌কড়ারাৎ সমাসঃ' ইতি সূত্রাৎ সমাস ইতি পদম্ অধিক্রিয়তে। সমর্থঃ পদবিধিঃ ইত্যস্য অধিকারঃ, তৎপুরুষ ইত্যস্য চাধিকারঃ। তদা সূত্রস্যায়মর্থঃ—চতুর্থ্যন্তং যৎ সুবন্তং সমর্থং তদর্থে বাচকেন সুবন্তেন সমর্থেন সহ সমস্যতে। তাদর্থ্যঞ্চ উপকার্য্যোপকারকভাবঃ প্রকৃতিবিকৃতিভাবশ্চ। অস্মিন্ সূত্রে কেবলং প্রকৃতিবিকৃতিভাবরূপে তাদর্থ্যে চতুর্থীতৎপুরুষসমাসো ভবতি। অস্যোদাহরণম্—যূপায় দারু যূপদারু, হারায় সুবর্ণম্ হারসুবর্ণম্। ব্রাহ্মণায় দধি ইত্যাদৌ ন সমাসঃ, উপকার্য্যোপকারকভাবরূপস্য তাদর্থ্যস্য সত্ত্বাৎ। অত্র চ জ্ঞাপকম্—অস্মিন্ সূত্রে বলিরক্ষিতগ্রহণম্। অন্যথা ভূতেভ্যঃ বলিঃ ভূতবলিঃ ইত্যাদৌ তাদর্থ্যেনৈব সমাসসিদ্ধৌ তদ্‌গ্রহণং ব্যর্থমেব স্যাৎ। এবং চতুর্থ্যন্তং সুবন্তং সমর্থম্ বলিহিতসুখরক্ষিতপ্রকৃতিকসুবন্তৈঃ সহ সমস্যতে।

***অর্দ্ধং নপুংসকম্*** ( ২।২।২ )—খণ্ডবাচী অর্দ্ধশব্দো ন নিত্যনপুংসকঃ, গ্রামার্ধো নগরার্ধ ইতি যথা। সমাংশবাচী অর্দ্ধশব্দস্তু নিত্যনপুংসকঃ, স এবেহ গৃহ্যতে। নিত্যনপুংসকলিঙ্গঃ অর্ধশব্দঃ অবয়ববাচিনা সমস্যত ইত্যর্থঃ সূত্রস্য। অর্ধং পিপল্যা ইতি বাক্যে অর্ধং প্রধানং পিপ্পলীত্যপ্রধানমুপসর্জনম্। শাস্ত্রতশ্চ অর্ধং পিপ্পল্যাস্তিষ্ঠতি, অর্ধং পিপ্পল্যা ভুঙ্‌ক্তে, অর্ধেন পিপ্পল্যাস্তৃপ্যতি ইত্যাদিষু পিপ্পলীশব্দে নিত্যষষ্ঠীদর্শনাৎ নিয়তবিভক্তিকতয়া 'একবিভক্তি চাপূর্বনিপাতে' ইতি তস্য উপসর্জনত্বমেব। ততঃ সমাসে 'গোস্ত্রিয়োঃ—' ইতি হ্রস্বত্বে অর্ধপিপ্পলিঃ। তত্র ভট্টোজিরাহ—'একবিভক্তাবষষ্ঠ্যন্তবচনম্' ইতি। অর্থাৎ 'একবিভক্তি চাপূর্বনিপাতে' ইতি সূত্রে অষষ্ঠ্যন্তমিতি বক্তব্যম্।

ততশ্চ পিপ্পলীশব্দস্য ষষ্ঠ্যন্তত্বান্নোপসর্জনত্বমিতি ন হ্রস্বত্বমিত্যর্থঃ। নম্বেবং সতি পঞ্চানাং খট্বানাং সমাহারঃ, সমাহারং সমাহারেণ— ইত্যাদি বিগ্রহবাক্যেষু খট্বাশব্দস্য নিয়তবিভক্তিকত্বেঽপি ষষ্ঠ্যন্তত্বাৎ অনুপসর্জনত্বাৎ 'গোস্ত্রিয়োঃ—' ইতি হ্রস্বাভাবে অদন্তত্বাভাবেন 'দ্বিগোঃ' ইতি ঙীবভাবে পঞ্চখট্বেতি স্যাৎ, ন তু পঞ্চখট্বীতি। তত্র পুনরাহ— একদেশিসমাসবিষয়কোঽয়মুপসর্জনসংজ্ঞানিষেধঃ। পঞ্চানাং খট্বানাং সমাহার ইত্যত্র তু দ্বিগুসমাসে নায়ং নিষেধাধিকারঃ প্রাপ্তঃ, তেন পঞ্চখট্বীতি সিধ্যতি।

***তত্রোপপদং সপ্তমীস্থম্*** (৩।১।৯২)—অত্র ধাতোরিতি পূর্ব-সূত্রাধিকারোঽনুবর্ততে। সূত্রস্থং তত্রেতি পদং বিভজ্য ভিন্নং বাক্যং ক্রমব্যত্যাসেন যোজ্যম্। সপ্তমীতি তদন্তগ্রহণম্। সপ্তম্যন্তে পদে বাচ্যবাচক-ভাবসম্বন্ধেন তিষ্ঠতীতি-সপ্তমীস্থম্। সপ্তম্যন্তবাচ্যমিতি যাবৎ। ধাতোরিত্যধিকারসূত্রাদুত্তরসূত্রমিদম্। ততশ্চ তদধিকারান্তর্গতেষু 'কর্মণ্যণ্' ইত্যাদিসূত্রেষু যৎ সপ্তম্যন্তমুচ্চারিতং তদেবেহ বিবক্ষিতম্। তথা চ ধাতোরিত্যধিকারান্তর্গতে 'কর্মণি' ইত্যাদিসূত্রেষু যৎ সপ্তম্যন্ত্যং কর্মণীত্যাদি তদ্বাচ্যং যৎ কুম্ভাদি তদ্বাচকং পদমুপপদসংজ্ঞকং স্যাদিত্যধিকৃতং বেদিতব্যম্। পদং হি দ্বিবিধম্। সুবন্তং তিঙন্তঞ্চ। উপ (সমীপে) উচ্চারিতং পদমুপপদম্। সামীপ্যঞ্চ অন্বয়কৃতম্। যস্য প্রত্যয়ার্থেন অন্বয়স্তদুপপদম্। তচ্চ তস্মিন্ প্রত্যয়ে সমর্থম্। তস্মিংশ্চ সপ্তম্যন্তবাচ্যে উপপদে সতি অণ্ প্রত্যয়ঃ স্যাদিতি কর্মণ্যণ ইত্যত্র ইদং সূত্রমুপস্থিতম্। তত্র কর্মণীত্যত্র সপ্তমীনির্দেশস্তু উপপদসংজ্ঞাপ্রবৃত্ত্যর্থঃ। অতএব কর্মণীতি সপ্তম্যন্তং প্রথমান্তত্বেন বিপরিণম্যতে। তস্য চ বাচ্যরূপেণ স্থিতং কর্মবাচকং যৎ কুম্ভাদিপদং তদেব উপপদসংজ্ঞং প্রত্যেতব্যম্। তস্মিংশ্চ উপপদে সত্যেব অণ্ স্যাদিতি ফলতি। তস্মিন্ সত্যেব অণ্ স্যাদিত্যভাবে তু কার ইত্যেবং কেবলাদপি ধাতোঃ কর্তরি অর্থে অণ্ প্রত্যয়ঃ স্যাৎ। তৎ

প্রতিষেধার্থমেব তত্রেতি ভিন্নগ্রহণম্। তদসতি অস্মিন্নুপপদে এষঃ প্রত্যয়ো ন স্যাৎ।

***রাত্রাহ্নাহাঃ পুংসি*** (২।৪।২৯)—অত্র সূত্রে দ্বন্দ্বতৎ—পুরুষয়োরিত্যনুবৃত্তং প্রথমাবহুবচনেন বিপরিণতং রাত্রাদিভির্বিশেষ্যতে। তদন্তবিধিরয়ম্। রাত্রিশব্দান্তাৎ তৎপুরুষাৎ দ্বন্দ্বাচ্চ সমাসান্তে অচি প্রত্যয়ে কৃতে কৃচিৎ সমাসাঙ্গস্য 'রাত্র' ইতি রূপম্। অহন্-শব্দান্তাৎ তৎপুরুষাৎ টচি প্রত্যয়ে 'অহ' ইতি 'অহ্ন' ইতি বা। তদা তু সমাসঃ পুংসি প্রযুজ্যতে ইতি সূত্রস্যার্থো জাতঃ। পরবল্লিঙ্গতাপবাদোঽয়ম্। অতএব পরবল্লিঙ্গতায়াং রাত্র্যন্তস্য স্ত্রীত্বম্ অহন্নন্তস্য চ ক্লীবত্বমিতি হেতোরিদং বচনম্। ননু অহশ্চ রাত্রিশ্চ ইতি সমাহারদ্বন্দ্বে 'স নপুংসকম্' ইতি নপুংসকত্বপ্রসঙ্গঃ। ন চ নপুংসকত্বস্যাপ্যয়ং পুংস্ত্ব-বিধিরপবাদ ইতি বাচ্যম্, যতঃ 'পুরস্তাদপবাদা অনন্তরান্ বিধীন্ বাধন্তে নোত্তরান্' ইতি ন্যায়েন—'রাত্রাহ্নাহাঃ পুংসি' ইতি পুংস্ত্ববিধিঃ পরবল্লিঙ্গতামাত্রস্যৈব অপবাদঃ, ন তু নপুংসকত্বস্য, নোত্তরান্ ইত্যুক্তেঃ। অথ 'স নপুংসকমিতি' 'রাত্রাহ্নাহাঃ পুংসি' ইতি সূত্রদ্বয়স্য তুল্যবল-বিরোধে 'বিপ্রতিষেধে পরং কার্য্যমিতি' পরিভাষয়া অহোরাত্র ইতি পুংস্ত্বমেব। অতএবোক্তম্—অয়ং পরত্বাৎ সমাহারনপুংসকতাং বাধতে ইতি। অহোরাত্র ইত্যত্র অহশ্চ রাত্রিশ্চ ইতি দ্বন্দ্বসমাসঃ। 'অহঃ সর্বৈকদেশ—' ইত্যনেনাচ্প্রত্যয়ঃ। পূর্বরাত্র ইত্যত্র রাত্রেঃ পূর্বমিতি একদেশিতৎপুরুষঃ, প্রাগ্বদচ্।

***শেষো বহুব্রীহিঃ*** (২।২।২৩)—এতদধিকারসূত্রম্। অনেকমন্য-পদার্থে ইত্যস্মিন্ বহুব্রীহিবিধায়কে সূত্রে এতদধিকারসূত্রমাগচ্ছতি। উক্তাদন্যঃ শেষঃ। যত্র অন্যঃ সমাসো নোক্তঃ স শেষ ইতি বৃত্তিকারাঃ। যেষাং পদানাং যস্মিন্ অর্থে অব্যয়ীভাবাদিসংজ্ঞকঃ সমাসো ন বিহিতঃ স শেষ ইত্যর্থ ইতি হরদত্তস্য মতম্। 'দ্বিতীয়াশ্রিত ..' ইত্যাদিনা

সূত্রেণ দ্বিতীয়াতৎপুরুষবিধানাৎ, 'তৃতীয়াতৎকৃত…' ইত্যনেন তৃতীয়াতৎপুরুষবিধানাৎ, এবং 'চতুর্থী তদর্থ…' ইত্যাদিনা চতুর্থীতৎপুরুষবিধানাৎ, 'পঞ্চমী ভয়েন' ইতি পঞ্চমীতৎপুরুষবিধানাৎ, 'ষষ্ঠী' ইতি—ষষ্ঠীতৎপুরুষবিধানাৎ, 'সপ্তমী শৌণ্ডৈঃ' ইত্যনেন সপ্তমীতৎপুরুষবিধানাৎ দ্বিতীয়াদিবিভক্তীনাং ষণ্ণাং সমাসো বিহিতঃ। তত্র দ্বিতীয়াদ্যা বিভক্তয়ো বিশিষ্য সমাসসূত্রে উক্তাঃ। অনুক্তা প্রথমা, সৈব শেষঃ। ননু বিশেষণং বিশেষ্যেণ ইত্যাদিনা তু প্রথমায়া অপি সমাসো বিহিতঃ। অতঃ শেষবিভক্তির্দুর্লভা ইতি আশঙ্কায়ামুক্তম্—বিশেষণসমাসস্য বস্তুতঃ প্রথমাবিভক্তৌ প্রবৃত্তৌ অপি প্রথমাবিভক্তিং বিশিষ্য উচ্চার্য্য বিধানাভাবাৎ সমাসবিধিষু বিশিষ্যনির্দিষ্টদ্বিতীয়াদিবিভক্তিষট্‌কাপেক্ষয়া প্রথমাবিভক্তিঃ শেষ ইতি ভাবঃ। তদাহ—শেষঃ প্রথমান্তমিত্যর্থঃ। সূত্রস্যায়মর্থঃ—অন্যপদার্থে বিদ্যমানং যৎ অনেকং প্রথমান্তং সুবন্তং সমর্থম্ তৎ সমাসসংজ্ঞকো ভবতি, স চ বহুব্রীহিঃ। তদুক্তং মূলে—অপ্রথমাবিভক্ত্যর্থে বহুব্রীহিরিতি যাবৎ। অস্যোদাহরণম্-প্রাপ্তঃ আনন্দঃ যেন স প্রাপ্তানন্দঃ। ঊঢ়ো রথো যেন স ঊঢ়রথঃ। ঊঢ়রথঃ অনড্বান্।

*শেষাদ্বিভাষা* (৫।৪।১৫৪)—অনুক্তসমাসান্তাৎ শেষাধিকারস্থাৎ বহুব্রীহেঃ কপ্ বা স্যাৎ। ইতঃ পূর্বং যেভ্যঃ সমাসান্তা বিহিতাঃ তেভ্যোঽন্যঃ শেষঃ। শেষাদিত্যনেন শেষাধিকারস্থাদিত্যপি বিবক্ষিতম্ ইতি ভাবঃ। মহাযশস্ক ইত্যুদাহরণং মহৎ যশঃ যস্যেতি বিগ্রহে, 'আন্মহতঃ…' ইত্যনেন আত্বে, কপ্ প্রত্যয়েন সিদ্ধম্। 'সোঽপাদাদৌ' ইত্যনেন সত্বম্। মহাযশাঃ ইত্যত্র কপ্ প্রত্যয়ো ন, 'অত্বসন্তস্য…' ইত্যনেন দীর্ঘঃ। ব্যাঘ্রপাৎ ইত্যত্র প্রথমান্তয়োঃ সমাসঃ, তদয়ং শেষাধিকারস্থঃ সমাসান্তস্তু বিহিত এবাস্মাৎ 'লোপঃ' ইতি। তদত্র ন কপ্ প্রত্যয়ঃ। 'উপবহবঃ' ইত্যত্র ন কশ্চিৎ সমাসান্তো বিহিতঃ। ন পুনরয়ং শেষাধিকারস্থঃ, অতো ন কপ্ প্রত্যয়ঃ। অত্র সূত্রে একৈব

আবৃত্তিঃ শেষশব্দস্য, কিন্তু দ্বৌ অর্থৌ যুগপদাগতৌ। তদুক্তম্—তন্ত্রাদিনা শেষশব্দোঽর্থদ্বয়পরঃ, একমনেকোপযোগি তন্ত্রম্। আদিপদেন আবৃত্তিসংগ্রহঃ।

**পরবল্লিঙ্গং দ্বন্দ্বতৎপুরুষয়োঃ** (২।৪।২৬)—সমাহারদ্বন্দ্বস্য নপুংসকলিঙ্গতা বিশেষেণ উক্তা। তদত্র দ্বন্দ্বপদম্ ইতরেতরযোগদ্বন্দ্বপরম্। তস্য উভয়পদার্থপ্রধানতাহেতোঃ ভিন্নলিঙ্গদ্বয়স্য সমাসে অনিয়তং লিঙ্গমেব ভবতি। অতএব নিয়মকরণার্থম্ এতয়োঃ লিঙ্গং পরপদস্যেব ভবতীতি। অত্রোদাহরণম্—কুক্কুটময়ূর্যৌ। অত্র পরপদম্ (ময়ূরীপদম্) আশ্রিত্য সমাসস্য লিঙ্গং বিহিতম্। যদা তু ময়ূরীকুক্কুটৌ ইতি পদং ভবতি তদা তু কুক্কুটশব্দমাশ্রিত্যৈব লিঙ্গম্। উত্তরপদপ্রধানস্তৎপুরুষঃ, তেন বৃক্ষশাখা ইত্যাদিষু উদাহরণেষু স্ত্রীত্বাদিকং লব্ধম্। একদেশিতৎপুরুষস্য তু পূর্বপদার্থপ্রধানতয়া পূর্বপদলিঙ্গে প্রাপ্তে উত্তরপদলিঙ্গার্থঃ বিধিঃ। অত্রোদাহরণম্—অর্ধপিপ্পলীতি। দ্বিগু, প্রাপ্ত, আপন্ন, অলম্পূর্ব, গতি সমাস—এতেষু পরবল্লিঙ্গস্য প্রতিষেধো বক্তব্যঃ বার্তিককারবচনাৎ। তেন পঞ্চসু কপালেষু সংস্কৃতঃ পঞ্চকপালঃ পুরোডাশঃ। এতদ্ধি দ্বিগোরুদাহরণম্। এবমন্যত্র।

**শুভ্রাদিভ্যশ্চ** (৪।১।১২৩)—অপত্যার্থে শুভ্র ইত্যেবমাদিভ্যঃ প্রাতিপদিকেভ্যো ঢক্ প্রত্যয়ো ভবতি। যথাযোগমিঞাদীনামপবাদঃ। শুভ্রস্যাপত্যং শৌভ্রেয়ঃ। অত্র সূত্রে 'ঢক্চ মণ্ডূকাৎ' ইতি সূত্রাৎ ঢগিতি পদমধ্যাহার্যম্। চকারোঽনুক্তসমুচ্চয়ার্থ আকৃতিগণতামস্য বোধয়তি—গাঙ্গেয়ঃ, পাণ্ডবেয় ইত্যেবমাদি সিদ্ধং ভবতি। শৌভ্রেয়প্রভৃতিষু অস্ত্রীত্বাদপ্রাপ্তৌ ঢগিতি ভাবঃ।

# পদসাধনানি

*লাকৃতিঃ*—ল৯ আকৃতিঃ ইতি স্থিতে 'ইকো যণচি' ইত্যনেন দন্তস্থানসাম্যাৎ ল৯বর্ণস্য লকারে লাকৃতিরিতি সিদ্ধম্। লাকৃতিরিত্যত্র ল৯বর্ণে তু বকারো লকার শ্চেত্যুভয়মপি প্রাপ্তম্। অত্র শব্দপরবি-প্রতিষেধমাশ্রিত্য লকারবিধিঃ পরত্বাদ্ অপবাদত্বাচ্চ বকারবিধিং বাধতে। যদি হি প্রথমাতিক্রমে কারণাভাবাদ্ অত্রাপি বকার এব স্যাৎ, তর্হি লকারবিধি র্নিরবকাশ এব স্যাৎ। অতোঽত্র ল৯বর্ণস্য লকার এব ইত্যাস্তাং তাবৎ।

*গব্যূতিঃ*—যুধাতোরধিকরণে ক্তিন্ প্রত্যয়ে কৃতে 'ঊতিযূতি—' ইত্যনেন নিপাতনদীর্ঘে 'যূতিঃ' ইতি পদং সিদ্ধম্। 'গোর্যূতৌ ছন্দস্যুপ-সংখ্যানম্' ইত্যনেন বান্তাদেশে গব্যূতিরিতি। অত্র হি অস্য গোচারণ-ভূমিরিত্যর্থঃ। 'বান্তো যি প্রত্যয়ে' ইত্যনেনাত্র বান্তাদেশস্তু ন, যূতিশব্দস্য প্রত্যয়ত্বাভাবাৎ।

*বিষ্ণবে*—বিষ্ণো+এ ইতি অবস্থায়াং 'যথাসংখ্যমনুদেশঃ সমানাম্' ইতি জ্ঞাপকাৎ 'এচোঽয়বায়াবঃ' ইত্যনেন ওকারস্য অবাদেশে প্রাপ্তে বিষ্ণবে ইতি পদং সিদ্ধম্

*গব্যম্*—গোর্বিকারো গব্যম্। বিকারে গম্যে যৎ। গো+যম্ ইতি স্থিতে ওকারস্য অচ্পরকত্বাভাবাৎ 'এচোঽয়বায়াব' ইত্যপ্রাপ্তে 'বান্তো যি প্রত্যয়ে' ইত্যনেন অবাদেশে জাতে উক্তং রূপং সিদ্ধম্।

=পুঁ + ঃ + কোকিলঃ—খরবসানয়োর্বিসর্জনীয়ঃ।
=পুঁ + স্ + কোকিলঃ—সম্পুংকানাং সো বক্তব্যঃ।
=পুঁস্কোকিলঃ।
(২) পুম্ + কোকিলঃ।
=পু + রু + কোকিলঃ—পুমঃ খয্যম্পরে।
=পুং + রু + কোকিলঃ—অনুনাসিকাৎ পরোঽনুস্বারঃ।
=পুং + র্ + কোকিলঃ—উপদেশেঽজনুনাসিক ইৎ।
=পুং + ঃ + কোকিলঃ—খরবসানয়োর্বিসর্জনীয়ঃ।
=পুং + স্ + কোকিলঃ—সম্পুংকানাং সো বক্তব্যঃ।
=পুংস্কোকিলঃ।]

**সংস্কর্তা**—'সম্ + কর্তা' ইতি দশায়াং 'সম্পরিভ্যাং করোতৌ ভূষণে' ইতি সুটি অনুবন্ধলোপে 'সমস্কর্তা' ইতি জাতে 'সমঃ সুটি' ইতি সূত্রেণ সুট্সম্বন্ধিসকারে পরে সমো মকারস্য রুত্বে অনুবন্ধলোপে 'সর্স্কর্তা' ইতি জাতে 'অত্রানুনাসিকঃ পূর্বস্য তু বা' ইত্যনেন সকারোত্তরাকারস্যানুনাসিকে, 'খরবসানয়োর্বিসর্জনীয়ঃ' ইতি রেফস্য বিসর্গে, 'বিসর্জনীয়স্য সঃ' ইতি বিসর্গস্য সত্বে প্রাপ্তে তম্ প্রবাধ্য 'বা শরি' ইতি বিসর্গস্য বিসর্গে প্রাপ্তে তমপি প্রবাধ্য 'সম্পুংকানাং সো বক্তব্যঃ' ইতি বিসর্গস্য সত্বে সিদ্ধং রূপং 'সঁস্স্কর্তা' ইতি। অনুনাসিকাভাবপক্ষে 'অনুনাসিকাৎপরোঽনুস্বারঃ' ইতি অনুস্বারে 'সংস্স্কর্তা' ইতি।

[ **অন্বয়ক্রম** ঃ—সম্ + কর্তা
=সম্ + সুট্ + কর্তা—সম্পরিভ্যাং করোতৌ ভূষণে।
=সম্ + স্ + কর্তা—(অনুবন্ধলোপঃ)।—হলন্ত্যম্।
=স + রু + স্ + কর্তা—সমঃ সুটি।
=সং + রু + স্ + কর্তা—অনুনাসিকাৎপরোঽনুস্বারঃ।

=সং+র্+স্+কর্তা—উপদেশেঽজনুনাসিক ইৎ।
=সং+ঃ+স্+কর্তা—খরবসানয়োর্বিসর্জনীয়ঃ।
=সং+স্+স্+কর্তা—সম্পুংকানাং সো বক্তব্যঃ। ]
=সংস্স্কর্তা। ]

**শিবচ্ছায়া**—'শিব+ছায়া' ইতি দশায়াং 'ছে চ' ইত্যনেন তুগাগমে অনুবন্ধলোপে 'শিব ত্ ছায়া' ইতি স্থিতে শ্চুত্বস্যাসিদ্ধত্বাৎ ঝলাং জশোঽন্তে' ইতি তকারস্য জশ্ত্বেন দকারে কৃতে চর্ত্বস্যাসিদ্ধত্বাৎ 'স্তোঃ শ্চুনা শ্চুঃ' ইতি দস্য শ্চুত্বেন জকারে ততঃ 'খরি চ' ইতি জস্য চর্ত্বে শিবচ্ছায়া ইতি।

[ **অয়ংক্রমঃ**—শিব+ছায়া
=শিব+তুক্+ছায়া—ছে চ।
=শিব+তু+ছায়া—হলন্ত্যম্।
=শিব+ত্+ছায়া—উপদেশেঽজনুনাসিক ইৎ।
=শিব+দ্+ছায়া—ঝলাং জশোঽন্তে।
=শিব+জ্+ছায়া—স্তোঃ শ্চুনা শ্চুঃ।
=শিব+চ্+ছায়া—খরি চ।
=শিবচ্ছায়া। ]

✓**আচ্ছাদয়তি**—'আ+ছাদয়তি' ইতি দশায়াং 'পদান্তাদ্বা' ইতি তুকি প্রাপ্তে তম্ প্রবাধ্য 'আঙ্মাঙোশ্চ' ইতি তুকি অনুবন্ধলোপে, 'ঝলাং জশোঽন্তে' ইতি তকারস্য জশ্ত্বেন দকারে কৃতে চর্ত্বস্যাসিদ্ধত্বাৎ 'স্তোঃ শ্চুনা শ্চুঃ' ইতি দস্য শ্চুত্বেন জকারে ততঃ 'খরি চ' ইতি চর্ত্বে চুত্বস্যাসিদ্ধত্বাৎ কৃত্বাভাবে উক্তং রূপং সিদ্ধম্।

[ **অয়ংক্রমঃ**- আ+ছাদয়তি।
=আ+তুক্+ছাদয়তি- আঙ্মাঙোশ্চ।

**সন্ত্সঃ**—'সন্ সঃ' ইতি স্থিতে 'নশ্চ' ইত্যনেন নকারান্তাৎ পরস্য সস্য ধুটি ধস্য চত্বে 'সন্ত্সঃ' ইতি। ধুডভাবপক্ষে তু 'সন্সঃ' ইতি।

**প্রৌঢ়বান্**—প্র + ঊঢ়বান। 'বহ্ প্রাপণে' ইতি ধাতোঃ ক্তবতু—প্রত্যয়ে কৃতে ঊঢ়বান্ ইতি। 'হোঢ়ঃ' ইতি ঢ়ত্বম্। প্র + ঊঢ়বান্ ইতি স্থিতে 'আদ্‌গুণঃ' ইত্যনেন গুণে প্রাপ্তে বিভক্তিকার্যে প্রোঢ়ব ন্ ইতি। অত্র 'প্রাদূহোঢ়োঢ্যৈষৈষ্যেষু' ইত্যনেন বার্ত্তিকেন প্রৌঢ়াদিশব্দবৎ বৃদ্ধিঃ ন,'অর্থবদ্‌গ্রহণে নানর্থকস্য গ্রহণম্' ইতি পরিভাষয়া নিষেধাৎ।

**সর্বে**—সর্বশব্দস্য 'অর্থবদধাতুরপ্রত্যয়ঃ প্রাতিপদিকম্' ইতি প্রাতিপদিকসংজ্ঞায়াং 'সর্বাদীনি' সর্বনামানি' ইতি সর্বনামসংজ্ঞায়াঞ্চ প্রথমাবহুবচনবিবক্ষায়াং 'স্বৌজস্,- ইত্যাদিনা সূত্রেণ বহুষু বহুবচনম্ ইত্যনেন নিয়মেন চ জস্‌প্রত্যয়ে কৃতে সর্ব + জস্ ইতি স্থিতে 'জসঃশী' ইতি জসঃ শীভাবে লশক্বতদ্ধিতে' ইতি শকারস্য ইৎসংজ্ঞায়াং সর্ব + ঈ' ইতি জাতে 'আদ্‌গুণঃ' ইতি গুণে 'স্থানেঽন্তরতমঃ' ইতি অন্তরতমে প্রাপ্তে স্থানসাম্যাৎ কণ্ঠতালুভবঃ একারঃ, এবং কণ্ঠতালুভবস্য 'অ + ঈ' ইত্যস্য যুক্তাদেশে কৃতে সর্ব এ ইতি জাতে সর্বে ইতি রূপম্।

[ **অয়ংক্রমঃ**—সর্ব + জস্ —স্বৌজসমৌড়িতি।
= সর্ব + শী—জসঃ শী।
= সর্ব + ঈ—লশক্বতদ্ধিতে।
= সর্বে—'আদ্‌গুণঃ'। ]

**সর্বেষাম্**—সর্বশব্দস্য 'অর্থবদধাতুরপ্রত্যয়ঃ প্রাতিপদিকম্' ইতি প্রাতিপদিকসংজ্ঞায়াং 'সর্বাদীনি সর্বনামানি' ইাত সর্বনামসংজ্ঞায়াঞ্চ ষষ্ঠীবহুবচনবিবক্ষায়াং 'স্বৌজসমৌড়ি' ত্যাদিনা আমি, 'আমি

সর্বনাম্নঃ স্নুট্' ইতি স্নুডাগমে 'বহুবচনে ঝল্যেৎ' ইতি এত্বে কৃতে 'যদাগমাস্তদ্—গ্রহণেন গৃহ্যন্তে' ইতি স্নুটোঽপি প্রত্যয়াবয়বত্বাৎ 'আদেশ-প্রত্যয়য়োঃ' ইতি ষত্বে 'সর্বেষামি'তি।

[ **অয়ংক্রমঃ** – সর্ব + আম্ –স্বৌজসমৌডিতি।
= সর্ব + স্নুট্ + আম্—আমি সর্বনাম্নঃ স্নুট্।
= সর্ব + স্নু + আম্—হলন্ত্যম্।
= সর্ব + স্ + আম—উপদেশেঽজনুনাসিক ইৎ।
= সর্বে + স্ + আম্—বহুবচনে ঝল্যেৎ।
= সর্বে + ষ্ + আম্—আদেশপ্রত্যয়য়োঃ।
= সর্বেষাম্। ]

***রামেণ***—রামশব্দস্য 'অর্থবদধাতুরপ্রত্যয়ঃ প্রাতিপদিকম্' ইতি প্রাতিপদিকসংজ্ঞায়াং ততঃ তৃতীয়ৈকবচনবিবক্ষায়াং 'স্বৌজসমৌডশস্-টাভ্যাম্ভিস্' ইতি সূত্রেণ 'দ্ব্যেকয়োর্দ্বিবচনৈকবচনে' ইতি নিয়মেন টাপ্রত্যয়ে কৃতে রাম + টা ইতি স্থিতে 'টাঙসিঙসামিনাৎ স্যাঃ' ইত্যনেন টা ইত্যস্য স্থানে ইনাদেশে রাম + ইন ইতি জাতে 'আদ্গুণঃ' ইতি গুণে 'স্থানেঽন্তরতমঃ' ইতি অন্তরতমে গ্রাহ্যে স্থানসাম্যাৎ কণ্ঠতালুভব একারঃ, এবং কণ্ঠতালুভবস্য 'অই' ইত্যস্য যুক্তাদেশে কৃতে 'রাম্ এন' ইতি জাতে 'অট্কুপ্যাঙ্নুম্ব্যবায়েঽপি' ইত্যনেন সূত্রেণ নকারস্য ণকারে কৃতে রামেণ ইতি পদং সিদ্ধম্।

[ সংক্ষিপ্তপ্রক্রিয়া—
রাম + টা—স্বৌজসমৌডিতি।
= রাম + ইন—টাঙসিঙসামিনাৎ স্যাঃ।
= রামেন—আদ্গুণঃ।
= রামেণ –অট্কুপ্যাঙ্······। ]

***উভয়ে***—উভৌ অবয়বৌ যেষামিত্যর্থে 'সংখ্যায়া অবয়বে তয়বি'তি তয়পঃ 'উভাদুদাত্তো নিত্যম্' ইত্যজাদেশে ততো জসি স্থানিবত্ত্বেন তয়প্‌প্রত্যয়ান্ততয়া 'প্রথমচরে'তি বিকল্পেন প্রাপ্তসংজ্ঞায়াঃ বিভক্তিনিরপেক্ষত্বেনান্তরঙ্গত্বাৎ 'সর্বাদীনি সর্ব নামানি' ইত্যনেন সর্বনাম—সংজ্ঞাং প্রতি অসিদ্ধত্বাদনেন নিত্যসংজ্ঞায়াং 'জসঃ শী'তি শী-আদেশে উভয়+শী ইতি স্থিতে শকারস্য 'লশকতদ্ধিতে'ইত্যতেন ইৎসংজ্ঞায়াং লোপে চ উভয়+ঈ ইত্যবস্থায়াম্ 'আদ্‌গুণঃ' ইতি গুণে 'উভয়ে' ইতি পদং জাতম্।

***নির্জরসৌ***—নির্গতা জরা অস্যেতি নির্জরঃ। নিষ্ক্রান্তঃ জরায়া ইতি বা 'নিরাদয়ঃ ক্রান্তাদ্যর্থে পঞ্চম্যা' ইতি সমাসে 'গোস্ত্রিয়োরুপসর্জনস্য' ইতি হ্রস্বে সতি নির্জরপদম্। নির্জরশব্দস্য 'অর্থবদধাতুরপ্রত্যয়ঃ' ইত্যনেন প্রাতিপদিকসংজ্ঞায়াম্, ততো নির্জরশব্দাৎ প্রথমাদ্বিবচনে (দ্বিতীয়াদ্বিবচনে বা) ঔবিভক্তৌ 'জরায়া জরসন্যতরস্যাম্' ইতি জরসাদেশে 'নির্জরসৌ' ইতি

***দতঃ***—দন্তশব্দাৎ শসি 'দন্ত 'শস্' ইতি স্থিতে, 'লশকতদ্ধিতে' ইত্যনেন শকারস্য ইৎসংজ্ঞায়াং 'দন্ত অস্' ইতি জাতে, 'পদন্নোমাস্-হৃন্নিশসন্—'ইতি সূত্রেণ 'দৎ' আদেশে 'দৎ অস্ 'ইতি স্থিতে 'স্বাদিষ্বসর্বনামস্থানে' ইত্যনেন পদসংজ্ঞায়াং 'যচিভম্' ইত্যনেন ভসংজ্ঞায়াং চ প্রাপ্তায়াম্ 'আ কড়ারাদেকা সংজ্ঞা' ইতি নিয়মাৎ শসাদৌ অচি ভসংজ্ঞৈব প্রাবল্যেন পদত্বাভাবেন জশ্‌ত্বাভাবে'সসজুষোরুঃ' ইত্যনেন সকারস্য রুত্বে 'খরবসানয়োর্বিসর্জনীয়ঃ' ইত্যনেন বিসর্গে উক্তং রূপং সিদ্ধম্।

[ ***সংক্ষিপ্ত প্রক্রিয়া***—

দন্ত+শস্—

=দন্ত+অস্—লশকতদ্ধিতে।

=দৎ+ঙস্—পদন্নোমাস্—।

=দৎ+অ+রু—সসজুষো রুঃ।

=দৎ+অ+র্—উপদেশেঽজনুনাসিক ইৎ।

=দৎ+অ+ঃ—খরবসানয়োর্বিসর্জনীয়ঃ।

=দতঃ।]

***মাভ্যাম্***—মাসশব্দাৎ ভ্যামি মাস+ভ্যাম্ ইত্যবস্থায়াং 'পদন্নোমাস্হৃন্নিশসন্—' ইত্যনেন সূত্রেণ মাসশব্দস্য মাস্—ইত্যাদেশে মাস্+ভ্যাম্ ইতি জাতে, স্বাদিষ্বসর্বনামস্থানে' ইত্যনেন পদসংজ্ঞায়াং 'সসজুষো রুঃ' ইতি সকারস্য রুত্বে প্রাপ্তে 'মা+রু+ভ্যাম্' ইত্যবস্থায়াং 'ভোভগোঅঘো—' ইতি যত্বে, 'হলি সর্বেষাম্' ইত্যনেন যলোপে উক্তং রূপং সিদ্ধম্।

[ ***সংক্ষিপ্তপ্রক্রিয়া***—মাস+ভ্যাম্

মাস্+ভ্যাম্—পদন্নোমাস্—

মা+রু+ভ্যাম্—সসজুষো রুঃ।

মা+র্+ভ্যাম্—উপদেশেঽজনুনাসিক ইৎ।

মা+য+ভ্যাম্—ভোভগোঅঘো—।

মা+ভ্যাম্—হলি সর্বেষাম্।

=মাভ্যাম্।]

***হরৌ***—হরিশব্দস্য সপ্তম্যেকবচনে হরি+ই ইতি স্থিতে 'শেষো ঘ্যসখি' ইত্যনেন ঘিসংজ্ঞায়াং 'ঘের্ঙিতি' ইতি তস্য গুণে প্রাপ্তে তং বাধিত্বা 'অচ্চঘেঃ' ইত্যনেন ঙেঃ ঔৎ ইতি প্রাপ্তে, হরিশব্দস্য চ অকারান্তাদেশে 'হর' ইতি প্রাপ্তে, 'হর+ঔ' ইতি জাতে 'বৃদ্ধিরেচি' ইত্যনেন বৃদ্ধৌ 'হরৌ' ইতি পদং সিদ্ধম্।

**পঞ্চাজী**—পঞ্চানামজানাং সমাহারঃ ইতি বিগ্রহে 'তদ্ধিতার্থ—' ইত্যাদিনা দ্বিগুঃ। 'অকারান্তোত্তরপদো দ্বিগুঃ স্ত্রিয়ামিষ্টঃ' ইত্যনেন স্ত্রীত্বম্। 'দ্বিগোঃ' ইতি ঙীপ্, 'যস্যেতি চ' ইত্যাকারলোপঃ। অত্র পঞ্চাজশব্দে সমাসার্থভূতো যঃ সমাহারঃ তস্মিংং স্ত্রীত্বং পঞ্চাজেতি সমুদায়স্য বাচ্যং ন তু অজশব্দস্য, অতোঽত্র ন টাবিত্যর্থঃ।

**গার্গ্যায়ণী**—গর্গস্যাপত্যং স্ত্রী ইতি বিগ্রহঃ। গর্গাদিযঞন্তাদ্ গার্গ্যশব্দাৎ 'প্রাচাং ষ্ফ তদ্ধিতঃ' ইতি ষ্ফ প্রত্যয়ে 'গার্গ্য+ষ্ফ' ইতি জাতে 'ষঃ প্রত্যয়স্য' ইত্যনেন ষস্য ইৎসংজ্ঞায়াং লোপে চ,'গার্গ্য+ফ' ইত্যবস্থায়াং 'যস্যেতি চ' ইত্যনেন যকারাদকারান্তস্য লোপে 'গার্গ্য্ +ফ' ইতি স্থিতে 'আয়নেয়ীনীয়িযঃ—' ইত্যনেন ফকারস্য আয়নাদেশে 'গার্গ্যায়ন'ইতি দশায়াং 'ষিদ্গৌরাদিভ্যশ্চ' ইত্যনেন ঙীষি, ণত্বে 'গার্গ্যায়ণী ইতি পদসিদ্ধিঃ।

**গৌরী**—'ষিদ্গৌরাদিভ্যশ্চ' ইত্যনেন সূত্রেণ 'গৌর'শব্দাৎ ঙীষি প্রাপ্তে 'গৌরী' ইতি পদম্। শ্বেতেত্যর্থঃ। ফিট্স্বরেণ অন্তোদাত্তত্বাদ্ 'অন্যতো ঙীষ্' ইত্যপ্রাপ্তেরিহ ঙীষ্বিধিরিতি ভাবঃ। সংজ্ঞাশব্দো বায়ম্। 'উমা কাত্যায়নী গৌরী' ইত্যমরঃ।

**অনড্বাহী**—অনডুহঃ বৃষভস্য স্ত্রী ইত্যর্থঃ। অনো বহতীতি যৌগিকো বা। অনডুহ্শব্দস্য গৌরাদিগণে পাঠাৎ 'ষিদ্ গৌরাদিভ্যশ্চ' ইত্যনেন ঙীষি প্রাপ্তে 'অনডুহঃ স্ত্রিয়াম্ আম্ বা' ইত্যনেন বার্ত্তিকেন নিপাতনাদেব বিকল্পেন আমি যণাদেশে বিভক্ত্যাদিকার্য্যে 'অনড্বাহী' ইতি। আমি অপ্রাপ্তে 'অনডুহী' ইত্যপি ভবতি।

***দংষ্ট্রা***—দশ্যতে অনয়া ইতি দংষ্ট্রা। 'দাম্নীশস—' ইত্যাদিনা করণে ষ্ট্রন্। অত্র ষিত্ত্বে প্রাপ্তেঽপি 'ষিদ্ গৌরাদিভ্যশ্চ' ইত্যনেন ন ঙীষিতি ভাবঃ কিন্তু টাবেব।

***গার্গী***—গর্গস্যাপত্যং স্ত্রী ইতি বিগ্রহে 'গর্গাদিভ্যো যঞ্' ইতি গর্গশব্দাৎ যঞ্প্রত্যয়ে প্রাপ্তে আদিশব্দস্য বৃদ্ধৌ 'গার্গ্য' ইতি। স্ত্রীত্ববিবক্ষায়াং 'যঞশ্চ' ইত্যনেন যঞ্প্রত্যয়ান্তস্য গার্গ্যশব্দস্য ঙীপি 'হলস্তদ্ধিতস্য' ইত্যনেন যলোপে বিভক্ত্যাদিকার্যে 'গার্গী' ইতি পদম্।

***নারী***—নারী সীমন্তিনী বধূঃ ইত্যমরঃ। নৃশব্দাৎ 'ঋন্নেভ্যো ঙীপ্' ইত্যনেন স্ত্রীলিঙ্গে ঙীপি প্রাপ্তে তং প্রবাধ্য 'নৃনরয়োর্বৃদ্ধিশ্চ' ইতি গণসূত্রেণ চকারপ্রয়োগাৎ ঙীন্বিধানেন বৃদ্ধৌ চ প্রাপ্তায়াং রপরত্বে বিভক্তিকার্য্যে 'নারী' ইতি সিদ্ধম্। নরশব্দস্য জাতিলক্ষণত্বে ঙীষি প্রাপ্তেঽপি, তন্নিষেধেন ঙীন্ বিধানমত্র। নরশব্দাত্তু ঙীনি নকারাদকারস্য বৃদ্ধিঃ। ন চ নৃশব্দাদ্ ঙীনি বৃদ্ধৌ নারীতি সিদ্ধের্নরগ্রহণং ব্যর্থমিতি বাচ্যম্, নরত্বজাতিবাচিনো নরশব্দাৎ স্ত্রিয়াং জাতিলক্ষণঙীষি নারীতি ব্যাবৃত্ত্যর্থত্বাৎ।

***যুবতিঃ***—যুবন্শব্দস্য স্ত্রীলিঙ্গত্বে 'যূনস্তিঃ'ইত্যনেন তি-প্রত্যয়ে 'স্বাদিষু—' ইত্যনেন পদত্বাদ্ 'ন লোপঃ প্রাতিপদিকান্তস্য' ইত্যনেন যুবন্শব্দস্য ন—কারলোপে বিভক্তিকার্যে 'যুবতিঃ' ইতি পদং সিদ্ধম্।

***মামকী***—মদীয়ায়ামিত্যর্থে 'যুষ্মদস্মদোরন্যতরস্যাং খঞ্ চ' ইত্যনেন অণি 'তবকমমকাবেকবচনে' ইত্যনেন প্রকৃতেঃ মমকাদেশে, 'টিড্ঢাণঞ্—' ইত্যাদিনা ঙীপি সিদ্ধে অপি 'কেবলমামকভাগধেয়—পাপাপরসমান—' ইত্যত্রাপি মামকশব্দস্য ঙীপ্বিধানং ব্যর্থমিতি আশঙ্কায়াং নিয়ময়তি—'অণন্তান্মামকশব্দাচ্চেদি ঙীপ্ স্যাত্তর্হি

সংজ্ঞাচ্ছন্দসোরেবে' তি। অতএব 'কেবলমামক—' ইত্যাদিনা ঙীপ্। 'সুপাংসুলুক্' ইত্যনেন সপ্তম্যা লুক্।

**মনাবী**—মনোঃ স্ত্রী মনাবী, মনায়ী, মনুঃ বা। 'মনো রৌ বা' ইতি সূত্রেণ ঙীপ্। অনেন সূত্রেণ মনুশব্দান্তস্য ঔকারান্তাদেশশ্চ, 'সন্নিযোগশিষ্টানাং সহ বা প্রবৃত্তিঃ সহ বা নিবৃত্তিঃ' ইতি পরিভাষা-বশাৎ। মনৌ+ঙীপ্ ইতি জাতে মনৌ+ঈ ইত্যবস্থায়াম্ আবাদেশে বিভক্তিকার্যে 'মনাবী' ইতি। ঙীপ্সন্নিযোগশিষ্টৈ ঐকারাদেশে, তস্য আযাদেশে 'মনায়ী' ইতি। ঐকারস্য ঔকারস্য চাভাবে তৎসন্নিযোগশিষ্টো ঙীবপি ন। অতঃ 'মনুঃ' ইত্যপি ভবতি।

**ঔপগবী**—উপগোরপত্যং স্ত্রী ইত্যর্থে 'তস্যাপত্যম্', ইতি অপত্যার্থে অণি বৃদ্ধৌ অবাদেশে 'টিড্ঢাণঞ্—' ইত্যনেন ঙীপং বাধিত্বা পরত্বাদ্ 'জাতেরস্ত্রীবিষয়াদযোপধাৎ' ইতি ঙীষি প্রাপ্তে 'যস্যেতি চ' ইতি অলোপে সুলোপে চ 'ঔপগবী' ইতি।

**অগ্নায়ী**—'অগ্নির্মূর্ধা' ইত্যাদৌ অগ্নিশব্দঃ অন্তোদাত্তঃ। অগ্নিশব্দাৎ 'বৃষাকপ্যগ্নিকুসিতকুসিদানামুদাত্তঃ' ইতি সূত্রেণ ঙীপি প্রাপ্তে আযাদেশে 'অগ্নায়ী' ইতি পদং সিদ্ধম্।

**দৃঢ়পত্নী**—'বিভাষা সপূর্বস্য' ইতি সূত্রে উত্তরত্রানুবৃত্তয়ে অনুবৃত্তস্য 'অনুপসর্জনাৎ' ইত্যস্য শ্রুতত্বেন সপূর্বস্য পত্যন্তস্যেতি বিশেষণাৎ দৃঢ়া পতির্যস্যেতি বিগ্রহে বহুব্রীহৌ অনেন সূত্রেণ নুকি অনুবন্ধলোপে 'ঋন্নেভ্যো ঙীপ্' ইতি ঙীপি, 'যস্যেতি চ' ইত্যনেন অলোপে বিভক্ত্যাদিকার্যে উক্তং রূপং সিদ্ধম্।

**বৃষলপত্নী**—বৃষলস্য পতিঃ স্ত্রী ইতি বিগ্রহঃ। অপশূদ্রাধিকরণে শূদ্রাণাং যজ্ঞাধিকারনিরাকরণাদ্ ইহ যজ্ঞসংযোগাভাবাদ্ 'পত্যুর্ন

যজ্ঞসংযোগে' ইত্যস্যাপ্রাপ্তৌ 'বিভাষা সপূর্বস্য' ইত্যনেন নুকি অনুবন্ধলোপে 'ঋন্নেভ্যো ঙীপ্' ইত্যনেন ঙীপি 'যস্যেতি চ' ইতি অকারস্য লোপে বিভক্তিকার্যে 'বৃষলপত্নী' ইতি।

***অধিহরি***—হরৌ ইতি লৌকিকবিগ্রহঃ। 'হরি ঙি অধি সু' ইত্যলৌকিকবিগ্রহে 'অব্যয়ম্—' ইত্যাদিনা অধিশব্দস্য হরৌ ইত্যনেন অব্যয়ভাবসমাসে সুব্‌লুকি, সমাসবিধৌ 'অব্যয়মি'তি প্রথমা-নির্দিষ্টত্বাৎ 'অধি' ইত্যস্য উপসর্জনসংজ্ঞায়াং চ প্রাপ্তায়াম্ 'উপসর্জনং পূর্বম্' ইত্যনেন অধেঃ পূর্বপ্রয়োগে সমুদায়স্য সৌ প্রাপ্তে 'অব্যয়ীভাবশ্চ' ইত্যব্যয়ত্বাদ্ 'অব্যয়াদাপ্‌সুপঃ' ইত্যনেন সুপো লুকি 'অধিহরি' ইতি। সপ্তম্যর্থস্যৈবাত্র দ্যোতকো অধিঃ।

✓ ***নির্মক্ষিকম্***—মক্ষিকাণামভাবো নির্মক্ষিকম্। 'অব্যয়ং বিভক্তি—' ইতি সূত্রে অভাবপদস্য উদাহরণমিদম্। 'প্রথমানির্দিষ্টং সমাস উপসর্জনম্' ইত্যাদিনা 'নির্' ইত্যস্য উপসর্জনসংজ্ঞায়াম্ 'উপসর্জনং পূর্বম্' ইত্যনেন 'নির্' ইতি পদস্য উপসর্জনত্বাৎ পূর্বপ্রয়োগে, 'এক-বিভক্তি চাপূর্বনিপাতে' ইতি সূত্রবলাৎ মক্ষিকাশব্দস্যাপি উপসর্জনত্বে 'গোস্ত্রিয়োরুপসর্জনস্য' ইত্যনেন স্ত্রীপ্রত্যয়ান্তস্য মক্ষিকাশব্দস্য হ্রস্বত্বে সমুদায়স্য সৌ প্রাপ্তে, 'অব্যয়ীভাবশ্চ' ইত্যনেন অব্যয়ত্বাৎ সুব্‌লুকি নপুংসকত্বে প্রাপ্তে, তং বাধিত্বা 'নাব্যয়ীভাবাদতোঽম্ত্বপঞ্চম্যাঃ' ইত্যনেন সুব্‌লুকি নিরুদ্ধে সতি, সোরমাদেশে চ জাতে উক্তং রূপং সিদ্ধম্।

***অনুগঙ্গম্***—গঙ্গায়া অনুরিত্যনুগঙ্গম্ বারাণসী। গঙ্গাদৈর্ঘ্য-সদৃশদৈর্ঘ্যোপলক্ষিতেত্যর্থঃ। অত্র অনুনা গঙ্গায়াঃ দৈর্ঘ্যে দ্যোত্যে 'যস্য চায়ামঃ' ইত্যনেন সূত্রেণ অব্যয়ীভাবসমাসে, সুব্‌লুকি 'প্রথমা-

নির্দিষ্টং সমাস উপসর্জনম্' ইত্যনেন 'অনু' ইতি শব্দস্য উপসর্জনসংজ্ঞায়াং তস্য 'উপসর্জনং পূর্বমি'ত্যনেন পূর্বপ্রয়োগে চ 'অব্যয়ীভাবশ্চ' ইতি নপুংসকসংজ্ঞায়াম্, 'হ্রস্বো নপুংসকে প্রাতিপদিকস্য' ইতি তস্য হ্রস্বত্বে, সৌ চ প্রাপ্তে 'নাব্যয়ীভাবাদতোঽম্ত্বপঞ্চম্যাঃ' ইত্যনেন সোরমাদেশে 'অনুগঙ্গম্' ইতি। অত্রোদাহরণে লক্ষণত্বং বস্তুসদেব নিমিত্তম্, ন তু অনুদ্যোত্যম্। অতো ন কর্মপ্রবচনীয়ত্বম্।

**উন্মত্তগঙ্গম্**—'অন্যপদার্থে চ সংজ্ঞায়াম্' ইত্যনেন সূত্রেণ অত্র অব্যয়ীভাবসমাসঃ। উন্মত্তা গঙ্গা যস্মিন্ দেশে স উন্মত্তগঙ্গং নাম দেশঃ। অত্র সংজ্ঞা সূচিতা, নদীবাচকেন শব্দেন সমাসশ্চ ভবতি, পরন্তু বিগ্রহেণ দেশো নাভিধীয়তে। 'প্রথমানির্দিষ্টং সমাস উপসর্জনম্' ইত্যনেন উন্মত্তশব্দস্য উপসর্জনত্বে তস্য 'উপসর্জনং পূর্বম্' ইত্যনেন পূর্বপ্রয়োগে চ, সৌ প্রাপ্তে, 'অব্যয়ীভাবশ্চ' ইতি নপুংসকত্বে 'হ্রস্বো নপুংসকে প্রাতিপদিকস্য' ইতি তস্য হ্রস্বত্বে, 'নাব্যয়ীভাবাদতোঽম্ত্ব-পঞ্চম্যাঃ' ইত্যনেন সোরমি পূর্বরূপে উক্তং রূপম্।

**পরোক্ষম্**—অক্ষ্ণঃ পরমিতি বিগ্রহে পরমিত্যস্য অক্ষি ইত্যনেন অব্যয়ীভাবসমাসঃ। পরশব্দস্যাত্র 'প্রথমানির্দিষ্টং সমাস উপসর্জনম্' ইত্যনেন উপসর্জনত্বে, 'উপসর্জনং পূর্বম্' ইত্যনেন তস্য পূর্বপ্রয়োগে চ, 'অব্যয়ীভাবে শরৎপ্রভৃতিভ্যঃ' ইত্যনেন টচ্ বিহিতে, 'যস্যেতি চ' ইত্যনেন অ-লোপে, 'পরোক্ষে লিট্' ইতি নিপাতনাৎ পরশব্দস্য ওকারাদেশে পররূপে চ প্রাপ্তে, সৌ যুক্তে, 'অব্যয়ীভাবশ্চ' ইতি অব্যয়ত্বাৎ, 'নাব্যয়ীভাবাদতোঽম্ত্বপঞ্চম্যাঃ' ইত্যনেন সোঃ অমাদেশে চ পূর্বরূপে 'পরোক্ষম্' ইতি।

**পূর্বকায়ঃ**—পূর্বং কায়স্যেতি বিগ্রহবাক্যে 'পূর্বাপরাধরোত্তরমেক—দেশিনৈকাধিকরণে' ইতি সূত্রেণ তৎপুরুষসমাসে, পূর্বশব্দস্য সমাসবিধৌ

প্রথমানির্দিষ্টত্বাৎ উপসর্জনসংজ্ঞায়াম্, 'উপসর্জনং পূর্বমি'ত্যনেন তস্য পূর্বপ্রয়োগে, সুব্‌লুকি, সমাসত্বাৎ প্রাতিপদিকসংজ্ঞায়াং সৌ প্রাপ্তে 'পরবল্লিঙ্গম্' ইতি পুংস্ত্বে, সকারস্য রুত্বে, 'খরবসানয়োর্বিসর্জনীয়ঃ' ইত্যনেন বিসর্গে 'পূর্বকায়ঃ' ইতি।

*মধ্যাহ্নঃ*—অহ্নো মধ্যমিতি বিগ্রহে 'পূর্বাপরাধরোত্তর—' ইত্যনেন তৎপুরুষসমাসে সুব্‌লুকি, মধ্যশব্দস্য সমাসবিধৌ প্রথমা-নির্দিষ্টত্বাৎ উপসর্জনসংজ্ঞায়াম্, 'উপসর্জনং পূর্বম্' ইত্যনেন তস্য পূর্ব-প্রয়োগে, 'রাজাহঃসখিভ্যষ্টচ্' ইতি টচ্‌প্রত্যয়ে, 'অহ্নোঽহ্ন এতেভ্যঃ' ইতি অহ্নাদেশে যণি কৃতে 'মধ্যাহ্নঃ' ইতি।

*কুমারশ্রমণা*—কুমারী শ্রমণা কুমারশ্রমণা। 'কুমারঃ শ্রমণাদিভিঃ' ইতি সূত্রেণ তৎপুরুষসমাসে কৃতে, সুব্‌লুকি, 'পুংবৎকর্মধারয়ঃ' ইতি পুংবত্ত্বে, বিভক্তিকার্যে উক্তং রূপম্ ননু সূত্রে কুমারশব্দস্য পুংলিঙ্গস্যৈব পাঠাৎ কথমিহ স্ত্রীলিঙ্গস্যোদাহরণমিত্যত আহ—ইহ গণে শ্রমণা প্রব্রজিতা গর্ভিণীত্যাদয়ঃ স্ত্রীলিঙ্গাঃ পঠ্যন্তে। লিঙ্গবিশিষ্টপরিভাষায়া এতদেব জ্ঞাপকম্।

*পরোক্ষা*—অক্ষ্ণোঃ পরমিতি লৌকিকবিগ্রহে 'অক্ষি ঙস্ পরম্', ইত্যলৌকিকবিগ্রহে চ 'অব্যয়ীভাবে শরৎপ্রভৃতিভ্যঃ', ইতি শরদাদিগণে পাঠাৎ সমাসান্তবিধানাৎ অনব্যয়স্যাপি পরশব্দস্য সমাসে টচি সুব্‌লুকি পরশব্দস্য পূর্বনিপাতে 'পরোক্ষে লিট্' ইতি নিপাতনাৎ পরশব্দস্য ওকারান্তাদেশে পররূপে 'যস্যেতি চ' ইতি অক্ষিশব্দস্য ইকারলোপে পরোক্ষমিতি নিষ্পদ্যতে। ততঃ পরোক্ষমস্যাস্তীত্যর্থে ধর্মপ্রধানাৎ পরোক্ষশব্দাৎ 'অর্শ আদিভ্যোঽচ্' ইতি অচ্‌প্রত্যয়ে 'যস্যেতি চ' ইত্যকারলোপে টাপি চ কৃতে পরোক্ষা ক্রিয়া ইতি সিধ্যতি।

**কুম্ভকারঃ**—কুম্ভং করোতীত্যর্থে 'কর্মণ্যণ্' ইতি কর্মীভূত—কুম্ভবাচকপদে উপপদে কৃঞ্ধাতোঃ কর্তরি অণ্প্রত্যয়ে 'অচো ঞ্ণিতি' ইতি বৃদ্ধৌ রপরত্বে 'কারঃ' ইতি। ততঃ কুম্ভশব্দস্য কার ইত্যনেন সমাসে কুম্ভকারশব্দ ইত্যর্থঃ। 'কুম্ভ অস্ কার স্' ইত্যলৌকিকবিগ্রহে 'উপপদমতিঙ্' ইত্যনেন সমাসে সুব্লুকি, প্রাতিপদিকত্বাৎ সৌ প্রাপ্তে তস্য রুত্বে, 'খরবসানয়োর্বিসর্জনীয়ঃ' ইত্যনেন বিসর্গে চ কৃতে 'কুম্ভকারঃ' ইতি।

**চিত্রগুঃ**—চিত্রা গাবো যস্যেতি লৌকিকবিগ্রহে 'চিত্রা অস্ গো অস্' ইত্যলৌকিকবিগ্রহে 'অনেকমন্যপদার্থে' ইতি বহুব্রীহিসমাসে সুব্লুকি, 'স্ত্রিয়াঃ পুংবদ্ভাষিতপুংস্কাদ্—' ইতি চিত্রাশব্দস্য পুংবদ্ভাবে প্রাপ্তে, টাপি অপ্রাপ্তে, 'একবিভক্তি চাপূর্বনিপাতে' ইত্যনেন গোশব্দস্য উপসর্জনত্বে, 'গোস্ত্রিয়োরুপসর্জনস্য' ইত্যনেন গোশব্দস্য হ্রস্বত্বে উত্বে প্রাপ্তে বিভক্তিকার্যে 'চিত্রগুঃ' ইতি।

**জরতীচিত্রাগুঃ**—চিত্রা জরতী গৌর্যস্যেতি বিগ্রহে 'অনেকমন্য-পদার্থে' ইত্যনেন বহুব্রীহিসমাসে সুব্লুকি, গাং প্রতি চিত্রাত্বস্য জরতীত্বস্য চ বিশেষণত্বাবিশেষাৎ অন্যতরস্য 'সপ্তমীবিশেষণে বহুব্রীহৌ' ইত্যনেন পর্যায়েণ পূর্বপ্রয়োগে 'গোস্ত্রিয়োরুপসর্জনস্য' ইতি তস্য হ্রস্বত্বে 'চিত্রাজরতীগুঃ', 'জরতীচিত্রাগুঃ' ইতি পদদ্বয়ং সিদ্ধম্।

**উপদশাঃ**—দশানাং সমীপে যে সন্তীতি বিগ্রহে 'সংখ্যয়াব্যয়াসন্নাদূরাধিকসংখ্যাঃ সংখ্যেয়ে' ইতি সূত্রেণ বহুব্রীহিসমাসঃ। উপশব্দস্য সমীপার্থকস্যাব্যয়ীভাব উক্তঃ। ইহ তু সমীপবর্তিনি উপশব্দো বর্ততে। দশসমীপবর্তিন ইত্যর্থঃ। ততশ্চ অন্যপদার্থবৃত্তিত্বাভাবাদপ্রথমান্তত্বাচ্চ 'অনেকমন্যপদার্থে' ইত্যস্যাপ্রাপ্তেঃ বচনমিদম্। 'প্রথমানির্দিষ্টং সমাস উপসর্জনম্' ইত্যনেন 'উপ' ইত্যস্য উপসর্জনসংজ্ঞায়াম্ 'উপসর্জনং

পূর্বম্' ইত্যনেন তস্য পূর্বপ্রয়োগে "বহুব্রীহৌ সংখ্যেয়ে" ইত্যনেন ডচি ডিত্বাট্টিলোপে বিভক্তিকার্যে 'উপদশাঃ' ইতি।

***আসন্নবিংশাঃ***—বিংশতেরাসন্না ইত্যর্থঃ। বিংশতিসংখ্যাসন্ন-সংখ্যাবন্ত ইতি। অত্র 'সংখ্যয়াব্যয়াসন্নাদূরাধিক—' ইত্যনেন বহুব্রীহি-সমাসে সুব্লুকি, 'প্রথমানির্দিষ্টং সমাস উপসর্জনম্' ইত্যনেন আসন্ন-শব্দস্য উপসর্জনসংজ্ঞায়াং তস্য 'উপসর্জনং পূর্বম্' ইত্যনেন পূর্বপ্রয়োগে 'বহুব্রীহৌ সংখ্যেয়ে—' ইত্যনেন ডচি কৃতে, আসন্নবিংশতি+অ ইতি স্থিতে, টিলোপে সবর্ণদীর্ঘং বাধিত্বা 'অতো গুণে' ইতি পররূপে, আসন্নবিংশশব্দঃ অদন্তঃ। তস্য বিভক্তিকার্যে 'আসন্নবিংশাঃ' ইতি।

***অদূরত্রিংশাঃ***—ত্রিংশৎসংখ্যায়াঃ অদূরসংখ্যাবন্ত ইতি হি অস্যার্থঃ। ত্রিংশতঃ অদূরা ইতি বিগ্রহে 'সংখ্যয়াব্যয়াসন্নাদূরাধিক—' ইত্যনেন বহুব্রীহিসমাসে সুব্লুকি অদূরশব্দস্য 'প্রথমানির্দিষ্টং সমাস উপসর্জনম্' ইত্যনেন উপসর্জনত্বে, 'উপসর্জনং পূর্বম্' ইত্যনেন তস্য পূর্বপ্রয়োগে, 'বহুব্রীহৌ সংখ্যেয়ে—' ইত্যনেন ডচি কৃতে, টিলোপে বিভক্তিকার্যে উক্তং রূপং জাতম্।

***দ্বিমূর্ধঃ***—দ্বৌ মূর্ধানৌ যস্যেতি বিগ্রহে 'অনেকমন্যপদার্থে' ইত্যনেন বহুব্রীহিসমাসে সুব্লুকি, 'দ্বিত্রিভ্যাং ষ মূর্ধ্নঃ' ইত্যনেন মূর্ধন্-শব্দস্য ষ-প্রত্যয়ে কৃতে 'দ্বিমূর্ধন্+ষ ইতি জাতে, 'নস্তদ্ধিতে' ইত্যনেন টিলোপে 'দ্বিমূর্ধঃ' ইতি।

***দ্রুণসঃ***—দ্রুরিব ( বৃক্ষ ইব ) নাসিকা যস্য ইতি বিগ্রহে 'অনেকমন্যপদার্থে' ইতি বহুব্রীহিসমাসে সুব্লুকি, দ্রুরিত্যস্য উপসর্জনত্বে তস্য পূর্বপ্রয়োগে চ 'অঞ্নাসিকায়াঃ সংজ্ঞায়াং নসং চাস্থূলাৎ' ইত্যনেন অচ্প্রত্যয়ে নাসিকাশব্দস্য নসাদেশে চ প্রাপ্তে, 'পূর্বপদাৎসংজ্ঞায়ামগঃ' ইত্যনেন ণত্বে 'দ্রুণসঃ' ইতি।

***বিগ্রঃ ( বিখ্যঃ )***—বিগতা নাসিকা যস্য ইতি বিগ্রহে 'অনেকমন্যপদার্থে' ইত্যনেন বহুব্রীহিসমাসে সুব্‌লুকি, 'বের্গ্রো বক্তব্যঃ' ইতি বার্ত্তিকেন বেঃ পরো যো নাসিকাশব্দঃ তস্য গ্রাদেশে 'বিগ্রঃ' ইতি। 'খ্যশ্চ' ইতি বার্ত্তিকেন নাসিকাশব্দস্য খ্যাদেশে বিভক্তিকার্যে 'বিখ্যঃ' ইতি।

***দণ্ডপাণিঃ***—দণ্ডঃ পাণৌ যস্যেতি বিগ্রহেণ বহুব্রীহিসমাসে 'প্রহরণার্থেভ্যঃ পরে নিষ্ঠাসপ্তম্যৌ' ইতি বার্ত্তিকেন 'পাণি' ইতি শব্দস্য পরনিপাতে বিভক্ত্যাদিকার্যে উক্তরূপং সিদ্ধম্। 'নিষ্ঠা' ইত্যস্য 'সপ্তমীবিশেষণে' ইত্যস্য চ অপবাদোঽয়ম্।

***পাণিপাদম্***—পাণ্যোঃ পাদয়োশ্চ সমাহার ইতি বিগ্রহে 'চার্থে দ্বন্দ্ব' ইতি দ্বন্দ্ব-সমাসে সুব্‌লুকি 'দ্বন্দ্বশ্চ প্রাণিতূর্যসেনাঙ্গানাম্' ইত্যনেন একবত্ত্বে, 'স নপুংসকম্' ইত্যনেন নপুংসকত্বে চ বিভক্তিকার্যে পাণিপাদম্ ইতি। পাণ্যোঃ পাদয়োশ্চ প্রাণ্যবয়বত্বাৎ প্রাণ্যঙ্গোদাহরণমিদম্।

***দ্বীপম্***—দ্বয়োঃ পার্শ্বয়োঃ গতা আপো যস্মিন্নিতি বিগ্রহে ব্যধিকরণবহুব্রীহৌ 'ঋক্‌পূরব্ধূঃ পথামানক্ষে' ইত্যনেন অ-প্রত্যয়ে 'দ্ব্যন্তরুপসর্গেভ্যোঽপ ইৎ' ইত্যনেন অপোঽকারস্য ঈত্বে 'আদেঃ পরস্য' ইতি পরিভাষয়া আদেরকারস্য ঈত্বে সবর্ণদীর্ঘে 'দ্বীপম্' ইতি। ( দ্বি+ ঈপ্+অম্=দ্বীপম্ )

***অন্তরীপম্***—অন্তর্গতা আপো যস্মিন্নিতি বিগ্রহে বহুব্রীহিসমাসে সুব্‌লুকি 'ঋক্‌পূরব্ধূঃ পথামানক্ষে' ইত্যনেন অপ্রত্যয়ে 'দ্ব্যন্তরুপসর্গেভ্যোঽপ ইৎ' ইতি অপোঽকারস্য ঈত্বে বিভক্তিকার্যে 'অন্তরীপম্' ইতি। ( অন্তর্+ঈপ্+অম্=অন্তরীপম্ )

*দৈত্যঃ*—দিতেরপত্যমিতি বিগ্রহে 'দিত্যদিত্যাদিত্য—পত্যুত্তরপদাণ্যঃ' ইতি সূত্রেণ ণ্য-প্রত্যয়ে দিতি+ণ্য ইতি স্থিতে,'চুটূ' ইত্যনেন ণকারস্য ইৎসংজ্ঞায়াং লোপে চ কৃতে 'দিতি+য' ইতি জাতে 'তদ্ধিতেষ্বচামাদেঃ' ইত্যনেন আদিবৃদ্ধৌ, 'যস্যেতি চ' ইত্যনেন ইকারলোপে বিভক্তিকার্যে 'দৈত্যঃ' ইতি।

*দাক্ষিঃ*—দক্ষস্যাপত্যমিতি বিগ্রহে 'অত ইঞ্' ইতি ইঞি প্রত্যয়ে দক্ষ+ইঞ্ ইতি স্থিতে, 'তদ্ধিতেষ্বচামাদেঃ' ইত্যনেন আদিবৃদ্ধৌ দাক্ষ+ইঞ্ ইতি জাতে, 'যস্যেতি চ' ইত্যনেন অকার-লোপে 'দাক্ষ্+ইঞ্' ইতি স্থিতে 'ঞ্' ইতস্য ইৎসংজ্ঞায়াং লোপে চ বিসর্গে কৃতে 'দাক্ষিঃ' ইতি।

*বৈয়াসকিঃ*—বেদান্ ব্যস্যতি বিবিধমস্যতি শাখাভেদেন বিভজতীতি বেদব্যাসঃ। কর্মণি অন্প্রত্যয়ঃ। অত্র নামৈকদেশগ্রহণেন ব্যাসস্যাপত্যমিতি বিগ্রহে 'ব্যাসবরুডনিষাদচণ্ডালবিম্বানাং চেতি বক্তব্যম্' ইতি বার্ত্তিকেন ইঞ্প্রত্যয়ে প্রকৃতেরকঙাদেশে চ কৃতে 'ব্যাস্+অকঙ্+ইঞ্' ইতি জাতে, 'ন য্বাভ্যাং পদান্তাভ্যাং পূর্বৌ তু তাভ্যামৈচ্' ইতি সূত্রেণ যকারস্য পূর্বম্ ঐচ্ (ঐকার)—আগমে বিভক্ত্যাদিকার্যে 'বৈয়াসকিঃ' ইতি।

*গার্গ্যঃ*—গর্গস্য গোত্রাপত্যমিতি বিগ্রহে 'গর্গাদিভ্যো যঞ্' ইতি যঞি কৃতে গর্গ+যঞ্ ইতি স্থিতে 'তদ্ধিতেষ্বচামাদেঃ' ইত্যনেন আদিবৃদ্ধৌ 'গার্গ+যঞ্' ইতি জাতে 'যস্যেতি চ' ইতি অকারলোপে গার্গ্+যঞ্ ইত্যবস্থায়াং 'ঞ'—কারস্য লোপে 'গার্গ্যঃ' ইতি।

*বৈশ্বামিত্রঃ*—বিশ্বামিত্রস্য অপত্যমিতি বিগ্রহে 'ঋষ্যন্ধকবৃষ্ণি-কুরুভ্যশ্চ' ইত্যনেন ঋষিবাচকস্য বিশ্বামিত্রশব্দস্য অণ্প্রত্যয়ে

'বিশ্বামিত্র+অণ্' ইতি স্থিতে, 'তদ্ধিতেষ্বচামাদেঃ' ইত্যনেন আদিবৃদ্ধৌ, 'যস্যেতি চ' ইত্যকারলোপে বৈশ্বামিত্র্+অণ্ ইতি জাতে বিভক্তিকার্যে বৈশ্বামিত্রঃ ইতি।

*গৌধেরঃ*—গোধায়া অপত্যমিতি বিগ্রহে 'গোধায়া ঢ্রক' ইত্যনেন ঢ্রক্‌প্রত্যয়ে 'গোধা+ঢ্রক্' ইতি জাতে 'কিতি চ' ইত্যনেন আদিবৃদ্ধৌ ঢস্য এযাদেশে 'লোপো ব্যোর্বলি' ইতি যলোপে স্বাদিকার্যে 'গৌধেরঃ' ইতি। ( গৌধা+এয্+রক্=গৌধা+এ+রক্=গৌধা +এ+র=গৌধেরঃ। ) শুভ্রাদিগণে পাঠাচ্চ 'শুভ্রাদিভ্যশ্চ' ইত্যনেন পক্ষে ঢকি 'গৌধেয়ঃ' ইতি।

*বৈনতেয়ঃ*—বিনতা নাম গরুড়মাতা। বিনতায়াঃ অপত্যমিতি বিগ্রহে, 'স্ত্রীভ্যো ঢক্' ইত্যনেন ঢক্‌প্রত্যয়ে আদিবৃদ্ধৌ, ঢস্য এযাদেশে বিভক্তিকার্যে 'বৈনতেয়ঃ' ইতি।

*মানুষঃ ( মনুষ্যঃ )*—মনুশব্দাৎ 'মনোর্জাতাবঞ্যতৌ ষুক্ চ' ইত্যনেন সূত্রেণ অঞ্‌প্রত্যয়ে, মনুশব্দস্য 'ষুক্'—আগমে চ কৃতে 'মনু+ষুক্+অঞ্' ইতি জাতে, অনুবন্ধলোপে, 'তদ্ধিতেষ্বচামাদেঃ' ইত্যনেন আদিবৃদ্ধৌ, 'যস্যেতি চ' ইত্যনেন অকারলোপে বিভক্তিকার্যে 'মানুষঃ' ইতি।

'মনোর্জাতাবঞ্'—ইত্যনেনৈব সূত্রেণ মনুশব্দাৎ যৎপ্রত্যয়ে ষুগাগমে চ কৃতে 'যস্যেতি চ' ইত্যকারলোপে বিভক্ত্যাদিকার্যে 'মনুষ্যঃ' ইতি।

*পৌরবঃ*—পুরূণাং রাজা পৌরবঃ। পুরুশব্দাৎ তদ্রাজা ইত্যর্থে 'পুরোরণ্ বক্তব্যঃ' ইত্যনেন বার্ত্তিকেন অণ্‌প্রত্যয়ে 'পুরু+অণ্' ইতি স্থিতে, আদিবৃদ্ধৌ, 'ওর্গুণঃ' ইত্যনেন গুণে অবাদেশে প্রাপ্তে, স্বাদি-বিভক্তৌ 'পৌরবঃ' ইতি।

*দেবপূজকঃ*—দেবানাং পূজকঃ ইতি বিগ্রহে পূজকশব্দস্য যাজকাদিগণে পাঠাৎ, 'যাজকাদিভিশ্চ' ইত্যনেন সূত্রেণ তৎপুরুষ-সমাসে, সুব্‌লুকি, স্বাদিকার্যে 'দেবপূজকঃ' ইতি।

*যুধিষ্ঠিরঃ*—যুধি স্থিরঃ ইতি বিগ্রহে সপ্তমীতৎপুরুষসমাসে 'হলদন্তাৎ সপ্তম্যাঃ সংজ্ঞায়াম্' ইতি সপ্তমীবিভক্তেঃ লোপে ন প্রাপ্তে, 'গবিযুধিভ্যাং স্থিরঃ' ইতি স্থিরস্য সস্য ষত্বে, ষ্টুত্বে বিভক্তিকার্যে 'যুধিষ্ঠিরঃ' ইতি।

*দ্বিত্রাঃ*—দ্বৌ বা ত্রয়ো বেতি বিগ্রহে, 'সংখ্যয়াব্যয়—' ইত্যনেন বহুব্রীহিসমাসে, সুব্‌লুকি, 'বহুব্রীহৌ সংখ্যেয়ে ডচ্' ইতি ডচি কৃতে, বিভক্তিকার্যে 'দ্বিত্রাঃ' ইতি। বহুব্রীহিত্বাৎ 'দ্ব্যষ্টনঃ সংখ্যায়াম—' ইত্যনেন আত্বং ন।

**কতিপয়শব্দানাং সংক্ষিপ্তসাধনপ্রক্রিয়াঃ—**

**নৄঁস্পাহি—**

নৄন্+পাহি।

=নৄ+রু+পাহি—নৄন্ পে।

=নৄঁ+রু+পাহি—অনুনাসিকাৎ পরোঽনুস্বারঃ।

=নৄঁ+র্+পাহি—উপদেশেঽজনুনাসিক ইৎ।

=নৄঁ+ঃ+পাহি—খরবসানয়োর্বিসর্জনীয়ঃ।

=নৄঁ+স্+পাহি—বিসর্জনীয়স্য সঃ।

=নৄঁস্পাহি।

**রামৈঃ—**

রাম+ভিস্—স্বৌজসমৌড্ছিতি।

=রাম+ঐস্—অতো ভিস ঐস্।

=রামৈ+স্—বৃদ্ধিরেচি।

=রামৈ+রু—সসজুষোরুঃ।

রামৈ+র্—উপদেশে…।

=রামৈ+ঃ—খরবসানয়োর্বিসর্জনীয়ঃ।

=রামৈঃ।

**সুরাচ্ছায়া—**

সুরা+ছায়া।

=সুরা+তুক্+ছায়া—দীর্ঘাৎ।

=সুরা+তু+ছায়া—হলন্ত্যম্।

=সুরা+ত্+ছায়া—উপদেশেঽজনুনাসিক ইৎ।

=সুরা+চ্+ছায়া—স্তোঃশ্চুনাশ্চুঃ॥

=সুরাচ্ছায়া।

**রামায়—**

রাম + ঙে—স্বৌজসমৌড়িতি।

= রাম + য = ঙের্য্যঃ।

= রামায়—সুপি চ।

**রামেভ্যঃ—**

রাম + ভ্যস্—স্বৌজসমৌড়িতি।

= রামে + ভ্যস্—বহুবচনে ঝল্যেৎ।

= রামে + ভ্য + রু—সসজুষোরুঃ।

= রামে + ভ্য + র্—উপদেশে……।

= রামে + ভ্য + ঃ—খরবসানয়োঃ……।

= রামেভ্যঃ।

**রাময়োঃ—**

রাম + ওস্—স্বৌজসমৌড়িতি।

= রামে + ওস্—ওসি চ।

= রাময়ো + স্—এচোঽয়বায়াবঃ।

= রাময়ো + রু—সসজুষোরুঃ।

= রাময়ো + র্—উপদেশে……।

= রাময়ো + ঃ—খরবসানয়ো……।

= রাময়োঃ।

**স্বে—**

স্ব + জস্—স্বমজ্ঞাতিধনাখ্যায়াম্।

= স্ব + শী—জসঃ শী।

= স্ব + ঈ—লশক্বতদ্ধিতে।

= স্বে—আদ্‌গুণঃ।

**পদঃ—**

পাদ + শস্—স্বৌজসমৌডিতি।
= পদ্ + শস্—পদ্দন্নোমাস্······।
= পদ্ + অস্—লশক্বতদ্ধিতে।
= পদ + স্ সংহিতায়াম্।
= পদ + রু সসজুষোরুঃ।
= পদ + র্—উপদেশে······।
= পদ + ঃ—খরবসানয়োর্বিসর্জনীয়ঃ।

**হরয়ঃ—**

হরি + জস্ = স্বৌজসমৌডিতি।
= হরে + জস্—জসি চ।
= হরে + অস্—চুটূ।
= হরয্ + অস্—এচোঽয়বায়াবঃ।
= হরয্ + অ + রু—সসজুষোরুঃ।
= হরয় + রু—সংহিতায়াম্।
= হরয় + র্—উপদেশে···।
= হরয় + ঃ—খরবসানয়োর্বিসর্জনীয়ঃ।
= হরয়ঃ।

**হরেঃ—**

হরি + ঙসি—স্বৌজসমৌডিতি।
= হরি + অসি— লশক্বতদ্ধিতে।
= হরি + অস্—উপদেশে······।
= হরে + অস্—ঘের্ঙিতি।
= হরে + স্—ঙসিঙসোশ্চ।
= হরে + র্ (রু)—সসজুষোরুঃ।
= হরে + ঃ—খরবসানয়োর্বিসর্জনীয়ঃ।
= হরেঃ।

**সুধিয়ঃ—**

সুধী + অস্ ( জস্ )—নভূসুধিয়োঃ।
= সুধিয়ঙ্ + অস্— অচিশ্নুধাতু……।
= সুধিয়্ + অস্—হলন্ত্যম্। উপদেশে…।
= সুধিয় + স্—সংহিতায়াম্।
= সুধিয় + রু—সসজুষো রুঃ।
= সুধিয় + র উপদেশে……।
= সুধিয় + ঃ—খরবসানয়োঃ…।
= সুধিয়ঃ।

**গৌঃ—**

গো + সু—স্বৌজসমৌড়িতি।
= গো + স্—উপদেশে……।
= গো + ণিদ্বৎস্—গোতোণিৎ।
= গৌ + স্—অচো ঞ্ণিতি।
= গৌ + রু—সসজুষোরুঃ।
= গৌ + র্—উপদেশে……।
= গৌ + ঃ—খরবসানয়োঃ……।
= গৌঃ।

**গাঃ—**

গো + শস্—স্বৌজসমৌড়িতি।
= গো + অস্—লশকতদ্ধিতে।
= গা + স্—ওতোঽম্শসোঃ।
= গা + রু—সসজুষোরুঃ।
= গা + র—উপদেশে……।
= গা + ঃ—খরবসানয়ো……।
= গাঃ।

**পচন্তী—**

পচৎ + ঙীপ্—উগিতশ্চ।

= পচৎ + ঙী—হলন্ত্যম্।

= পচৎ + ঈ—লশক্বতদ্ধিতে।

= পচ + নুম্ + ৎ + ঈ—শপ্‌শ্যনোর্নিত্যম্।

= পচ + ন্ + ৎ + ঈ—হলন্ত্যম্। উপদেশে···

= পচন্তী।

**শর্ব্বরী—**

শৃ + বণিপ্ + র + ঙীপ্—বনোরচ।

= শৃ + ব + র + ঙীপ্—হলন্ত্যম্, উপদেশে······

= শর্বর + ঙীপ্—সার্বধাতুকার্দ্ধধাতুকয়োঃ।

= শর্ব্বর + ঙীপ্—অচোরহাভ্যাং দ্বে।

= শর্ব্বর + ঙী—হলন্ত্যম্।

= শর্ব্বর + ঈ—লশক্বতদ্ধিতে।

= শর্ব্বর্ + ঈ—যস্যেতি চ।

= শর্ব্বরী।

**দ্বিপদী—**

দ্বৌ পাদৌ যস্যেতি দ্বিপাদ্ + ঙীপ্।

= দ্বিপাদ্ + ঙীপ্—সংখ্যাসু পূর্বস্য।

= দ্বিপাদ্ + ঙীপ্—যচি ভম্।

= দ্বিপাদ্ + ঈ—হলন্ত্যম্। লশক্বতদ্ধিতে।

= দ্বিপৎ + ঈ—পাদঃ পৎ।

= দ্বিপদী—ঝলাং জশোঽন্তে।

# ফক্কিকাব্যাখ্যাঃ

## ১। তেন 'বিশ্বপাভিঃ' ইত্যত্র "হো ঢঃ" ইতি ঢত্বং ন ভবতি।

'তুল্যাস্যপ্রযত্নং সবর্ণম্' ইতি সবর্ণতায়া বিধানং 'নাজ্‌ঝলৌ' ইতি নিষেধস্য। এবং সূত্রদ্বয়েন বিধিনিষেধাভ্যাং ব্যবস্থাপিতে এব সবর্ণত্বে "অণুদিৎসবর্ণস্য চাপ্রত্যয়ঃ" ইতি গ্রহণকসূত্রং প্রবর্ত্ততে। অতএবাত্র ব্যবস্থাপনং প্রতি "অণুদিদিতি" সূত্রস্য প্রবৃত্তির্নাস্তি। "নাজ্‌ঝলৌ" ইতি নিষেধসূত্রে যদজ্‌গ্রহণং তেন শুদ্ধাঃ শিবসূত্রস্থিতাঃ কণ্ঠ্যা গৃহ্যন্তে ন চ তেষাং সবর্ণা অপি। যদ্যেবং শুদ্ধানামেব অচাং স নিষেধো নান্যেষাম্, তর্হি আকারেণ অচা হকারস্য সাবর্ণ্যং স্যাৎ। স্থানপ্রযত্ন-সাম্যাৎ। তেন হকারস্য বিধিরাকারস্যাপি প্রসজ্যেত। ততো 'হোঢঃ' ইত্যনেন ভকারে পরে হকারস্য যৎ ঢত্বং, তৎ বিশ্বপাভিঃ ইত্যত্র আকারস্যাপি ভবেৎ। দোষস্যাস্য পরিহারায় নাজ্‌ঝলৌ ইত্যত্র নিষেধসূত্রে আকারপ্রশ্লেষঃ কৃতঃ। স চ প্রশ্লেষঃ নাজ্‌ঝলৌ ইতি সূত্রে 'আকারসহিতঃ অচ্ আচ্। স চ হল্ চ ইত্যেতৌ মিথঃ সবর্ণৌ ন স্তঃ' ইত্যনেন ব্যাখ্যাতঃ। ননু অস্তু হকারস্য আকারস্য চ সাবর্ণ্যম্, কিং তৎ প্রতিষেধার্থেন আকারপ্রশ্লেষেণেত্যত আহ—তেন বিশ্বপাভিরিত্যা-দয়ঃ। হকারস্য আকারস্য চ সাবর্ণ্যপ্রতিষেধেন, হকারেণ আকারস্য চ গ্রহণাভাবাদ্ বিশ্বপাভিরিত্যত্র 'হোঢঃ' ইতি হকারস্য বিধীয়মানং ঢত্বং পকারাদাকারস্য ন ভবতি। আকারপ্রশ্লেষাভাবে তু তস্য হকারস্য চ সাবর্ণ্যসত্ত্বাদ্ হকারেণ আকারস্য চ গ্রহণাৎ তস্য ঢত্বং স্যাদিত্যর্থঃ। অত্র ঢত্বস্যাসিদ্ধত্বাৎ সংযোগান্তলোপ এবাপাদনীয় ইতি নবীনাঃ। 'কালসময়বেলাসু তুমুন্' ইতি সূত্রে বেলাসু ইতি লকারাদকারস্য নির্দেশো নাজ্‌ঝলৌ ইত্যত্র আকারপ্রশ্লেষে প্রমাণম্। অন্যথা তত্র ঢত্বস্য সংযোগান্তলোপস্য বা আপত্তৌ আকারো ন শ্রূয়েত ইত্যলম্।

## ২। পরনিত্যান্তরঙ্গাপবাদানামুত্তরোত্তরং বলীয়ঃ ॥ (পরি-৩৯)

পরিভাষেয়ম্। পরাদীনাং মধ্যে পূর্বপূর্বাপেক্ষয়া উত্তরমুত্তরং শাস্ত্রং বলবত্তরমিতি হি তদর্থঃ। পরাপেক্ষয়া নিত্যান্তরঙ্গাপবাদাঃ, নিত্যাপেক্ষয়াপি অন্তরঙ্গাপবাদৌ, অন্তরঙ্গাপেক্ষয়াপি অপবাদঃ ইত্যেবংক্রমেণ পূর্বপূর্বাপেক্ষয়া উত্তরোত্তরস্য বলবত্ত্বমিতি ফলিতোঽর্থঃ। 'বিপ্রতিষেধে পরং কার্যম্' ইতি সূত্রেণ পূর্বাপেক্ষয়া পরং বলবৎ। তদ্ যথা—'অষ্টাভ্য ঔশ্' ইত্যাদৌ। অত্র পূর্বমপি প্রবর্তমানম্ 'আদেঃ পরস্য' ইতি শাস্ত্রং পরেণ 'অনেকাল্শিৎসর্বস্য' ইত্যনেন বাধ্যতে। পরান্নিত্যং যথা—তুদতীতি। অত্র পরমপি 'পুগন্তলঘূপধস্য চ' ইতি লঘূপধগুণং বাধিত্বা নিত্যত্বাৎ 'তুদাদিভ্যঃ শঃ' ইতি শঃ। অত্রেদমবধেয়ম্—কৃতাকৃতপ্রসঙ্গী যো বিধিঃ স নিত্য ইতি তল্লক্ষণম্। নিত্যঃ শপ্রত্যয়ঃ লঘূপধগুণে কৃতে অকৃতেঽপি প্রবৃত্তির্মহতীতি স নিত্যঃ। অতো নিত্যঃ শপ্রত্যয়ঃ পরমপি লঘূপধগুণং বাধিত্বা প্রথমং প্রবর্ততে। পরাদন্তরঙ্গং যথা—উভয়ে দেবমনুষ্যা ইতি। ইহ 'প্রথমচরম—' ইতি পরামপি বিকল্পেন প্রাপ্তাং সর্বনামসংজ্ঞাং বাধিত্বা বিভক্তি-নিরপেক্ষত্বেন অন্তরঙ্গত্বাৎ 'সর্বাদীনি সর্বনামানি' ইতি নিত্যৈব সর্বনাম-সংজ্ঞা ভবতি। অল্পাপেক্ষমন্তরঙ্গমিতি হি তল্লক্ষণম্। পরাদপবাদো যথা—'দধ্না, দধ্নে' ইত্যত্র। অত্র 'অস্থিদধি—' ইত্যনঙ্ পরমপি 'অনেকাল্শিৎ—' ইতি সর্বাদেশং বাধিত্বা 'ঙিচ্চ' ইত্যপবাদেন অন্ত্যাদেশঃ। অপোহ্যতে প্রত্যাদিশ্যতে বিষয়াৎ নিবর্ত্যতে অনেন ইত্যপবাদো বিষয়সঙ্কোচ ইতি তল্লক্ষণম্। নিত্যাদন্তরঙ্গং যথা—গ্রামণিনি কুলে। অত্র নিত্যমপি 'ইকোঽচি' ইতি নুমং বাধিত্বা 'হ্রস্বো নপুংসকে প্রাতিপদিকস্য' ইত্যন্তরঙ্গত্বাৎ হ্রস্বঃ। প্রথমতঃ নুমি কৃতে অনজন্তত্বাৎ হ্রস্বো ন স্যাৎ। অন্তরঙ্গাদপবাদো যথা—'দৈত্যারিঃ, শ্রীশঃ।' পরমপি সবর্ণদীর্ঘং বাধিত্বা অন্তরঙ্গত্বাৎ 'আদ্গুণঃ' ইতি গুণে যণি চ প্রাপ্তে অপবাদত্বাৎ সবর্ণদীর্ঘ ইতি দিক্।

## ৩। অসিদ্ধং বহিরঙ্গমন্তরঙ্গে ( পরি-৫১ )।

পরিভাষেয়ং জ্ঞাপকসিদ্ধা ন্যায়সিদ্ধা চেতি। আভ্যন্তরকারণাপেক্ষমল্পাপেক্ষং চ অন্তরঙ্গম্। বহিঃকারণাপেক্ষং বহ্বপেক্ষঞ্চ বহিরঙ্গমিতি। এবমন্তরঙ্গে বিধৌ কর্ত্তব্যে বহিরঙ্গশাস্ত্রমসিদ্ধং কৃতমপি অকৃতমিব বেদিতব্যম্ ইত্যর্থঃ। 'বাহ ঊঠ্' ইতি সূত্রে ঊঠ্গ্রহণেন জ্ঞাপিতেয়ং পরিভাষা জ্ঞাপকসিদ্ধত্বেন গৃহ্যতে। অত্র পূর্বসূত্রাৎ সম্প্রসারণস্যানুবর্ত্তমানেঽপি ঊঠ্গ্রহণং জ্ঞাপয়তি যৎ অস্মিন্ সূত্রে 'এত্যেধত্যূঠ্সু' ইতি সূত্রেণ বৃদ্ধিরাবশ্যকী। তেন 'বিশ্বৌহ' ইতি পদং সিদ্ধম্। জ্ঞাপকো হি চতুর্বিধাংশাত্মকঃ। তদ্ যথা—আদৌ বৈয়র্থ্যম্, পশ্চাৎ বাক্যান্তরকল্পনা, স্বাংশে চারিতার্থ্যম্, অন্যত্র ফলমিতি।

(১) 'বাহ ঊঠ্' ইতি সূত্রে সম্প্রসারণস্য অনুবৃত্ত্যৈব ঊঠ্লাভাৎ পুনরূঠ্গ্রহণং নিষ্প্রয়োজনম্। (২) তদেব ব্যর্থং সৎ বাক্যান্তরবিশেষং জ্ঞাপয়তি—অসিদ্ধং বহিরঙ্গমন্তরঙ্গে ইতি। অন্তরঙ্গশাস্ত্রে কর্ত্তব্যে বহিরঙ্গশাস্ত্রমসিদ্ধং স্যাদিতি হি তদর্থঃ। অত্র বহিরঙ্গং সম্প্রসারণমন্তরঙ্গো গুণঃ। অত্র সম্প্রসারণকৃতং শস্কার্যং গুণকৃতেন ণ্বিকার্যেন ন দৃশ্যতে। অতঃ 'বিশ্বৌহ' ইতি পদং ন সিধ্যতি। তস্মাদূঠ্গ্রহণং কর্ত্তব্যমেব। (৩) 'বিশ্বৌহ' ইত্যত্র 'বাহ ঊঠ্' ইতি সূত্র'মসিদ্ধং বহিরঙ্গমন্তরঙ্গে' ইতি পরিভাষয়া চ সমমেব প্রযোক্তব্যম্। (৪) অস্যাঃ পরিভাষায়াঃ ফলং 'স্যোনঃ' 'পচাবেদম্' ইত্যাদৌ দ্রষ্টব্যম্।

অল্পাপেক্ষমন্তরঙ্গং বহ্বপেক্ষং বহিরঙ্গমিতি যদুক্তং তদেব লক্ষণং নাগোজীভট্টেন পরিভাষেন্দুশেখরে প্রত্যাখ্যাতম্। লোকন্যায়সিদ্ধেয়ং পরিভাষা ভাষ্যে এবং প্রদর্শিতা—যথা, পুরুষোঽয়ং প্রাতরুত্থায় যান্যস্য প্রতিশরীরং কার্য্যং তানি তাবৎ করোতি, ততঃ সুহৃদাং ততঃ সম্বন্ধিনাম্।

### (৪) যত্রানেকবিধমান্তর্যং তত্র স্থানত আন্তর্যং বলীয়ঃ। ( পরি-১৪ )।

স্থানার্থগুণপ্রমাণতশ্চেতি চত্বার আন্তর্যভেদাঃ শব্দশাস্ত্রে প্রসিদ্ধাঃ। তত্র স্থানতো যথা—দধ্যত্র ইতি। অত্র তালুস্থানস্য ইকারস্য স্থানে তালুস্থানীয়ো যকারো জাতঃ। অর্থতো যথা—তৃজ্বৎক্রোষ্টুঃ ইতি। অত্র ক্রোষ্টুশব্দস্য উকারান্তস্য তৃজন্ত আদেশো ভবন্ অর্থসাম্যাৎ ক্রোষ্টৃশব্দ এব তৃজন্ত আদেশো ভবতি। গুণতো যথা—'বাগ্ঘরিঃ' ইতি। অত্র সংবারস্য নাদবতো ঘোষস্য মহাপ্রাণস্য হস্য তাদৃশ এব ঘকারঃ। প্রমাণতো যথা—অমুম্, অমূ, অমূন্, ইত্যাদি। অত্র 'অদসোঽসের্দাদুদো মঃ' ইতি হ্রস্বস্য হ্রস্বো দীর্ঘস্য চ দীর্ঘ উকারঃ।

অস্যাঃ পরিভাষায়াঃ কিং প্রয়োজনমিত্যাশঙ্কায়াম্ আহ—চেতা, স্তোতা ইত্যত্র 'পুগন্তলঘূপধস্য চ' ইত্যনেন ইকারোকারয়োঃ স্থানত আন্তর্য্যাৎ একারৌকাররূপে গুণে প্রাপ্তে প্রমাণত আন্তর্য্যাচ্চ অকার-রূপে গুণে প্রাপ্তে 'যত্রানেকবিধমান্তর্যং……' ইতি পরিভাষয়া স্থানত আন্তর্যস্য বলবত্ত্বাৎ একারৌকারৌ স্তঃ এবেতি দিক্।

### (৫) অকৃতব্যূহাঃ পাণিনীয়াঃ ॥ ( পরি—৫৭ ) ॥

পাণিনীয়াঃ পাণিনিপ্রভৃতিপ্রোক্তশাস্ত্রাধ্যেতারঃ অকৃতব্যূহা ভবন্তি। উহ্যতে কর্তব্যত্বেন নিরূপ্যতে ইত্যূহঃ প্রক্রিয়াবিশেষঃ। বিশেষঃ উহঃ ব্যূহঃ। আসন্ননিমিত্তলোপা প্রক্রিয়া। অকৃতঃ অননুষ্ঠিতো ব্যূহো যৈস্তাদৃশা অকৃতব্যূহাঃ। তদেব কথ্যতে দীক্ষিতাচার্যেণ—নিমিত্তং বিনাশোন্মুখং দৃষ্ট্বা তৎপ্রযুক্তং কার্যং ন কুর্বন্তীত্যর্থঃ।

নিমিত্তকারণবিনাশেঽপি কার্যস্য স্থিতিঃ ন্যায়দর্শনাদৌ দৃশ্যতে। তদ্ যথা—দণ্ডবিনাশেঽপি ঘটস্য স্থিতিঃ। বৈয়াকরণানাস্তু 'নিমিত্তা-পায়ে নৈমিত্তিকস্যাপ্যপায়ঃ'—ইতি হি ন্যায়ঃ। তে খলু নিমিত্তকারণ-বিনাশে কার্যমপি বিনশ্যতীতি মন্যন্তে। তদ্ যথা—ষদ্‌ধাতোঃ লিটঃ

কসু-প্রত্যয়ে দ্বিত্বে হলাদিঃ শেষঃ, এত্বে অভ্যাসলোপে চ সেদ্ বস্ ইতি জাতে 'বস্বেকাজাদ্…' ইতি সূত্রেণ ইড়াগমঃ প্রাপ্তঃ। কিন্তু অস্মাচ্ছব্দাৎ শসি ভসংজ্ঞায়াং বসোঃ বকারস্য তু বিনাশোন্মুখত্বং, তেন ইড়াগমোঽপি নিবর্ততে অনেন পরিভাষাশ্রয়েণ। বহির্ভূতযজাত্তসর্বনামস্থানস্বাদিপ্রত্যয়নিমিত্তকভসংজ্ঞাপেক্ষতয়া সম্প্রসারণস্য তু বহিরঙ্গত্বম্ ইড়াগমস্যৈবান্তরঙ্গত্বম্। তেন তস্যৈব প্রথমং প্রবৃত্তত্বং, তথাপি ইড়াগমো নিবর্ততে এব।

নাগেশমতে তু ইয়ং পরিভাষা নির্মূলা নিষ্ফলা চ ভাষ্যকৃতা অনভিধানাদব্যাখ্যানাচ্চ।

**(৬) *'বান্তঃ' ইত্যত্র বকারাৎ 'গোর্যূতৌ' ইত্যত্র ছকারাদ্বা পূর্বভাগে 'লোপো ব্যোঃ' ইতি লোপেন বকারঃ প্রশ্লিষ্যতে।***

গব্যং নাব্যমিত্যত্র লোপঃ শাকল্যস্যেতি হলি সর্বেষামিতি চ বকারস্য লোপো ন ভবতি, তয়োঃ পদান্তবিষয়ত্বাৎ। ইহ চ ভত্বেন পদত্বাভাবাৎ। গব্যূতিরিত্যত্র তু পদত্বাৎ বলোপঃ স্যাদেবেতি চেন্ন, 'বান্তো যি প্রত্যয়ে' ইতি সূত্রে বকারাৎ পূর্বং বকারপ্রশ্লেষাৎ। তর্হি সূত্রে বান্ত ইতি বস্তুতো ব্ বান্ত ইত্যস্য লোপো ব্যোর্বলীতি সূত্রেণ বলোপে রূপম্। ব্ বান্ত ইতি চ ব্-শব্দস্য বান্তশব্দেন কর্মধারয়ঃ। ব ইতি প্রশ্লিষ্যমাণং বান্তস্য বিশেষণম্, বিশেষণত্বাচ্চ তদন্তবিধৌ সতি বকারান্ত ইতি লভ্যতে। তত্র বান্তস্য পুনর্বান্তত্ববচনসামর্থ্যাৎ শ্রূয়মাণবকারবান্ বান্ত আদেশঃ স্যাদিতি লভ্যতে। গোর্যূতাবিত্যত্র চ ইদমেব বান্তগ্রহণমনুবর্ততে ইতি তত্রাপি শ্রূয়মাণবকারবান্ বান্তাদেশ ইতি লভ্যতে। তেন গোঃ ব্ বকারযুক্তো বান্ত আদেশঃ স্যাৎ যূতৌ পরে ইত্যর্থঃ সম্পদ্যতে। বান্তস্য বকারযুক্ত এব, তস্য পুনর্বকারযুক্ততানির্দেশে বকারস্য লোপো ন ভবতীত্যায়াতি। বকারস্য শ্রূয়মাণত্ববচনং বকারো ন লুপ্যেত ইত্যর্থে পর্য্যবসন্নমিত্যর্থঃ, অশ্রবণস্যৈব লোপ-

শব্দার্থত্বাদিতি দিক্। গব্যং নাব্যমিত্যত্র বকারপ্রশ্লেষাভাবেঽপি পদত্ববাধকেন ভত্বেন বকারলোপাপ্রসক্তেরিষ্টসিদ্ধৌ অপি গব্যূতিরিত্যত্র বকারলোপাভাবার্থং গোর্যূতৌ ইতি বার্ত্তিকে বকারপ্রশ্লেষ আবশ্যক এব।

*(৭) 'কানি সন্তি' 'কৌ স্তঃ' ইত্যত্রাস্তেরল্লোপস্য স্থানিবদ্ভাবেন যণাবাদেশৌ প্রাপ্তৌ 'ন পদান্ত' ইতি সূত্রেণ পদান্তবিধৌ তন্নিষেধায় স্তঃ।*

নন্বু কানি সন্তি কৌ স্তঃ ইত্যত্র 'শ্নসোরল্লোপঃ' ইত্যনেন অস্‌-ধাতোরকারস্য লোপেঽপি অচঃ পরস্মিন্ পূর্ববিধাবিতি সূত্রবলাৎ পর-নিমিত্তকস্যঅল্লোপস্য স্থানিবদ্ভাবেন অচ্‌ত্বমানীয় উক্তস্থলে যণাবাদেশৌ প্রাপ্তৌ ইতি শঙ্কা উদেতি। ন চায়ং পূর্বপক্ষঃ পদসংস্কারপক্ষেণ সম্ভবতি। পদসংস্কারপক্ষশ্চ পদানি সংস্কৃত্য সংস্কৃত্য উৎসৃজ্যন্তে তেষাং যথেষ্টম-ভিসম্বন্ধো বর্ততে ইতি। তত্র তাবদপরঃ কশ্চন পক্ষোঽস্তি—বাক্য-সংস্কারপক্ষ ইতি। স চ বাক্যানি সংস্কৃত্য পদানি সংক্রিয়ন্তে ইত্যেবংরূপঃ। অস্মিন্ পক্ষে পূর্বোপস্থিতনিমিত্তকত্বরূপান্তরঙ্গত্বমাদায়ান্ত-রঙ্গাণাং পূর্বং প্রবৃত্তিরিতি ইকারাদেঃ স্থানিভূতাদচঃ পূর্বত্বমিতি কৃত্বা শঙ্কায়া অবসরো বিদ্যতে এব। অতঃ বাক্যসংস্কারপক্ষমবলম্ব্যৈব কথং ন যণাবাদেশৌ ইতি প্রশ্নাশয়ঃ। সমাধানঞ্চাত্র—"ন পদান্তদ্বিবচনে" ইতি সূত্রেণ পদান্তবিধৌ কর্তব্যে স্থানিবদ্ভাবাভাবাৎ অচ্‌ত্বাভাবেন সূত্রদ্বয়স্য প্রবৃত্তিরেব নাস্তি ইতি কৃত্বা যণাবাদেশৌ ন স্ত ইতি সংশয়ঃ।

*(৮) দ্বিত্বং লাৈস্যব কাৈস্যব নোভয়োরুভয়োরপি।*
*তবল্‌কারাদিষু বুধৈর্বোধ্যং রূপচতুষ্টয়ম্॥*

'তব ল৯কার' ইতি স্থিতে 'আদ্‌গুণঃ' ইত্যনেন অকারল৯কারয়োঃ স্থানে গুণে অকারে তস্য 'উরণ্‌পরঃ' ইত্যনেন লপরত্বে তবল্‌কার ইতি রূপম্। অত্র লকারোঽয়ং যণ্, ককারশ্চময়্। তৎ 'যণো ময়ো দ্বে

বাচ্যে' ইত্যস্য যণঃ পরস্য ময়ো দ্বিত্বম্ ইতি ব্যাখ্যানে ককারস্য দ্বিত্ববিকল্পঃ। লকারস্যাপি 'অনচি চ' ইতি বৈকল্পিকদ্বিত্বং তেন তবল্‌কার ইত্যত্র রূপচতুষ্টয়ং বোধ্যম্। তথাহি—(১) 'অনচি চ' ইতিসূত্রেণ লকারস্য দ্বিত্বে ককারস্য দ্বিত্বাভাবে দ্বিলকারমেকককারং চ প্রথমং রূপম্—তবল্‌লকারঃ ইতি। (২) ককারস্য দ্বিত্বে লকারস্য দ্বিত্বাভাবে দ্বিককারমেকলকারং চ দ্বিতীয়ং রূপম্—তবলক্‌কার ইতি। (৩) লকার-ককারয়োরুভয়োরপি দ্বিত্বাভাবে একলকারমেকককারমিতি তৃতীয়ং রূপম্—তবল্‌কারঃ ইতি। (৪) লকারককারয়োরুভয়োরপি দ্বিত্বে দ্বিলকারং দ্বিককারমিতি চতুর্থং রূপমিত্যর্থঃ। তবল্লক্কার ইতি দিক্।

তত্র প্রথমে ককারো ন যম্ ইতি 'হলো যমাং যমি লোপঃ' ইতি ন প্রবর্ততে। নাপি লকারো ঝর্ ন বা ককারস্তস্য সবর্ণ ইতি 'ঝরো ঝরি সবর্ণে' ইত্যস্যাপি প্রসঙ্গো নাস্তি। তেন লকারস্য লোপো ন। দ্বিতীয়ে 'ঝরো ঝরি—' ইত্যস্তি ককারলোপস্যাবসরঃ, ফলং তু একক-কারম্। তৃতীয়মেব রূপম্, তন্নিষ্প্রয়োজনো লোপো ন প্রবর্ততে। চতুর্থেঽপি লোপে ফলাভাবঃ। তেন চত্বার্য্যেব রূপাণি। তদুক্তং মূলে—বোধ্যং রূপচতুষ্টয়মিতি। আদিনা মমল্‌কারাদিসংগ্রহো বোধ্যঃ।

## ✓(৯) *'অচি' কিম্। কুমারী শেতে।*

অকঃ সবর্ণে অচি পরে দীর্ঘ একাদেশঃ স্যাদিতি 'অকঃ সবর্ণে দীর্ঘঃ' ইতি সূত্রস্যায়মর্থঃ। তত্রেদমাশঙ্ক্যতে—ননু 'অকঃ সবর্ণে দীর্ঘঃ' ইতি সূত্রে 'ইকো যণচি' ইত্যতঃ অচিপদমনুবর্ততে। তদননু-বর্তনেঽপি অকঃ সবর্ণে পরে পূর্বাপরয়োঃ দীর্ঘৈকাদেশ স্যাদিত্যর্থে জাতে দৈত্যারিঃ, শ্রীশঃ ইত্যাদিসকলেষ্টসিদ্ধৌ সূত্রে অচিপদানুবর্তনং ব্যর্থমিতি চেন্ন। কুমারী শেতে ইত্যত্র তালুস্থানজন্যত্বেন বিবৃত-প্রযত্নত্বেন চ স্থানপ্রযত্নসাম্যাৎ ঈকারশকারয়োঃ সবর্ণতয়া শকারে ঈকারবুদ্ধ্যা তয়োর্দীর্ঘ ঈকার একাদেশরূপানিষ্টাপত্তেঃ। ন চ নাজ্-

ঝলাবিতি সূত্রেণ অজ্‌ঝলোঃ সাবর্ণ্যনিষেধাৎ ঈকারশকারয়োঃ স্থানপ্রযত্নসাম্যেঽপি সাবর্ণ্যাভাবেন ন কাচিৎ হানিরিতি বাচ্যম্। নাজ্‌ঝলৌ ইত্যস্য বাক্যার্থবোধবেলায়াম্ অণুদিৎসূত্রস্য বাক্যার্থ-বোধাভাবেন ( পঞ্চধামহাবাক্যোত্তরপ্রবৃত্তিরণুদিৎসূত্রস্য ) দীর্ঘাদীনাং জ্ঞানাভাবাৎ নাজ্‌ঝলৌ ইতি নিষেধস্যাপ্রবৃত্তেঃ। পঞ্চধামহাবাক্যঞ্চেত্থং —প্রথমতঃ, অইউণ্‌ ইত্যাদিনা বর্ণোপদেশঃ। ততো হলন্ত্যম্ ইত্যনেন ইৎসংজ্ঞা, অনন্তরম্ আদিরন্ত্যেন সহেতা ইতি প্রত্যাহারসিদ্ধিঃ, ততঃ তুল্যাস্যপ্রযত্নং সবর্ণমিতি সবর্ণসংজ্ঞা। অনন্তরম্ 'অণুদিৎসবর্ণস্য চা-প্রত্যয়ঃ' ইত্যনেন গ্রাহকতাসিদ্ধিঃ। তত্র তাবৎ পঞ্চধামহাবাক্যে নাজ্‌ঝলৌ ইতি সূত্রস্যাবিদ্যমানত্বাৎ কথং ন দীর্ঘাদৌ প্রবৃত্তিরিতি বাচ্যম্, নিষেধশাস্ত্রাণাং নিষিদ্ধবিশেষাকাঙ্ক্ষত্বাৎ বিধ্যেকবাক্যতান্বয়ঃ ইতি নাগেশোক্ত্যা ভুক্তবন্তং প্রতি মা ভুঙ্‌ক্ষ্ব ইতি ন্যায়েন চ নিষেধশাস্ত্রস্য বৈয়র্থ্যভিয়া বিধিবাক্যেণ সহার্থবোধস্বীকারেণ পঞ্চধা-মহাবাক্যে অন্তর্ভূতত্বাৎ। তেন অজ্‌ঝলভিন্নং যৎ তুল্যাস্যপ্রযত্নং তৎ সবর্ণসংজ্ঞং স্যাদিতি সূত্রার্থো জাতঃ। অতঃ নাজ্‌ঝলৌ ইতি সূত্রস্য দীর্ঘাদৌ ন প্রবৃত্তিঃ ইতি কৃত্বা কুমারী শেতে ইত্যত্রানিষ্টাপত্তির্মা ভূদিত্যেতদর্থং সূত্রে অচিপদম্ অনুবর্তনীয়ম্ ইতি দিক্।

## ✓(১০) টোঃ কিম্? সর্পিষ্টমম্।

'ন পদান্তাট্টোরনাম্'—ইতিসূত্রস্যায়ং তাবদর্থঃ—পদান্তাট্টবর্গাৎ পরস্যানামঃ স্তোঃ ষ্টুর্ন স্যাদিতি। ননু 'তোঃ ষি' ইতি নির্দেশাৎ 'কচিদেকদেশোঽপ্যনুবর্ত্ততে' ইতি পরিভাষয়া 'ষ্টুনা ষ্টুঃ' ইতি সূত্রাৎ টু-পদমনুবর্ত্য পদান্তাৎ টবর্গাৎ পরস্যানামঃ স্তোঃ ষ্টুর্ন স্যাদিত্যর্থলাভে ষট্ সন্তঃ, ষট্ তে ইত্যাদীনাম্ ইষ্টসিদ্ধৌ 'ন পদান্তাট্টোরনাম্' ইতি সূত্রে টোগ্রহণং ব্যর্থমিতি শঙ্কায়াম্ উক্তং—তদেব ব্যর্থং সদুক্তপরিভাষায়া অনিত্যত্বং জ্ঞাপয়তি। তথা চ টোগ্রহণাভাবে 'সন্নিযোগশিষ্টানাং সহ বা প্রবৃত্তিঃ সহ বা নিবৃত্তিঃ' ইতি ন্যায়েন 'টুঃ' ইতি সমুদায়স্যানুবৃত্তৌ

পদান্তাভ্যাং ষকারটবর্গাভ্যাং পরস্যানামঃ স্তোঃ ষ্টুর্ন স্যাদিত্যর্থে জাতে সর্পিষ্টমমিত্যত্রাপি ষ্টুত্বনিষেধঃ স্যাদিত্যনিষ্টাপত্তিঃ তৎ মা ভূদিত্যেতদর্থং সূত্রে টোগ্রহণং কর্তব্যমেব। ন চ 'সর্পিষ্ তমম্' ইতি স্থিতে 'স্বাদিষ্বসর্বনামস্থানে' ইতি অন্তর্বর্তিনীং বিভক্তিমাশ্রিত্য বা পদত্বাৎ ষকারস্য পদান্তত্বাৎ জশ্ত্বে ষকারানুবৃত্তৌ অপি পদান্তে টবর্গস্যৈব লাভ ইতি বাচ্যম্। জশ্ত্বে কর্তব্যে "হ্রস্বাত্তাদৌ তদ্ধিতে" ইতি সূত্রবিহিতষত্বস্যাসিদ্ধত্বাৎ জশ্ত্বাভাবাৎ পদান্তে ন টবর্গঃ কিন্তু ষকার ইতি তত্র দোষস্য জাগরূকত্বাৎ।

## (১১) অপ্লুতাৎ কিম্—এহি সুস্রোত (৩) অত্র স্নাহি।

'অতো রোরপ্লুতাদপ্লুতে' ইতি সূত্রে অপ্লুতাদিতি বিশেষণাভাবে 'এহি সুস্রোত (৩) অত্র স্নাহি' ইত্যত্র প্লুতাকারাৎ পরস্য রুত্বস্যোত্বং স্যাদিতি তন্নিবারণার্থং তৎকর্ত্তব্যম্। উত্বে কর্ত্তব্যে প্লুতস্যাসিদ্ধত্বাদতঃ পরোঽয়ং রুঃ। অতস্তস্য উত্বে প্রাপ্তে তন্নিবৃত্যর্থমপ্লুতাদিত্যাবশ্যকমিত্যর্থঃ। নম্বপ্লুতাদিত্যুক্তেঽপি রোরুত্বমত্র দুর্বারম্, উত্বে কর্ত্তব্যে প্লুতস্যাসিদ্ধতয়া অপ্লুতাৎ পরত্বস্যাপি সত্বাদিত্যত আহ—অপ্লুতাদিতি বিশেষণে তু তৎসামর্থ্যান্নাসিদ্ধত্বম্ ইতি। যদি উত্বে কর্ত্তব্যে প্লুতস্যাসিদ্ধত্বম্, তর্হি অপ্লুতাদিতি বিশেষণং ব্যর্থমেব স্যাৎ, দত্তেঽপি বিশেষণে প্লুতস্যাসিদ্ধতয়া অপ্লুতাৎ পরত্বস্যাপি সত্ত্বেন উত্বপ্রাপ্তিদোষতাদবস্থ্যাৎ। অতঃ অপ্লুতাদিতি বিশেষণসামর্থ্যাৎ প্লুতস্য নাসিদ্ধত্বম্ ইতি বিজ্ঞায়ত ইত্যর্থঃ। নম্বেবমপি অপ্লুতাদিতি ব্যর্থম্। প্লুতাৎ পরস্য রোঃ অত ইতি তপরকরণাদেব উত্বনিবৃত্তিসিদ্ধেঃ। ন চ উত্বে কর্ত্তব্যে প্লুতস্যাসিদ্ধত্বাদতঃ পরত্বস্যাপি সত্বাদুত্বং স্যাদিতি বাচ্যম্, তপরকরণসামর্থ্যাদেব প্লুতস্যাসিদ্ধত্বাভাববিজ্ঞানেন অতঃ পরত্বাভাবেনৈব উত্বনিবৃত্তেঃ সম্ভবাদিতি।

## (১২) অশি কিম্। দেবাস্সন্তি।

'ভোভগোঅঘোঅপূর্বস্য যোঽশি' ইত্যত্র অশ্গ্রহণাভাবেঽপি 'দেবাস্সন্তি' ইত্যত্র 'সসজুষো রুঃ' ইতি রুত্বে 'ভোভগো—'ইতি যত্বে

কৃতে তস্য পূর্বত্রাসিদ্ধীয়ত্বেনাসিদ্ধত্বাৎ 'খরবসানয়োর্বিসর্জনীয়ঃ' ইতি বিসর্গে সতি 'দেবাঃ সন্তি' ইতি সিধ্যতীতি চেন্ন। বিসর্গে জাতে অপি বিসর্গস্য 'স্থানিবদাদেশোঽনল্বিধৌ' ইতি স্থানিবদ্ভাবেন রুত্বাতিদেশে পুনরপি যত্বাপত্তেঃ। কৃতে চাশ্গ্রহণে সকারস্যাশ্ত্বাভাবান্ন যত্বমিতি। ন চ অনল্বিধৌ ইতি স্থানিবদ্ভাবনিষেধ ইতি বাচ্যম্। রোরিতি সমুদায়রূপাশ্রয়ণেনাদোষাৎ।

## (১৩) *পূর্বগ্রহণমনুত্তরপদেঽপি পূর্বমাত্রস্যৈব দীর্ঘত্বম্। লীঢঃ।*

ঢলোপনিমিত্তে ঢকারে রেফলোপনিমিত্তে রেফে চ পরতঃ পূর্বস্যাণঃ দীর্ঘঃ স্যাদিতি "ঢ্রলোপে পূর্বস্য দীর্ঘোঽণঃ" ইতি সূত্রস্যায়ং তাবদর্থঃ। যথা, পুনারমতে, হরীরম্য ইতি।

তত্রেদমাশঙ্ক্যতে—ননু 'ঢ্রলোপে পূর্বস্য—' ইতি সূত্রে পূর্বস্য গ্রহণাভাবেঽপি 'ঢ্রলোপে' ইতি সপ্তম্যন্তং দৃষ্ট্বা 'তস্মিন্নিতি নির্দ্দিষ্টে পূর্বস্য' ইতি পরিভাষয়া অব্যবহিতপূর্বস্য উপস্থিতৌ চ ঢ্রলোপ-নিমিত্তয়োঃ ঢকাররেফয়োঃ পরয়োঃ পূর্বস্যাণঃ দীর্ঘঃ স্যাদিত্যর্থে পুনারমতে হরীরম্য ইত্যাদিসকলেষ্টসিদ্ধৌ সূত্রে পূর্বগ্রহণং ব্যর্থমিতি চেন্ন। সূত্রে পূর্বগ্রহণাভাবে হি 'অলুগুত্তরপদে' ইতি সূত্রাৎ উত্তরপদানুবৃত্ত্যা 'নীরক্তম্' 'দূরক্তম্' ইত্যাদি সমাসস্থলে এব দীর্ঘো ভবিষ্যতীতি 'লীঢ়ঃ, অজর্ঘাঃ' ইত্যাদৌ দীর্ঘাসিদ্ধেঃ। তস্মাৎ পূর্বগ্রহণং কর্ত্তব্যমেব। কৃতে চ তস্মিন্ তৎসামর্থ্যাৎ উত্তরপদাননুবৃত্তৌ সমাসে অসমাসে চ সর্বত্রৈব দীর্ঘঃ সিধ্যতীতি ভাবঃ।

## (১৪) *স্থানপ্রযত্নাভ্যামন্তরতমে স্পার্শে চরিতার্থো বিধিরয়ং রেফে ন প্রবর্ত্ততে। চতুর্মুখঃ।*

চত্বারি মুখানি যস্য অসৌ চতুর্মুখঃ। ব্রহ্মা ইত্যর্থঃ। অত্রেদং শঙ্ক্যতে—চতুর্ মুখ ইতি দশায়াং "যরোঽনুনাসিকেঽনুনাসিকো বা"

ইতি সূত্রেণ পদান্তস্থ যরোঽত্র রেফস্থ অনুনাসিকে মুখশব্দাবয়বমকারে পরে অনুনাসিকো মূর্ধস্থানজন্যো ণকারঃ কুতো নেতি চেদুচ্যতে 'স্থানেঽন্তরতম উরণ্‌রপরঃ' ইতি সংহিতাপাঠে প্রথমান্তপাঠাঙ্গীকারে স্থানিনঃ স্থানে অন্তরতম এব আদেশো ভবতীতি যথা নিয়মঃ তথা 'ভাষ্যকৃতা স্থানেঽন্তরতমে' ইতি সপ্তম্যন্তপাঠং স্বীকৃত্য আদেশোঽন্তর-তমে স্থানিনি ভবতীত্যর্থং ব্যাখ্যায় আদেশোঽপি অন্তরতমস্যৈব স্থানিনঃ স্থানে ভবতি ইতি নিয়মঃ স্বীকৃতঃ। এবঞ্চ স্থানপ্রযত্নাভ্যাম্ অন্তরতমে স্পর্শে চরিতার্থে লব্ধপ্রয়োজনোঽয়ম্ অনুনাসিকবিধিঃ কেবলং স্থান-মাত্রেণ আনন্তর্যমাদায় সদৃশে রেফে ন প্রবর্ততে। তর্হি ক্বচিৎ প্রথমান্তপাঠস্য ক্বচিৎ সপ্তম্যন্তপাঠস্য স্বীকারে অর্ধজরত্যাপত্তেঃ দীর্ঘেকারাদৌ সুধ্যুপাস্য ইত্যাদৌ যণনাপত্তেশ্চেতি চেন্ন। "অনুস্বারস্য যয়ি পরসবর্ণঃ" ইতি সূত্রাৎ সবর্ণপদমাকৃষ্য প্রকৃতসূত্রে সংযোজ্য পদান্তস্য যরোঽনুনাসিকে পরে সবর্ণানুনাসিকঃ স্যাদিতি সূত্রার্থে "রেফোষ্মাণাং সবর্ণা ন সন্তি" ইতি ভাষ্যেণ রেফস্য সাবর্ণ্যাভাবাৎ ণত্বাভাব ইতি সমাধানাৎ।

✓(১৫) ***কথং তর্হি 'মদোদগ্রাঃ ককুদ্মন্তঃ' ইতি। যবাদি-গণে দকারনিপাতনাৎ।***

'প্রত্যয়ে ভাষায়াং নিত্যম্' ইত্যনেন বার্ত্তিকেন প্রত্যয়ে বিদ্যমানে অনুনাসিকে পরতঃ নিত্যানুনাসিকো ভবতীত্যর্থঃ। তত্রোদাহরণম্ —তন্মাত্রম্, চিন্ময়মিত্যাদয়ঃ। 'ককুদ্মন্তঃ' ইত্যত্র ককুদ্‌শব্দাৎ মতুপি প্রত্যয়ে পরে "প্রত্যয়ে ভাষায়াং নিত্যম্" ইতি নিত্যানুনাসিকঃ কথং নেতি প্রশ্নঃ। সমাধানঞ্চাত্র—

"মাদুপধায়াশ্চ মতোর্বোঽযবাদিভ্যঃ" ইতি যবাদিগণে দকারস্য নিপাতনাদত্র 'ককুদ্ম'চ্ছব্দে দকারস্য নির্দেশান্ন তস্যানুনাসিকঃ। যদি তত্র দকারস্য নকার এব ইষ্টঃ স্যাৎ তর্হি নকারমেব লাঘবা-ন্নির্দেশাদিতি ভাবঃ। অথবা, 'যচি ভম্' 'তসৌ মত্বর্থে' ইতি

সংহিতাপাঠে তকারাৎ প্রাক্ চত্বেন দকারস্যাপি প্রশ্লেষেণ দান্ত-তান্তসান্তস্য ভসংজ্ঞা। তেন প্রকৃতে ভসংজ্ঞয়া পদসংজ্ঞায়াঃ বাধাৎ অনুনাসিকস্য ন প্রাপ্তিঃ॥

## (১৬) *পূর্বসূত্রেণ সিদ্ধে সমাসগ্রহণং নিয়মার্থম্।*

ননু 'কৃত্তদ্ধিতসমাসাশ্চ' ইতি সূত্রে সমাসগ্রহণাভাবেঽপি 'অর্থবদ-ধাতুরপ্রত্যয়ঃ প্রাতিপদিকম্' ইতি সূত্রে 'প্রত্যয়গ্রহণে যস্মাৎ স দেস্তদন্তস্য গ্রহণম্' ইতি পরিভাষয়া তদাদিবিশিষ্টতদন্তবিধৌ সতি বিহিতস্তদা প্রত্যয়ান্ততদাদিভিন্নস্য প্রাতিপদিকসংজ্ঞা স্যাদিত্যর্থে 'রাজন্ ঙস্ পুরুষ সু' ইতি সমুদায়ঘটকরাজন্ ঙস্ ইত্যস্য পুরুষ সু ইত্যস্য চ প্রত্যয়ান্ততদাদিত্বেঽপি রাজন্ ঙস্ পুরুষ সু ইতি সমুদায়স্য প্রত্যয়ান্ততদাদিভিন্নত্বাৎ 'অর্থবদিতি' সূত্রেনৈব প্রাতিপদিকসংজ্ঞা-সিদ্ধৌ সূত্রে সমাসগ্রহণং ব্যর্থমিতি পূর্বপক্ষঃ।

সমাধানঞ্চাত্র দীক্ষিতেন কৃতম্—নিয়মার্থমিহ সমাসগ্রহণম্। কীদৃশো নিয়ম ইত্যাহ—যত্র সংঘাতে পূর্বো ভাগঃ উপান্ত্যঃ অংশঃ পদম্ অন্ত্যো ভাগঃ পদং ভবতু বা ন বা তস্য চেদ্‌ভবতি তাদৃশস্য সংঘাতস্য যদি সংজ্ঞা প্রার্থ্যতে তর্হি সমাসস্যৈব তস্য সমাসসংজ্ঞায়াং সত্যামেব প্রাতিপদিকসংজ্ঞা অপি ভবতি। নান্যথা। অতঃ গামানয় ইত্যাদিবাক্যস্য সমাসসংজ্ঞা নাস্তি, অস্য সংঘাতস্য প্রাতিপাদকসংজ্ঞা অপি ন ভবতি।

## (১৭) *"প্রাতিপদিকগ্রহণে লিঙ্গবিশিষ্টস্যাপি গ্রহণম্" ইত্যেব সিদ্ধে ঙ্যাব্‌গ্রহণং ঙ্যাবন্তাত্তদ্ধিতোৎপত্তির্যথা স্যান্ঙ্যাব্‌ভ্যাং প্রাক্ মা ভূদিত্যেতদর্থম্॥*

প্রাতিপদিকগ্রহণে লিঙ্গবিশিষ্টস্যাপি গ্রহণমিত্যনয়া পরিভাষয়া যৎ কিঞ্চিদবিশেষেণ প্রাতিপদিকস্য উক্তং তৎ স্ত্রিয়াং বর্তমানস্যাপি তস্য ভবতি। তেন রমা গৌরী ইত্যাদৌ অপি অনয়া পরিভাষয়া প্রাতি-

পদিকত্বধর্মস্যানয়নেন প্রাতিপদিকাদিত্যনেনৈব ইষ্টসিদ্ধৌ ঙ্যাপ্ প্রাতিপদিকাদিতি সূত্রে ঙ্যাব্‌গ্রহণং ব্যর্থমেব। তদেব ব্যর্থং সৎ 'ঙ্যাব্‌ভ্যাং তদ্ধিতাঃ' ইত্যর্থং বোধয়তি। অর্থাৎ 'ঙ্যাপ্' ইতি বিশিষ্ট-বচনাৎ ঙ্যাবন্তাদেব তদ্ধিতোৎপত্তির্যথা স্যাৎ ঙ্যাব্‌ভ্যাং প্রাক্ তদ্ধিতো মা ভূদিত্যর্থো জায়তে। যদা খলু কস্যাশ্চিৎ প্রকৃতে স্তদ্ধিতশ্চ স্ত্রীপ্রত্যয়শ্চ যুগপৎ প্রাপ্নুতস্তদা প্রথমং তদ্ধিতঃ ক্রিয়তাং স্ত্রীপ্রত্যয়ো বেতি সন্দেহে ইয়ং ব্যবস্থা—প্রথমং স্ত্রীপ্রত্যয়ো ভবতি ততস্তদ্ধিত ইতি। অন্যথা "স্বার্থদ্রব্যলিঙ্গসংখ্যাকারকাণাং ক্রমশঃ স্বীকারঃ" ইতি ন্যায়েন আর্যশব্দাৎ পূর্বং স্বার্থিকত্বেন কপ্রত্যয়ে ততষ্টাপি আকার-স্থানিকাকারস্যাভাবেন "উদীচামাতঃ স্থানে—" ইত্যস্যাপ্রবৃত্তৌ "প্রত্যয়স্থাৎ কাৎ—" ইত্যনেনৈব নিত্যমিত্বে "আর্যিকা" ইত্যেকমেব রূপং স্যাৎ। কৃতে হি ঙ্যাব্‌গ্রহণে তৎসামর্থ্যাৎ পূর্বং টাপি ততঃ কপ্রত্যয়ে 'কেঽণঃ' ইতি হ্রস্বে আকারস্থানিকাকারস্য সত্ত্বেন "উদীচামাতঃ স্থানে যকপূর্বায়াঃ" ইতি সূত্রেণ বৈকল্পিকত্বেন আর্যকা 'আর্যিকা' ইতি রূপদ্বয়ং সিধ্যতি।

**(১৮) পুরস্তাদপবাদা অনন্তরান্ বিধীন্ বাধন্তে নোত্তরান্ ইতি ন্যায়েন 'অকঃ সবর্ণে দীর্ঘঃ' ইত্যস্যৈবাপ-বাদো ন তু প্রথময়োরিত্যস্যাপি। রামাঃ।**

রামশব্দাৎ জসি বিভক্তৌ অনুবন্ধলোপে চ রাম অস্ ইতি স্থিতে 'অকঃ সবর্ণে দীর্ঘঃ' ইতি সবর্ণদীর্ঘঃ প্রাপ্তঃ, 'প্রথময়োঃ পূর্বসবর্ণঃ' ইতি পূর্বসবর্ণদীর্ঘশ্চ প্রাপ্তঃ, 'অতো গুণে' ইতি পর-রূপমপি প্রাপ্তম্। ননু তত্র 'অতো গুণে' ইতি পররূপমপবাদত্বাৎ সবর্ণদীর্ঘমিব পূর্বসবর্ণদীর্ঘমপি বাধেত ইতি চেন্ন, যত্র যত্র অপ-দান্তাদকারাদগ্রে হ্রস্বাকারঃ, তত্র তত্র সর্বত্র সবর্ণদীর্ঘস্য ক্বচিচ্চ প্রথমাদ্বিতীয়াস্থলে পূর্বসবর্ণদীর্ঘস্য চ প্রাপ্তিরিতি পররূপস্য নিরবকাশস্য সকললক্ষ্যপ্রাপ্তসবর্ণদীর্ঘস্য বাধকত্বম্।

সবর্ণদীর্ঘবাধেন চারিতার্থ্যে পূর্বসবর্ণদীর্ঘস্য বাধে নিরবকাশত্বরূপবাধ-বীজস্যাভাবেন ন পূর্বসবর্ণদীর্ঘস্য বাধকত্বম্। কিন্তু পূর্বসবর্ণদীর্ঘস্যৈব পরত্বেন প্রাবল্যাৎ প্রবৃত্তিরিতি। অপবাদো যদ্যন্যত্র চরিতার্থস্তর্হি পরেণ অন্তরঙ্গেণ চ বাধ্যতে ইতি পরিভাষা। এবং হি অষ্টাধ্যায্যাং পাঠঃ—'অতো গুণে', 'অকঃ সবর্ণে দীর্ঘঃ', 'প্রথময়োঃ পূর্বসবর্ণদীর্ঘঃ' ইতি অপবাদশাস্ত্রস্য প্রাথম্যম্, বাধ্যশাস্ত্রস্য চ অনন্তরোত্তরত্বম্। তত্র 'অতো গুণে' ইতি সূত্রং যদ্যপি 'অকঃ সবর্ণে দীর্ঘঃ' তথা 'প্রথময়োঃ পূর্বসবর্ণঃ' ইতি দ্বয়স্যাপি বাধকং প্রতীয়তে তাভ্যাং বিষয়াল্পত্বাৎ, তথাপি 'পুরস্তাদপবাদা অনন্তরান্ বিধীন্ বাধন্তে নোত্তরান্' ইতি ন্যায়েন 'অতো গুণে' ইতি সূত্রম্ 'অকঃ সবর্ণে দীর্ঘঃ' ইত্যস্যৈব বাধকং স্যাৎ ন তু ব্যবহিতস্য 'প্রথময়োঃ পূর্বসবর্ণদীর্ঘঃ' ইত্যস্যাপি। এবং প্রকৃতে রাম অস্ ইত্যত্র 'প্রথময়োঃ পূর্বসবর্ণঃ' ইত্যস্যৈব সাবকাশত্বাৎ পূর্বসবর্ণদীর্ঘেণ রামা ইতি রূপং স্যাদিতি দিক্।

***(১৯) সম্বুদ্ধ্যাক্ষিপ্তস্যাঙ্গস্যৈঙ্হ্রস্বাভ্যাং বিশেষণান্নেহ। হে কতরৎ কুলেতি।***

ননু 'এঙ্হ্রস্বাৎ সংবুদ্ধেঃ' ইতি সূত্রে 'যেন বিনা যদনুপপন্নং তত্তেনাক্ষিপ্যতে' ইতি অর্থাপত্তিন্যায়েন প্রকৃতিমন্তরা প্রত্যয়স্য সম্বুদ্ধেরনুপপন্নত্বাৎ সম্বুদ্ধ্যা অঙ্গপদস্যাক্ষেপঃ। তত্র তাবৎ যেন যস্য আক্ষেপস্তস্য তত এবান্বয়ঃ যুক্তঃ। তৎ কথং দীক্ষিতেন এঙ্হ্রস্বাভ্যাং সহ অন্বয়ঃ কৃত ইতি পূর্বপক্ষঃ। অত্রোচ্যতে—যদি অঙ্গ-পদস্য সম্বুদ্ধৌ অন্বয়ঃ ক্রিয়তে তর্হি হে কতরৎ হে কুল ইত্যত্র অব্যাপ্ত্যতিব্যাপ্তিদোষঃ সঞ্জায়তে। তচ্চ ইত্থং সম্বুদ্ধ্যান্বয়ে তু অঙ্গাৎ পরা য সম্বুদ্ধিস্তদবয়বো হল্ লুপ্যতে স চ এঙ্হ্রস্বাভ্যাং পরীভূতশ্চেৎ ইত্যর্থস্বীকারে হে কতরৎ ইত্যত্র তকারস্য লোপাপত্তিস্তদ্বারণায়, অঙ্গাৎ পরা যা সম্বুদ্ধি স্তদবয়বো হল্ লুপ্যতে সা চ সম্বুদ্ধিঃ এঙ্-হ্রস্বাভ্যাং পরীভূতা চেদিত্যর্থাঙ্গীকারে হে কুল ইত্যত্র একদেশবিকৃত-

ন্যায়েন লান্তভাগস্যাঙ্গত্বে, পরাদিবদ্ভাবেন সম্বুদ্ধিত্বে জাতে সতি হ্রস্বাৎ পরা সম্বুদ্ধি নাস্তি, ইতি সলোপো ন স্যাদিতি ক্বচিদন্যেনাক্ষিপ্ত-স্যাপি পদার্থস্যাত্বত্র পদার্থেঽন্বয়ো ভবতীতি বোধ্যম্।

সূত্রে 'হে হরে' 'হে বিষ্ণো' ইতি যথা স্যাৎ অতঃ এঙ্‌গ্রহণম্, হে 'হরি স্' ইত্যাদৌ-হ্রস্বস্য গুণঃ ইত্যনেন 'হে হরে স্' ইত্যস্মিন্ 'স্' ইতি সম্বুদ্ধি র্লোপঃ স্যাৎ, এঙন্তত্বাৎ ন তু হ্রস্বান্তত্বাৎ। এবং হে বিষ্ণো ইতি রূপম্। ততশ্চ হরে ইতি ইষ্টাপত্তিং কর্ত্তুং সূত্রে এঙ্-গ্রহণং ক্রিয়তে। তথা আহ—অত্র হি পরত্বাৎ নিত্যত্বাৎ চ সংবুদ্ধি-গুণে কৃতে হ্রস্বাৎ পরত্বং নাস্তি।

(২০) *বিধিরিতি কিম্। স্ত্রী ইয়তী।*

"যস্মাৎ প্রত্যয়বিধিস্তদাদিপ্রত্যয়েঽঙ্গম্" ইতি সূত্রস্যায়মর্থঃ—যঃ প্রত্যয়ঃ যস্মাৎ প্রকৃতিভূতাৎ বিধীয়তে তস্মিন্ প্রত্যয়ে পরে তদাদিশব্দস্বরূপম্ অঙ্গসংজ্ঞং ভবতি। যথা রাম+টা ইতি স্থিতে রাম ইত্যস্য টাপ্রত্যয়ে পরে অঙ্গসংজ্ঞা ভবতি। তত্রেদমাশঙ্ক্যতে —ননু "যস্মাৎ যঃ প্রত্যয়ঃ পরত্বেন শ্রূয়তে তদাদিশব্দস্বরূপং তস্মিন্ প্রত্যয়ে পরে অঙ্গসংজ্ঞম্"—ইত্যর্থেনৈব সর্বেষ্টসিদ্ধৌ "যস্মাৎ প্রত্যয়বিধিঃ..." ইতি সূত্রে বিধিগ্রহণং ব্যর্থমিতি। তত্রোচ্যতে—অত্র বিধিগ্রহণাভাবে 'স্ত্রী ইয়তী' ইত্যত্র স্ত্রীশব্দস্য অঙ্গসংজ্ঞাপ্রসক্তিরূপানিষ্টাপত্তিঃ স্যাৎ। তথাহি—ইদং পরিমাণমস্য ইত্যর্থে ইদংশব্দাৎ 'কিমিদম্‌ভ্যাং বো ঘঃ' ইতি বতুপ্। বস্য ঘশ্চ, তস্য আয়নেয়ীতি ইযাদেশঃ। ইদম্ ইয়ৎ ইতি দশায়াম্ "ইদং কিমোরীশ্‌কী" ইতি ইদম ঈশাদেশে, শকারস্য ইৎসংজ্ঞায়াং লোপে চ শিত্বাৎ সর্বাদেশে ঈ ইয়ৎ ইতি স্থিতে "যস্যেতি চ" ইতীকারলোপঃ। ইয়ৎ ইতি প্রত্যয়মাত্রমবশিষ্যতে। "উগিতশ্চ" ইতি ঙীপি ইয়তীতি রূপম্। অত্র বিধিগ্রহণাভাবে স্ত্রী ইয়তীত্যত্র রেফাদ্ ঈকারস্য 'স্ত্রিয়াঃ'

ইতি অঙ্গকার্য্যমিয়ঙ্ স্যাৎ। স্ত্রী শব্দাৎ পরত্বেন ইয়দিতি প্রত্যয়স্য শ্রূয়মাণত্বাৎ। তন্বারণায় বিধিগ্রহণমাবশ্যকমেব। কৃতে তু বিধিগ্রহণে ইয়তীত্যস্য স্ত্রীশব্দাদ্ বিহিতত্বাভাবেন তস্মিন্ ইয়তীশব্দে পরে স্ত্রীশব্দস্য অঙ্গসংজ্ঞাপ্রসক্তি র্ন স্যাৎ। ন চ 'যস্যেতি চ' ইতি লোপস্যাভীয়ত্বেন অসিদ্ধত্বাদজাদিপ্রত্যয়পরকত্বাভাবাৎ নাত্র ইয়ঙঃ প্রবৃত্তিরিতি বাচ্যম্। অন্যূনানতিরিক্তসমানাশ্রয়ে কার্যে কর্ত্তব্যে এব আভীয়াসিদ্ধত্বস্য প্রবৃত্তেঃ।

## (২১) *স্বাভিধেয়াপেক্ষাবধিনিয়মো ব্যবস্থা।*

'পূর্বপরে'তি সূত্রে এতেষাং পূর্বাপরাদীনাং ব্যবস্থায়ামসংজ্ঞায়াং সর্বনামসংজ্ঞা বিকল্পেন স্যাদিত্যুক্তম্। তত্র ব্যবস্থাশব্দস্যার্থমাহ—স্বাভিধেয়াপেক্ষাবধীতাদিনা। অপেক্ষ্যত ইত্যপেক্ষঃ। স্বস্য পূর্বাদিশব্দস্য। অভিধেয়ম্ বাচ্যম্। তেন অপেক্ষস্যাপেক্ষমাণস্য অবধেঃ নিয়মঃ ব্যবস্থাশব্দেন বিবক্ষিত ইত্যর্থঃ। দীক্ষিতোক্তে-রয়মর্থঃ—স্বস্য পূর্বাদিশব্দস্য অভিধেয়েন বাচ্যার্থেন নিয়মেনাবধি-রপেক্ষ্যতে, তাদৃশো নিয়মো ব্যবস্থা, তদ্বাচিপূর্বাদিশব্দানাং সর্ব-নামসংজ্ঞা ভবতীতি। পূর্বাদিশব্দে উচ্চারিতে কস্মাৎ পূর্বঃ কস্মাৎ পর ইত্যাদিনিয়মেনাবধিসাপেক্ষোঽর্থঃ ইতি যাবৎ। 'পূর্বপর' ইতি সূত্রে ব্যবস্থাপদাভাবে কুশলবাচিদক্ষিণশব্দস্যাপি সর্ব-নামসংজ্ঞা স্যাৎ, সা মা ভূদিতি তত্র ব্যবস্থাগ্রহণম্। কৃতে তু তস্মিন্ কুশলার্থস্য কস্মাৎ কুশলঃ ইতি কদাচিৎ অবধ্যপেক্ষত্বেঽপি কুশলমাত্রপ্রতিপাদনেচ্ছোচ্চারিতদক্ষিণশব্দার্থস্য অবধ্যপেক্ষত্বাভাবেন নিয়মেনাবধিসাপেক্ষার্থকত্বাভাবাৎ সর্বনামসংজ্ঞা ন ভবতীতি 'দক্ষিণাঃ' ইতি একমেব রূপম্। যদি চ ইহ অমুকস্মাৎ কুশলঃ অবধ্যন্বয়সম্ভবেন অস্তি ইহ ব্যবস্থা, তদা অধরে তাম্বূলরাগঃ, উত্তরে প্রত্যুত্তরে চ শক্তঃ ইতি প্রত্যুদাহরণং বোধ্যম্।

**(২২) ভাষ্যকারস্তু ত্বকৎপিতৃকঃ, মকৎপিতৃকঃ ইতি রূপে ইষ্টাপত্তিং কৃত্বা এতৎ সূত্রং প্রত্যাচক্ষৌ। যথোত্তরং মুনীনাং প্রামাণ্যম্।**

'ন বহুব্রীহৌ' ইতি সূত্রে বিষয়সপ্তমীং স্বীকৃত্য বহুব্রীহৌ চিকীর্ষিতে সর্বনামসংজ্ঞা ন স্যাদিতি দীক্ষিতঃ। ভাবে সপ্তমী-স্বীকারে তু বহুব্রীহৌ সত্যাং সর্বনামসংজ্ঞা ন স্যাদিত্যর্থো ভবিতুমর্হতি। [illegible] [illegible]বে সপ্তমীস্বীকারে সূত্রস্য বৈয়র্থ্যং স্পষ্টমেব। তথাহি 'সংজ্ঞোপসর্জনীভূতাস্তু ন সর্বাদয়ঃ' ইত্যুক্তেঃ বহুব্রীহিসমাসস্য অন্যপদার্থপ্রাধান্যাৎ উপসর্জনত্বেন সর্বনামসংজ্ঞায়াঃ প্রাপ্তিরেব নাস্তি ইতি কৃত্বা সূত্রমিদং ব্যর্থং স্যাৎ। অতঃ সূত্রস্য সার্থক্যায় বিষয়সপ্তমী স্বীকরণীয়া। তেন ত্বকং পিতা যস্য, অহকং পিতা যস্য ইতি লৌকিকবিগ্রহে যুষ্মদ্ সু পিতৃ সু, অস্মৎ সু পিতৃ সু ইত্যলৌকিকবিগ্রহে বহুব্রীহিসমাসাৎ প্রাগেব 'ন বহুব্রীহৌ' ইতি সর্বনামসংজ্ঞানিষেধেঽকচোঽপ্রাপ্ত্যা কে, প্রত্যয়োত্তরপদয়োশ্চেতি ত্বমাদেশে, নদ্যৃতশ্চেতি কপি ত্বৎকপিতৃকো মৎকপিতৃক ইতি রূপে ভবতঃ। ন বহুব্রীহৌ ইত্যস্যাভাবে ভবকন্তমতিক্রান্তোঽতিভব-কানিত্যত্রেব সমাসে অপি অকচঃ শ্রবণাপত্তৌ উক্তরূপাসিদ্ধেরিতি পাণিনিমতম্। ন চ নিমিত্তস্যানুপসর্জনত্বস্য বিনাশোন্মুখত্বাদকৃত-ব্যূহপরিভাষয়া সমাসাৎ প্রাগপি সর্বনামতা ন ভবিষ্যতীতি বাচ্যম্। তস্যাঃ পরিভাষায়াঃ অনিত্যত্বাৎ তত্র এতৎসূত্রস্যৈব জ্ঞাপকত্বাৎ। তথা হি—যদি অকৃতব্যূহপরিভাষা সার্বত্রিকী স্যাৎ তর্হি বহুব্রীহিবিষয়েঽপি যুষ্মদ্ সু পিতৃ সু ইত্যাদ্যলৌকিকবিগ্রহবাক্যে অনুপসর্জনত্বস্য বহুব্রীহি-কালিকবিনাশোন্মুখতয়া সর্বনামত্বস্যাপ্রসক্তত্বাদ্ ন বহুব্রীহৌ ইতি নারভ্যেত। এতদেব সূত্রং ব্যর্থং সৎ অকৃতব্যূহপরিভাষায়া অনিত্যত্বং জ্ঞাপয়তি।

ভাষ্যকারস্তু 'অকচ্স্বরৌ তু কর্তব্যৌ প্রত্যঙ্গং মুক্তসংশয়ৌ' ইত্যুক্ত্বা ত্বকৎপিতৃকঃ মকৎপিতৃক ইতি রূপে ইষ্টাপত্তিং কৃত্বা ন বহুব্রীহৌ ইতি

সূত্রং প্রত্যাচখ্যৌ। ন চ 'ফলৈক্যে প্রত্যাখ্যানং যুক্তং ন তু ফলভেদে' ইতি নিয়মাৎ সূত্রখণ্ডনমসমীচীনমিতি বাচ্যম্, যথোত্তরং মুনীনাং প্রামাণ্যমিতি ব্যবস্থিতত্বাৎ। তথা চ সূত্রকারাদ্ বার্ত্তিককারস্থ উভাভ্যামপি ভাষ্যকৃতঃ ইত্যেবং মুনীনামুত্তরোত্তরস্থ গ্রন্থস্থ প্রামাণ্যং পূর্বপূর্বস্থাপ্রামাণ্যমিতি বৈয়াকরণসময়াদত্র সূত্রভাষ্যয়োরুভয়োরপি স্মৃতিত্বাবিশেষাদ্বিকল্পে প্রাপ্তে ভাষ্যকারমতস্যৈব প্রামাণ্যমিতি বোধ্যম্।

(২৩) *সংজ্ঞোপসর্জনীভূতাস্তু ন সর্বাদয়ঃ (বার্ত্তিক-২২৫)। মহাসংজ্ঞাকরণেন গণে সংনিবেশাৎ।*

'সর্বাদীনি সর্বনামানি' ইতি সর্বনামসংজ্ঞাবিধায়কং সূত্রম্। অস্যায়-মর্থঃ—সর্বাদীনি গণপঠিতানি শব্দস্বরূপাণি সর্বাদ্যন্তানি চ শব্দস্বরূপাণি সর্বনামসংজ্ঞকানি ভবন্তি ইতি। তত্রেয়ং জিজ্ঞাসা—অনেন সূত্রেণ কিং প্রধানভূতস্যৈব সর্বাদেঃ সর্বনামসংজ্ঞা ভবতি উত উপসর্জনীভূত-স্যাপি। তত্র বার্ত্তিককৃতা সংজ্ঞোপসর্জনীভূতানাং প্রতিষেধো বক্তব্য ইতি বার্ত্তিকেন সংজ্ঞাবাচকস্য উপসর্জনীভূতস্য চ সর্বাদেঃ সর্বনামসংজ্ঞা নিষিধ্যতে। তেন সর্বো নাম কশ্চিৎ বালকঃ তস্মৈ সর্বায় দেহি ইতি প্রয়োগঃ ভবতি, ন সর্বস্মৈ দেহি ইতি। এবং সর্বম্ অতিক্রান্তঃ অতি-সর্ব, জ্ঞাতঃ সর্বো যেন অসৌ জ্ঞাতসর্বঃ তস্মৈ অতিসর্বায় জ্ঞাতসর্বায় ইত্যেবং রূপং ভবতি। উপসর্জনত্বঞ্চ অন্যপদার্থনিষ্ঠবিশেষ্যতা-নিরূপিতপ্রকারতাপ্রযোজকত্বং বোধ্যম্ ইতি বার্ত্তিকস্য মতম্।

ভাষ্যকৃতা তু এতদ্বার্ত্তিকং প্রত্যাখ্যাতম্। তথাহি সর্বনাম ইতি সংজ্ঞা অন্বর্থা স্বীকৃতা, সর্বেষাং নামানি সর্বনামানি, সর্বেষাং পদার্থানাং বোধকানি ইত্যর্থঃ। এবঞ্চ প্রাধান্যেন স্বকীয়সর্বার্থবোধকত্বসমানাধি-করণানি যানি সর্বাদিগণপঠিতানি শব্দস্বরূপাণি তানি সর্বনামসংজ্ঞ-কানি ভবন্তি ইতি সূত্রার্থঃ সম্পদ্যতে। প্রকৃতে সংজ্ঞাবাচকঃ সর্বশব্দ

একস্যাঃ ব্যক্তের্বোধকঃ ন তু বুদ্ধিস্থসর্বস্যাঃ ব্যক্তের্বোধকঃ। তেন সর্বনামসংজ্ঞা ন ভবতি। অতিসর্ব ইত্যাদৌ সর্বশব্দঃ উপসর্জনীভূতঃ। তেন প্রাধান্যেন স্বকীয়সর্বার্থবোধকত্বাভাবাৎ ন সর্বনামসংজ্ঞা ভবতি। তৎ ফলং অতিতদ্ ইত্যাদৌ ত্যদাদীনামঃ ইতি সূত্রেণ অকারান্তাদেশঃ ন ভবতি অতিস্ ইতি রূপং ন ভবতি। এবং কতরম্ অতিক্রান্তং কুলম্ অতিকতরম্ ইত্যত্র অদড্ডতরাদিভ্যঃ পঞ্চভ্যঃ ইত্যনেন সোঃ অদ্ড্ডাদেশঃ ন ভবতি। অতঃ অতিকতরম্ ইতি রূপং সিধ্যতি।

(২৪) ***প্রথমহল্‌গ্রহণং কিম? রাজা।***

ননু সূচিকটাহন্যায়েন 'হল্ঙ্যাব্ভ্যো দীর্ঘাৎ সুতিস্যপৃক্তং হল্' ইতি সূত্রে হল্‌গ্রহণং কিমর্থমিতি প্রষ্টুরাশয়ঃ। অত্রায়মভিপ্রায়ঃ—সূত্রে প্রথমহল্‌গ্রহণাভাবেঽপি হলন্তাৎ পরস্য সকারস্য সংযোগান্তত্বাৎ 'সংযোগান্তস্য লোপঃ' ইতি সূত্রেণৈব লিট্ধুগিত্যাদীনাং সিদ্ধিঃ। সূত্রে প্রথমগ্রহণং ব্যর্থমিতি চেন্ন। সূত্রে প্রথমহল্‌গ্রহণাভাবে রাজন্ সু ইত্যত্র 'উপদেশেঽজনুনাসিক ইৎ' ইতি সূত্রেণ উকারস্য ইৎসংজ্ঞায়াম্ 'তস্য লোপ' ইতি লোপে চ কৃতে, রাজন্ স্ ইতি জাতে উপধাসংজ্ঞায়াং 'সর্বনামস্থানে চাসম্বুদ্ধৌ—'ইতি উপধাদীর্ঘে চ কৃতে রাজান্ স্ ইত্যবস্থায়াং 'সংযোগান্তস্য লোপঃ' ইতি সূত্রেণ স্লোপেঽপি 'নলোপঃ প্রাতিপদিকান্তস্য' ইতি নলোপকর্ত্তব্যে ত্রৈপাদিকস্য সংযোগান্তলোপস্য অসিদ্ধত্বাৎ পদান্তে নকারাভাবেন নলোপাভাবেন অনিষ্টাপত্তেঃ। অতঃ সূত্রে প্রথমহল্‌গ্রহণং কর্ত্তব্যমেব। ন চ সখা ইত্যত্রৈব অনিষ্টাপত্তিসম্ভাবাৎ রাজা ইতি প্রত্যুদাহরণং কিমর্থমিতি বাচ্যম্। তত্র 'অনঙ্ সৌ' ইতি সূত্রস্থলে সোর্ঙেতি ন্যাসেন এব সখা ইত্যত্র দোষাভাবাৎ। যদি "ন ঙি সম্বুদ্ধ্যোঃ" ইতি সূত্রে সম্বুদ্ধিগ্রহণং ব্যর্থং সৎ নলোপকর্ত্তব্যে সংযোগান্তলোপস্য ন অসিদ্ধত্বমিতি

জ্ঞাপয়তি, তর্হি ভবানিত্যত্রাপি নলোপেন আনষ্টাপত্তিঃ। অত্র তাবৎ নকারবিভক্ত্যোঃ আনন্তর্য্যং যত্র তত্রৈব নলোপকর্ত্তব্যে সংযোগান্ত-লোপস্য অসিদ্ধত্বমিতি বিশেষাপেক্ষং জ্ঞাপকস্বরূপ[illegible]ক্রিয়েত তর্হি ভবানিত্যত্র ন কা চিৎ হানিরিতি। তত্তর্হি অ[illegible]র্ ভবান্ অবিভর্ ভবান্ ইত্যত্র তলোপসিদ্ধ্যর্থং প্রথমহল্‌গ্রহণম[illegible]কমিতি দিক্।

**(২৫) *অজাদিভিঃ স্ত্রীত্বস্য বিশেষণান্নেহ—পঞ্চাজী*।—** ননু 'প্রত্যয়ঃ' 'পরশ্চ' ইতি নির্দ্দেশাৎ সর্বত্র প্রত্যয়বিধায়কশাস্ত্রেষু দিগ্‌ যোগলক্ষণাপঞ্চমীস্বীকারাৎ কথমত্র 'অজাদ্যতষ্টাপ্' ইতি সূত্রে "অজাদীনামকারান্তস্য চ বাচ্যং যৎ স্ত্রীত্বং তত্র দ্যোত্যে টাপ্ স্যাৎ" ইত্যর্থে ষষ্ঠ্যন্তঃ স্বীকৃতঃ দীক্ষিতপাদৈরিতি পূর্বপক্ষঃ।

তত্র সমাধীয়তে—অত্র পঞ্চম্যন্তস্বীকারে তু প্রাতিপদিকাধিকারাৎ বিশেষ্যবিশেষণভাবেন 'যেন বিধিস্তদন্তস্য' ইতি পরিভাষয়া তদন্তবিধৌ অজাদ্যন্তং যৎ প্রাতিপদিকম্ অজ..দিরূপঞ্চ যৎ প্রাতিপদিকম্ ততষ্টাপ্ স্যাদিত্যর্থে পঞ্চাজশব্দাদপি টাবাপত্তিঃ স্যাৎ। ন চ "সমাসপ্রত্যয়-বিধৌ প্রতিষেধঃ" ইতি বার্ত্তিকেন তদন্তবিধেরভাব ইতি বাচ্যম্, 'অনুপসর্জনাৎ' ইতি অধিকারসামর্থ্যেন স্ত্রীপ্রত্যয়ে তদন্তবিধি-স্বীকারাৎ।

ন চ তদন্তবিধৌ অপি শ্রুতানুমিতয়োঃ শ্রুতসম্বন্ধো বলীয়ান্ ইতি পরিভাষয়া সাক্ষাৎ শ্রুতস্য অজাদিশব্দস্যৈব গ্রহণেন তত্রৈব টাপ্ স্যাৎ, ন তু অনুমিতাৎ পঞ্চাজশব্দাৎ টাবাপত্তিরিতি বাচ্যম্। 'শূদ্রা চামহৎপূর্বা জাতিঃ' ইতি বার্ত্তিকস্থেন অমহৎপূর্বগ্রহণেন স্ত্রীপ্রত্যয়ে শ্রুতানুমিতপরিভাষায়া অনিত্যত্বমেব জ্ঞাপ্যতে ইতি কৃত্বা দোষসম্ভাবাৎ। সূত্রে ষষ্ঠ্যন্তস্বীকারে তু বাচ্যবাচকভাবেন স্ত্রীত্বেঽন্বয় ইতি কৃত্বা অজাদিনিষ্ঠং বাচ্যং যৎ স্ত্রীত্বং তত্র দ্যোত্যে তস্য দ্যোতকষ্টাপ্‌প্রত্যয়ঃ স্যাৎ ইত্যর্থে অজাদিনিষ্ঠস্ত্রীত্বে অজা এড়কা ইত্যাদৌ টাপ্‌প্রত্যয়ঃ স্যাৎ। ন তু সমাসার্থসমাহারনিষ্ঠস্ত্রীত্বে

পঞ্চাজশব্দাৎ টাপ্ স্যাৎ। তত্র পঞ্চাজশব্দে সমাসার্থভূতো যঃ সমাহারস্তন্নিষ্ঠং স্ত্রীত্বং পঞ্চাজেতি সমুদায়স্য দ্যোত্যং ন তু অজশব্দস্য। অতো ন টাবিত্যর্থঃ। কিন্তু দ্বিগোঃ ইতি সূত্রেণ ঙীপ্ প্রত্যয়ে পঞ্চাজী ইতি রূপমিতি সংক্ষেপঃ।

(২৬) *অসুপঃ কিম। বহুপরিব্রাজকা নগরী।*

'প্রত্যয়স্থাৎ কাৎপূর্বস্যাত ইদাপ্যসুপঃ' ইতি সূত্রস্য অয়মর্থঃ— প্রত্যয়স্থাৎ ককারাৎ পূর্বস্যাকারস্য ইকারঃ স্যাৎ আপি পরে, স আপ্ সুপঃ পরো ন চেদিতি। অস্যোদাহরণং সর্বিকা, কারিকা ইত্যাদয়ঃ। সূত্রে 'অসুপঃ' ইতি পদস্য ফলমাহ বহুপরিব্রাজকা নগরীতি। পরিপূর্বাদ্ ব্রজেঃ ণ্বুল্। বহবঃ পরিব্রাজকা যস্মিন্ ইতি বহুব্রীহিঃ। সুপো লুকি বহুপরিব্রাজকশব্দাৎ টাপ্। অত্রাকারস্য কাৎ পূর্বস্য ইত্বং ন প্রত্যয়-লক্ষণেন আপঃ সুবপেক্ষয়া পরত্বাৎ। 'ন লুমতাঙ্গস্য' ইতি নিষেধস্তু ন, তস্য লুমতা লুপ্তে প্রত্যয়ে যদঙ্গং তস্য কার্য এব প্রবৃত্তেঃ। ইত্বং তু টাপ্যনঙ্গকার্যমিতি নাত্র তন্নিষেধঃ। যদি তু 'অসুপঃ' ইতি পর্যুদাস আশ্রীয়েত, তর্হি বহুপরিব্রাজক ইতি সমুদায়স্য সুব্‌ভিন্নত্বাদাপঃ ততঃ পরত্বাদিত্বং দুর্বারং স্যাদিতি ভাবঃ।

(২৭) *পূর্বস্য কিম্—পরস্য মা ভূৎ। কটুকা।*

ননু "প্রত্যয়স্থাৎ কাৎ পূর্বস্যাত ইদাপ্যসুপঃ" ইতি সূত্রে পূর্বস্য-গ্রহণাভাবেঽপি 'আপি' ইতি সপ্তম্যন্তং দৃষ্ট্বা 'তস্মিন্নিতি নির্দিষ্টে পূর্বস্য'-ইতি পরিভাষয়া অব্যবহিতপূর্বস্য উপস্থিতৌ প্রত্যয়স্থককারব্যবহিত-স্যাকারস্য ইত্বং স্যাদাপি পরে স আপ্ সুপঃ পরো ন চেদিত্যর্থে জাতে সর্বিকা কারিকা ইত্যাদিসকলেষ্টসিদ্ধৌ সূত্রে পূর্বস্যগ্রহণং ব্যর্থমিতি চেন্ন।

সূত্রে পূর্বস্য ইত্যস্যাভাবে 'আপি' ইতি সপ্তম্যন্তং দৃষ্ট্বা 'তস্মিন' ইতি পরিভাষয়া যথা অব্যবহিতপূর্বস্যোপস্থিতিঃ তথৈব 'কাদ'তি

পঞ্চম্যন্তং দৃষ্ট্বা 'তস্মাদিত্যুত্তরস্য' ইতি পরিভাষয়া অব্যবহিতপরস্যোপস্থিতিঃ। তত্র তাবদ্ধ"ভয়নির্দ্দেশে পঞ্চমীনির্দ্দেশো বলীয়ান্ পরত্বাৎ" ইতি পরিভাষয়া পঞ্চমীনির্দ্দেশস্য প্রাবল্যবোধনেন প্রত্যয়স্থককারাদব্যবহিতপরস্যাকারস্যেত্বং স্যাদিত্যর্থে কটুকা ইত্যত্র ইত্বেন অনিষ্টাপত্তিঃ। ন চাত্র কটুক আ ইতি দশায়াম্ "অকঃ সবর্ণে দীর্ঘঃ" ইত্যনেন সবর্ণদীর্ঘত্বং শঙ্ক্যম্, 'বর্ণাদঙ্গং বলীয়ঃ' ইতি পরিভাষয়া অঙ্গকার্যস্য বলবত্ত্বাৎ সূত্রস্যাপবাদত্বাচ্চ সবর্ণদীর্ঘাপ্রবৃত্তেঃ। ন চৈবং সর্বিকা ইত্যত্রৈব সর্বক আ ইতি দশায়াম্ উক্তপ্রকারেণেত্ত্বাপত্তিসত্ত্বেন কটুকাপর্য্যন্তমনুধাবনস্য বৈয়র্থ্যমিতি বাচ্যম্। বস্তুতস্তু উভয়বিরোধে অব্যবহিতমাত্রস্য উপস্থিতিরিতি বচনাৎ ককারব্যবহিতস্য অকারস্য ইত্বং স্যাদিত্যর্থে জাতে সর্বিকা কারিকা ইত্যাদৌ পূর্বোপস্থিতিকত্বেন অন্তরঙ্গত্বাৎ পূর্বস্যাকারস্য ইত্বেন ইষ্টসিদ্ধৌ সর্বিকা কারিকা ইত্যাদৌ দোষাভাবাৎ। কটুকা ইত্যত্র তু ককারাব্যবহিতপূর্বস্যাকারস্যাভাবেন পরস্যৈব অকারস্য ইত্ববিধানেন অনিষ্টাপত্তিঃ। অতঃ সূত্রে পূর্বস্যগ্রহণং কর্ত্তব্যমেবেতি দিক্।

***(২৮) বক্ষ্যমাণা ইত্যত্র টিত্ত্বাদুগিত্ত্বাচ্চ ঙীপ্ প্রাপ্তঃ। যাসুটো ঙিত্ত্বেন 'আশ্রয়মনুবন্ধকার্যং নাদেশানাম্' ইতি জ্ঞাপকাৎ ন ভবতি।***

ননু বচ্ধাতোঃ 'লৃটঃ সদ্বা' ইতি সূত্রেণ লৃটঃ স্থানে শানচি টিত্ত্বাৎ 'টিড্ঢাণঞ্—' ইত্যনেন সূত্রেণ ঙীপি প্রাপ্তে, অথবা ঋকারস্য ইৎসংজ্ঞকত্বাৎ 'উগিতশ্চ' ইত্যনেন ঙীপি চ প্রাপ্তে কুতো ঙীপ্ ন স্যাদিতি, ন চ 'অনল্বিধৌ' ইতি প্রতিষেধেন স্থানিবদ্ভাবাভাবাৎ ন ঙীপ্ ইতি বাচ্যম্। 'ন ল্যপি' ইতি সূত্রারম্ভসামর্থ্যেন অনুবন্ধকার্যে কর্ত্তব্যে 'অনল্বিধৌ' ইতি প্রতিষেধস্য অপ্রবৃত্তেঃ। অন্যথা প্রদায় ইত্যত্র ল্যপি কৃতে অনল্বিধাবিতি প্রতিষেধেন ক্ত্বাগতকিত্ত্বধর্মস্য ল্যপি অনাশ্রয়েণ 'ন ল্যপি' ইতি সূত্রং ব্যর্থমেব। তর্হি 'যাসুট্

পরস্মৈপদেষ্দান্তো ঙিচ্চ' ইতি সূত্রে ঙিৎগ্রহণাভাবেঽপি স্থানিবদ্ভাবেন লিঙ্গতঙিত্বধর্মস্য তিপি আনীয় ততশ্চ যদাগমপরিভাষয়া যাসুট-বিশিষ্টস্য ঙিত্বসিদ্ধৌ সূত্রে ঙিৎগ্রহণং ব্যর্থম্। এতদেব ব্যর্থং সৎ "লাশ্রয়ে অনুবন্ধকার্যে কর্ত্তব্যে অনল্বিধৌ" ইত্যস্য প্রবৃত্তিরিতি জ্ঞাপয়তি। তেন বক্ষ্যমাণা ইত্যত্র অনলবিধৌ ইতি প্রতিষেধস্য প্রবৃত্তিস্বীকারেণ ঙিত্বধর্মস্য উগিত্বধর্মস্য চ অনাশ্রয়াৎ ন কাচিৎ হানিরিতি। যদি 'পিচ্চ ঙিন্ন ঙিচ্চ পিন্ন' ইতি ভাষ্যবচনেন লিঙ্গত-ঙিত্বধর্মস্য তিপি পিত্বাৎ অনাশ্রয়ণমিতি চেত্তর্হি 'হলঃ শ্নঃ শানচ্ হৌ' ইতি সূত্রে আনচ্ ইতি কথনেন এব শ্লাগতশিত্বধর্মস্য স্থানিবদ্ভাবেন আশ্রয়নাৎ শানচঃ ইতি শিৎগ্রহণং ব্যর্থম্। তদেব ব্যর্থং সৎ 'লাশ্রয়েঽনুবন্ধকার্যে…' ইতি সূত্রস্য প্রবৃত্তিস্বীকারং জ্ঞাপয়তি।

*কেচিত্তু*—'লাশ্রয়মনুবন্ধকার্যং নাদেশানাম্' ইত্যত্র যাসুটো ঙিত্বং ন জ্ঞাপকম্, তস্য তিপ্সিপ্মিবর্থত্বাৎ পিদর্থং ঙিত্বম্ ইতি ভাষ্যাচ্চ। 'সার্বধাতুকম্' ইতি সূত্রে অপিদিত্যাবর্ত্য প্রসজ্যপ্রতিষেধসিদ্ধেন 'ঙিচ্চ পিন্ন, পিচ্চ ঙিন্ন' ইত্যনেন 'হলঃ শ্নঃ' ইতি সূত্রভাষ্যোক্তেন পিৎসু ঙিত্ত্বাপ্রসক্তেঃ। শানচঃ শিত্বমপি তৎসূত্রে এব ভাষ্যে প্রত্যাখ্যাতম্। হেরপিত্বস্য তাতঙো ঙিত্বস্য বৈয়র্থ্যাপত্তিশ্চ জ্ঞাপকত্বে দূষণমপ্যুক্তং ভাষ্যে। তস্মাৎ বক্ষ্যমাণা ইত্যাদৌ সত্যভিধানে অজাদিপাঠাৎ টাপ্। যত্তু 'কিঙতি চ' ইতি সূত্রভাষ্যে যাসুটো ঙিদ্বচনস্য ন ঙিদাদেশানাং ঙিত্বমিত্যর্থে জ্ঞাপকতা উক্তা, তত্তু বার্ত্তিকমতম্। ঙিচ্চ পিন্নেত্যা-দেস্তেনানুক্তেঃ।—ইত্যাহুঃ।

(২৯) ***বৃত্তিকৃতা তু—"পূর্ববিপ্রতিষেধেনেনাতোঃ কৃতয়োঃ সন্নিপাতপরিভাষায়া অনিত্যত্বমাশ্রিত্য জরসি কৃতে নির্জরসিন্ নির্জরসাৎ ইতি রূপে, নতু নির্জরসা নির্জরসঃ ইতি কেচিৎ"—ইত্যুক্তম্।***

নির্জরশব্দাৎ তৃতীয়ৈকবচনে 'নির্জর্ টা' ইত্যত্র, চতুর্থ্যেকবচনে

'নির্জর ঙসি' ইত্যত্র চ ক্রমশঃ 'টাঙসিঙসামিনাৎস্যাঃ' ইত্যনেন ইনাদাদেশয়োঃ প্রাপ্তয়োঃ, 'জরায়া জরসন্যতরস্যাম্' ইত্যনেন জরসাদেশে চ প্রাপ্তে 'বিপ্রতিষেধে পরং কার্যম্' ইত্যনেন ইনাদেশং বাধিত্বা পরত্বাৎ জরসাদেশে উক্তং রূপদ্বয়ং সিদ্ধম্। তত্র তাবৎ বৃত্তিকারস্তু—"বিপ্রতিষেধে পরমিত্যত্র অপরমিতি পদং ছিত্বা, অপরমিত্যস্য ইষ্টং কার্যমর্থাৎ বিপ্রতিষেধে পূর্বস্য কার্যং ভবতীত্যর্থঃ। তথা সতি পূর্ববিপ্রতিষেধেন ইনাতোঃ কৃতয়োঃ জরসাদেশোঽপি ভবতি ন চ সন্নিপাতপরিভাষাবিরোধাৎ জরাদেশঃ স্যাদিতি বাচ্যম্। সন্নিপাতপরিভাষায়া অনিত্যত্বমাশ্রিত্য জরসাদেশে বাধাভাবাৎ। তেন নির্জরসিন্, নির্জরসাৎ ইতি রূপে ভবতঃ"—ইতি স্বীকরোতি। তচ্চ ইত্থম্—যত্র যত্র খলু বিপ্রতিষেধে পূর্বস্য কার্যং ভবতি তত্র তত্র বচনমাবশ্যকম্। যথা—'নুমচিরতৃজ্—বদ্ভাবেভ্যো…'ইতি, 'বৃদ্ধি…' ইতি বাক্যদ্বয়ং পূর্ববিপ্রতিষেধস্য নিয়ামকম্। অত্র কস্যচিৎ বাক্যস্য অভাবাৎ পূর্ববিপ্রতিষেধো ভাষ্যবিরুদ্ধঃ। তথা চ সন্নিপাতপরিভাষায়া অনিত্যত্বং স্বীকৃত্য বৃত্তিকারো জরসাদেশো ভবতীতি নিগদতি। এতদপি ভাষ্যবিরুদ্ধম্। ভাষ্যকারৈঃ কথং তর্হি অতিজরৈসেরিতি ভবিতব্যম্, সন্নিপাত-পরিভাষাবিরোধাদিত্যুক্তম্। অত্র পরিভাষায়া অনিত্যত্বাশ্রয়ণং ভাষ্যবিরুদ্ধম্। অতঃ দীক্ষিতমতে নির্জরসা নির্জরস ইত্যেব রূপং ভবতি।

## (৩০) *স্ত্রীত্বং প্রকৃতিবাচ্যং প্রত্যয়বাচ্যং বা?*

জাতিব্যক্তিবৎ স্ত্রীত্বাদিলিঙ্গং প্রাতিপদিকার্থ এব। প্রত্যয়ার্থত্বে প্রাধান্যাপত্তৌ অজা খট্বা ইত্যাদৌ স্ত্রীত্ববিশিষ্টতাদাত্ম্যাবচ্ছিন্না-জাদিবোধোঽনুভবসিদ্ধো বিরুধ্যেত। কিং চ মাতৃদুহিতৃস্বসৃগবাদি-শব্দেষু টাবাদিপ্রত্যয়ং বিনাপি স্ত্রীত্ববিশিষ্টার্থস্য বোধাৎ প্রাতি-পদিকস্য তত্র শক্ত্যাবশ্যকত্বে টাবাদীনামপি শক্তিকল্পনে

গৌরবং স্যাৎ। অতএব স্ত্রীত্বস্য প্রকৃতিবাচ্যত্বং স্পষ্টমেব। ন চৈবমপি প্রকৃত্যৈব স্ত্রীত্বস্যোক্তত্বাৎ কথং টাবাদয় ইতি বাচ্যম্। দ্বাবিত্যাদিবৎ প্রকৃত্যুক্তস্যাব্যাবর্তকত্বাৎ, অন্যথা টাবাদিবিধিবৈয়র্থ্যাৎ। তথা চ স্ত্রীত্বমিহ প্রাতিপদিকস্যৈব বাচ্যম্। টাবাদয়স্তু তদ্দ্যোতকাঃ। তথা চ টাবাদিষু সৎসু অবশ্যং স্ত্রীত্ববোধ ইতি নিয়মঃ, ন তু টাবাদিষু সৎস্বেবেতি নিয়ম ইতি। এতদেবাভিপ্রেত্য অজাদ্যতষ্টাপ্ ইতি সূত্রে অজাদ্যত ইত্যত্র ষষ্ঠীবিভক্তিং স্বীকৃত্য দীক্ষিতেনোক্তম্—অজাদীনামকারান্তস্য চ বাচ্যং যৎ স্ত্রীত্বং তত্র দ্যোত্যে টাপ্ স্যাদিতি।

## (৩১) আকৃতিগ্রহণা জাতির্লিঙ্গানাং চ ন সর্বভাক্। সকৃদাখ্যাতনির্গ্রাহ্যা, গোত্রং চ চরণৈঃ সহ॥

জাতেরস্ত্রী-বিষয়াদযোপধাদিতি সূত্রস্যায়মর্থঃ—জাতিবাচি যন্ন চ স্ত্রীয়াং নিয়তমযোপধং ততঃ স্ত্রিয়াং ঙীপ্ স্যাদিতি। নন্বত্র জাতিপদেন 'নিত্যমেকমনেকানুগতং সামান্যম্' ইতি তার্কিকোক্তা জাতির্গৃহ্যতে চেত্তর্হি শুক্লাদিগুণস্য নিত্যত্বৈকত্বপক্ষে শুক্লেত্যাদাবতিব্যাপ্তিঃ, ঔপগবী কঠী ইত্যাদৌ অব্যাপ্তিশ্চ স্যাৎ। অথবা জননেন যৎ প্রাপ্যতে ব্রাহ্মণত্বাদি সা জাতিশ্চেদ্গব্যত্বাদৌ অব্যাপ্তিরিত্যত আহ—আকৃতিগ্রহণা জাতিরিতি। তর্হি অত্র বৈয়াকরণসম্মতং জাতিলক্ষণং বিবক্ষিতম্। তথা চ ভাষ্যোক্তত্রিবিধজাতের্বিবক্ষিতত্বাদত্র ত্রিধা জাতির্গৃহ্যতে। তত্র প্রথমলক্ষণম্—আকৃতিগ্রহণা জাতিরিতি। আকৃতিঃ অবয়বসন্নিবেশবিশেষঃ। আকৃতি গ্রহণং যস্যাঃ সা আকৃতিগ্রহণা। ঈদৃশাকারো গৌরিত্যুপদিষ্টে পুচ্ছলাঙ্গুলাদ্যাকৃতিনির্দ্দেশেন গবাদিষু জাতির্গৃহ্যতে। তত্র হ্যনুগতমেকাকারেণ প্রতীতং যৎ সংস্থানং তেন ব্যঙ্গ্যা সা জাতিরিতি ভাবঃ। এবঞ্চ জলসমীপস্থলবিশেষদর্শনেন জ্ঞাতত্বাৎ তটত্বং জাতিঃ। পরঞ্চ এতল্লক্ষণেন বৃষলত্বাদীনাং জাতিত্বং ন স্যাৎ। হস্তাদ্যবয়বসন্নিবেশো

যথা ব্রাহ্মণাদীনাং বর্ততে তথা বৃষলাদীনামপি। অতঃ প্রথমলক্ষণেন অগতার্থত্বাৎ দ্বিতীয়লক্ষণং ক্রিয়তে—লিঙ্গানাঞ্চ ন সর্বভাক্, সকৃদাখ্যাতনির্গ্রাহ্যেতি। যা সর্বাণি লিঙ্গানি ন ভজতি সাপি জাতিরিতি প্রথমদলস্যার্থঃ। এতেন অসর্বলিঙ্গত্বে সতি একস্যাং ব্যক্তৌ কথনান্তরং ব্যক্ত্যন্তরেঽপি সুগ্রহা জাতিরিতি লক্ষণান্তরমুক্তম্। বৃষলত্বং হি অসর্বলিঙ্গং নপুংসকত্বাভাবাৎ। একস্যাং হি ব্যক্তৌ বৃষলত্বে কথিতে সতি তদপত্যসহোদরাদৌ কথনং বিনাপি তস্য সুগ্রহত্বাৎ বৃষলত্বং জাতিঃ। অসর্বলিঙ্গে সতি সকৃদাখ্যাতনির্গ্রাহ্যত্বং চেত্তর্হি জাতিঃ। তস্মাৎ শুক্লশব্দস্য বিশেষ্যনিঘ্নতয়া ত্রিলিঙ্গত্বাদসর্বলিঙ্গ—ত্বাভাবাৎ শুক্লত্বং ন জাতিঃ। দেবদত্তশব্দস্য সংজ্ঞাত্বেন নপুংসক—লিঙ্গহীনতয়া অসর্বলিঙ্গত্বে অপি ন সকৃদাখ্যাতনির্গ্রাহ্যত্বমিতি ভাবঃ। অতএব ন জাতিবাচিত্বম্। ননু এতাভ্যাম্ ঔপগবী কঠীত্যাদেরসংগ্রহঃ, অনুগতসংস্থানব্যঙ্গ্যত্বাভাবাৎ সর্বলিঙ্গত্বাচ্চেতি কৃত্বা আহ—গোত্রং চ চরণৈঃ সহ। গোত্রশব্দেনাত্র অপত্যং বিবক্ষিতম্। চরণঃ শাখাধ্যেতা। চরণৈঃ সহ গোত্রং জাতিরিতি লভ্যতে। অপত্যপ্রত্যয়ান্তঃ শাখাধ্যেতৃবাচী চ শব্দঃ জাতিকার্যং লভতে ইত্যর্থঃ। তত্র প্রথমং গোত্রোদাহরণম্ ঔপগবী ইতি। দ্বিতীয়ং চরণোদাহরণং কঠীতি।

(৩২) **অদ্রবং মূর্তিমৎ স্বাঙ্গং, প্রাণিস্থমবিকারজম্।**
**অতৎস্থং তত্র দৃষ্টঞ্চ তেন চেত্তথা যুতম্॥**

স্বাঙ্গাচ্চোপসর্জনাদসংযোগোপধাৎ ইতি সূত্রস্য অয়মর্থঃ—অসংযোগোপধমুপসর্জনম্ যৎ স্বাঙ্গং তদন্তাদদন্তাৎ প্রাতিপদিকাদ্বা ঙীষ্ স্যাদিতি। ননু তত্র স্বাঙ্গপদেন স্বস্যাবয়বীভূতস্য অঙ্গং স্বাঙ্গমিতি ব্যাখানে সুমুখা শালা ইত্যত্রাপি ঙীষ্ স্যাৎ। তত্র মুখশব্দস্য প্রথমভাগস্য অবয়বীভূতশালাঙ্গত্বাৎ। কিঞ্চ সুকেশী রথ্যা ইত্যত্র ঙীষ্ ন স্যাৎ—কেশানাং রথ্যাঙ্গত্বাভাবাৎ। অতএব অব্যাপ্তি—অতিব্যাপ্তিদোষ-

বারণায় উক্তসূত্রে অদ্রবমিত্যাদিনা ভাষ্যে নিরুক্তং ত্রিবিধং পারিভাষিকং স্বাঙ্গমেব বিবক্ষিতম্। তত্র প্রথমং যথা অদ্রবং মূর্ত্তিমৎ স্বাঙ্গং প্রাণিস্থমবিকারজমিতি। ন বিদ্যতে দ্রবো যস্য তদদ্রবম্। মূর্ত্তিঃ অবয়বসংযোগোঽস্যাস্তীতি মূর্ত্তিমৎ, অবয়বসংযোগাসমবায়ি-কারণং দ্রব্যমিতি যাবৎ। স্পর্শবদ্ দ্রব্যপরিমাণং মূর্ত্তিস্তদ্বৎ। প্রাণিনি প্রাণবতি জন্তৌ বিদ্যমানং প্রাণিস্থম্। অবিকারজং রোগাদিবিকার-জন্যং যন্নতৎ। তেন অদ্রবত্বে সতি মূর্ত্তিমত্ত্বে সতি প্রাণিস্থত্বে সতি বিকারজভিন্নত্বমিতি প্রথমং স্বাঙ্গলক্ষণম্। এবঞ্চ সুস্বেদা ইত্যাদৌ মূর্ত্তিমত্ত্বে অপি দ্রবত্বান্ন স্বাঙ্গমতো ন ঙীষ্। সুজ্ঞানা ইত্যাদৌ অদ্রবত্বে অপি মূর্ত্তিমত্ত্বাভাবান্ন স্বাঙ্গং তেন ন ঙীষ্। সুশোভনং মুখং প্রথম-ভাগো যস্য ইতি বিগ্রহে সুমুখা শালা ইত্যত্র অপ্রাণিস্থত্বান্ন স্বাঙ্গমতো তত্রাপি ন ঙীষ্। সু অধিকঃ শোফঃ শ্বয়থুঃ যস্যা সা সুশোফা ইত্যত্র প্রাণিস্থত্বে অপি রোগজত্বান্ন স্বাঙ্গত্বম্। অতো ন ঙীষাপত্তিঃ। অতৎস্থং তত্র দৃষ্টঞ্চেত্যত্র তচ্ছব্দেন প্রাণী পরামৃশ্যতে। তেনায়মর্থঃ —সম্প্রতি প্রাণিস্থত্বাভাবে অপি প্রাণিনি দৃষ্টং যৎ তদপি স্বাঙ্গমিত্যর্থঃ। এবঞ্চ কেশস্য সম্প্রতি প্রাণিস্থত্বাভাবে অপি প্রাণিনি দৃষ্টত্বাৎ সুকেশী-ত্যত্র স্বাঙ্গত্বেন ঙীষ্‌সিদ্ধিঃ। ননু প্রতিমাগতস্তনস্য প্রাণিনি কদাপি অদৃষ্টত্বাৎ সুস্তনী প্রতিমা ইত্যত্র ঙীষ্ ন স্যাদিত্যত আহ—তেন চেত্তথা যুতম্ ইতি। যেনাঙ্গেন প্রাণিরূপং বস্তু তথাযুতং তেন তৎ-সদৃশেনাঙ্গেন তৎ অপ্রাণিরূপং দ্রব্যং তথা প্রাণিদ্রব্যবৎ যুতং সম্বদ্ধং চেৎ, তদা তদপি অপ্রাণিনি দৃষ্টং স্বাঙ্গং ভবতি। অতএব সুস্তনী প্রতিমা ইত্যত্র ঙীষ্ সিদ্ধঃ।

## (৩৩) *তমব্‌গ্রহণং কিম্। গঙ্গায়াং ঘোষঃ।*

ননু সাধকতমং করণম্ ইতি সূত্রে তমব্‌গ্রহণাভাবে অপি করণম্ ইতি মহাসংজ্ঞাকরণানুরোধাৎ অন্বর্থসংজ্ঞাবিজ্ঞানেন (ক্রিয়তে অনেন ইতি করণম্) ব্যুৎপত্তিগম্যার্থে নৈব সাধকার্থলাভে সূত্রে সাধকপদমেব

তমবর্থং বোধয়তি। তেন ক্রিয়াসিদ্ধৌ প্রকৃষ্টোপকারকং করণসংজ্ঞং স্যাৎ ইত্যর্থে সকলেষ্টসিদ্ধৌ সূত্রে তমব্গ্রহণং ব্যর্থমেব ইত্যাশঙ্ক্যাহ— এতদেব তমব্গ্রহণং ব্যর্থং সৎ ইহ কারকপ্রকরণে শব্দসামর্থ্যগম্যতর-তমযোগো ন ভবতীতি জ্ঞাপয়তি। অন্যথা আধারোঽধিকরণম্ ইত্যত্রাপি অধিক্রিয়তে অস্মিন্ ইতি অধিকরণম্ ইতি ব্যুৎপত্ত্যা অধিকরণম্ ইত্যনেনৈব আধারলাভে সূত্রে আধারপদং তমবর্থং বোধয়তি। আধারস্ত্রিবিধঃ—অভিব্যাপকঃ, ঔপশ্লেষিকঃ, বৈষয়িকশ্চেতি। অতঃ আধারোঽধিকরণম্ ইতি সূত্রে "গৌণমুখ্যয়োঃ মুখ্যে এব কার্যসম্-প্রত্যয়ঃ"—ইতি ন্যায়শ্চেৎ প্রবর্ত্তেত তর্হি সর্বাবয়বব্যাপ্ত্যা যঃ মুখ্য আধারঃ স এব অধিকরণমিতি অর্থঃ স্যাৎ। এবং চ তিলেষু তৈলম্, দধ্নি সর্পিঃ, সর্বস্মিন্ আত্মা ইত্যাদৌ এব মুখ্যে অধিকরণে সপ্তমী স্যাৎ। গঙ্গায়াং ঘোষঃ, কূপে গর্গকুলম্, মোক্ষে ইচ্ছা—ইত্যাদিষু ঔপশ্লেষিকে, বৈষয়িকে চ গৌণাধিকরণে সপ্তমী ন স্যাদিতি বারণায় অত্র তমব্গ্রহণম্।

(৩৪) What is the difference between হেতু and করণ? Elucidate the point by means of examples.

Or

Explain.—*দ্রব্যাদিসাধারণং নির্ব্যাপারসাধারণং চ হেতুত্বম্। করণত্বং তু ক্রিয়ামাত্রবিষয়ং ব্যাপারনিয়তঞ্চ॥*

হেতুরিহ করণপর্যায়ো লৌকিক এব বিবক্ষিতঃ। ন তু 'তৎ-প্রযোজকো হেতুশ্চ' ইতি কৃত্রিমঃ। করণং তু সাধকতমং কারকম্। তথা হি উচ্যতে—

ক্রিয়ায়াঃ ফলনিষ্পত্তির্যদ্ব্যাপারাদনন্তরম্।
বিবক্ষ্যতে যদা যত্র করণং তত্তদা স্মৃতম্॥ ইতি॥

তৎ হেতুরপি কারণম্, ফলসাধনযোগ্যঃ পদার্থঃ। করণমপি ফলসাধন-

যোগ্যঃ পদার্থঃ। অতঃ হেতুকরণয়োঃ কো ভেদ ইতি চেদুচ্যতে—দ্রব্যাদিসাধারণং নির্ব্যাপারসাধারণঞ্চ হেতুত্বম্। করণত্বং তু ক্রিয়ামাত্রবিষয়ং ব্যাপারনিয়তঞ্চ। দ্রব্যগুণক্রিয়ানিরূপিতং নির্ব্যাপারসব্যাপারবৃত্তি চ হেতুত্বমিত্যর্থঃ। করণত্বং ক্রিয়ামাত্রনিরূপিতং ব্যাপারবৃত্তি চ নিয়তমেব ইতি বোধ্যম্। যথা দ্রব্যস্য তথা গুণস্য তথৈব চ ক্রিয়ায়াঃ সাধনযোগ্যো হেতুঃ। কারকত্বাৎ করণস্তু ক্রিয়ামাত্রস্য সাধকম্। অয়মেকো ভেদঃ। অপরঃ ভেদশ্চ হেতুত্বং নির্ব্যাপারে অপি সাধারণং সমানমস্তি যথা সব্যাপারে। অস্তি নাস্তি চ হেতৌ ব্যাপারঃ। করণত্বং পুনর্ব্যাপারে নিয়তং নিয়ন্ত্রিতম্। অস্ত্যেব করণে ব্যাপার ইতি ভেদো দ্বিতীয়ঃ। তথাহি দ্রব্যবিষয়ে সব্যাপারহেতুঃ উদহ্রিয়তে—দণ্ডেন ঘট ইতি। দণ্ডহেতুকঃ ঘট ইত্যর্থঃ। ব্যাপারবান্ দণ্ডঃ ঘটরূপস্য হেতুঃ। অত্র ব্যাপারোঽস্তু মা বা সাক্ষাৎক্রিয়ান্বয়িত্বাভাবাৎ করণত্বং নাস্তি ইতি ভাবঃ। দ্রব্যবিষয়ে নির্ব্যাপারহেতোঃ উদাহরণমাহ—ধনেন কুলমিতি। তথা চ ক্রিয়াবিষয়ে নির্ব্যাপারহেতোঃ উদাহরণম্—পুণ্যেন দৃষ্টো হরিঃ। পুণ্যশব্দেন ইহ পরমাপূর্বমুচ্যতে। যদা তু পুণ্যশব্দেন যাগাদিক্রিয়া বিবক্ষ্যতে তদা তস্য ব্যাপারবত্ত্বাৎ ন হেতুত্বং পরন্তু করণত্বমেব। গুণবিষয়ে উদাহরণং যথা পুণ্যেন ব্রহ্মবর্চসম্ ইতি। অত্র পুণ্যশব্দস্য যাগাদিকং বা পরমাপূর্বং বা অর্থো ভবতু গুণস্য কারণমিতি নাত্র করণপ্রসঙ্গঃ, অতো হেতুরেব। পরন্তু রামেণ বাণেন হতো বালী ইত্যুক্তে সতি বাণঃ হননক্রিয়ায়াঃ এব ব্যাপারবান্ সাধকঃ, ন তু কস্যচিদপি দ্রব্যস্য গুণস্য বা। অতঃ বাণেন ইত্যত্র করণে তৃতীয়া এব ন পুনঃ হেতৌ। 'হেত্বধীনঃ কর্ত্তা কর্ত্রধীনং করণম্' ইতি পুরুষোত্তমঃ। মাতা শোকেন রোদিতি ইত্যত্র শোকস্য অধীনে স্থিতা মাতা ক্রন্দনরতা। অতঃ শোকস্যাত্র হেতুত্বম্। পুনশ্চ রামঃ কুঠারেণ কাষ্ঠং ছিনত্তি ইত্যত্র কুঠারঃ কর্ত্তুঃ রামস্য অধীনে স্থিতঃ সন্ তস্য ইচ্ছানুসারেণ কর্ম করোতি। অতএব কুঠারস্য করণত্বম্।

**(৩৫) কৃতি কিম্। তদ্ধিতে মা ভূৎ। কৃতপূর্বী কটম্।**

ননু 'কর্তৃকর্মণোঃ কৃতি' 'ইত্যস্মিন্ সূত্রে কৃতি ইত্যস্য গ্রহণং কিমর্থম্? তদভাবেঽপি 'কর্তৃকর্মণোঃ' ইতি সূত্রস্যায়মর্থঃ স্যাৎ। কর্তুঃ কর্মণশ্চ ক্রিয়াযোগে এব কারকত্বম্। ক্রিয়া চ ধাত্বর্থঃ এব, সা চ ধাতৌ তিঙ্প্রত্যয়যোগাৎ কৃৎপ্রত্যয়যোগাচ্চ লভ্যতে। ততঃ তিঙ্-প্রত্যয়ে কৃৎপ্রত্যয়ে চ কর্তৃকর্মণোঃ ষষ্ঠী ভবতীতি। তত্র 'ন লোকা-ব্যয়—' ইত্যাদিনা লাদেশতিঙন্তযোগে ষষ্ঠ্যাঃ নিষেধাৎ, তিঙন্তযোগে ষষ্ঠী ন প্রাপ্নোতি। এবঞ্চ ধাতুভ্যঃ বিহিতে কৃদন্তযোগে এব ষষ্ঠী প্রাপ্নোতি। ততশ্চ কৃদন্তধাতুযোগে এব কর্তুঃ কর্মণশ্চ ষষ্ঠীসিদ্ধৌ সূত্রে কৃতিগ্রহণং কিমর্থমিতি প্রশ্নঃ। অত্রোত্তরং—তদ্ধিতে মা ভূদিতি। তদ্ধিতে অপি ক্রিয়ায়া অন্তর্ভাবো ভবতি। তাদৃশে তদ্ধিতে অনুক্তে কর্তরি কর্মণি চ ষষ্ঠী ন—ইতি বোধনার্থং 'কৃতি' ইত্যুক্তম্। কৃতপূর্বী কটমিত্যত্র কৃধাতোঃ কর্মণঃ পূর্বমবিবক্ষয়া ভাবে ক্ত প্রত্যয়ে ততঃ পূর্বশব্দেন সমাসে 'পূর্বাদিনি সপূর্বাচ্চ' ইত্যনেন কর্তরি ইনি প্রত্যয়ে তদ্ধিতান্তত্বাৎ 'কৃতপূর্বী'—শব্দো নিষ্পদ্যতে। যদি কশ্চিৎ জিজ্ঞাসুঃ কস্মিন্ কর্মণি সফল ইতি পৃচ্ছতি, তদা উত্তরং কটকরণে ইতি। অথবা, কটং কৃতপূর্বী অয়মিতি বাক্যং জায়তে। অত্র তদ্ধিতঃ কর্তারমভিধত্তে ন তু কর্ম। কৃতশব্দস্থঃ কৃৎ কটরূপেণ কর্মণা সম্বন্ধযুক্তে জাতে অপি তদ্ধিতান্তরিতঃ সন্ কর্ম অভিধাতুং ন প্রভবতি। এবং কর্মণি অনুক্তে ষষ্ঠী প্রসজ্যতে, 'তদ্ধিতে মা ভূৎ' ইতি নিষেধাত্তু ন ভবতি। অতঃ কৃতপূর্বী কটমিত্যেব, ন চ কৃতপূর্বী কটস্য ইতি।

**✓(৩৬) অর্থগ্রহণং কিম? বৃত্তাবর্থান্তরোপসংক্রান্তে মা ভূৎ। ব্যাপ্যামশ্বো ব্যাপ্যশ্বঃ।**

ননু 'ঈদূতৌ চ সপ্তম্যর্থে' ইতি সূত্রে অর্থগ্রহণাভাবেঽপি ঈদূতৌ বিশেষণত্বে সপ্তমীতি বিশেষ্যে চ "যেন বিধি স্তদন্তস্য" "ইতি পরি-

ভাষাসূত্রেণ তদন্তবিধৌ প্রত্যগ্রহণে যস্মাৎ স বিহিতস্তদাদেস্তদন্তস্য গ্রহণমিতি পরিভাষয়া চ তদন্তবিধৌ ঈদূদন্তং যৎ সপ্তম্যর্থং তৎ প্রগৃহ্যসংজ্ঞং স্যাদিত্যর্থে 'সোমো গৌরী অধিশ্রিতঃ। মামকী তনূ' ইত্যাদিপ্রয়োগাণাং সিদ্ধৌ সূত্রে অর্থগ্রহণং কিমর্থমিত্যাশঙ্ক্যাহ দীক্ষিতঃ—অর্থগ্রহণং কিমিতি।

ন চ 'সংজ্ঞাবিধৌ প্রত্যয়গ্রহণে তদন্তগ্রহণং নাস্তি' ইতি পরিভাষয়া তদন্তবিধিনিষেধেন উক্তার্থাসম্ভব ইতি বাচ্যম্, তদন্তবিধেরভাবে সূত্রস্য বৈয়র্থ্যাপত্তেঃ। তদৈব ব্যর্থং সৎ জ্ঞাপয়তি সংজ্ঞাবিধৌ ইতি পরিভাষা নাত্র প্রবর্ত্ততে ইতি। ন চ দক্ষিণাহি পথে মহান্তি সরাংসি সরসী ইত্যুচ্যতে। তত্র হি সূত্রার্থস্য চারিতার্থ্যমস্ত্যেব ইতি বাচ্যম্। বচনাৎ যত্র দীর্ঘত্বং তত্রাপি সরসী যদি ইতি ভাষ্যোক্ত্যা এতাদৃশপ্রয়োগাণামনভিধানাৎ। যথাকথঞ্চিৎ স্বীকারেঽপি উকারাংশে সূত্রস্য বৈয়ার্থ্যাৎ। এবং তর্হি অর্থগ্রহণং মাত্রার্থপদলাভার্থম্। তেন অর্থগ্রহণসামর্থ্যাৎ সপ্তম্যর্থবিশেষ্যতাকোপস্থিতিজনকস্যৈব ঈকারান্তস্য উকারান্তস্য বা প্রগৃহ্যসংজ্ঞা ভবতীত্যর্থো বিবক্ষিতঃ। এবঞ্চ 'সোমো গৌরী অধিশ্রিতঃ','মামকী তনূঃ' ইত্যাদৌ "যঃ শিষ্যতে স লুপ্যমানার্থাভিধায়ী' ইতি ন্যায়েন ঈকারান্তে উকারান্তে চ সপ্তম্যর্থবিশেষ্যতাকোপস্থিতিজনকত্বস্য (সপ্তম্যর্থনিরূপিতশক্তি পর্য্যাপ্ত্যধিকরণত্বস্য) সত্ত্বেন প্রগৃহ্যসংজ্ঞাসিদ্ধিঃ। 'বাপ্যশ্ব' ইত্যত্র তু সমাসঘটকবাপীশব্দস্য প্রত্যয়লক্ষণেন সপ্তম্যন্তত্বেঽপি সমাসে সমুদায়ে শক্তিস্বীকারেণ সপ্তম্যর্থবিশেষ্যতাকোপস্থিতিজনকত্বা-ভাবেন ন প্রগৃহ্যসংজ্ঞেতি। 'বাপ্যশ্ব' ইত্যত্র 'বাপীনিষ্ঠাঽধিকরণতা-নিরূপিতাঽধেয়তাবানশ্বঃ' ইতি শাব্দবোধঃ। ননু বাপ্যামশ্ব ইতি সংজ্ঞায়াম্ ইতি সমাসে বাক্যেন সংজ্ঞানবগমান্নিত্যসমাসত্বেন বিগ্রহোঽনুচিত ইতি চেন্ন। তেষু সমাসসমানার্থকবাক্যাভাবেন নিত্যসমাসসদৃশত্বেঽপি নিত্যসমাসত্বাভাবাৎ। অতএব সূত্রে অর্থ-গ্রহণমাবশ্যকম্।

ন চ সুপাং সুলুগিত্যাদিনা সূত্রে পূর্বসবর্ণদীর্ঘ ইতি বাচ্যম্। 'অসিদ্ধং বহিরঙ্গমন্তরঙ্গে' ইতি পরিভাষয়া অন্তরঙ্গত্বেন 'আডাম্ভাব-প্রসক্তেঃ'।

### (৩৭) *প্রতিপদবিধানা ষষ্ঠী ন সমস্যত ইতি বাচ্যম্।*

পদং পদং প্রতিপদমিতি বীপ্সায়ামব্যয়ীভাবঃ। প্রতিপদং বিধানং যস্যাঃ সা প্রতিপদবিধানা। কারকবিশেষে কর্তরি কর্মণি করণে ইত্যাদিপ্রকারেণ পদে পদে বিহিতা যা ষষ্ঠী সা ইত্যর্থঃ। ভাষ্যকারাস্তু ষষ্ঠী শেষে ইতি শেষলক্ষণাং ষষ্ঠীং বর্জয়িত্বা সর্বা ষষ্ঠী প্রতিপদবিধানা ইত্যাহুঃ। তথা চোক্তম্—কা পুনঃ ষষ্ঠী প্রতিপদবিধানা কা চ কৃদ্-যোগা। সর্বা ষষ্ঠী প্রতিপদবিধানা শেষলক্ষণাং বর্জয়িত্বা। কর্তৃ-কর্মণোঃ কৃতি ইতি যা ষষ্ঠী সা কৃদ্যোগা ইতি। অতএব ষষ্ঠী শেষে ইতি বিহায়ান্যেন 'জ্ঞোঽবিদর্থস্য করণে' ইত্যাদিনা বিহিতা ষষ্ঠী প্রতি-পদবিধানা। সা প্রতিপদবিধানা ষষ্ঠী ন সমস্যত ইতি হি বার্ত্তিককার-বচনম্। উদাহরণং যথা—সর্পিষো জ্ঞানমিতি। অত্র জ্ঞোঽবিদর্থস্য করণে ইতি বিহিতষষ্ঠ্যাঃ সমাসো ন ভবতি। ধাতুকারকবিশেষং গৃহীত্বৈব জ্ঞোঽবিদর্থস্য ইত্যাদিনা ষষ্ঠী বিধীয়ত ইতি ভবতি তস্যাঃ প্রতিপদবিধানত্বম্। অতএবাত্র সমাসস্য প্রাপ্তির্নাস্তি। বস্তুতস্তু ইহ করণস্য সম্বন্ধমাত্রবিবক্ষয়া জ্ঞোঽবিদর্থস্য ইতি ষষ্ঠী। সর্পিঃসম্বন্ধি প্রবর্তনমিত্যর্থঃ।

### (৩৮) *কৃত্তদ্ধিতসমাসৈকশেষসনাদ্যন্তধাতুরূপাঃ পঞ্চ বৃত্তয়ঃ। পরার্থাভিধানং বৃত্তিঃ।*

বিগ্রহবাক্যাবয়বপদার্থেভ্যঃ পরঃ অন্যঃ যোঽয়ং বিশিষ্টৈকার্থঃ তৎ-প্রতিপাদিকা বৃত্তিরিত্যর্থঃ, প্রক্রিয়াদশায়াং প্রত্যেকমর্থবত্ত্বেন প্রথম-বিগৃহীতানাং পদানাং সমুদায়শক্ত্যা বিশিষ্টকার্যপ্রতিপাদিকা বৃত্তিরিতি যাবৎ। যদ্বা, প্রত্যয়ান্তর্ভাবেণ অপরপদার্থান্তর্ভাবেণ বা যো

বিশিষ্টোঽর্থঃ স পরার্থঃ। সঃ অভিধীয়তে যেন তৎ পরার্থাভিধানম্.সা হি বৃত্তিঃ। অতএব তিঙন্তং বৃত্তি র্ন ভবতি, তত্র একার্থীভাবানভ্যুপগমাৎ, অন্যথা 'মৃদু পচতি' ইত্যাদৌ ফলে মৃদুত্বান্বয়ো ন স্যাৎ, 'সবিশেষাণাং বৃত্তি র্ন ভবতি, বৃত্তস্য চ বিশেষণযোগো ন' ইত্যভ্যুপগমাৎ ইত্যেকে।

সমর্থসূত্রে কৈয়টস্তু আহ—পরস্য শব্দস্য যোঽর্থঃ, তস্য অভিধানং শব্দান্তরেণ যত্র সা বৃত্তিরিত্যর্থঃ। যথা, রাজপুরুষ—ইত্যত্র রাজশব্দেন বাক্যাবস্থায়াম্ অনুক্তঃ পুরুষার্থো বৃত্তৌ অভিধীয়তে। তথা চোক্তম্—

পাণিন্যাদিভিরাচার্যৈঃ শব্দশাস্ত্রপ্রবক্তৃভিঃ।
ভণিতা বৃত্তয়ো যা হি বিশিষ্টৈকার্থবোধিকাঃ॥ ইতি॥

বৃত্তয়ঃ পঞ্চ। তাশ্চ,—কৃৎ, তদ্ধিতঃ, সমাসঃ, একশেষঃ, সনাদ্যন্তধাতুঃ ইতি। তথা চোক্তম্—

সমাসা একশেষাশ্চ তদ্ধিতাশ্চ কৃতস্তথা।
সনাদ্যন্তাঃ ধাতবশ্চ বৃত্তয়ঃ পঞ্চধা মতাঃ॥ ইতি॥

অত্রোদাহরণম্—কৃৎপ্রত্যয়ে কুম্ভকার ইতি। অত্র কুম্ভশব্দঃ কারশব্দশ্চ স্বার্থাভিধানে অন্যোন্যম্ অপেক্ষতে। তদ্ধিতে দাশরথিরিতি। অত্র দশরথশব্দঃ অপত্যার্থঃ ইঞ্‌প্রত্যয়শ্চ স্বার্থাভিধানে পরস্পরমপেক্ষতে। এতদ্ধি পরার্থাভিধানম্। সমাসে রাজপুরুষ ইত্যত্রাপি পরার্থাভিধানং বর্ততে। একশেষে পিতরৌ ইত্যত্র মাতৃশব্দস্যাপি অর্থঃ সূচিতঃ। এতদপি পরার্থাভিধানম্। সনাদ্যন্তধাতৌ পুত্রকাম্যতীত্যত্র পুত্রশব্দঃ কাম্যচ্‌প্রত্যয়শ্চ অন্যোন্যম্ অপেক্ষতে। অতএব অত্রাপি পরার্থাভিধানম্।

**(৩৯) কৃতসন্ধেঃ কিম্। সৌত্থিতিঃ। অকৃতব্যূহপরিভাষয়া সাবুত্থিতির্মা ভূৎ।** ( অপত্যাধিকারপ্রকরণম্ )।

'সমর্থানাং প্রথমাদ্বা' ইত্যধিকারসূত্রস্থসমর্থগ্রহণলব্ধং 'তস্যাপত্যমিত্যত্র' কৃতসন্ধেরিত্যেতৎ কিমর্থমিতি প্রশ্নঃ। সৌত্থিতিরিত্যত্র সু শোভনঃ উত্থিতঃ সূত্থিতঃ। প্রাদিসমাসে সবর্ণদীর্ঘঃ। সূত্থিতস্য অপত্যং সৌত্থিতিঃ, 'অত ইঞ্' ইত্যনেন ইঞ্‌প্রত্যয়ঃ। সুব্‌লুকি,

আদিবৃদ্ধৌ রূপমিদম্। 'যস্যেতি চ' ইত্যকারলোপঃ। 'তস্যাপত্যম্' ইতি সূত্রে 'কৃতসন্ধে' রিত্যভাবে তু 'সু উত্থিতঃ' ইত্যস্যামেব দশায়াং সবর্ণদীর্ঘত্বাৎ পরত্বাদাদিবৃদ্ধৌ কৃতায়ামাবাদেশে 'সাবুত্থিতি' রিতি স্যাৎ। ননু অত্রান্তরঙ্গত্বাৎ সবর্ণদীর্ঘে কৃতে তদুত্তরমেব ইঞ্ প্রত্যয় উচিতঃ, পরাদন্তরঙ্গস্য বলবত্ত্বাৎ। ততশ্চ সন্ধেঃ প্রাক্ তদ্ধিতোৎপত্তেঃ অপ্রসক্তেঃ কৃতসন্ধেরিতি ব্যর্থমেবেতি চেন্ন, 'অকৃতব্যূহাঃ পাণিনীয়াঃ' ইতি পরিভাষয়া সন্ধেরভাবপ্রসঙ্গাৎ। তথাহি—অন্তরঙ্গপরিভাষয়া অপ্যপবাদভূতয়া অকৃতব্যূহপরিভাষয়া সন্ধেঃ প্রাগেব প্রত্যয়ঃ স্যাৎ। ততশ্চ আদিবৃদ্ধ্যপেক্ষয়া অন্তরঙ্গোঽপি সবর্ণদীর্ঘঃ অকৃতব্যূহপরিভাষয়া আদিবৃদ্ধেঃ প্রাক্ ন প্রবর্ত্ততে। এবঞ্চ সবর্ণদীর্ঘাৎ প্রাগেবাদিবৃদ্ধৌ আবাদেশে সাবুত্থিতিরিতি স্যাদিত্যর্থঃ।

# উত্তরার্দ্ধঃ

প্রবৃত্তিঃ তস্যৈবাত্র ক্রিয়াফলশব্দেন বিবক্ষিতত্বাৎ। কর্তৃগামিফলক-ক্রিয়াবৃত্তের্ধাতোরিত্যর্থঃ। আত্মনেপদং তু ধাত্বর্থফলস্য কর্তৃগামিত্বং দ্যোতয়তীত্যলম্। উক্তঞ্চ হেলারাজেন—"যঃ স্বর্গাদিফলার্থং ভৃত্যা তরং ব্যাপারয়তি স্বয়ঞ্চ প্রতিবিধানমারভতে তত্রৈব যজমানাদৌ র্তরি আত্মনেপদমিষ্যতে।" ইতি।

*প্রহাসে চ মন্যোপপদে মন্যতেরুত্তম একবচ্চ* (১।৪।১০৬)—বাক্যদ্বয়মিদং সূত্রম্। 'প্রহাসে চ মন্যোপপদে' ইতি প্রথমং বাক্যম্। মন্যতেরুত্তম একবচ্চ' ইতি দ্বিতীয়ং বাক্যম্। তত্র প্রথমে 'যুষ্মদ্যুপপদে মানাধিকরণে –' ইতি সূত্রাৎ 'মধ্যমঃ' ইত্যনুবর্ততে। মন্ধাতুঃ ন্বিকরণঃ উপপদং যস্যেতি বহুব্রীহিঃ। মন্যপদশ্রবণবলাদ্ ধাতৌ তি বিশেষ্যং লভ্যতে। তদুক্তম্—মন্যধাতুরুপপদং যস্য ধাতো-স্তস্মাদ্ধাতোর্লস্য স্থানে অস্মদ্যুপপদে মধ্যমঃ স্যাৎ পরিহাসে গম্যমানে। দ্বিতীয়বাক্যে পূর্বসূত্রাৎ 'যুষ্মদ্যুপপদে' ইতি অনুবর্ততে, 'অস্মদ্যুত্তমঃ' তি উত্তরসূত্রাৎ 'উত্তমঃ' ইতি চাপকৃষ্যতে। তথা চায়মর্থঃ—ষ্মদ্যুপপদে মন্যতেস্তূত্তমঃ স্যাৎ স চ একার্থস্য বাচকঃ স্যাৎ। স ন্যতেরুত্তমপুরুষঃ দ্বিত্ববহুত্বয়োরপি একবচনং লভতে ইত্যর্থঃ। ধ্যমোত্তময়োর্ব্যত্যাসার্থমিদম্। উদাহরণং যথা—এহি মন্যে ওদনং ভোক্ষ্যসে ইতি ভুক্তঃ সোঽতিথিভিঃ। অত্র ভুজেরুত্তমপুরুষে প্রাপ্তে ধ্যমঃ পুরুষঃ, মন্যতেস্তু মধ্যমপুরুষে প্রাপ্তে উত্তমঃ পুরুষঃ।

*সার্বধাতুকার্ধধাতুকয়োঃ* (৭।৩।৮৪)—অঙ্গাধিকারীদং সূত্রম্। অঙ্গস্য' ইতি সূত্রস্যাধিকারঃ ষষ্ঠাধ্যায়স্য চতুর্থপাদত আ সপ্তমাধ্যায়ং পরিব্যাপ্তঃ। অত্র যস্মাৎ প্রত্যয়বিধিস্তদাদিপ্রত্যয়েঽঙ্গম্ ইতি অঙ্গসংজ্ঞা স্মর্তব্যা। 'মিদের্গুণ' ইত্যস্মাদ্ গুণ ইত্যনুবর্ততে। সূত্রেষ্বদৃষ্টং পদং সূত্রান্তরাদনুবর্তনীয়ং সর্বত্র। গুণে চ বক্তব্যে 'ইকো গুণবৃদ্ধী' ( গুণবৃদ্ধিশব্দাভ্যাং যত্র গুণবৃদ্ধী বিধীয়েতে তত্র ইক ইতি

ষষ্ঠ্যন্তং পদমুপতিষ্ঠতে ) ইতি পারিভাষিকত্বাদ্ ইক ইত্যুপস্থিতেন 'অঙ্গস্য' ইত্যধিকৃতং বিশিষ্যতে। 'যেন বিধিস্তদন্তস্য' ইতি পরিভাষয়া ইক ইতি পদেন ইগন্তোঽপি বোদ্ধব্যঃ। বিশেষণং তদন্তস্য চ বোধকম্। অতঃ অঙ্গস্য ইকো গুণঃ স্যাৎ সার্বধাতুকার্ধধাতুকয়োঃ পরত ইতি সূত্রশরীরং সম্পূর্যতে। যত্র কাচিদপি ক্রিয়া ন শ্রূয়তে, তত্র স্যাদ্ভবত্যাস্তীত্যাদি প্রযুজ্যন্ত ইতি ভাষ্যকারঃ। তিঙ্‌শিৎ— সার্বধাতুকম্। আর্ধধাতুকং শেষাঃ। তদয়মর্থঃ— ভূ ইতি শপি পরত ইগন্তমঙ্গম্। ততঃ পরং সার্বধাতুকতিঙ্ চ বর্ততে। অতএব অঙ্গস্য গুণঃ অবাদেশশ্চ ভবতি। তেন চ ভূ+শপ্+তি=ভূ+অ+তি ভো+অ+তি=ভব্ অতি=ভবতি ইতি সাধিতং ভবতি॥

✓*অতো দীর্ঘো যঞি* (৭।৩।১০১)—'অঙ্গস্য' ইতি আসপ্তমাধ্যায়-পরিসমাপ্তেরধিকার ইতি ভাষ্যবচনাৎ 'অতো দীর্ঘো যঞি' ইত্যস্য চ সপ্তমাধ্যায়মধ্যপতিতত্বাৎ 'অঙ্গস্য' ইতি বর্ততে। তদাহ—অদন্ত-স্যাঙ্গস্য দীর্ঘঃ স্যাদ্ যঞাদৌ সার্বধাতুকে পরে। অত্র "তুরুস্তুশম্যমঃ সার্বধাতুকে" ইত্যতঃ সার্বধাতুকে ইতি অনুবর্ততে। অঙ্গস্য ইতি বিশেষ্যম্। অদন্তস্যেতি বিশেষণম্। তেনাকারান্তস্যাঙ্গস্যেতি ফলিতার্থঃ। অত্র তদন্তবিধিঃ। সার্বধাতুকে ইত্যনুবৃত্তং যঞা বিশেষ্যতে। অত্র তদাদিবিধিঃ। যঞপ্রত্যাহারান্তর্গতবর্ণঃ আদৌ প্রথমে যস্য সার্বধাতুকপ্রত্যয়স্য তস্মিন্ পরে সতি ইতি স্ফুটার্থঃ। যঞিতি —য বরট্। লণ্। ঞমঙ্। ণনম্। ঝভঞ্।—এতেষাং ব্যবহারঃ। ভবামীত্যত্র ভব ইতি অঙ্গম্। 'মী'তি মকাররূপযঞাদিসার্বধাতুক-প্রত্যয়ঃ, তেন 'ভব' ইত্যস্য 'ভবা' ইতি রূপম্। মিপা ভবামীতি ভবতি। 'যস্মাৎ প্রত্যয়বিধিস্তদাদিপ্রত্যয়েঽঙ্গম্' ইত্যত্র তদাদি-গ্রহণেন বিকরণবিশিষ্টস্যাপি অঙ্গম্। তস্মাৎ ভবাবঃ, ভবাম ইতি। যঞি কিম্?—ভবতঃ। অত্র 'ভব' ইতি অঙ্গম্। কিন্তু 'ত' ইতি সার্বধাতুকোঽপি যঞাদির্ন ভবতি। তেন দীর্ঘত্বমপি ন।

**পরোক্ষে লিট্** (৩।২।১১৫)—অত্র 'অনদ্যতনে লঙ্' ইত্যস্মাদনদ্যতন ইত্যনুবর্ত্ততে। 'ভূতে' ইত্যধিকৃতং চ। পরোক্ষত্বং ধাত্বর্থবিশেষণম্। তদুক্তম্—ভূতানদ্যতনপরোক্ষার্থবৃত্তের্ধাতোর্লিট্ স্যাৎ। লস্য তিবাদিনবকম্। অতীতরাত্রেরন্ত্যযামেন আগামিরাত্রেরাদ্যযামেন সহিতো দিবসঃ অদ্যতন ইতি কৈয়টে স্থিতম্। পরোক্ষত্বং তু বর্ষশতবৃত্তত্বমিত্যেকে। বর্ষসহস্রবৃত্তত্বমিত্যপরে। দ্ব্যহবৃত্তত্বমিতি ত্র্যহবৃত্তত্বং চেত্যন্যে। কুড্যকটাদ্যন্তরিতত্বমিতীতরে। এতে পক্ষাঃ ভাষ্যে স্থিতাঃ। তত্র প্রযোক্তুরিন্দ্রিয়াগোচরত্বং পরোক্ষত্বমিত্যেব সর্বসম্মতম্। ননু ধাত্বর্থঃ সর্বঃ পরোক্ষ এব। সত্যমেতৎ, অস্তি তু লোকে ধাত্বর্থেনাপি কারকেষু প্রত্যক্ষাভিমানঃ, স যত্র নাস্তি তৎ পরোক্ষমিত্যুচ্যতে ইতি কাশিকাকারঃ। অত্রোদাহরণম্—চকার, জহার ইত্যাদয়ঃ। উত্তমবিষয়ে অপি চিত্তব্যাক্ষেপাৎ পরোক্ষতা সম্ভবত্যেব, তদ্যথা—সুপ্তোঽহং কিল বিললাপ। অত্যন্তাপহ্নবে চ লিড্ বক্তব্যঃ। কলিঙ্গেষু স্থিতোঽসি ? নাহং কলিঙ্গান্ জগাম। ১

**লিটিধাতোরনভ্যাসস্য** (৬।১।৮)—লিটি পরে অনভ্যাসধাত্ববয়বস্যৈকাচঃ প্রথমস্য দ্বে স্ত আদিভূতাদচঃ পরস্য তু দ্বিতীয়স্য ইতি দীক্ষিতপাদাঃ। অত্র একাচো দ্বে প্রথমস্য ইতি সূত্রমধিক্রিয়তে। ধাতোরিত্যবয়বষষ্ঠী। একাচ্ ইতি প্রথমস্য ইতি চ ধাত্ববয়বস্য বিশেষণম্। একঃ অচ্ যস্যেতি একাজিতি তদ্গুণসংবিজ্ঞানো বহুব্রীহিঃ। তথা চায়ং সূত্রার্থঃ—লিটিপরে অভ্যাসভিন্নৈকাচ্কস্য প্রথমস্য ধাত্ববয়বস্য দ্বে উচ্চারণে ভবত ইতি। একাচ্ ইত্যত্র কর্মধারয়াশ্রয়ণে তু পপাচ পপাঠেতি রূপাদিকং ন সিধ্যেদিতি ভাষ্যে স্পষ্টমেবোক্তম্। অজাদের্দ্বিতীয়স্য ইত্যপি সূত্রমধিক্রিয়তে অত্র। তত্রাচ্চাসাবাদিশ্চ অজাদিঃ, তস্মাদিতি কর্মধারয়াৎ পঞ্চমী। দ্বিতীয়স্য ইত্যতঃ একাচ ইতি অধ্যাহার্য্য ব্যাখ্যেয়ম্। অজাদের্দ্বিতীয়স্য ইতি সূত্রং পূর্বস্য একাচঃ প্রথমস্য ইত্যস্য বাধকম্। তেনায়মর্থঃ

—অজাদিধাত্ববয়বস্য একাচশ্চেদ্ দ্বিত্বং তর্হি দ্বিতীয়স্যৈকাচো দ্বিত্বং ন তু প্রথমস্য ইতি। অজাদেরিতি বহুব্রীহ্যাশ্রয়ণে তু ইন্দ্রমাত্মন ইচ্ছতি ইন্দ্রীয়তি, ইন্দ্রীয়িতুমিচ্ছতি ইন্দ্রিন্দ্রীয়িষতীত্যাদৌ 'নন্দ্রাঃ সংযোগাদয়ঃ' ইতি দকারস্য দ্বিত্বনিষেধঃ স্যাৎ। তত্র অজাদেরিত্যস্যানুবৃত্তেঃ। অত্র অচ ইতি উক্তেঽপি ন কেবলম্ অচ্' এব দ্বিরুচ্যতে কিন্তু তদ্‌যোগাৎ ব্যঞ্জনান্যপি। তথা চ ভাষ্যম্—"ব্যঞ্জনানি পুনর্নটভার্য্যাবদ্ ভবন্তি তদ্ যথা—নটানাং স্ত্রিয়ো রঙ্গগতাঃ যো যঃ পৃচ্ছতি কস্য যূয়ং কস্য যূয়মিতি তং তং তব তবেত্যাহুঃ। এবং ব্যঞ্জনান্যপি যস্য যস্যাচঃ কার্য্যমুচ্যতে তং তং ভজন্তে" ইতি। অত্র ধাতোরিতি কিমর্থম্? তদভাবে লিটি পরে যঃ প্রথম একাচ্ তস্য দ্বে ইত্যর্থঃ স্যৎ। এবং চ পপাচেত্যাদাবেব স্যাৎ ন তু জজাগরেত্যাদাবপীতি ভাষে স্পষ্টম্। অনভ্যাস ইতি কিম্? সন্নন্তানাং যঙন্তানাঞ্চ দ্বিত্বং ভবতি। পুনশ্চঙি তেষাং দ্বিত্বং মা ভূদিত্যেবমর্থম্ 'অনভ্যাস' ইত্যুক্তম্। সকৃৎকৃতাভ্যাসকার্যস্য পুনরভ্যাসকার্যং নাস্তীতি তদর্থঃ।

***অভ্যাসে চর্চ*** (৮।৪।৫৪)—'ঝলাং জশ্ ঝশি' ইত্যস্মাদ্ ঝলামিত্যত্রানুবর্ততে। চকারেণ জশ্ সমুচ্চীয়তে। তদুক্তম্ দীক্ষিতপাদৈঃ —"অভ্যাসে ঝলাং চরঃ স্যুর্জশশ্চ। ঝশাং জশঃ। খয়াং চরঃ। তত্রাপি প্রকৃতিজশাং প্রকৃতিজশঃ,প্রকৃতিচরাং প্রকৃতিচর ইতি বিবেকঃ, আন্তরতম্যাৎ।" ইতি। ঝলশ্চতুর্বিংশতিঃ। তত্র শষসাঃ শরঃ। তেষামভ্যাসে লোপো ভবতি 'শর্পূর্বাঃ খয়ঃ' ইত্যনেন। হকারস্য ত্বভ্যাসে "কুহোশ্চুঃ" ইতি চুত্বম্। এবং চ ঝল্‌ষু ঝয়ো বিংশতিরিহাভ্যাসগতাঃ স্থানিনো লভ্যন্তে। তেষাং মধ্যে কস্য চরঃ কস্য জশ ইত্যাকাঙ্ক্ষায়ামাহ—ঝশাং জশ ইতি। বর্গাণাং তৃতীয়চতুর্থা ঝশঃ। তেষাং জশো জবগডদা ইত্যর্থঃ। যদ্ যদ্ বর্গ্যাঃ স্থানিনঃ তত্তদ্বর্গ্যাঃ আদেশা ইত্যপি বোধ্যম্। বর্গানাং প্রথমদ্বিতীয়াঃ খয়ঃ, তেষাং চরঃ চটকতপা ইত্যর্থঃ। অত্রাপি যদ্ যদ্ বর্গ্যাঃ স্থানিনঃ তত্তদ্বর্গ্যাঃ আদেশা

আর্ধধাতুকাব্যবহিতপূর্বত্বাভাবাৎ গুণো ন স্যাদিত্যুভয়ত্রাপি দোষঃ। অত্রেদং সমাধীয়তে—সার্বধাতুকার্ধধাতুকয়োরিতীকো বিশেষণম্। তেনায়ং সূত্রার্থঃ—সার্বধাতুকার্ধধাতুকাব্যবহিতপূর্বস্যেকো গুণঃ স্যাৎ স চেদঙ্গাবয়ব ইতি।

**যাসুট্ পরস্মৈপদেষূদাত্তো ঙিচ্চ** (৩।৪।১০৩)—পরস্মৈপদেষ্বিতি ষষ্ঠ্যর্থে সপ্তমী। 'লিঙঃ সীযুট্' ইত্যতো লিঙঃ ইত্যনুবর্ততে। লিঙঃ পরস্মৈপদানাং যাসুডাগমঃ স্যাৎ স চোদাত্তো ঙিচ্চ। 'আগমাঃ অনুদাত্তাঃ' ইতি যাসুটোঽনুদাত্তত্বে প্রাপ্তে উদাত্তবচনম্। টিত্ত্বাৎ পরস্মৈপদতিবাদীনামাদাবেব যাসুডাগম্যতে যাস্ চ শিষ্যতে। স্তুয়াৎ স্তুয়াতামিত্যাদৌ গুণাদিনিষেধার্থং যাসুটো ঙিত্ত্ববচনম্। ননু "যদাগমাস্তদ্গুণীভূতাস্তদ্গ্রহণেন গৃহ্যন্তে" ইতি পরিভাষয়া যাসুডাগমো লিঙাদেশপরস্মৈপদাবয়বঃ। ততশ্চ স্থানিবদ্ভাবেনৈব ঙিত্ত্বসিদ্ধেঃ যাসুটো ঙিত্ত্ববিধি র্ব্যর্থঃ। অত্রোচ্যতে—'স্থানিবদাদেশোঽনল্বিধৌ' ইতি। আদেশঃ স্থানিবদ্ভবতি ন তু অল্বিধৌ। অত্র ঙিত্ত্বম্ অল্মাত্রবৃত্তিধর্মঘটিতধর্মঃ। তেন চ স্থানিবদ্ভাবঃ। অতঃ সূত্রে ঙিত্ত্বপদমাবশ্যকম্ এবেতি প্রতীয়তে। অত্র পুনর্জ্ঞাপকাৎ 'অনুবন্ধকার্যে কর্ত্তব্যে অনল্বিধৌ ইতি নিষেধো ন কর্তব্য' ইতি পরিভাষা উপলভ্যতে। ইৎসংজ্ঞকত্বমনুবন্ধত্বম্। ইৎপদঘটিতঃ অল্মাত্রবৃত্তিধর্মঘটিতঃ যো ধর্মস্তদ্ধর্মঘটিতকার্য্যে স্থানিবদ্ভাবো ভবত্যেব। অতো ঙিৎপদস্য প্রয়োগো ন ব্যর্থঃ। 'ন ল্যপি' ইতি সূত্রমেবাত্র প্রমাণম্ 'ঘুমাস্থাগাপাজহাতিসাং হলি'—এষামাৎ ঈৎ স্যাদ্ হলাদৌ কিঙতি আর্ধধাতুকে পরে। দীয়তে। 'ন ল্যপি'—ল্যপি প্রত্যয়ে পরতঃ তন্ন ভবতি। প্রদায়। অকিৎপ্রত্যয়স্য ল্যপঃ কিত্ত্বগুণবিশিষ্টত্বাৎ স্ফুটমেব বুধ্যতে যৎ ক্তাচঃ কিত্ত্বং ল্যপ্যপ্যতিদিশ্যতে। তেন 'ঘুমাস্থা—' ইতি সূত্রমত্রাপি প্রযুজ্যতে। অত্র ল্যপি কিত্ত্বপ্রয়োগেনৈতৎ প্রমীয়তে যদনুবন্ধকার্যে অল্আশ্রয়বিধৌ অপি স্থানিবদ্ভাবো ন নিষিধ্যতে। অনেনাপি ঙিদ্-

গ্রহণস্থ প্রয়োজনং ন জ্ঞায়তে, তেনেদং ব্যর্থমিতি প্রতীয়তে। দীক্ষিত-মতে তু নিয়মান্তরজ্ঞাপকাদিদং ন ব্যর্থম্। ক্বচিদ্ ( লাশ্রয়বিধিকার্যে ) অনুবন্ধকার্যে অপি অনল্বিধৌ ইতি প্রতিষেধ ইতি। তদ্যথা—বক্ষ্যমাণ ॥

**অতো যেয়ঃ** ( ৭।২।৮০ )—অতঃ পরস্থ সার্বধাতুকাবয়বস্থ যা ইত্যস্থ 'ইয্' স্যাদিতি হি বৃত্তিঃ। 'অত' ইতি পঞ্চমী। 'যা' ইতি লুপ্ত-ষষ্ঠীকং পদম্। 'রুদাদিভ্যঃ সার্বধাতুকে' ইত্যতঃ সার্বধাতুক ইত্যনুবর্ত্য অবয়বষষ্ঠ্যা বিপরিণম্যতে। ইয ইত্যত্র অকার উচ্চারণার্থঃ। 'ভব যা ত্' ইত্যত্র যা-ভাবস্থ ইযাদেশে 'ভব ইয্ ত্' ইতি স্থিতে 'আদ্গুণঃ' ইতি গুণে সতি, 'লোপো ব্যোর্বলি' ইতি যকারলোপে চ ভবেদিতি লভ্যতে। যলোপাৎ প্রাগ্ হল্ঙ্যাদিলোপঃ সংযোগান্তলোপশ্চ ন শঙ্ক্যঃ, অন্তরঙ্গত্বেন যলোপস্য পূর্বং প্রবৃত্তেঃ, সংযোগান্তলোপস্য ত্রৈপাদিকত্বেনাসিদ্ধত্বাচ্চেতি ভাবঃ। সূত্রে সার্বধাতুকপদানুবর্তনং ব্যর্থমিতি চেন্ন। সূত্রে সার্বধাতুকপদাভাবে সূত্রস্যাস্য আর্ধধাতুকে অপি প্রবৃত্তিঃ। যদীহ-সার্বধাতুকানুবৃত্তি র্ন ক্রিয়েত, তর্হি চিকীর্ষ্যাদিতি পদং ন সিদ্ধ্যেদিতি।

**গাতিস্থাঘুপাভূভ্যঃ সিচঃ পরস্মৈপদেষু** ( ২।৪।৭৭ )—গাতি স্থা ঘু পা ভূ এষাং দ্বন্দ্বাৎ পঞ্চমীবহুবচনম্। পরস্যেতি শেষঃ। সিচ ইতি ষষ্ঠ্যন্তম্। গাতি ইতি শ্তিপা নির্দেশাৎ গাধাতো গ্রহণম্। 'ঘু' ইত্যনেন ঘুসংজ্ঞকয়োঃ দাধাতোঃ ধাধাতোশ্চ গ্রহণম্। অত্র সূত্রে ব্যবহিতোঽপি লুগনুবর্ততে ন তু শ্লুঃ। সূত্রস্যায়মর্থঃ—গাতি স্থা ঘু পা ভূ ইত্যেতেভ্যঃ পরস্য সিচঃ লুগ্ ভবতি পরস্মৈপদেষু পরতঃ ইতি, 'গা' ইতি গত্যর্থকস্য ইণ্ ধাতোঃ স্থানে আদিষ্টঃ গাধাতুঃ গৃহ্যতে, ন তু 'গৈ' ইত্যস্য স্থানে আদিষ্টস্য গাধাতোঃ। এবং 'পা' ইত্যনেন পানার্থকস্য গ্রহণম্, ন তু পালনার্থকস্য। তদুক্তম্—গাপৌ ইহ

ইণাদেশপিবতী গৃহ্যেতে। গায়তেঃ পাতেশ্চ ন ভবতীতি শেষঃ। অতএব অগাসীন্নটঃ, অপাসীন্মৃপঃ ইত্যাদয়ঃ প্রয়োগাঃ। অত্র অস্য সূত্রস্য ন ক্ষেত্রম্। সূত্রস্যাস্যোদাহরণাণি তু—অগাৎ, অধাৎ, অপাৎ, অভূৎ ইত্যাদীনি।

**ভূসুবোস্তিঙি** ( ৭।৩।৮৮ )—'মিদের্গুণঃ' ইত্যতো গুণ ইতি অনুবর্ততে, 'নাভ্যস্তস্যাচি পিতি সার্বধাতুকে' ইত্যতো নেতি সার্বধাতুকে ইতি চানুবর্ততে। তদাহ--ভূ সূ এতয়োঃ সার্বধাতুকে তিঙি পরে গুণো ন স্যাৎ, ভূ ধাতোঃ সূধাতোশ্চ সার্বধাতুকে তিঙ্প্রত্যয়ে পরে গুণো ন ভবতীতি সূত্রার্থঃ। অস্যোদাহরণম্—অভূৎ। ভূধাতোঃ লুঙি তিপি মধ্যে চ্লেঃ সিচি 'গাতি স্থা'—ইত্যাদিনা সিচো লুকি 'সার্বধাতুকার্ধধাতুকয়োঃ' ইতি গুণো ভবতি, স চ অনেন সূত্রেণ নিষিধ্যতে, ভবতীত্যাদৌ তু শপ্প্রত্যয়নিমিত্তকো গুণঃ ন তু তিঙ্নিমিত্তকঃ। তেন ইদং সূত্রং তত্র ন প্রবর্ততে। ভূয়াদিত্যাদৌ তিঙঃ আর্ধধাতুকসংজ্ঞায়াম্ অস্য সূত্রস্য প্রবৃত্তি র্নাস্তি। তদা ক্ঙিতি চ ইত্যনেন গুণো নিষিধ্যতে।

✓**অস্তিসিচোঽপৃক্তে** ( ৭।৩।৯৬ )— সূত্রমিদং দ্বিধা ব্যাখ্যানসহম্। প্রাচীনাশ্চ অত্র – অস্তি চ সিচ্চেতি সমাহারদ্বন্দ্বে অস্তিসিচ্, তস্মাদিতি বিগ্রহঃ। অত্র পূর্বানিপাতপ্রকরণস্যানিত্যত্বাৎ অল্পাচ্তরমিতি সিচ্শব্দস্য পূর্বপ্রয়োগো ন। অস্তিসিচ ইতি পঞ্চম্যন্তং পদম্। 'ব্রুব ঈট্' ইত্যতঃ ঈডিত্যনুবর্ততে। 'উতো বৃদ্ধির্লুকি হলি' ইত্যতো হলীত্যনুবর্ততে। তচ্চ ষষ্ঠ্যন্তেন বিপরিণম্যতে। 'তস্মাদিত্যুত্তরস্য' ইতি পরিভাষয়া 'অস্তিসিচঃ' ইতি পঞ্চমী অপৃক্তস্যেতি ষষ্ঠী প্রকল্পয়তি। ততশ্চ অস্তেঃ সিচশ্চ পরস্যাপৃক্তস্য হল ঈডাগমঃ স্যাদিত্যর্থো ব্যাখ্যাতঃ। পরন্তু নৈতদ্ব্যাখ্যানং সম্যক্। যতোঽস্মিন্ মতে কৃতভূভাবাদ্ অস্ধাতোঃ সিচো লুক্যপি ভূধাতোশ্চ স্থানিবদ্ভাবেন অস্ধাতুত্বং

সিচঃ পরত্বঞ্চাশ্রিত্য ততঃ পরস্যাপৃক্তহলঃ অভূদিত্যাদৌ ঈট্ প্রসজ্যেত। তথা— অগাৎ, অস্থাৎ ইত্যাদাবাপি 'গাতিস্থা'—ইত্যনেন সিচো লুক্যপি স্থানিবত্ত্বেন সিচঃ পরত্বাদীডাগমঃ দুর্বারঃ স্যাৎ। তস্মাদ্ব্যাখ্যান্তরমাশ্রিয়তে দীক্ষিতপাদৈঃ। তথাহি সিচ্চ অস্ চেতি সমাহারদ্বন্দ্বঃ। সিচ্ছব্দস্য সৌত্রং ভত্বমাশ্রিত্য পদত্বাভাবাৎ চোঃ কুরিতি কুত্বং ন। ন চ সিচস্‌শব্দে অসিত্যনেনৈবাস্তের্লাভাদস্তিগ্রহণং ব্যর্থমিতি বাচ্যম্, লুপ্তসুব্‌বিভক্তিকস্যাস্তীতি তিঙন্তপ্রতিরূপকাব্যয়স্য গ্রহণেন তস্যৈব কর্মধারয়ে সতি সার্থক্যাৎ। ততঃ পরস্যাঃ পঞ্চম্যাঃ সুপাং সুলুগিত্যাদিনা সৌত্রো লুক্। 'উতো বৃদ্ধির্লুকি হলি' ইত্যতঃ অনুবৃত্তস্য হলীত্যস্য ষষ্ঠ্যা বিপরিণামঃ। তস্মাদ্ বিদ্যমানাৎ সিচোঽস্তেশ্চ পরস্যাপৃক্তস্য হল ঈডাগমঃ স্যাদিত্যর্থো ভবতীতি সমালোচনকুশলা ব্যাচক্ষতে। তেন অভূদিত্যত্র সিচো 'গাতিস্থা'—ইত্যাদিনা লুপ্তত্বাদ্ বিদ্যমানত্বাভাবাৎ ততঃ পরস্যাপৃক্তহল ঈট্ ন। কৃতভূভাবস্য অস্তেশ্চ অস্তের্বিদ্যমানত্বাভাবাত্ততঃ পরস্যাপৃক্তস্য হল ঈট্ ন ভবতীতি বোধ্যম্। অস্যোদাহরণাণি চ আসীৎ অসৈপ্‌সীৎ ইত্যাদীনি বোধ্যম্। অপৃক্তে কিম্? এধিষ্ঠ ইতি। এধ্ + লুঙ্ + ত —অত্র তকারস্য হল্‌ত্বে অপি সিচঃ পরত্বেঽপি চ অপৃক্তত্বাভাবাদ্ ঈডাগমো ন।

***লিঙ্‌নিমিত্তে লৃঙ্ ক্রিয়াতিপত্তৌ*** (৩।৩।১৩৯)—

'হেতুহেতুমতোর্লিঙ্' ইত্যতো হেতুহেতুমদিত্যনুবর্ততে। হেতুরস্ত্যস্য ইতি হেতুমৎ। 'ভবিষ্যতি মর্যাদাবচনে' ইত্যতো ভবিষ্যতীত্যনুবর্ততে, ক্রিয়াতিপত্তৌ ইত্যত্র অতিপত্তিরিত্যস্য অনিষ্পত্তিরিত্যর্থঃ। 'হেতুহেতুমতোর্লিঙ' 'ইচ্ছার্থেষু লিঙ্‌লোটৌ' ইত্যাদি লিঙো নিমিত্তম্। ততশ্চ হেতুহেতুমদ্‌ভাবাদিলিঙ্‌নিমিত্তে ভবিষ্যতি কালে লৃঙ্‌প্রত্যয়ো ভবতি ক্রিয়ায়া অনিষ্পত্তৌ গম্যমানায়াম্ ইত্যর্থঃ পর্যবস্যতি। তদ্যথা সুবৃষ্টিশ্চেদভবিষ্যত্তদা সুভিক্ষমভবিষ্যৎ। অত্র সুবৃষ্টিভবনং সুভিক্ষং প্রতি কারণমিতি কার্যকারণভাবসম্বন্ধঃ। যদ্বা, সুবৃষ্টিভবনং সুভিক্ষস্য

ইত্যাদৌ তু পরগামিনি ক্রিয়াফলে নানেনাত্মনেপদম্। আম্-প্রকৃতেঃ 'ইদি পরমৈশ্বর্যে' ইতি ধাতোরাত্মনেপদাভাবাদ্ তস্য পরস্মৈপদিত্বাৎ। এতদর্থমেব আম্প্রত্যয়বদিত্যুপাত্তম্। ইত্থঞ্চ— এধাঞ্চক্রে ইত্যুদাহরণম্। ইন্দ্রাংচকার ইতি প্রত্যুদাহরণং বোধ্যম্।

**কুহোশ্চুঃ** (৭।৪।৬২) কুরিতি কবর্গঃ। চুরিতি চবর্গঃ। হ্ ইতি হকারঃ। কু চ হ্ চ ইত্যনয়োঃ দ্বন্দ্বাৎ ষষ্ঠীদ্বিবচনম্। 'অত্র লোপোঽভ্যাসস্য' ইত্যতঃ অভ্যাসস্যেত্যনুবর্ততে। তদুক্তম্—অভ্যাস-কবর্গহকারয়োশ্চবর্গাদেশঃ স্যাৎ। অত্র স্থানিনাং কবর্গীয়াণাং হকারস্য চ ষট্ত্বাৎ চবর্গীয়াণাং পঞ্চত্বান্ন যথাসংখ্যম্। নাপি স্থানত আন্তর্যম্. কণ্ঠতালুস্থানভেদাৎ। আভ্যন্তরপ্রযত্নসাম্যং তু কবর্গ-চবর্গয়োরবিশিষ্টম্। হকারচবর্গয়োস্তু নাস্ত্যেব তৎ।অতো বাহ্যপ্রযত্নত এবান্তর্যমিহ ব্যবস্থাপকমাশ্রয়ণীয়ম্। তত্র প্রথমস্য কবর্গীয়স্য প্রথম এব চবর্গীয়ো ভবতি, অঘোষশ্বাসবিবারাল্পপ্রাণপ্রযত্নসাম্যাৎ। ন তু দ্বিতীয়ঃ, মহাপ্রাণত্বাৎ। কিঞ্চ যদ্যপি উভয়োঃ ( কবর্গহকারস্য চবর্গস্য চ ) মধ্যে প্রযত্নভেদোঽপ্যস্তি তথাপি সূত্রারম্ভসামর্থ্যাৎ আদেশো বোধ্য ইতি। 'এধাম্ কর্ কৃ এ' ইতি স্থিতে 'হলাদিঃ শেষঃ' ইত্যনেন অভ্যাসস্যান্ত্যহলো লোপে অনেন সূত্রেণ কস্য চুত্বে 'এধাম্ চ কৃ এ' ইতি জাতে যণাদেশে 'অনুস্বারস্য যয়ি পরসবর্ণে'ইতি পরসবর্ণে চ এধাঞ্চক্রে ইতি।

**একাচ উপদেশেঽনুদাত্তাৎ** (৭।২।১০)—টিৎসম্বন্ধিনস্থ থাসঃ স্থানে সে ভবতি। এধাংচকৃসে। লিট্ চ ইত্যার্ধধাতুকসংজ্ঞা। আর্ধধাতুকস্যেড্বলাদেরিতি য ইডাগমঃ প্রসজ্যেত তং বাধিত্বাহ— একাচ উপদেশেঽনুদাত্তাৎ। উপদেশে যো ধাতুঃ একাচ্ অনুদাত্তশ্চ ততঃ পরস্য বলাদেরার্ধধাতুকস্য ইট্ ন ভবতি। অত্র উপদেশপদম্ একাচ্-পদেন অনুদাত্তেন চ সহ অন্বেতি কাকাক্ষিগোলকন্যায়েন দেহলীদীপ-ন্যায়েন বা। অতএব উপদেশপদস্য মধ্যে পাঠঃ। তেন একাচ্ত্বস্য

অনুদাত্তত্বস্য ঔপদেশিকেন ভাব্যম। উপদেশে ইতি পদম্ মধ্যবর্তিত্বাৎ মধ্যমণিন্যায়েন পূর্বোত্তরাভ্যাং সংবধ্যতে। যদি 'উপদেশে' ইতি 'একাচঃ' ইত্যত্র অম্বিতো ন অভবিষ্যৎ তর্হি কর্তুমিত্যত্র ইণ্ নিষেধো ন অভবিষ্যৎ। যদি চ উপদেশে ইতি পদম্ অনুদাত্তাদিত্যত্র ন অম্বেতি, তর্হি এধাঞ্চক্রুষে ইত্যাদৌ ইণ্ নিষেধো ন স্যাৎ। অনেন সূত্রেণ সন্-প্রত্যয়ে একাচঃ ধাতবঃ পিপক্ষতিবিভিৎসতীত্যাদয়ঃ ইটং ন লভন্তে। কিন্তু যঙ্ লুকি এতে এব ধাতবঃ ইটং লভন্তে এব, তত্র ইড্ বিধীয়ত এব। কথমিতি চেৎ? সূত্রে একাজ্ গ্রহণসামর্থ্যাদিতি। স্মরন্তীত্যা-দয়ঃ অস্য প্রমাণম্।

উপদেশে ধাতুপাঠাবস্থায়ামিত্যর্থঃ। প্রয়োগকালে উদাত্তঃ উপদেশে অনুদাত্তঃ। প্রয়োগকালে অনেকাচি ভূতে অপি ন হানিঃ। পরমুপদেশকালে একাচ্ ভবিষ্যত্যেব। দ্বয় এব ধাতবঃ-স্বরান্তাঃ ব্যঞ্জনান্তাশ্চ। তত্র সর্বে স্বরান্তা একাচোঽনুদাত্তা অদন্তাদীন্ বর্জয়িত্বা। দাতা। নেতা। চেতা। স্তোতা। অদন্তাদয় উদাত্তাঃ—অবশিষ্ট।

***অসংযোগাল্লিট্ কিৎ*** ( ১।২।৫ )—অসংযোগাৎ+লিট্+কিৎ ইতি ছেদঃ। 'সার্বধাতুকমপিৎ' ইত্যতঃ অপিদিতি অনুবর্ততে। তদাহ —অসংযোগাৎ পরোঽপিৎ লিট্ কিৎ স্যাৎ। হলোঽনন্তরাঃ সংযোগঃ। অসংযোগাদিত্যস্য সংযোগবহির্ভূতাদ্ বর্ণাদিত্যর্থঃ। তস্মাৎ পরঃ যঃ অপিৎ লিট্ লিডাদেশঃ স কিৎ অগুণী স্যাদিতি। ততঃ 'সার্বধাতু-কার্ধধাতুকয়োঃ' ইতি গুণে বিহিতেঽপি অত্র লিটঃ কিত্ত্বাৎ 'ক্ঙিতি চ' ইতি নিষেধাৎ ন গুণঃ। এধাম্ কৃ এ ইতি স্থিতে 'লিটি ধাতো-রনভ্যাসস্য' ইতি দ্বিত্বাৎ পরত্বাদ্ 'ইকো যণচি' ইতি ঋকারস্য যণাদেশে রেফে প্রাপ্তে বিশেষমাহ—কৃতে তু যণি একাচ্ত্বাভাবাদ্ 'লিটি ধাতো —' ইতি দ্বিত্বং ন স্যাদিতি ভাবঃ। অসংযোগাদিতি কিম্, মমন্থে। অত্র নলোপো ন।

**বদব্রজহলন্তস্যাচঃ** ( ৭।২।৩ )—বদশ্চ ব্রজশ্চ হলন্তাশ্চ ইত্যেতেষাং সমাহারদ্বন্দ্বঃ। ষষ্ঠ্যেকবচনম্। 'অঙ্গস্য' ইত্যধিকৃতম্। 'সিচি বৃদ্ধিঃ পরস্মৈপদেষু' ইতি সম্পূর্ণং সূত্রমনুবর্ততে। তদাহ—বদের্ব্রজের্হলন্তস্য চ অঙ্গস্য অচঃ স্থানে বৃদ্ধিঃ স্যাৎ সিচি পরস্মৈপদেষু ইতি। হলন্তত্বাদেব সিদ্ধে বদব্রজগ্রহণং তু অবাদীদম্রাজীদিত্যত্র 'অতো হলাদেঃ—' ইতি বিকল্পং বাধিত্বা নিত্যং বৃদ্ধিঃ। হলন্তস্যোদাহরণম্—অপাক্ষীৎ, অধাক্ষীৎ। তদন্তবিধিনা এব সিদ্ধে অন্তগ্রহণং স্পষ্টপ্রতিপত্ত্যর্থম্। অচ ইতি ইক্‌পরিভাষায়া অনুপস্থানার্থম্। অন্যথা অভৈৎসীদিত্যত্র স্যান্ন ত্বপাক্ষীদিত্যাদৌ।

**তস্মান্নুড্‌দ্বিহলঃ** ( ৭।৪।৭১ )—ধাতোরিত্যধিকৃতং বর্ততে। তস্মাদিতি দ্বিহলঃ ইতি চ পঞ্চম্যন্তং পদদ্বয়ং তস্যৈব বিশেষণম্। তচ্ছব্দেন 'অত আদেঃ' ইতি কৃতদীর্ঘঃ পরামৃশ্যতে। অর্থাৎ দীর্ঘীভূতঃ অকারঃ পরামৃশ্যতে। সূত্রস্যায়মর্থঃ—দীর্ঘীভূতাদকারাৎ পরস্য দ্বিহলো ধাতোঃ নুডাগমো ভবতি লিটি পরে ইতি। দ্বিহল্ ইতি দ্বৌ-হলৌ যস্য তস্যেতি বিগ্রহঃ। নুটঃ টকার ইৎ। উকার উচ্চারণার্থঃ। 'আদ্যন্তৌ টকিতৌ' ইতি সূত্রেণ টিত্ত্বাদাদ্যবয়বঃ। অত্রোদাহরণম্—আনর্দ্ধ ইতি। অর্দ্ধ+লিট্ অ ইতি স্থিতে দ্বিত্বেন অর্দ্ধ্ অর্দ্ধ্ অ ইতি জাতে অনেন 'আ নুট্ অর্দ্ধ্ অ' ইতি কৃতে 'আন্ অর্দ্ধ্ অ' ইতি। ততঃ আনর্দ্ধ ইতি।

**ঝলো ঝলি** ( ৮।২।২৬ )—[ঝল্=ঝভঞ্। ঘঢধষ্। জবগডদশ্। খফছঠথচটতব্। কপয্। শসষর্। হল্॥] ঝল ইতি পঞ্চমী। 'সংযোগান্তস্য লোপঃ' ইত্যতো লোপ ইত্যনুবর্ততে। 'রাৎ সস্য' ইত্যতঃ সস্যেতি চানুবর্ততে। তদাহ—ঝলঃ পরস্য সস্য লোপঃ স্যাৎ ঝলি। পদস্যেত্যধিকারাৎ প্রত্যয়াসত্তেঃ ঝলো ঝলি সস্যেতি নির্দিষ্টানাং ত্রয়াণামেকপদসম্বন্ধিত্বে লোপোঽয়ম্। সূত্র-

স্যোদাহরণম্—অসৈদ্ধামিতি। অসৈধ্ স্ তামিতি স্থিতে সলোপে ধত্বে, জশ্ত্বে চ রূপম্। ইডভাবপক্ষে রূপম্। ইট্পক্ষে তু অসেধীদিতি। 'ইট ইটি' ইতি সলোপঃ। 'নেটি' ইতি বৃদ্ধি-প্রতিষেধঃ। 'পুগন্তলঘূপধস্য' ইতি গুণঃ।

***অজের্ব্যঘঞপোঃ*** (২।৪।৫৬)—'আর্ধধাতুকে' ইত্যধিকৃতম্। বী ইতি দীর্ঘান্তং লুপ্তপ্রথমাকম্। তদাহ—অজে র্বী ইত্যয়মাদেশঃ স্যাদার্ধধাতুকবিষয়ে ঘঞমপং চ বর্জয়িত্বা ইতি। ঘঞি অপি চ পরতোঽবর্তমানে সতি অজ্ধাতোঃ স্থানে 'বী' ইত্যাদেশঃ স্যাদার্ধ-ধাতুকবিষয়ে। 'আর্ধধাতুকাবিষয়ে' ইতি দীক্ষিতপ্রয়োগেন এতদ্ বিজ্ঞায়তে যদ্ 'আর্ধধাতুক' ইতি যদধিকৃতং বিদ্যতে তদ্ বিষয়সপ্তমী এব ন তু পরসপ্তমী। পরসপ্তম্যাশ্রয়েণ তু বেবীয়ত ইতি ন স্যাৎ, বীভাবাৎ প্রাগ্ অজাদিত্বাদ্ যঙসংভবাৎ। বিষয়সপ্তম্যাশ্রয়েণ তু যঙি বিবক্ষিতে বীভাবে সতি হলাদিত্বাদ্ যঙ্ নির্বাধঃ। 'অঘঞপোঃ' ইতি প্রয়োগঃ কিমর্থম্। ঘঞি সমাজঃ। 'সমুদোরজঃ পশুষু' ইত্যপি সমজঃ। অত্র অঘঞোরিতি ন বক্তব্যম্, 'বা লিটি' ইত্যতো বেতি অনুবর্ততে। ব্যবস্থিতবিভাষেয়ম্। ঘঞি অপি চ ন ভবতি। ল্যুটি বলাদাবার্ধধাতুকে চ বিকল্পঃ॥

***সিচি বৃদ্ধিঃ পরস্মৈপদেষু*** (৭।২।১)—'ইকো গুণবৃদ্ধী' ইতি পরিভাষয়া ইহ বৃদ্ধিপদেন ইগন্তস্যোপস্থিতিরাক্ষিপ্যতে। 'অঙ্গস্যে'ত্য ধিকৃতস্য বিশেষণমিগন্তস্যেতি। তদন্তবিধিরিতি ভাবঃ। তদুক্তং দীক্ষিতপাদেন—ইগন্তাঙ্গস্য বৃদ্ধিঃ স্যাৎ পরস্মৈপদে পরে সিচি। অর্থাৎ পরস্মৈপদে যদা সিজনুবর্ততে তদা ইগন্তস্য (ইক=ই, উ, ঋ, ৯) অঙ্গস্য বৃদ্ধিঃ স্যাৎ। যথা—অবৈষীদিতি। ধাতোঃ লুঙস্তিপি,ইকার-লোপে, সিচি বীভাবে, 'একাচ—' ইত্যনেন বীভাবস্যৈকাচত্বাদিড়—ভাবে, বৃদ্ধৌ অডাগমে ষত্বে চ রূপমিদম্। পরস্মৈপদেষ্বিতি কিম্। অধবিষ্ট। আত্মনেপদত্বাদ্ নাত্র বৃদ্ধিঃ। সিচীতি কিম্। এতি,বিভর্ত্তীতি।

***অকৃৎসার্বধাতুকয়োর্দীর্ঘঃ*** ( ৭।৪।২৫ )—আশীর্লিঙি বিশেষ-নির্দেশনার্থং প্রবৃত্তমিদং সূত্রম্। অত্র 'অঙ্গস্য' ইত্যধিকৃতম্। 'অযঙ্ যি কৃঙিতি' ইত্যতো যীত্যনুবর্ততে। যীতি সপ্তম্যন্তমনুবৃত্তমঙ্গাক্ষিপ্ত-প্রত্যয়বিশেষণম্। তদাদিবিধিঃ। 'অচশ্চ' ইতি পরিভাষোপস্থিতেঃ অঙ্গাধিকারাৎ যেন বিধিস্তদন্তস্য ইত্যস্মাচ্চ বৃত্তৌ দীর্ঘশ্রুতিঃ। অতএ-বোক্তম্—'অজন্তস্যাঙ্গস্য দীর্ঘঃ স্যাদ্ যাদৌ প্রত্যয়ে পরে। ন তু কৃৎসার্বধাতুকয়োঃ' ইতি। 'অকৃদ্যকারে অসার্বধাতুকযকারে চ কৃঙিতি পরতোঽজন্তস্যাঙ্গস্য দীর্ঘো ভবতীতি—কাশিকা। অত্রোদাহরণং যথা—ক্ষীয়াদিতি। ক্ষয়ার্থকক্ষিধাতোরাশীর্লিঙি আর্ধধাতুকত্বাদনেন সূত্রেণ দীর্ঘঃ। কিন্তু কৃদ্যকারে সার্বধাতুক-( বিধিলিঙ্ ) যকারে চ পরে অজন্তাঙ্গস্য দীর্ঘো নেত্যর্থঃ। তস্মাদেব কৃদ্যকার ল্যপি পরে প্রপূর্বককৃধাতোঃ প্রকৃত্য ইতি রূপং ভবতি। অত্র ন দীর্ঘঃ। এবম্ চিনুয়াৎ ইত্যত্র সার্বধাতুকবিধিলিঙ্যকারত্বান্ন দীর্ঘঃ।

***আতো লোপঃ*** ( ৬।৪।৪৮ )—"অনুদাত্তোপদেশবনতিতনোত্যা-দীনামনুনাসিকলোপো ঝলি ক্ঙিতি"—ইত্যত 'উপদেশ'ইত্যনুবর্ততে। 'আর্ধধাতুকে' ইতি অধিকৃতম্। তচ্চ ইহ আবর্ততে। অতএবোক্তম্—আর্ধধাতুকোপদেশকালে যদকারান্তং তস্যাকারস্য লোপঃ স্যাদার্ধ-ধাতুকে পরে ইতি। 'আর্ধধাতুকোপদেশে' ইতি কিম্? অয পয় গতৌ আভ্যাং ক্বিপি আর্ধধাতুকত্বে অপি 'অতো লোপ' ইত্যনেন অলোপো ন। তেন 'বেরপৃক্তলোপাদ্বলি—' ইতি বার্ত্তিকাৎ 'লোপো ব্যোর্বলি' ইতি যলোপে 'হ্রস্বস্য পিতি কৃতি—' ইত্যনেন তুগাগমে, অপৃক্তলোপে অৎ পৎ ইতীষ্যতে। অত্র যলোপে সতি অতো লোপো ন ভবতি,আর্ধধাতুকোপদেশকালে ধাতোর্যকারান্তত্বাৎ। 'আর্ধধাতুকে পরে' ইতি কিম্। কথয়তি। চুরাদৌ অদন্তোঽয়ং ধাতুঃ। অত্র 'অত উপধায়া' ইতি ণিচি উপধাবৃদ্ধৌ 'কাথয়তি' ইতি ন, 'অচঃ পরস্মিন পূর্ববিধৌ' ইত্যনেন অল্লোপস্য স্থানিবত্ত্বাৎ। 'আর্ধ-

ধাতুকে পরে' ইত্যনুক্তৌ তু অল্লোপস্য পরনিমিত্তকত্বাভাবাৎ স্থানিবত্ত্বং ন স্যাৎ, তদভাবে চ কথ্ ইত্যেবং রূপে জাতে উপধাবৃদ্ধিঃ ভবিষ্যতি। তথা চ প্রকৃতে—গোপায় আম্ ইতি স্থিতে অতো লোপে গোপায়ামিতি সিদ্ধ্যতি। যদ্যপি সবর্ণদীর্ঘেণ অপি এতৎ সিদ্ধম্, তথাপি ন্যায্যত্বাদতো লোপ উপন্যস্তঃ।

***সন্বল্লঘুনি চঙ্পরেঽনগ্লোপে*** ( ৭।৪।৯৩ )—লঘুনি ধাত্বক্ষরে পরতো যোঽভ্যাসস্তস্য চঙ্পরে ণৌ পরতঃ সনীব কার্যং ভবতি অনগ্লোপে ইত্যর্থঃ। অত্র 'অনগ্লোপে' ইতি চ্ছেদঃ। 'চঙ্পরে' ইত্যত্র চঙ্পরো যস্মাদিতি বহুব্রীহিঃ। কর্মধারয়মাশ্রিত্য চঙি পরে ইতি নার্থঃ, পরগ্রহণবৈয়র্থ্যাৎ। ননু অন্যপদার্থে বহুব্রীহির্ভবতি প্রকৃতে চ কোঽন্যপদার্থ ইতি চেৎ? ণেরেবান্যপদার্থত্বাৎ, অতএব অণ্যন্তেভ্যঃ শ্রিদ্রুশ্রুভ্যশ্চঙি দ্বিত্বে অশিশ্রিয়ৎ, অদুদ্রুবৎ, অসুস্রুবৎ ইত্যত্র সন্বত্ত্বং 'দীর্ঘো লঘো' রিত্যনেনাভ্যাসদীর্ঘশ্চ ন ভবতি ণেরভাবাৎ। বহুব্রীহিগম্যো ণিঃ 'অঙ্গস্য' ইত্যনুবৃত্তং চ। তত্র ণাবিত্যাবৃত্তৌ একং লঘুনীত্যত্রান্বেতি। তথা চ চঙ্ পরে ণৌ যল্লঘু তস্মিন্ পরত ইতি লভ্যতে। দ্বিতীয়ং তু অনগ্লোপে ইত্যত্রান্বেতি। তথা চ ণৌ পরতো যোঽনগ্লোপ স্তস্যাভাবে সতীতি লভ্যতে। অঙ্গস্য ইত্যাবৃত্তৌ একং চঙ্পরে ইত্যত্রান্বেতি। নিমিত্তনিমিত্তিভাবে ষষ্ঠী। তথা চ অঙ্গসংজ্ঞানিমিত্তভূতে চঙ্পরকে বর্ণে পরে ইতি লভ্যতে। চঙ্পরকশ্চ বর্ণঃ অর্থাদ্ ণেরিকার এব। ন তু শ্রিদ্রুস্রুবামন্ত্যবর্ণঃ, তস্য অপ্রত্যয়ত্বেন অঙ্গসংজ্ঞাপ্রাপকত্বাভাবাৎ। এতদর্থমেব অঙ্গস্যেত্যস্য নিমিত্তষষ্ঠ্যন্ততামাশ্রিত্য চঙ্পর ইত্যনেনান্বয়োঽভ্যুপগতঃ। দ্বিতীয়স্য চাঙ্গস্য অনুবৃত্তস্য 'অভ্যাসস্য' ইত্যত্রান্বয়ঃ। সন্বদিতি সপ্তম্যন্তাদ্ বতিঃ। তথা চ—অঙ্গসংজ্ঞানিমিত্তং যচ্চঙপরং ণিরিতি যাবৎ তৎপরং যল্লঘু তৎপরো যোঽঙ্গস্যাভ্যাসস্তস্য সনীব কার্যং স্যাণ্ণাবগ্লোপেঽসতি ইত্যর্থো ভবতি। অথবা অঙ্গস্যেতি নাবর্ততে, চঙ্পরে

ই.ত্যেতদঙ্গ.স্যেত্যত্রান্বেতি ন তু লঘুনি। অঙ্গস্য চ প্রত্যয়নিমিত্তত্বাদেব ণেরন্যপদার্থস্য লাভঃ। লঘুনীতি তু অভ্যাস.স্যেত্যত্রৈবান্বেতি। তদাহ —চঙ্‌পরে ণৌ যদঙ্গং তস্য যোঽভ্যাসো লঘুপরস্তস্য সনীব কার্যং স্যাণ্‌ণাবগ্‌লোপে অসতি ইত্যর্থঃ। অত্র প্রথমপক্ষ এব ভাষ্যসংমতঃ, অজজাগরদিত্যত্র চঙ্‌পরে ণৌ যল্লঘু তদভ্যাসব্যবহিতমিতি ন সন্বত্ত্বমিতি ভাষ্যোক্তেঃ।

***ণৌ চঙ্যুপধায়া হ্রস্বঃ*** (৭।৪।১)—চঙ্‌পরে ণৌ যদঙ্গং তস্যোপধায়া হ্রস্বঃ স্যাদিত্যর্থঃ। 'চঙি' ইত্যেতৎ 'ণৌ' ইত্যেতস্য বিশেষণমিত্যাহ —চঙ্‌পরে ণৌ ইতি। চঙ্‌পরো যস্মাদিতি বিগ্রহঃ। তাদৃশে ণৌ ণিপ্রত্যয়ে পরত ইত্যর্থঃ। অঙ্গমিতি অঙ্গাধিকারাদিতি বোদ্ধব্যম্। অতএব 'অ কাম্ অ ত' ইত্যনেন 'অ কম্ অ ত' ইতি ভবতি। 'উপধায়া' ইতি কিম্? অচকাঙ্ক্ষৎ। কাঙ্ক্ষ ইত্যদন্তোঽয়ং ধাতুস্তেন আকারস্য উপধাত্বং ন। 'চঙি' কিম্? কারয়তি। অত্র চঙভাবাদ্ হ্রস্বাদেশো ন ভবতি। 'ণৌ' কিম্? 'চঙ্যুপধায়া' হ্রস্ব ইত্যুচ্যমানে অদীদপদিত্যত্র দাধাতোঃ ণ্যন্তাদ্ লুঙি চঙি 'দা ই অৎ' ইতি স্থিতে আকারস্য হ্রস্বে সতি পুগ্‌ ন স্যাৎ। 'ণৌ' ইত্যুক্তৌ তু আকারস্য ণৌ পরত উপধাত্বা-ভাবান্ন হ্রস্বঃ। 'দ্বির্বচনেঽচি' ইতি নিষেধস্তু ন শঙ্ক্যঃ দ্বিত্বনিমিত্তচঙ উপধয়া ব্যবহিতত্বাৎ।

***ণিশ্রিদ্রুস্রুভ্যঃ কর্তরি চঙ্*** (৩।১।৪৮)—ণিশ্চ শ্রিশ্চ দ্রুশ্চ স্রুশ্চেতি দ্বন্দ্বঃ। তস্মাৎ পঞ্চম্যা বহুবচনম্। প্রত্যয়গ্রহণপরিভাষয়া ণীতি তদন্তস্য গ্রহণম্। 'চ্লেঃ সিচ্‌' ইত্যতঃ চ্লেরিতি, 'চ্লি লুঙি' ইত্যতো লুঙীতি চানুবর্ততে। তদুক্তম্—ণ্যন্তাৎ শ্র্যাদিভ্যশ্চ চ্লেশ্চঙ্ স্যাৎ কর্ত্রর্থে লুঙি পরে ইতি। অত্র শ্র্যাদিভ্যশ্চেতি দ্রু স্রু ইত্যেতয়োঃ গ্রহণম্। সূত্রে কর্তরি ইত্যস্য 'কর্ত্রর্থে লুঙি পরে' ইত্যর্থঃ। চঙাবিতৌ। চঙঃ অকারমাত্রং শিষ্যতে। অত্রোদাহরণম্—অচীকমত ইতি। অস্য পদস্য

সিদ্ধেঃ প্রাক্ 'অকাম্ ণি চঙ্ ( চ্লি ) ত' ইত্যবস্থায়াং স্থিতায়াম্ অনেন সূত্রেণ 'অকাম্ ই অ ত' ইত্যবস্থা জাতা। লুঙি তপরে চঙঃ অকারঃ অবশিষ্যতে। কাশিকায়াং সূত্রস্যাস্য ঈদৃশী ব্যাখ্যা—"সিজপবাদশ্চঙ্ বিধীয়তে। ণ্যন্তেভ্যো ধাতুভ্যঃ শ্রি দ্রু স্রু ইত্যেতেভ্যশ্চ পরস্য চ্লেশ্চঙাদেশো ভবতি কর্তৃবাচিনি লুঙি পরতঃ। ঙকারো গুণবৃদ্ধি—প্রতিষেধার্থঃ, চকারশ্চঙীতি বিশেষণার্থঃ।" ইতি।

***সন্যতঃ*** ( ৭।৪।৭৯ )—সনি অত ইতি ছেদঃ। 'অত্র লোপোঽভ্যাসস্য' ইত্যতঃ অভ্যাসস্য ইতি অনুবর্ততে। 'ভৃঞামিৎ' ইত্যত ইৎ ইতি চানুবর্ততে। তদাহ—অভ্যাসস্য অত ইকারঃ স্যাৎ সনি। সনি প্রত্যয়ে পরে অকারান্তস্য অভ্যাসস্য ইকারাদেশঃ ভবতি। সন্প্রত্যয়স্য উদাহরণম্—পঠিতুমিচ্ছতি পিপঠিষতি। ক্বচিৎ সন্প্রত্যয়াভাবে অপি সন্বদ্ভাবেন অভ্যাসস্য ইকারান্তাদেশঃ ক্রিয়তে। যথা অচীকমত, অপীপঠত।

***যে বিভাষা*** ( ৬।৩।৪৩ )—'জনসনখনাং সন্ঝলোঃ' ইত্যতো জনসনখনামিত্যনুবর্ততে। 'অনুদাত্তোপদেশ'—ইত্যতঃ 'ক্ঙিতি' ইতি চ অনুবর্ততে। 'যে' ইত্যনেন তদাদিবিধিমাশ্রিত্য বিশেষণম্। 'যে' ইত্যত্র অকার উচ্চারণার্থঃ। 'বিড্বনোরনুনাসিকস্যাৎ ইত্যত আদিত্যনুবর্ততে। তদাহ—'জনসনখনামাত্বং বা স্যাৎ যাদৌ ক্ঙিতি। ইতি। যকারাদৌ ক্ঙিতি প্রত্যয়ে পরতো জনসনখনামাকার আদেশো ভবতি বিভাষা।'—ইত্যর্থো জাতঃ। অত্রোদাহরণম্—সায়াৎ সন্যাৎ। আদৌ কিদাশিষীতি আশীর্লিঙি যাসুটঃ কিত্বাৎ প্রাপ্তিঃ। নকারস্য আত্বে সবর্ণদীর্ঘঃ।

***মিদের্গুণঃ*** ( ৭।৩।৮২ )—মিদেরঙ্গস্যেকো গুণো ভবতি শিতি প্রত্যয়ে পরতঃ। মিদেরিত্যবয়বষষ্ঠী। গুণশ্রুত্যা 'ইকো গুণবৃদ্ধী'

ইতি পরিভাষয়া ইক ইত্যুপতিষ্ঠতে। 'ইৎসংজ্ঞকশকারাদৌ' ইতি দীক্ষিতপ্রয়োগঃ 'ষ্ঠিবুক্লমুচমাং শিতি' ইত্যতঃ 'শিতি' ইত্যস্যানুবৃত্তেরিত্যর্থঃ। শ্ চাসৌ ইচ্চেতি কর্মধারয়ঃ। ইৎসংজ্ঞকশকারাদৌ প্রত্যয়ে পরে ইতি লভ্যতে। দৈবাদিকমিদেঃ শ্যনি মেদ্যতে ইত্যুদাহরণম্। শ্ ইদ্ যস্যেতি বহুব্রীহিমাশ্রিত্য শিতি প্রত্যয়ে পরে মিদেরিকো গুণ ইত্যেব কুতো ন ব্যাখ্যায়ত ইত্যাশঙ্ক্য মিমিদে ইত্যত্র গুণাভাবার্থমিৎসংজ্ঞকশকারাদাবিতি ব্যাখ্যেয়মিত্যভিপ্রেত্যাহ—এশঃ আদিশিত্ত্বাভাবান্নানেন গুণঃ। আদিঃ শকার ইৎ যস্যেতি বিগ্রহঃ। প্রাক্ শকারেত্ত্বাভাবাদিত্যর্থঃ।

***শ্র্যুকঃ ক্বিতি*** (৭।৪।২৯)—শ্রিশ্চ উক্ চেতি সমাহারদ্বন্দ্বাৎ ষষ্ঠী, উক্ ইতি প্রত্যাহারঃ—উ, ঋ, ৯, ইতি বর্ণত্রয়গ্রাহকঃ। অঙ্গস্যেতি অধিকৃতং পঞ্চম্যা বিপরিণতম্ উকঃ বিশেষণম্। তদন্তবিধিঃ। 'একাচ উপদেশে'—ইত্যতঃ একাচ ইত্যনুবৃত্তম্ ইগন্তে অন্বেতি। 'নেড্ বশি কৃতি' ইত্যতো নেডিতি। ক্বিতীতি ষষ্ঠ্যর্থে সপ্তমী। ক্বিতীত্যনেন গিতোঽপি সংগ্রহঃ। তদাহ—শ্রিঞ একাচ উগন্তাচ্চ পরয়োর্গিৎকিতোরিট্ ন স্যাৎ ইতি। শ্রি ইত্যেতস্যোগন্তানাং চ কিতি প্রত্যয়ে পরত ইডাগমো ন ভবতি। শ্রিতঃ। শ্রিতবান্। শ্রিত্বা। উগন্তানাং চ—যুতঃ। যুতবান্। যুত্বা। কিতীত্যত্র গকারপ্রশ্লেষঃ কিম্। ভূষ্ণুঃ। 'গ্লাজিস্থশ্চ গ্স্নুঃ' ইতি চকারাৎ ভূধাতোঃ গ্স্নুঃ। তস্য গিত্বাদিট্ ন। পুরস্তাৎ প্রতিষেধকাণ্ডারম্ভসামর্থ্যাৎ পরমপি স্বরত্যাদিবিকল্পং বাধিত্বা অনেন নিষেধে প্রাপ্তে ক্রাদিনিয়মাৎ নিত্যমিট্। সস্বরিব-সস্বরিম ইত্যাদিঃ।

***সন্যঙোঃ*** (৬।১।৯)—সন্ চ যঙ্ চেতি দ্বন্দ্বসমাসে রূপমিদম্। অবয়বষষ্ঠী এষা। 'একাচো দ্বে প্রথমস্য' ইতি 'অজাদের্দ্বিতীয়স্য' ইতি চ সূত্রদ্বয়মনুবর্ততে। "ধাতোরনভ্যাসস্যেতি বর্ততে। সন্নন্তস্য

যঙন্তস্য চানভ্যাসস্য ধাতোরবয়বস্য প্রথমস্যৈকাচো দ্বিতীয়স্য বা যথাযোগং দ্বে ভবতঃ। পিপক্ষতি। পিপতিষতি। যঙন্তস্যোদাহরণম্—পাপচ্যতে। অটাট্যতে।"- -ইতি কাশিকা। সপ্তমীমাশ্রিত্য সনি যঙি চ পরে ইতি ব্যাখ্যায়াং প্রতীষিষতি, অটাট্যতে ইত্যাদি ন সিধ্যেৎ, সন্যঙোঃ প্রকৃতিভাগস্যৈব দ্বিত্বপ্রসক্তেঃ। তেন অবয়বষষ্ঠীমবলম্ব্য তদন্তবিধিনা ব্যাখ্যানমেব যুক্তম্। পরসপ্তম্যা ব্যাখ্যানে প্রকৃতিভাগস্যৈব দ্বিত্বপ্রসক্তিঃ।

✓*হেতুমতি চ* (৩।১।২৬)—ণিজন্তপ্রক্রিয়াবিধায়কং সূত্রমিদম্। অত্র সূত্রে 'সত্যাপপাশ'—ইত্যতো ণিজিত্যনুবর্ততে। 'ধাতোরেকাচো হলাদেঃ' ইত্যতো ধাতোরিত্যপি। ততঃ হেতুমতি চ ধাতো র্ণিচ্ স্যাৎ ইতি সূত্রশরীরং কল্প্যতে। তস্য চায়মাশয়ঃ—তৎপ্রয়োজকো হেতুশ্চ ইতি সংজ্ঞয়া প্রাপ্যতে কর্ত্তুঃ প্রয়োজকো হেতুঃ। স আধারতয়া অস্যাস্তীতি হেতুমান্ প্রযোজকনিষ্ঠঃ প্রেষণাদিব্যাপারঃ। তস্মিন্ বাচ্যে ণি চ্ স্যাদিত্যর্থঃ। তদুক্তং দীক্ষিতেন—প্রযোজকব্যাপারে প্রেষণাদৌ বাচ্যে ণিচ্ স্যাদিতি। প্রযোজকশ্চেতনসাধারণ্যেন বিবক্ষিতঃ। স চ্ ক্বচিদ সিদ্ধঃ, ক্বচিৎ ফলরূপঃ, দেবদত্তঃ পাচয়তি গময়তীত্যাদৌ সিদ্ধঃ। ভিক্ষা বাসয়তি। সংগ্রামো বাসয়তীত্যাদৌ তু ফলরূপঃ। প্রেষণাদাবিত্যাদিশব্দেন অধ্যেষণানুমত্যুপদেশানাং গ্রহণম্। তত্র ভৃত্যাদের্নিকৃষ্টস্য প্রবর্তনা প্রেষণম্ আজ্ঞা ইত্যর্থঃ। সমানস্যাধিকস্য চ সখ্যাচার্যাদেঃ প্রবর্তনা অধ্যেষণা। অনুমতিস্তু রাজ্ঞাদেঃ সম্মতিঃ। জ্বরিতস্য কষায়পানে হিতাববোধনেন প্রবর্তনা উপদেশঃ। অত্রোদাহরতি—ভবন্তং প্রেরয়তি ইত্যর্থে ভূধাতো র্ণিচি বৃদ্ধ্যাবাদেশৌ, ভাবীতি ণিজন্তম্। তস্মাদ্ ভবনানুকুলব্যাপারার্থকাল্লটি ভাবয়তীতি রূপম।

✓*বিভেতের্হেতুভয়ে* (৬।১।৫৬ —হেতুঃ প্রযোজকঃ। ইহ সূত্রে 'আদে চ উপদেশে—' ইত্যত এচ ইতি আদিতি চানুবর্ততে। 'বিভাষা

ভীয়তেঃ' ইত্যতো বিভাষেতি। 'বিস্ফুরোঃ—' ইত্যতো ণাবিতি চ। হেতুভয়ং প্রযোজকাদ্ ভয়ম্। তদাহ—বিভেতেরেব আত্বং বা স্যাৎ প্রযোজকাদ্ ভয়ং চেৎ। অত্র কাশিকা—"হেতুরিহ পারিভাষিকঃ স্বতন্ত্রস্য প্রযোজক স্ততো যদ্ভয়ং, স যস্য সাক্ষাৎ হেতুঃ তদ্ভয়ং হেতুভয়ম্। তত্র বর্তমানস্য ঞিভী ভয় ইত্যস্য ধাতো র্ণৌ পরতো বিভাষা আকারাদেশো ভবতি। মুণ্ডো ভাপয়তে, মুণ্ডো ভীষয়তে। ভীস্ম্যোর্হেতুভয় ইত্যাত্মনেপদম্।" ইতি।

**ভীস্ম্যোর্হেতুভয়ে** (১।৩।৬৮)—'অনুদাত্তঙিত—' ইত্যত আত্মনেপদম্, 'ণেরণৌ' ইত্যতোণেরিতি চানুবর্ততে। হেতুঃ প্রযোজকঃ। তদাহ—আভ্যাং ণ্যন্তাভ্যামাত্মনেপদং স্যাৎ ধাতোশ্চেদ্ ভয়স্ময়ৌ ইতি। অকত্র'ভিপ্রায়োঽমারম্ভঃ। বিভেতেঃ স্ময়তেশ্চ ণ্যন্তাদাত্মনেপদং ভবতি হেতুভয়ে। হেতুঃ প্রযোজকঃ লকারবাচ্যস্ততশ্চেদ্ ভয়ং ভবতি। সূত্রে ভয়গ্রহণমুপলক্ষণার্থং বিস্ময়োঽপি তত এব। জটিলো ভীষয়তে, মুণ্ডো বিস্মাপয়তে ইত্যস্যোদাহরণদ্বয়ম্। হেতুভয় ইতি কিম্। কুঞ্চিকয়ৈনং ভায়য়তি, রূপেণ বিস্মায়য়তি অত্র কুঞ্চিকা ভয়স্য করণং ন হেতুঃ। ন অতো আত্মনেপদম্।

**দীর্ঘোঽকিতঃ** (৭।৪।৮৩)—'অত্র লোপোঽভ্যাসস্য' ইত্যতঃ 'অভ্যাসস্য' ইত্যনুবর্ততে। 'গুণো যঙ্লুকোঃ' ইত্যতঃ যঙ্লুকঃ অনুবৃত্তিঃ। অতত্রবোক্তং দীক্ষিতেন—অকিতোঽভ্যাসস্য দীর্ঘঃ স্যাদ্ যঙি যঙ্লুকি চ। অস্যোদাহরণম্—অটাট্যতে। ইতি। অকিতঃ কিম্। যংযম্যতে, রংরম্যতে। ননু দীর্ঘশ্রুত্যোপস্থিতেনাচা 'অত্র লোপো'— ইত্যতোঽনুবৃত্তমভ্যাসস্য ইত্যেতদ্ বিশিষ্যেত। ততশ্চাজন্তাভ্যাসস্য দীর্ঘো ভবতীত্যর্থাৎ পাপচ্যত ইত্যাদাবেব দীর্ঘো ভবেন্ন তু যংযম্যতে ইত্যাদৌ।

✓**রীগৃদুপধস্য চ** (৭।৪।৯০)—অত্র সূত্রে 'অত্র লোপোঽভ্যাসস্য' ইত্যতঃ 'অভ্যাসস্য' ইত্যনুবর্ততে। 'গুণো যঙ্‌লুকোঃ'—ইত্যতঃ যঙ্‌লুকোরিত্যনুবর্ততে। অতত্রব দীক্ষিতেন উক্তম্—ঋদুপধস্য ধাতোরভ্যাসস্য রীগাগমঃ স্যাৎ যঙ্‌যঙ্‌লুকোঃ। ইতি। ঋদুপধস্যাঙ্গস্য যোঽভ্যাস স্তস্য রীগাগমো ভবতি যঙ্‌যঙ্‌লুকোঃ পরতঃ ইত্যর্থঃ। অত্রোদাহরণম্—বরীবৃত্যতে। ( বৃৎ+যঙ্ লট্ তে। ) পুনঃ পুনঃ বর্ততে ইতি বিগ্রহে বৃৎধাতোঃ যঙি দ্বিত্বে অভ্যাসত্বে 'উরৎ' ইত্যত্বে রপরত্বে হলাদিশেষে 'ব বৃৎ য' ইতি জাতে, অনেন সূত্রেণ অভ্যাসস্য রীগাগমে অনুবন্ধলোপে 'বরীবৃত্য' ইতি জাতে লটি আত্মনেপদিত্বাৎ এত্বে 'বরীবৃত্যতে' ইতি। এবং—নরীনৃত্যতে ইতি।

**যঙো বা** ( ৭।৩।৯৪ )—ভূধাতো র্যঙো লুকি দ্বিত্বাদৌ বোভূ ইত্যস্মাল্লটি তিপি শপো লুকি বোভূতি ইতি স্থিতে অস্য সূত্রস্য অবতারণা। অত্র সূত্রে 'উতো বৃদ্ধিঃ'—ইত্যতো হলীতি, 'নাভ্যস্তস্যাচি' —ইত্যতঃ পিতি সার্বধাতুকে ইতি, 'ব্রূব ঈট্' ইত্যত ঈডিতি চানুবর্ততে। অতঃ সূত্রস্যায়মর্থঃ—যঙঃ উত্তরস্য হলাদেঃ পিতঃ সার্বধাতুকস্য ঈডাগমো ভবতি ইতি। টিত্ত্বাত্তিপ আদ্যবয়ব ঈট্। তথা চ 'বোভূ ঈ তি'-ইতি স্থিতে উকারস্য গুণ অবাদেশে বোভবীতীতি রূপম্। হলাদেঃ পিতঃ সার্বধাতুকস্য যঙন্তাদভাব ইতি যঙ্‌লুগন্তস্যোদাহরণম্। যঙো লুক্যপি প্রত্যয়লক্ষণেনাত্র যঙন্তত্বম্। এতেন যঙন্তাদ্ হলাদিপিৎসার্বধাতুকং ন সংভবতীতি যঙ্‌শব্দেন যঙ্‌লুগন্তং লক্ষ্যত ইতি ব্যাখ্যানং পরাস্তম্। উক্তরীত্যা যঙন্তত্বানপায়াৎ। কিংচ যঙন্তাদ্ হলাদিপিন্ন সংভবতীতি যঙ্‌শব্দেন যঙ্‌লুগন্তে লক্ষিতে অপি 'সন্যঙোঃ' ইতি দ্বিত্বস্য যঙন্তে চরিতার্থতয়া যঙ্‌লুগন্তলক্ষণায়াং বীজাভাবাদ্ যঙ্‌লুকি দ্বিত্বাভাবপ্রসঙ্গাদিতি দিক্।

কান্তৌ ইত্যস্য তাতঙি—'গ্রহিজ্যাবয়িব্যধিবষ্টি' ইতি বকারস্য সম্প্রসারণং ভবতি। অত্র 'বষ্টাদি'তি ন ভবতি। আদিপদেন ব্রূতাদিত্যত্র 'ব্রুব ইট্' ইতীটোঽভাবস্য সংগ্রহঃ। এতানি তাতঙি ঙিৎকরণস্য প্রয়োজনানি। তস্মাদ্ কেবলম্ অন্ত্যাদেশত্বরূপপ্রয়োজনবৎ 'ঙিচ্চে'তি সূত্রম্ এতাদৃশবহুবিধপ্রয়োজনবতি তাতঙি শিথিলং প্রবৃত্তং ভবতি। ঙিত্ত্বদর্শনেন প্রবৃত্তমপি অপ্রবৃত্তবৎ ভবতি প্রয়োজনান্তর-ভূয়িষ্টত্বাৎ অস্য ঙিত্ত্বস্য। অতঃ পরেণ সর্বাদেশেন 'অনেকাল্‌শিৎ' ইত্যনেন বাধ্যতে। ননু 'অনেকাল্‌শিৎ সর্বস্য' ইত্যুৎসর্গঃ, 'ঙিচ্চে'তি চাপবাদঃ। তৎ 'পরনিত্যান্তরঙ্গাপবাদানামুত্তরোত্তরং বলীয়ঃ' ইতি অপবাদশাস্ত্রস্য বলীয়স্ত্বং কথং ন ভবতীতি চেৎ, তত্রাহ—ইহোৎসর্গাপবাদয়োরপি সমবলত্বাৎ ইতি। ইহ তাতঙ্-বিষয়ে উৎসর্গসূত্রম্—'অনেকাল্‌শিৎসর্বস্য' ইতি অপবাদসূত্রেণ 'ঙিচ্চে'-ত্যনেন তুল্যং বর্ততে। কথমিতি চেদুচ্যতে—পরনিত্যান্তরঙ্গাপ-বাদানামুত্তরোত্তরং বলীয় ইতি পরিভাষয়া 'ঙিচ্চে'তি বলীয়ঃ। তদ্ভাবেব সমবলৌ। অতএবোৎসর্গাপবাদয়োঃ সমবলত্বাদনেকাল্‌ত্বেন সর্বাদেশস্যৈব প্রবৃত্তিঃ। উক্তঞ্চ ভাষ্যকৃতাঽপি—'ঙিত্ত্বস্য সাবকাশত্বাদ্বি-প্রতিষেধাত্তাতঙ্ সর্বাদেশঃ' ইতি।

(২) *ঙিত্ত্বোক্তে জ্ঞাপ্যতে কচিদনুবন্ধকার্যেঽপ্যনল্‌বিধা-বিতি প্রতিষেধ ইতি। শ্নঃ শানচঃ শিত্ত্বমপীহ লিঙ্গম্।*

ভূয়াদিত্যত্র যাসুটো ঙিত্ত্বস্য গুণাভাবরূপং ন ফলম্, গুণাভাবস্য লিঙো ঙিত্ত্বেনৈব সিদ্ধত্বাৎ। ননু লিঙ্‌বৃত্তিঙিত্ত্বস্য স্থানিবদ্ভাবেন তদাদেশে তিবাদৌ সুলভত্বাৎ যাসুট্‌বিশিষ্টেঽপি 'যদাগমাস্তদ্‌গুণীভূতা-স্তদ্‌গ্রহণেন গৃহ্যন্তে' ইতি ন্যায়েন ঙিত্ত্বস্য সুলভত্বেন পুনঃ 'যাসুট্ পরস্মৈপদেষূদাত্তো ঙিচ্চ' ইতি ঙিদ্বিধানং ব্যর্থমিতি চেন্ন। তস্য কচিদনুবন্ধকার্যেঽপি অনল্‌বিধাবিতি নিষেধঃ প্রবর্ত্ততে এব ইতি জ্ঞাপনার্থত্বেন আবশ্যকাৎ। অন্যথা অনুবন্ধকার্যে অনল্‌বিধাবিতি

নিষেধো ন প্রবর্ত্ততে ইতি পরিভাষয়া অনল্‌বিধাবিতি নিষেধস্য প্রবৃত্ত্যভাবাৎ স্থানিবদ্বৃত্তিঙিত্ত্বস্য আদেশেঽপি আনেতুং শক্যতয়া ঙিদ্বিধানস্য সুস্পষ্টমেব বৈয়র্থ্যমাপদ্যতে। অনুবন্ধকার্যে অনল্‌বিধাবিতি নিষেধস্য প্রবৃত্ত্যভাবে প্রমাণন্তু 'ন ল্যপি' ইতি সূত্রমেব। তদ্ধি প্রদায় প্রধায় ইত্যাদৌ স্থানিবদ্ভাবেন ক্ত্বাবৃত্তিকিত্ত্বমাদায় 'ঘুমাস্থাগাপাজহাতিসাং হলি' ইত্যাদিনা ইত্ত্ববাধনার্থং তস্য অল্‌মাত্রবৃত্তিধর্মতয়া স্থানিবদ্ভাবাভাবাৎ কিত্ত্বভাবাৎ ইত্ত্বাপ্রাপ্ত্যা তন্নিষেধার্থং 'ন ল্যপি' ইতি সূত্রং ব্যর্থং স্যাৎ। এবং তর্হি যাসুড়িতি সূত্রে ঙিদ্‌গ্রহণস্য ক্বচিদনুবন্ধকার্যেঽপি অনল্‌বিধাবিতি নিষেধঃ প্রবর্ত্ততে এবেতি জ্ঞাপনার্থত্বেন সার্থক্যাৎ। তৎফলন্তু বক্ষ্যমাণা ইত্যাদৌ স্থানিবদ্ভাবেন লট্‌বৃত্তিটিত্ত্বম্ উগিত্ত্বং বা আদায় 'টিড্‌ঢ্বাণঞ্' ইত্যাদিনা 'উগিতশ্চ' ইত্যনেন বা ঙীপ্ ন ভবতি। কিন্তু 'অজাদ্যতষ্টাপ্' ইতি টাবেব। অন্যথা বচ্‌ধাতোঃ ল্‌ৃটঃ স্থানে শানচি 'আনে মুক্' ইতি মুগাগমে 'স্যতাসী ল্‌ৃলুটোঃ' ইতি স্যবিকরণে 'চোঃ কুঃ' ইতি কুত্বে 'আদেশপ্রত্যয়য়োঃ' ইতি ষত্বে 'অট্‌কুপ্‌বাঙ্—' ইতি ণত্বে বক্ষ্যমাণ ইতি স্থিতে টিত্ত্বস্য উগিত্ত্বস্য চ অনুবন্ধকার্যতয়া অনল্‌বিধাবিতি নিষেধাভাবাৎ স্থানিবদ্ভাবেন ঙীপ্ প্রসজ্যেত। ন চ ভাষ্যে 'পিচ্চ ঙিন্ন, ঙিচ্চ পিন্ন' ইত্যুক্তে পিৎসু তিপ্‌সিপ্‌মিপ্‌সু ঙিত্ত্বস্যাতিদেষ্টুমশক্যতয়া তদর্থং যাসুড়িতি সূত্রে ঙিদ্‌গ্রহণং চরিতার্থমিতি বাচ্যম্। 'হলঃ শ্নঃ শানজ্‌ঝৌ' ইতি সূত্রে শিদ্‌গ্রহণসামর্থ্যেন ঙিৎগ্রহণসার্থক্যজ্ঞাপনসম্ভবাৎ। অন্যথা শ্নাবৃত্তিশিত্ত্বস্য তদাদেশে শানচি আনেতুং শক্যতয়া পুনস্তত্র শিদ্‌গ্রহণং স্পষ্টমেব ব্যর্থং স্যাদিতি। বস্তুতস্তু তস্যাপি শিদ্‌গ্রহণস্য ভাষ্যে প্রত্যাখ্যাততয়া অজাদিগণে বক্ষ্যমাণশব্দস্য পাঠকল্পনয়া ঙীপং বাধিত্বা টাপ্‌সিদ্ধে উক্তপরিভাষায়া ন মানং ন চ ফলমিতি দিক্।

(৩) ***যেন নাব্যবধানং তেন ব্যবহিতেঽপি বচনপ্রামাণ্যাৎ। তেন ভিনত্তীত্যাদৌ অনেকব্যবহিতস্যেকো ন গুণঃ।***

ননু ভবিতা ইতি পদসাধনাবসরে ভবিত্ আ ইতি স্থিতে তত্র ইকারস্য সার্বধাতুকাব্যবহিতপূর্বত্বাভাবাৎ 'পুগন্তলঘূপধস্য চ' ইতি গুণস্য প্রাপ্তিরেব নাস্তি ইত্যাশঙ্কায়ামুচ্যতে—যেন নাব্যবধানমিতি।

অয়মাশয়ঃ—'পুগন্তলঘূপধস্য চ' ইত্যস্মিন্ সূত্রে অঙ্গস্য ইতি সূত্রমধিক্রিয়তে। ইকো গুণবৃদ্ধীতি পরিভাষয়া ইক ইতি ষষ্ঠ্যন্তং পদমুপতিষ্ঠতে। তত্র সার্বধাতুকার্ধধাতুকয়োঃ ইতি পদং যদি অঙ্গস্য বিশেষণং স্যাৎ তদা সার্বধাতুকার্ধধাতুকাব্যবহিতপূর্বস্য অঙ্গাবয়বস্য ইকো গুণঃ স্যাদিতি সূত্রার্থঃ সম্পদ্যতে। অস্মিন্নর্থে ভিনত্তীত্যত্রাপি তীতি সার্বধাতুকাব্যবহিতপূর্বং যদ্ ভিনদিত্যঙ্গং তদবয়বস্য ইকারস্য গুণঃ স্যাৎ, তেন ভেনত্তীত্যনিষ্টং প্রসজ্যেত। যদি সার্বধাতুকার্ধধাতুকয়োরিতি পদমিকো বিশেষণং স্যাত্তদা সার্বধাতুকার্ধধাতুকাব্যবহিতপূর্বো য ইক্ তস্য গুণঃ স্যাৎ, স চ ইগ্ যদি লঘূপধাঙ্গস্যাবয়বঃ স্যাদিতি। অস্মিন্নর্থে ভিনত্তীত্যাদৌ ন দোষঃ ইকঃ সার্বধাতুকাব্যবহিতপূর্বত্বাভাবাৎ। কিন্তু ভেত্তেত্যাদাবপি ইক অর্ধধাতুকাব্যবহিতপূর্বত্বাভাবাদ্ গুণো ন স্যাদিত্যুভয়ত্রাপি দোষঃ। তত্রেদং সমাধীয়তে—সার্বধাতুকার্ধধাতুকয়োরিতি পদম্ ইক এব বিশেষণমিতি সিদ্ধান্তিমতম্। তেনায়ং সূত্রার্থঃ—সার্বধাতুকার্ধধাতুকাব্যবহিতপূর্বস্যেকো গুণঃ স্যাৎ স চেদঙ্গাবয়ব ইতি। ন চ ভেত্তেত্যত্র ইকঃ সার্বধাতুকাব্যবহিতপূর্বত্বাভাবস্তকারব্যবহিতত্বেন গুণো ন স্যাদিতি বাচ্যম্—যেন নাব্যবধানমিতি পরিভাষয়া একবর্ণব্যবধানেঽপি গুণেন দোষাভাবাৎ। পরিভাষায়াস্ত্বয়মর্থঃ যৎকর্তৃকমবশ্যব্যবধানং তেন ব্যবহিতেঽপি বিধীয়মানং কার্য্যং ভবতি। যস্য বর্ণস্য অবশ্যমেব ব্যবধানেন ভাব্যম্, তস্য বর্ণস্য ব্যবধানং সোঢ়ব্যমিত্যর্থঃ। কুতঃ এতজ্ জ্ঞায়তে ইতি চেদত্রোচ্যতে—বচনপ্রামাণ্যাদিতি। সূত্রারম্ভসামর্থ্যাদিত্যর্থঃ। যদি ভেত্তা ইত্যাদৌ একবর্ণব্যবধানে গুণো ন

ভবেত্তদা 'পুগন্তলঘূপধস্য চ' ইতি সূত্রমেব ব্যর্থং স্যাৎ। লঘূপধস্যাঙ্গাবয়বস্য ইকো গুণবিধানেন জ্ঞায়তে যৎ কস্যচিদ্বর্ণস্য অবশ্যমেব ব্যবধায়কত্বমিতি। যদি ইকঃ সার্বধাতুকার্ধধাতুকয়োঃ মধ্যে কশ্চিদপি বর্ণো ন স্যাত্তদা লঘূপধত্বমেব ন স্যাৎ। উপধাত্বং হি অন্ত্যাদলঃ পূর্ববর্তিত্বমিতি। এবঞ্চ ভবিত্‌+আ ইতি প্রকৃতেঽপি তকারেণ ব্যবধানাৎ ইকারস্য গুণঃ প্রাপ্ত এবেতি বাচ্যম্। স চ 'দীধীবেবীটাম্' ইত্যনেন নিষিধ্যতে। ভিনত্তীত্যাদৌ তু ইক্‌সার্বধাতুকয়োরনেকবর্ণব্যবহিতত্বেন গুণো ন ভবতীতি বোধ্যম্।

(৪) ***সার্বধাতুকে কিম্ ? চিকীর্ষ্যাৎ। মধ্যেঽপবাদন্যায়েন হি অতো লোপ এব বাধ্যতে। ভবেদিত্যাদৌ-পরত্বাদ্দীর্ঘঃ।***

'অতো যেয়ঃ' ইতি সূত্রে 'রুধাদিভ্যঃ সার্বধাতুকে' ইত্যতঃ সার্বধাতুকে ইতি পদমনুবর্ত্য ষষ্ঠ্যন্তেন চ বিপরিণম্য অদন্তাৎ অঙ্গাৎ পরস্য সার্বাধাতুকাবয়বস্য যা ইত্যস্য ইয়্‌ স্যাদিতি সূত্রার্থঃ সম্পদ্যতে। তথা হি ভব যাৎ ইত্যবস্থায়াম্ যা ইত্যস্য স্থানে ইযাদেশে গুণে যলোপে চ ভবেদিতি পদং সিধ্যতি। তত্র ত্বেদং শঙ্ক্যতে—ননু সার্বধাতুকাবয়বস্য ইতি বিশেষণাভাবেঽপি ভূ যাদিত্যাদৌ আর্ধধাতুকে অকারপরবর্তিত্বাভাবাৎ ইয়্‌ ইত্যস্য প্রবৃত্তির্নাস্তি, পুনস্তদ্ব্যাবৃত্ত্যর্থং সার্বধাতুকে ইত্যনুবৃত্তির্ব্যর্থৈব ইতি চেদত্রোচ্যতে—সার্বধাতুকে ইতি পদাভাবে সন্নন্তাৎ কৃধাতোঃ চিকীর্ষ যা ত্‌ ইত্যাশীর্লিঙি যা ইত্যস্য অতঃ পরত্বাৎ (অকারপরত্বাৎ) আর্ধধাতুকাবয়বস্যাপি ইযাপত্তেঃ। ন চ 'অতো লোপ' ইত্যস্য কৃতাকৃতপ্রসঙ্গবিধিত্বেন নিত্যতয়া পরমপি 'অতো যেয়' ইতি সূত্রং বাধিত্বা ইযাদেশাৎ প্রাক্ অকারলোপে যা ইত্যস্য অতঃ পরত্বাভাবাদেব ইযপ্রাপ্তৌ তদ্ব্যাবৃত্ত্যর্থং সার্বধাতুকে ইতি পদং নানুবর্ত্তব্যমিতি বাচ্যম্। সার্বধাতুকে ইত্যনুবৃত্ত্যভাবে 'অতো যেয়ঃ' ইত্যস্য অপবাদত্বাৎ 'অতো লোপঃ' 'অতো দীর্ঘো যঞি'

ইত্যুভয়োরপি বাধাপ্রসঙ্গে 'মধ্যেঽপবাদাঃ পূর্বান্ বিধীন্ বাধন্তে নোত্তরান্' ইতি পরিভাষয়া পূর্ববিধিম্ 'অতো লোপ' ইতি সূত্রং বাধেত ন তু 'অতো দীর্ঘো যঞি' ইতি পরং সূত্রম্। তথাহি অষ্টাধ্যায্যামিত্থং সূত্রক্রমঃ—

'অতো লোপঃ' ইতি ষষ্ঠাধ্যায়স্য চতুর্থপাদগতং সূত্রম্ (৬।৪।৪৮)।

'অতো যেয়ঃ' ইতি সপ্তমাধ্যায়স্য দ্বিতীয়পাদগতং সূত্রম্ (৭।২।৮০)।

'অতো দীর্ঘো যঞি' ইতি সপ্তমাধ্যায়স্য তৃতীয়পাদগতং সূত্রম্ (৭।৩।১০১)।

তত্র 'অতো যেয়ঃ' ইতি মধ্যগতমপবাদসূত্রম্। তচ্চ মধ্যেঽপবাদন্যায়েন পূর্বসূত্রম্ 'অতো লোপ' ইতীদমেব বাধেত ন তু পরবর্তি 'অতো দীর্ঘো যঞি' ইতি সূত্রম্। যদি চ 'অতো লোপ' ইতি বাধ্যেত তর্হি চিকীর্ষ যা ত্ (চিকীর্ষধাতোরাশীর্লিঙি) ইত্যত্র চিকীর্ষ ইত্যস্য আর্ধধাতুকত্বে অপি অকারলোপো ন স্যাৎ। তেন 'অতো যেয়' ইত্যেনেন চিকীর্ষ ইয্ ত্ ইতি স্থিতে 'লোপো ব্যোর্বলি' ইতি যলোপে চ চিকীর্ষেৎ ইত্যনিষ্টং রূপং প্রসজ্যেত। ইষ্টং তু রূপং চিকীর্ষ্যাদিতি। তস্মাৎ সুষ্ঠূক্তং সর্বধাতুকাবয়বস্যেতি। ভবেদিত্যাদৌ তু ভব যা ত্ ইতি দশায়াম্ 'অতো যেয়' ইতি, 'অতো দীর্ঘো যঞি' ইতি চানয়োঃ সূত্রয়োঃ 'অতো দীর্ঘো যঞি' ইতি সূত্রং পরত্বাৎ বিপ্রতিষেধে পরং কার্য্যমিতি পরিভাষয়া 'অতো যেয়ঃ' ইতি সূত্রং বাধেত। ততশ্চ ভব যাৎ ইত্যত্র 'অতো দীর্ঘো যঞি' ইত্যেনন ভবাযাৎ ইতি রূপং স্যাৎ। এবঞ্চ সার্বধাতুকে ইত্যনুবৃত্ত্যভাবে 'অতো যেয়' ইত্যস্য সার্বধাতুকে আর্ধধাতুকে চ উভয়ত্রাপি প্রসক্তৌ মধ্যেঽপবাদন্যায়েন পূর্বং বিধিং বাধিত্বা চিকীর্ষেদিত্যাদৌ অতিব্যাপ্তিঃ স্যাৎ। ভবেদিত্যত্র চ তদপ্রসক্তেরব্যাপ্তিঃ স্যাৎ। অতএব উক্তদোষদ্বয়বারণায় সার্বধাতুকে ইতি পদমনুবর্তনীয়মেবেতি দিক্।

### (৫) পরত্বান্নিত্যত্বাচ্চ 'অতো যেয়ঃ' ইতি প্রাঞ্চঃ।

'ভব যা উস্' ইত্যবস্থায়াম্, পরত্বান্নিত্যত্বাচ্চ 'উস্যপদান্তাৎ' ইতি সূত্রং বাধিত্বা 'অতো যেয়ঃ' ইতি ইযাদেশে গুণে 'ভবেয়ুঃ' ইতিপ্রাঞ্চঃ। বস্তুতস্তু সার্বধাতুকসংজ্ঞানিরপেক্ষস্য'উস্যপদান্তাৎ'ইতি সূত্রস্যান্তরঙ্গত্বেন পররূপমেব ন্যায্যং স্যাদিতি 'অতো যেয়ঃ' ইতি সূত্রস্য সার্বধাতুকাবয়বস্য যাস্ ইত্যস্য ইযাদেশঃ স্যাদিতি ব্যাখ্যা কার্যা। তেন চ সলোপস্যাপবাদ ইয্ স্যাৎ। বালমনোরমাকৃতা চোক্তম্—পররূপাপেক্ষয়া ইযাদেশঃ পরো নিত্যশ্চ। অকৃতে কৃতে চ প্রবৃত্তেঃ। কৃতে পররূপে য্ ইত্যস্যৈকদেশবিকৃতন্যায়েন একাদেশস্য পূর্বান্তত্বেন বা ইযাদেশস্য নির্বাধত্বাৎ। ততশ্চ পররূপং বাধিত্বা ইযাদেশে ভবেয়ুরিতি রূপমিতি প্রাচীনা মন্যন্ত ইত্যর্থঃ। ননু পররূপমঙ্গাধিকারস্থত্বাভাবাদ্ অঙ্গানপেক্ষত্বাদ্ অন্তরঙ্গম্, ইযাদেশস্তু অঙ্গত্বাৎ প্রকৃতিপ্রত্যয়োভয়সাপেক্ষত্বাদ্ বহিরঙ্গঃ। ততশ্চ পরান্নিত্যাদপীযাদেশাৎ পররূপস্যান্তরঙ্গতয়া বলবত্ত্বাৎ পররূপমেব ইহ স্যাদিত্যশঙ্কায়ামুক্তং দীক্ষিতপাদেন—যদ্যপ্যন্তরঙ্গত্বাৎ পররূপং ন্যায্যং তথাপি যাস্ ইত্যেতস্য ইয্ ইতি ব্যাখ্যেয়ম্। ইতি। 'অতঃ' 'যাস্' 'ইযঃ' ইতি 'অতো যেয়ঃ' ইত্যস্য পদচ্ছেদঃ। যাসিতি লুপ্তষষ্ঠীকং পদম্। ততশ্চ অতঃ পরস্য যাসিত্যেতস্য ইয্ স্যাদিতি ব্যাখ্যেয়ম্। যাসিতি সকারান্তস্য ইযাদেশবিধিসামর্থ্যাদেব সকারলোপং বাধিত্বা প্রাগেব যাসিতি সকারান্তস্য ইযাদেশো ভবতীত্যর্থঃ। তথা চ সকারাবস্থায়ামবর্ণাৎ পরত্বাভাবেন পররূপস্যাপ্রবৃত্তিরিতি ভাবঃ। ননু যদি যাস্ ইয ইতি চ্ছেদঃ, তদা সকারস্য রুত্বে, 'ভোভগো—' ইতি যত্বে, 'লোপঃ শাকলস্য' ইতি তস্য লোপে 'অতো যা ইয' ইতি স্যাৎ। আদ্‌গুণে কর্তব্যে যলোপস্যাসিদ্ধত্বাদিত্যত উক্তং দীক্ষিতেন—'অতো যেয়ঃ' ইত্যত্র তু সন্ধিরার্ষঃ।

(৬) *সংহিতৈকপদে নিত্যা নিত্যা ধাতূপসর্গয়োঃ।*
*নিত্যা সমাসে বাক্যে তু সা বিবক্ষামপেক্ষতে॥*

ভর্তৃহরিবিরচিতোঽয়ং শ্লোকঃ। একস্মিন্ পদে নায়ক পাচক ইত্যাদৌ সংহিতা নিত্যা। তেন নৈ অক পো অক ইত্যাদীনি সন্ধ্যভাবঘটিতানি রূপাণি ন ভবন্তি।

ধাতূপসর্গয়োঃ সংহিতাপি নিত্যা। পূর্বং ধাতুরুপসর্গেণ যুজ্যতে পশ্চাৎ সাধনেন ইতি ভাষ্যোক্তেঃ। তেন প্র এজতে, উপ ওষতি ইত্যাদৌ এঙি পররূপমিত্যনেন অবর্ণান্তাদুপসর্গাদেঙাদিধাতৌ পরে পররূপং নিত্যমেব ভবতি। এবঞ্চ প্রণিভবতি ইত্যাদৌ অপি ধাতূপসর্গয়োঃ সংহিতায়া নিত্যত্বাৎ নিত্যং ণত্বং প্রাপ্তম্। তদ্বারণার্থং বিভাষাগ্রহণং বোধ্যম্।

সমাসেঽপি সংহিতা নিত্যা। যথা, সুধীভিরুপাস্যঃ সুধ্যুপাস্য ইত্যাদৌ সমাসে সংহিতায়া নিত্যত্বেন ইকো যণচি ইতি নিত্যমেব যণ্। সুধী+উপাস্য ইতি যণ্ঘটিতং রূপং ত্বসাধ্বেব। অত্রৈকপদে ইত্যনেনৈব সিদ্ধে 'সমাসে'-গ্রহণং খণ্ডপদত্বলাভার্থম্। অখণ্ডত্বঞ্চ পদত্বাভাববদুত্তরখণ্ডকত্বম্। তেন রাজীয়তীত্যাদৌ রাজানমিচ্ছতীতি বিগ্রহে পূর্বস্য পদত্বেঽপি উত্তরখণ্ডস্য পদত্বাভাবাদ্ রাজীয় অতি ইত্যবস্থায়াম্ 'অতো গুণে' ইতি নিত্যমেব পররূপম্।

বাক্যে তু সা সংহিতা বিবক্ষাধীনা। যথা, দধি আনয় ইত্যাদৌ যদা সংহিতা বিবক্ষ্যতে তদা ইকো যণচি ইতি যণি 'দধ্যানয়' ইতি রূপম্। যদা তু সংহিতা ন বিবক্ষ্যতে তদা দধি আনয় ইত্যেব। অয়মাশয়ঃ --দ্রুতোচ্চারণজন্যো যদা অত্যন্তসন্নিধির্বর্ণাণাং তদা সংহিতা, 'পরঃ সন্নিকর্ষঃ সংহিতে'তি পাণিনিনা সূত্রিতত্বাৎ। সংহিতায়ামিত্যত্র ভাষ্যকারেণ চ দ্রুতোচ্চারণে এব সংহিতেত্যুক্তত্বাৎ। অদ্রুতায়াম-সংহিতমিতি ভাষ্যম্। বাচাং বৃত্তিস্ত্রিধা—দ্রুতা, মধ্যমা, বিলম্বিতা চ। তত্র বক্ত্রা কচিদ্ দ্রুতা বৃত্তিরবলম্ব্যতে, কচিন্মধ্যমা কচিচ্চ বিলম্বিতা। তত্র ক্ব কা বৃত্তিরবলম্বনীয়া ইত্যত্রোক্তং শৌনকেন—

অভ্যাসার্থে দ্রুতাং বৃত্তিং প্রয়োগার্থে তু মধ্যমাম্।
শিষ্যাণামুপদেশার্থং বৃত্তিং কুর্য্যাদ্বিলম্বিতাম্॥

তেন যত্র সংহিতায়া নিত্যত্বমুক্তং তেন দ্রুতোচ্চারণস্যাবশ্য-কর্ত্তব্যতা বিহিতা। দ্রুতোচ্চারণাভাবে তু সংহিতা ন ভবতীত্যেব তাৎপর্য্যং বোধ্যম্।

(৭) ***আমো মকারস্য নেত্বম্। আস্কাসোরাম্বিধানাজ্জ্ঞাপকাৎ।***

নমু 'ইজাদেশ্চ গুরুমতোঽনৃচ্ছঃ' ইত্যেতৎসূত্রবিহিতাঽম্ঘটক-মকারস্য হল্‌ত্বেন ইৎসংজ্ঞা স্যাদিতি চেন্ন, আস্‌ধাতোঃ কাস্‌ধাতোশ্চ 'দয়ায়াসশ্চ' 'কাস্‌প্রত্যয়াদামমন্ত্রে লিটি' ইতি আম্বিধানসামর্থ্যাৎ যদ্যত্র মকারস্যেৎসংজ্ঞা স্যাৎ তদা আস্‌ধাতোঃ কাস্‌ধাতোশ্চাম্বিধানং ব্যর্থং স্যাৎ তত্রাপীৎসংজ্ঞায়া দুর্ব্বারত্বাদিতি তৎসামর্থ্যাদিৎসংজ্ঞাঽভাব-কল্পনেন ন প্রকৃতে কাপ্যাপত্তিঃ। অয়মর্থঃ—'কাস্‌প্রত্যয়াদমমেন্ত্রে লিটি' ইতি কাস্‌ধাতোঃ, 'দয়ায়াসশ্চ' ইতি আস্‌ধাতোশ্চ উত্তরং লিটি আম্‌প্রত্যয়ো বিহিতঃ। তৎ যদি আম্ ইতি মকারস্য ইদভবিষ্যত্তদা 'মিদচোঽন্ত্যাৎ পরঃ' ইতি পরিভাষয়া অয়ম্ আম্-প্রত্যয়ঃ কাসধাতোরাস্‌ধাতোশ্চ অন্ত্যাদচঃ আকারাৎ পরোঽভবিষ্যৎ। কা আম্ স্ ইতি, আ আম্ স্ ইতি চ স্থিতে মিত্ত্বাৎ মলোপে কা আ স্ ইতি, আ আ স্ ইতি চ জাতে, 'অকঃ সবর্ণে দীর্ঘঃ' ইতি সূত্রেণ সবর্ণদীর্ঘে কৃতে কাস্ আস্ ইত্যেবাভবিষ্যৎ, ততঃ পুনরাম্বিধানং ব্যর্থং স্যাৎ। তস্মাৎ অস্মাভিরেতৎ জ্ঞায়তে যৎ আমো মকারস্য নেত্বমিতি।

(৮) ***প্রত্যয়ে কিম্? বব্রশ্চ।***—অভ্যাসঋবর্ণস্য অৎ স্যাৎ প্রত্যয়ে পরে ইতি 'উরৎ' ইতি সূত্রস্যার্থঃ ক্রিয়তে। অত্রাঙ্গস্যেত্য-ধিকৃতং বর্ত্ততে। অঙ্গস্যেত্যনেন প্রত্যয়ঃ আক্ষিপ্যতে। নমু

অঙ্গেনৈব প্রত্যয়স্যাক্ষিপ্তত্বাৎ প্রত্যয়ে পরত ইতি কিমর্থমিতি পূর্বপক্ষিণঃ প্রশ্নঃ। ততঃ স্বব্যাখ্যানে 'প্রত্যয়ে' ইতি পদং কথমন্তর্ভুক্তমিতি কারণং কলঙ্ক নিদর্শয়িতুমুক্তং বব্রশ্চেতি। 'ওব্রশ্চ্ চ্ছেদনে' ইত্যস্মাদ্ধাতো লিটি ণলি রূপম্। তদিত্থং প্রক্রিয়া—ব্রশ্চ্ লিট্ ণল্ ইতি স্থিতে দ্বিত্বে ব্রশ্চ্ ব্রশ্চ্ অ ইতি জাতে, 'লিট্যভ্যাসস্য –' ইত্যনেন অভ্যাসস্য সম্প্রসারণে ঋকারে বৃশ্চ্ ব্রশ্চ্ অ ইতি জাতে, 'উরদি'তি অভ্যাসস্য ঋকারস্য অকারাদেশে রপরত্বে বর্শ্চ্ ব্রশ্চ্ অ ইতি জাতে, 'হলাদিঃ শেষঃ' ইত্যনেন বকারবর্জং সর্বেষাম্ অভ্যাসহলাং লোপে 'বব্রশ্চ্' ইতি রূপং সিদ্ধম্।

তত্র ব্রশ্চ্ ইত্যত্র পূর্বস্যাপি বকারস্য সম্প্রসারণং ন ভবতি। 'উরৎ' ইত্যনেন জায়মানস্যাত্বস্য প্রত্যয়নিমিত্তকত্বেন পরনিমিত্তকত্বাৎ 'অচঃ পরস্মিন্ পূর্ববিধৌ' ইত্যনেন ঋাকারস্থানিকেঽকারে স্থানিবদ্ভাবেন সম্প্রসারণবুদ্ধ্যা 'ন সম্প্রসারণে সম্প্রসারণমি'তি সম্প্রসারণে পরতঃ পূর্বস্য বকারস্য সম্প্রসারণনিষেধাৎ। যদ্যত্র প্রত্যয়ে ইতি পদং নাক্ষিপ্যেত তদা উরত্বস্য পরনিমিত্তকত্বাভাবেন ˑস্থানিবত্তাভাবাৎ সম্প্রসারণপরকত্বাভাবেন 'ন সম্প্রসারণে সম্প্রসারণম্' ইতি নিষেধস্যাপ্রবৃত্তেঃ পূর্বস্য বকারস্য সম্প্রসারণং প্রসজ্যেত। তেন বব্রশ্চ ইত্যত্র উব্রশ্চ ইত্যনিষ্টং রূপং স্যাৎ। তন্মাভূদিত্যেতদর্থং প্রত্যয়ে ইতি পদং নূনমেব আক্ষিপ্যতে। ন চ রেফস্য সম্প্রসারণাৎ প্রাগেব অভ্যাসবকারস্যৈব সম্প্রসারণং স্যাদিতি বাচ্যম্। 'ন সম্প্রসারণে সম্প্রসারণম্' ইতি নিষেধারম্ভসামর্থ্যাৎ পরস্যৈব যণঃ পূর্বং সম্প্রসারণমিতি জ্ঞাপনেন ন কুত্রচিৎ দোষাবসরঃ ইতি দিক্।

**(৯) *শিত্পা শপাঽনুবন্ধেন নির্দিষ্টং যদ্গণেন চ। যত্রৈকাজ্গ্রহণং চৈব পঞ্চৈতানি ন যঙ্লুকি॥***

'একাচ্ উপদেশেঽনুদাত্তাদি'তি সূত্রস্যায়ং তাবদর্থঃ-উপদেশে যো ধাতুরেকাজনুদাত্তশ্চ ততঃ পরস্য বলাদেরার্ধধাতুকস্যেণ্ন স্যাদিতি।

তত্রেদমাশঙ্ক্যতে—ননু সূত্রে একাজ্‌গ্রহণাভাবে অপি উদৃদন্তৈরি-ত্যাদিনা পরিগণিতানামেবানুদাত্তোপদেশধাতূনামেকাচ্‌ত্বাঽব্যভি-চারাৎ কর্ত্তুং, চক্লৃষে, গন্তমিত্যাদাবিন্নিষেধসিদ্ধেঃ, একাজ্‌গ্রহণং ব্যর্থমিতি চেন্ন, যঙ্‌লুকি 'চর্করিতে'ত্যাদাবিণ্‌নিষেধব্যাবৃত্ত্যর্থং তদাবশ্যকত্বাৎ। ন চ কৃতেঽপি একাজ্‌গ্রহণে যঙ্‌লুকি দ্বিত্বে কৃতেঽনেকাচ্‌ত্বেঽপি ধাতূপদেশে একাচ্‌ত্বস্য বিদ্যমানত্বেনেণ্‌নিষেধো দুর্বার এবেতি বাচ্যম্, প্রাচীনৈঃ "শি্‌ত্‌পা শপানুবন্ধেনে"ত্যাদিনি-বন্ধনাদিণ্‌নিষেধব্যাবৃত্তেঃ সুস্থত্বাৎ। কারিকায়া অয়মর্থঃ শি্‌ত্‌পা নির্দ্দিষ্টং শপা নির্দ্দিষ্টম্, অনুবন্ধেন নির্দ্দিষ্টং গণেন বা নির্দ্দিষ্টম্, একাজ্‌-গ্রহণেন নির্দ্দিষ্টং যৎ কার্য্যং তৎ যঙ্‌লুকি ন প্রবর্ত্ততে ইতি। ততঃ ক্রমশ উদাহরণানি—

***শ্তিপা নির্দ্দিষ্টম্***—'নের্গদনদপতপদঘুমাস্যতিহন্তি—'ইত্যাদিনা সূত্রেণ গদনদাদেঃ প্রাক্ স্থিতস্য 'নি' রিত্যুপসর্গস্য ণত্বং বিধীয়তে —তথা চ প্রণিহন্তীত্যাদিরূপং ভবতি। পরন্তু 'হন্তি' ইতি হন্ ধাতোঃ শ্তিপা প্রত্যয়েন নির্দিষ্টত্বাৎ রক্তকার্য্যং যঙ্‌লুকি ন প্রবর্ত্ততে। তেন যঙ্‌লুকি প্রনিজঙ্ঘনীতি রূপং ভবতি।

***শপা নির্দ্দিষ্টম্***—'সনীবন্তর্ধভ্রস্জদম্ভুশ্রিস্বৃযূর্নু—' ইত্যনেন ভৃধাতোঃ সনি ইট্‌বিকল্পঃ প্রাপ্তঃ যথা—বিভরিষতি বুভূর্ষতি ইতি কিন্তু শপা নির্দ্দিষ্টত্বাদ্ যঙ্‌লুকি নিত্য এব ইণ্‌নিষেধঃ। যথা বর্ভতি, বরিভর্ত্তি ইতি।

***অনুবন্ধনির্দ্দিষ্টম্***—অনুবন্ধেন নির্দ্দেশো দ্বিধা—স্বরূপেণেৎ-সংজ্ঞকত্বেন চ। স্বরূপেণ যথা—'শীঙঃ সার্বধাতুকে গুণঃ' ইতি শীধাতোর্যদ্ গুণবিধানং তদ্ যঙ্‌লুকি ন প্রবর্ত্ততে। তত্র তু শেশিত ইতি অগুণিতমেব রূপম্। ইৎসংজ্ঞকত্বেন যথা—'অনুদাত্তঙিত

আত্মনেপদম্' ইতি ইৎসংজ্ঞামুল্লিখ্য যদাত্মনেপদবিধানং তত্ত্, যঙ্লুকি ব্যাবর্ত্ততে,' অতস্তত্রাত্মনেপদাভাবঃ। তেন পাস্পর্ধীতি, শেশয়ীতি ইতি পরস্মৈপদিত্বমেবেতি।

*গণেন নির্দ্দিষ্টম্*—'রুধাদিভ্যঃ শ্নম্' ইতি গণনির্দ্দিষ্টং যৎ শ্নম্বিধানং যঙ্লুকি তন্ন প্রবর্ততে। অতঃ বেভিদীতি ইত্যত্র শ্নমভাবো লক্ষ্যতে।

*একাজ্গ্রহণস্য উদাহরণম্* একাজ্গ্রহণেন প্রকৃতসূত্রে যদিন্নিষেধঃ তচ্ছঙ্লকি ন সঙ্গচ্ছতে, তেন বেভদিতা ইত্যত্র ইন্নিষেধো ন।

(১০) "*অজান্তোঽকারবান্ বা যস্তাস্যানিট্ থলি বেভয়ম্। ঋদন্ত ঈদৃঙ্ নিত্যানিট্ ক্রাদ্যন্যো লিটি সেড্ভবেৎ॥*"

অস্যাং কারিকায়াং "কৃস্হভৃবৃস্তুদ্রুশ্রুবো লিটি" ইতি "অচস্তাস্বৎথল্যনিটো নিত্যম্" ইতি, "উপদেশেঽত্বতঃ" ইতি "ঋতো ভারদ্বাজস্য" ইতি ৫ চতুর্ণাং সূত্রাণাম্ অর্থঃ সংগ্রহরূপেণ পঠিতঃ। তত্র "অচস্তাস্বৎথল্যনিটো নিত্যম্" ইত্যনেন উপদেশেঽজন্তো যো ধাতুঃ তাসৌ নিত্যানিট্ ততঃ পরস্য থলঃ ইট্ নিষিধ্যতে। যথা পাধাতোঃ তাসৌ পাতা ইতি রূপম্। থলি তু পপাথ ইতি ভরদ্বাজমতে তাসৌ নিত্যানিট্ যো ঋদন্তস্তস্মাদেব থল ইট্ ন ভবতি। অন্যস্মাত্তু ভবত্যেব ইতি নিয়মাৎ পাধাতোঃ থলি ঋদন্তভিন্নধাতুপরত্বেন ইট্ ভবত্যেব। তেন পপিথ পপাথ ইতি রূপদ্বয়মপি মতভেদেন সাধু। তত 'উপদেশেঽত্বতঃ' ইতি সূত্রেণ উপদেশেঽকারবতঃ তাসৌ—নিত্যানিটঃ পরস্য থল ইট্ নিষিধ্যতে। ভরদ্বাজমতেন উপদেশেঽকারবতো ধাতোরপি পরস্য থলঃ ইট্ ভবত্যেব। তথাহি পচ্ধাতোঃ

মতভেদেন পেচিথ, পপক্থ, যজ্ ধাতোঃ মতভেদেন যষ্ট যজিথ ইতি থলি রূপদ্বয়মিষ্টং বোধ্যম্। অত্র অকারবান্ ইত্যনেন হ্রস্বাকারবান্ ইতি ব্যাখ্যেয়ম্। তেন রাধ্ ধাতোঃ থলি নিত্যমেব ইট্ ররাধিত ইতি। যো ধাতুঃ ঋদন্তঃ তাসৌ চ নিত্যমনিট্ ততঃ পরস্য থলো নিত্যমেব ইট্ নিষেধঃ ভবতি। পাণিনিমতে 'অচস্তাস্ব—' ইতি ইটো নিষেধাৎ, ভরদ্বাজমতে চ ইটো নিষেধাৎ। তেন হৃধাতোঃ ধৃধাতোশ্চ জহর্থ, দধর্থ ইত্যেকমেব রূপম্। ক্রাদিভ্যঃ অষ্টভ্যঃ অতিরিক্তা যে ধাতবঃ তেভ্যঃ পরস্য লিটঃ ইট্ ভবত্যেব। তথাহি বিভেদিথ, বিভেদিব, বভূবিব ইত্যাদি প্রয়োগঃ সিধ্যতি। ন চ স্তুদ্রুপ্রভৃতীনামপি অজন্তত্বেন থলি ইট্ বিকল্পঃ শঙ্ক্যঃ। 'অনন্তরস্য বিধির্বা ভবতি প্রতিষেধো বেতি' ন্যায়াৎ 'অচস্তাস্বৎ ' ইতি 'উপদেশেঽত্বত' ইতি চ যোগদ্বয়-প্রাপিতস্যৈব নিষেধস্য ভরদ্বাজনিয়মেন নিবর্তিতত্বাৎ। 'কৃসৃভৃবৃ—' ইত্যস্য বহুসূত্রব্যবহৃতত্বেন নিয়মেন তস্য নিবর্তনাযোগাৎ। কিঞ্চ পুরস্তাৎ প্রতিষেধকাণ্ডারম্ভসামর্থ্যাৎ তস্যৈব নিষেধস্য বলবত্ত্বাভ্যুপগমাৎ। তেন স্তুদ্রুপ্রভৃতীনাং তু থলি 'স্তুষ্টোথ' 'তুদ্রোথ' 'সুস্রোথ' ইত্যাদি ইট্ নিষেধো ভবত্যেব ইতি সর্বং সমঞ্জসম্।

(১১) *আদেশশ্চেহ বৈরূপ্যসংপাদক এবাশ্রীয়তে, শসি-দদ্যোঃ প্রতিষেধবচনাজ্ জ্ঞাপকাৎ। (ভ্বাদিপ্রকরণম্)।*

'অত একহল্মধ্যেঽনাদেশাদের্লিটি' ইতি সূত্রে অনাদেশাদেরিতি পদে আদেশ আদৌ যস্য স আদেশাদিঃ, ন আদেশাদিরনাদেশাদি-স্তস্যেতি সমাসে জাতে আদেশপদেন যো হি বৈরূপ্যস্য রূপান্তরস্য সম্পাদকঃ কারকঃ, স এব গ্রাহ্যঃ। আদেশশব্দেন স্থান্যপেক্ষয়া বিরূপ এবাদেশঃ বিবক্ষিতঃ। তথা চ তথাবিধাদেশাদেরেব এত্বাভ্যাস-লোপৌ ন ভবতঃ স্থানিসরূপাদেশাদেস্তু ন পর্যুদাস ইত্যর্থঃ। 'জগাদ' ইত্যত্র গকারস্য জকারাদেশো ভবতি। তত্র গকারস্য অন্যদ্ রূপং জায়তে। তথা চ দধধাত্বাদৌ দকারস্য দকাররূপাদেশে জাতেঽপি

এত্বাভ্যাসলোপৌ ভবত এব। প্রমাণঞ্চাত্র—'ন শসদদবাদিগুণানাম্' ইতি সূত্রে শসিদদ্যোরেত্বাভ্যাসলোপয়োঃ প্রতিষেধ উচ্যতে। অন্যথা আদেশপদেন যদি সামান্যাদেশস্য গ্রহণং স্যাত্তদা শসিদদ্যোরপি 'অভ্যাসে চর্চ্চ' ইতি সূত্রেণ শকারস্য শকাররূপাদেশো দকারস্য চ দকাররূপাদেশো ভবত্যেবেতি তত্রৈত্ববিধায়কসূত্রাপ্রবৃত্তৌ নিষেধকশাস্ত্রে তয়োঃ পাঠঃ নিষ্ফল এব। অতো বৈরূপ্যসংপাদকাদেশাদেরেব পর্য্যুদাসো বিজ্ঞায়তে ইত্যর্থঃ।

**(১২)** ***সেক্-সৃপ্-সৃ-স্তৃ-সৃজ-স্তৃ-স্ত্যাবো দন্ত্যাজন্তষাদয়ঃ। একাচঃ ষোপাদেশাঃ স্যুঃ ষ্বক্-ষ্বিদ্-ষ্বদ্-ষ্বঞ্জ-ষ্বপ্-ষ্মিঙঃ॥ (ভ্বাদিপ্রকরণম্)।***

সাধাদিষু সাধিপাঠস্যৈব দৃশ্যমানত্বাৎ অতো লক্ষণামুখেন তান্ ব্যবস্থাপয়তি সেগিত্যাদিনা। দন্ত্যশ্চ অচ্চ দন্ত্যাচৌ তৌ অন্তৌ অব্যবহিতপরৌ যস্য স দন্ত্যাজন্তঃ। দন্ত্যাজন্তশ্চাসৌ সশ্চ দন্ত্যাজন্তসঃ, স আদি র্যেষাং ধাতূনাং তে দন্ত্যাজন্তসাদয়োঽজন্তসাদয় শ্চৈকাচঃ ষোপদেশাঃ বোধ্যাঃ। তথা চ সাধাদৌ সাংপ্রতং পঠ্যমানঃ সকার উপদেশে ন স্থিত ইত্যনুমেয়ম্ ইতি ভাবঃ। দন্ত্যপরকোঽচ্পরকশ্চ যঃ সকারস্তদাদয় একাচো ধাতব ইদানীং কৃতসত্বাঃ সকারাদিত্বেন পরিদৃশ্যমানা অপি ষকারাদিত্বেন পাণিনিনা উপদিষ্টাঃ প্রত্যেতব্যাঃ ইত্যর্থঃ। নন্বেবং সেকৃপ্রভৃতীনামপি ষোপদেশত্বং স্যাৎ, আদ্যানাং চতুর্ণামচ্পরকসাদিত্বাদন্ত্যানাঞ্চ ত্রয়ানাং দন্ত্যপরকসাদিত্বাদতঃ সেকৃপ্রভৃতীন্ বারয়তি। নন্বেবমপি ষ্বক্কাদীনামসংগ্রহঃ স্যাৎ, এষু সকারস্য দন্ত্যাচ্পরকত্বাভাবাৎ,—ইতি অব্যাপ্তিমাশঙ্ক্য তানপি সংগৃহ্লাতি—ষ্বক্ক ষ্বিদ্ ষ্বদ্ ষ্বঞ্জ ষ্বপ্ ষ্মিঙ ইতি। অত্র দন্ত্যপদেন কেবলদন্ত্যো গৃহ্যতে, ন তু দন্ত্যোষ্ঠজোঽপি, ষ্বক্কাদীনাং পৃথগ্গ্রহণাজ্জ্ঞাপকাৎ। অন্যথা দন্ত্যপরকত্বাদেব সিদ্ধে ষ্বক্কাদিগ্রহণং ব্যর্থং স্যাদিতি ভাবঃ।

(১৩) **ক্রাদীনাং চতুর্ণাং গ্রহণং নিয়মার্থম্।** (**ভ্বাদি-প্রকরণম্**)

'কৃস্ভৃবৃস্তুদ্রুস্রুশ্রুবো লিটি' ইতি সূত্রস্যায়মর্থঃ—এভ্যো লিট্ ইণ ন স্যাদিতি। নন্ন 'একাচ উপদেশেঽনুদাত্তাৎ' ইতি 'শ্র্যুকঃ কিতি' ইতি চ সিদ্ধে কিমর্থমিদং সূত্রমিত্যত আহ—ক্রাদীনামিতি। নন্ন 'কৃস্ভৃ' এষাং ত্রয়াণামনুদাত্তত্বাৎ 'একাচ উপদেশেঽনুদাত্তাৎ' ইত্যনেন বৃঞ উদাত্তত্বাৎ 'শ্র্যুকঃ কিতি' ইত্যনেন থলোঽকিত্বাৎ 'শ্র্যুকঃ কিতি' ইত্যস্যাপ্রবৃত্ত্যা 'ববর্থ' ইতি বেদে নির্দেশাচ্চ সর্বত্রৈবেণ্ নিষেধে সিদ্ধে চতুর্ণাং গ্রহণং ব্যর্থং সৎ 'একাচ উপদেশেঽনুদাত্তাৎ' ইতি প্রকৃত্যাশ্রয়েণ 'শ্র্যুকঃ কিতি' ইতি প্রত্যয়াশ্রয়েণ চ লিটি ইণ্ নিষেধশ্চেত্তর্হি ক্রাদিভ্যশ্চতুর্ভ্য এবেতি নিয়ময়তি। বৃঞস্তু বেদে এবে'তি চ। তেনান্যেষাং ধাতূনাং লিটি ইট্, লোকে 'ববরিথ' ইতি চ ফলদ্বয়ং সিধ্যতি। স্তুদ্রুস্রুশ্রুবাং গ্রহণং তু থলি ভারদ্বাজনিয়মপ্রাপিতস্য বমাদিষু-ক্রাদিনিয়মপ্রাপিতস্য চেটো নিষেধার্থম্। বমাদিষু ক্রাদিনিয়মেন প্রাপ্তস্যেডাগমস্য নিষেধার্থঞ্চেতি বিধ্যর্থমেব। তথাহি—ক্রাদিনিয়মাৎ ক্রাদ্যন্যেষাং ধাতূনাং লিটি ইট্ প্রাপ্তৌ অজন্তানাম্ 'অচস্তাস্বৎথল্যনিটো নিত্যম্' ইত্যনেন থলি ইণ্ নিষেধে সিদ্ধে 'ঋতো ভারদ্বাজস্য—' ইতি সূত্রং ব্যর্থং সৎ অজন্তানাম্ অকারবতাঞ্চ থলি ইণ্ নিষেধশ্চেত্তর্হি ঋদন্তানামেবেতি সামান্যাপেক্ষয়া নিয়ামকম্। তেন থলি ঋদন্তাদন্যেষাং ধাতূনাং ভারদ্বাজমতেন ইটি, অন্যেষাম্ আচার্যাণাং মতে ইডভাবে চ পেচিথ, পপক্থ, বিবয়িথ, বিবেথ ইত্যাদিস্থলেষু দ্বে দ্বে রূপে সিধ্যতঃ। ন চ ভারদ্বাজনিয়মেন স্তাদীনামপি থলীট্ স্যাদিতি বাচ্যম্। 'অনন্তরস্য বিধির্বা ভবতি প্রতিষেধো বা' ইতি পরিভাষয়া 'অচস্তাস্বৎথল্যনিটো নিত্যম্' 'উপদেশেঽত্বত' ইতি সূত্রদ্বয়েন প্রাপ্তস্যৈব ইণনিষেধস্য ভারদ্বাজনিয়-মস্য নিবর্তকত্বাৎ। ক্রাদিনিয়মেন স্তাদিগ্রহণম্ 'অচস্তাস্বৎ' ইতি 'উপদেশেঽত্বতঃ' ইতি সূত্রদ্বয়ঞ্চ ইণ্ নিষেধার্থং বর্ততে। তথা চ—

ভারদ্বাজনিয়মেন ঋদন্তাতিরিক্তধাতুষু সূত্রদ্বয়ং ন প্রবর্ততে, তথৈব ত্বাদিগ্রহণমপি ন প্রবর্ত্ততামিতি ন শক্যম্। 'অনন্তরস্য' ইতি ন্যায়াদিত্যলম্।

(১৪) ***সংজ্ঞায়াঃ কার্যকালত্বাদঙ্গং যত্র দ্বিরুচ্যতে। তত্রৈব দীর্ঘঃ সন্বচ্চ নানেকাচ্ক্ত্বিতি মাধবঃ॥***

'সন্বল্লঘুনি চঙ্পরেঽনগ্লোপে' ইত্যত্র 'দীর্ঘো লঘো' রিত্যত্র চ যন্মতদ্বয়ং সংক্ষেপাদুপন্যস্তং তস্যৈব প্রপঞ্চার্থমাহ—সংজ্ঞায়াঃ কার্যকালত্বাদিতি। শাস্ত্রেঽস্মিন্ পক্ষদ্বয়ং বিদ্যতে—'যথোদ্দেশং সংজ্ঞাপরিভাষম্', কার্যকালং সংজ্ঞাপরিভাষমিতি। যদ্যপি মূলতঃ কার্যকারিত্বমুভয়োঃ সমানমেব তথাপি অস্তি কশ্চিদ্বিশেষঃ। তত্র পূর্বস্যার্থঃ—উদ্দেশ্যমনতিক্রম্য যথোদ্দেশম্। সংজ্ঞাঃ পরিভাষাশ্চ যত্র যত্রাস্মিন্ শাস্ত্রে উপদিশ্যন্তে তত্র তত্রৈব তেষামুপস্থিতিঃ দ্রষ্টব্যা নান্যত্রেতি। কার্যকালমিত্যস্যার্থস্তু সংজ্ঞাঃ পরিভাষাশ্চ তত্তৎকার্যেণ তত্র তত্র (কার্যপ্রদেশে) কাল্যন্তে সন্নিধিং প্রাপ্যন্তে সন্নিধাপ্যন্তে ইতি। তেন পূর্বপক্ষে সংজ্ঞাপরিভাষাণামর্থস্যৈবোপস্থিতি র্ন তু তত্তৎসংজ্ঞাপরিভাষাবিধায়কসূত্রাণাম্। কার্যকালপক্ষে তু তেষামেবেতি ভেদঃ। তত্র কার্যকালপক্ষপাতিমাধবমতং তাবদ্ব্যাচষ্টে। 'সন্বল্লঘুনি—' 'দীর্ঘো লঘোঃ' ইতি সূত্রদ্বয়ে অঙ্গস্যেতি অভ্যাসস্যেতি চানুবর্ত্তেতে। তেনাঙ্গস্য যে দ্বে তয়োঃ পূর্বোঽভ্যাসসংজ্ঞকঃ তস্যেতি ফলিতম্। দ্বে ইত্যত্র চ উচ্চারণে ইতি বিশেষ্যসমর্পকমধ্যাহ্রিয়তে। তদ্যোগাদ-ঙ্গস্যেতি কর্মণি ষষ্ঠী। তেন যত্র কৃৎস্নমঙ্গং দ্বিরুচ্যতে ন তু তদেকদেশমাত্রং তত্রৈব পূর্বস্য দীর্ঘসন্বদ্ভাবৌ স্ত ইতি। যথা—অচীকরোৎ, অপীপচৎ ইত্যাদি। এবঞ্চাঙ্গস্য একাচ্কত্বে সত্যেব তয়োঃ প্রবৃত্তিঃ, নত্বনেকাচ্কেষু চকাস্ত্যর্থাপয়ত্যূর্ণোত্যাদিষু। অত্র ণ্যন্তেভ্য এভ্যশ্চঙি কৃৎস্নমঙ্গং ন দ্বিরুচ্যতে, অপি তু হলাদেঃ প্রথমাবয়বোঽজাদেস্তু দ্বিতীয়াবয়বো দ্বিরুচ্যতে। অতএব 'চকাস্ৎদীপ্তৌ'

ইত্যস্মাদ্ ণিজন্তাল্লুঙি অচচকাসদিত্যেব রূপম্, কৃৎস্নস্যাঙ্গস্য দ্বিরুচ্চারণাভাবাৎ। কিন্তু অর্থমাচষ্টে ইত্যর্থে অর্থশব্দাৎ ণিচি 'অর্থবেদয়োরাপুগ্ বক্তব্যঃ' ইতি আপুগাগমে অর্থাপি—ধাতোঃ লুঙি চঙি 'চঙী'তি দ্বিতীয়স্যৈকাচঃ অপ্ ইত্যস্য দ্বিত্বে অভ্যাসকার্যে আর্তথপৎ ইত্যেব। অত্রাপি দীর্ঘসন্বদ্ভাবৌ ন, অঙ্গাবয়বস্য দ্বিরুচ্চারণাৎ। উর্ণুধাতোশ্চ ণিজন্তাল্লুঙি নুশব্দস্যৈব দ্বিত্বে দীর্ঘাভাবে ঔর্ণুনবদিত্যেবং রূপম্। তদুক্তং শ্লোকদ্বয়েন—সংজ্ঞায়াঃ কার্যকালত্বাদিত্যাদিনা। ভট্টোজিদীক্ষিতেন তু বস্তুতঃ অনেন স্বমতং প্রদর্শিতম্।

### (১৫) *'অস্তিসিচোঽপৃক্তে' ইত্যস্য ব্যাখ্যানং সূত্রকারস্য সম্মতং ন বা।*

সূত্রমিদং দ্বিধা ব্যাখ্যানসহম্। প্রাচীনাশ্চ অত্র-অস্তি চ সিচ্চেতি সমাহারদ্বন্দ্বে অস্তিসিচ্ তস্মাদিতি বিগ্রহঃ। অত্র সমাসান্তবিধেরনিত্যত্বাৎ (দ্বিত্রিভ্যাং পাদ্দন্মূর্ধসু বহুব্রীহাবিতি জ্ঞাপকাৎ সমাসান্তবিধেরনিত্যত্বং সূচ্যতে) 'দ্বন্দ্বাচ্চুদষহন্তাৎ সমাহারে' ইতি টচ্ ন। পূর্বনিপাতপ্রকরণস্যাপি অনিত্যত্বাৎ (সমুদ্রাভ্রাদ্ ঘঃ ইতি জ্ঞাপকম্) অল্পাচ্তরম্ ইতি সিচ্শব্দস্য পূর্বপ্রয়োগো ন। তেন অস্তিসিচ ইতি পঞ্চম্যন্তং পদম্। 'ব্রুব ঈট্' ইত্যতঃ ঈডিত্যনুবর্ততে। 'উতো বৃদ্ধির্লুকি হলি' ইত্যতো হলীত্যনুবর্ততে। তচ্চ ষষ্ঠ্যন্তেন বিপরিণম্যতে। 'তস্মাদিত্যুত্তরস্য' ইতি পরিভাষয়া অস্তিসিচ ইতি পঞ্চমী অপৃক্তস্যেতি ষষ্ঠী প্রকল্পয়তি। ততশ্চ অস্তেঃ সিচশ্চ পরস্যাপৃক্তস্য হল ঈডাগমঃ স্যাদিত্যর্থ ইতি ব্যাচক্ষতে। তেন—'অস্তেরঙ্গাৎ সিচশ্চ পরস্য অপৃক্তস্য ঈডাগমঃ স্যাদি'তি কাশিকা। পরন্তু নৈতদ্ব্যাখ্যানং সম্যক্। যতোঽস্মিন্ মতে কৃতভূভাবাদ্ অস্ধাতোঃ সিচো লুক্যপি ভূধাতোশ্চ স্থানিবদ্ভাবেন অস্ধাতুত্বং সিচঃ পরত্বঞ্চাশ্রিত্য ততঃ পরস্যাপৃক্তহলঃ অভূদিত্যাদৌ ঈট্ প্রসজ্যেত। তথা—অগাৎ, অস্থাৎ ইত্যাদাবপি 'গাতিস্থাঘুপাভূভ্যঃ সিচঃ পরস্মৈপদেষু' ইত্যনেন

সিচো লুক্যপি স্থানিবত্ত্বেন সিচঃ পরত্বাদীডাগমঃ দুর্বারঃ স্যাৎ। তস্মাদ্ব্যাখ্যান্তরমাশ্রিয়তে দীক্ষিতপাদৈঃ। তথাহি সিচ্চ অস্ চেতি সমাহারদ্বন্দ্বঃ। সিচ্ছব্দস্য সৌত্রং ভত্বমাশ্রিত্য পদত্বাভাবাৎ চোঃ কুরিতি কুত্বং ন। ন চ সিচস্‌শব্দে অসিত্যনেনৈবাস্তে র্লাভাদস্তিগ্রহণং ব্যর্থমিতি বাচ্যম্, লুপ্তসুব্‌বিভক্তিকস্যাস্তীতি তিঙন্তপ্রতিরূপকাব্যয়স্য গ্রহণেন তস্যৈব কর্মধারয়ে সতি সার্থক্যাৎ। ততঃ পরস্যাঃ পঞ্চম্যাঃ সুপাং সুলুগিত্যাদিনা সৌত্রো লুক। 'উতো বৃদ্ধির্লুকি হলি' ইত্যতোঽনুবৃত্তস্য হলীত্যস্য ষষ্ঠ্যা বিপরিণামঃ। তস্মাদ্—বিদ্যমানাৎ সিচোঽস্তেশ্চ পরস্যাপৃক্তস্য হল ঈডাগমঃ স্যাদিত্যর্থো ভবতীতি সমালোচনাকুশলা ব্যাচক্ষতে। তেন অভূদিত্যত্র সিচো 'গাতিস্থা—'ইত্যাদিনা লুপ্তত্বাদ্ বিদ্যমানত্বাভাবাৎ ততঃ পরস্যাপৃক্তহল ইট্‌ ন। কৃতভূভাবস্য অস্তেশ্চ অস্তের্বিদ্যমানত্বাভাবাত্ততঃ পরস্যাপৃক্তস্য হল ইট্‌ন ভবতীতি বোধ্যম্। অস্যোদাহরণানি চ আসীৎ অসৈপ্‌সীত ইত্যাদীনি বোধ্যম্। অপৃক্তে কিম্? এধিষ্ঠ ইতি। (এধ্‌+লুঙ্‌ত)। অত্র তকারস্য হল্‌ত্বে অপি সিচঃ পরত্বেঽপি চ অপৃক্তত্বাভাবাদীডাগমো ন।

**(১৬) *উপধাকার্যং হি দ্বিত্বাৎপ্রবলম, ওণেশ্চর্দিৎকরণস্য সামান্যাপেক্ষজ্ঞাপকত্বাৎ।* (*সন্‌প্রকরণম্‌*)**

ইষ্‌ধাতোঃ সনি ইটি কৃতে হলাদিত্বাভাবেন 'রলো ব্যুপধ্যাদ্ বলাদেঃ সংশ্চ' ইত্যনেন কিত্বাভাবাদ্‌গুণে 'এষ্‌ ইস্' ইতি স্থিতে 'অজাদের্দ্বিতীয়স্য' ইতি 'ষিস্' ইত্যস্য দ্বিত্বে অভ্যাসসংজ্ঞায়াং হলাদিশেষে সনঃ সকারস্য ষত্বে সন্নন্তস্য ধাতুত্বাল্লটি তিপি শপি পররূপে 'এষিষিষতি' ইতি রূপম্। ননু ইহ সত্যপি কিত্বে নিত্যত্বাৎ পরমপি গুণং বাধিত্বা 'ষিস্' ইত্যস্য দ্বিত্বে ধাত্ববয়বস্য ইকারস্য উপধাত্বাভাবাদেব গুণাপ্রসক্তেঽর্লাদেরিতি ব্যর্থমিতি চেন্ন, ইহ নিত্যমপি দ্বিত্বং গুণেন বাধ্যতে। কুত ইত্যত আহ—উপধাকার্যং হি দ্বিত্বাৎ প্রবলমিতি। তচ্চ কুত ইত্যত আহ—ওণেশ্চর্দিৎকরণস্য

সামান্যাপেক্ষজ্ঞাপকত্বাদিতি। তথাহি—ওণ্‌ধাতোঃ ণ্যন্তাল্লুঙি 'ণৌ চঙ্‌্যুপধায়া হ্রস্বঃ' ইতি হ্রস্বস্য 'নাগ্‌লোপিশাস্বৃদিতাম্' ইতি নিষেধে সতি 'ওণি অৎ' ইতি স্থিতে 'ণি' ইত্যস্য দ্বিত্বে 'মা ভবানোণিণৎ' ইতি রূপম্, অত্র উপধাহ্রস্বনিষেধার্থমোণেঃ ঋদিৎকরণম্। উপধাহ্রস্বে কৃতে তু 'উণ্ ই অৎ' ইতি স্থিতে 'ণি' শব্দস্য দ্বিত্বে মা ভবানুণিণদিতি রূপম্। ওকারো ন শ্রূয়েত ইতি স্থিতিঃ। যদি তু নিত্যত্বাদুপধাহ্রস্বাৎ প্রাগেব 'ওণ্ ই অৎ' ইতি দশায়াং দ্বিত্বং স্যাৎ, তদা ওকারস্যোপধাত্বাভাবাদেব হ্রস্বাপ্রসক্তেস্তন্নিষেধার্থম্ ঋদিৎকরণমনর্থকং স্যাৎ। তস্মাদুপধাহ্রস্বাত্মকম্ উপধাকার্যং দ্বিত্বাৎ প্রবলমিতি বিজ্ঞায়তে।

## (১৭) *নিবৃত্তপ্রেষণাদ্ধাতোঃ প্রাকৃতেঽর্থে ণিজিষ্যতে।*

( ণিচ্‌প্রকরণম্ )

ননু 'প্রার্থয়ন্তি শয়নোত্থিতং প্রিয়াঃ' ইতি মাঘকাব্যে প্রার্থয়ন্তীতি ন চৌরাদিকস্বার্থিকণিজন্তম্। তস্যাগর্বীয়তয়া আত্মনেপদপ্রসঙ্গাৎ। নাপি হেতুমণ্ণ্যন্তম্। স্বাভীষ্টং যাচতে ইত্যর্থে তদসংভবাৎ। নহি প্রযোজকব্যাপারাভাবে তৎপ্রবৃত্তিরস্তীত্যত আহ—নিবৃত্তপ্রেষণাদ্ধাতোরিতি। নিবৃত্তং প্রেষণং যস্মাৎ স নিবৃত্তপ্রেষণঃ—সম্প্রতি অবিবক্ষিতপ্রেষণ ইত্যর্থঃ। তস্মাদ্ধাতোঃ ভূতপূর্বগত্যা প্রেষণমাদায় হেতুমণ্ণৌ কৃতে শুদ্ধেন ণিজ্‌বিহিতেন ধাতুনা তুল্যোঽর্থঃ প্রতীয়তে ইত্যর্থঃ। তদুক্তম্—'নিবৃত্তপ্রেষণাদ্ধাতোঃ প্রাকৃতেঽর্থে ণিজিষ্যতে' ইতি। ইদঞ্চ 'ণেরণৌ' ইতি সূত্রে ভাষ্যে স্পষ্টম্।

প্রার্থয়ন্তি শয়নোত্থিতং প্রিয়া ইত্যত্র প্রার্থনাং কুর্বন্তীতি বিবক্ষিতার্থে প্রয়োগঃ সিদ্ধঃ ইতি ভাবঃ। বয়স্যাঃ প্রেরয়ন্তীতি বয়স্যাঃ প্রিয়াভিঃ প্রার্থয়ন্তীতি দশায়াং সখ্যা ব্যাপারত্যাগে যাদৃশোঽর্থঃ শুদ্ধার্থধাতো র্ভবতি তাদৃশোঽর্থঃ ণ্যন্তে সত্যপি ভবতি। ইত্থঞ্চ প্রিয়া

যৌবনেন লজ্জাং বিহায় স্বস্বভর্তারং পুনরাগমনায় স্বয়মেব প্রার্থয়ন্তীতি বাক্যার্থো ভবতীত্যলম্।

**(১৮) 'যকারবকারান্তানাং তুঠ্ ভাবিনাং যঙ্লুক্ নাস্তি' ইতি 'চ্ছ্বোঃ'—ইতি সূত্রে ভাষ্যে ধ্বনিতম্। (যঙ্লুক্-প্রকরণম্)।**

'চ্ছ্বোঃ শূড্'—ইতি সূত্রে কিদ্গ্রহণমনুবর্ততে ন বেতি বিচারে ভাষ্যকৃতা—"যদি কিদ্গ্রহণমনুবর্ততে তদা প্রষ্টা, প্রষ্টুমিত্যাদৌ 'চ্ছ্বোরি'তি সূত্রাপ্রবৃত্তৌ ষত্বার্থং 'ব্রশ্চে'তি সূত্রে ছকারগ্রহণং কর্তব্যম্। অথ চ যদি নানুবর্ততে তদা পূর্বোক্তসূত্রেণ শস্য ছত্বে শান্তত্বাদেব ষত্বসিদ্ধৌ 'ব্রশ্চে'তি সূত্রে ছকারগ্রহণং ন কর্তব্যং ভবতীত্যেতাবানেব বিশেষঃ ইত্যভিহিতম্। এবং হি বদতা ভাষ্যকৃতা 'উঠ্ভাবিভ্যো যঙ্লুঙ্ নাস্তি' ইত্যুক্তপ্রায়ম্। অন্যথা দিবের্যঙ্লুকি ঈডভাবপক্ষে দেদেতি দেদেষি ইত্যাদৌ উঠো ভাবাভাবাভ্যাং মহান্ বিশেষঃ স্যাৎ। অথ চ যদি কিদ্গ্রহণস্য নানুবৃত্তিস্তদা তু বস্য উঠি দেদ্যোতি দেদ্যোষি ইত্যাদি রূপম্। ততশ্চৈতাবানেবেত্যেবকারো বিরুধ্যেত। অত উঠ্ভাবিনাং যকারবকারান্তানাং যঙ্লুক্ নাস্তীতি বিজ্ঞায়তে। 'চ্ছ্বোঃ' ইতি সূত্রেণ যত্র উঠ্ প্রবর্ততে তদ্বিষয়কমেব ইদম্ উক্তং জ্ঞাপনমিত্যর্থঃ।

**(১৯) শৈষিকান্মতুবর্থীয়াচ্ছৈশিকো মতুবর্থিকঃ।**
**সরূপঃ প্রত্যয়ো নেষ্টঃ সন্নন্তান্ন সনিষ্যতে॥**

শেষাধিকারে বিহিতঃ শৈষিকঃ। ভবার্থে অধ্যাত্মাদিত্বাৎ ঠঞ্। শৈষিকাৎ শেষাধিকারভবপ্রত্যয়ান্তাদিত্যর্থঃ। শৈষিকাৎ সরূপঃ শৈষিকপ্রত্যয়ো ন। তেন শালায়াং ভবঃ শালীয়ঃ, 'বৃদ্ধাচ্ছঃ' ইত্যনেন ছপ্রত্যয়ঃ। শালীয়ে ভবঃ ইতি বাচ্যমেব ন তু ছান্তাচ্ছঃ। কিন্তু বিরূপস্তু স্যাদেব। তেন অহিচ্ছত্রে ভবঃ আহিচ্ছত্রঃ। আহিচ্ছত্রে ভব আহিচ্ছত্রীয়ঃ।

অণন্তাৎ ছপ্রত্যয়ঃ স্যাদেব। তথা মত্বর্থাৎ সরূপো মত্বর্থীয়ো ন। তেন ধনমস্যাস্তীতি ধনবান্, ধনবান্ অস্যাস্তীতি বিগ্রহে বাক্যমেব। মতুবন্তাৎ মতুপ্ ন। বিরূপস্তু স্যাদেব। দণ্ডমস্যাস্তীতি দণ্ডিন্, দণ্ডী অস্যা অস্তীতি দণ্ডিমতী শালা। ইহ মতুবন্তাৎ ইন্প্রত্যয়ো ভবত্যেব। সাদৃশ্যমর্থদ্বারাপি গৃহ্যতে। তেন গন্তুমিচ্ছতীতি— জিগমিষতি, জিগমিষিতুমিচ্ছতীতি বিগ্রহে ইচ্ছাসন্নন্তাৎ ইচ্ছাসন্ ন। অতো বাক্যমেব। স্বার্থসন্নন্তাত্তু ইচ্ছাসন্ স্যাদেব। তেন জুগুপ্সীসতে ইত্যাদৌ স্বার্থসন্নাৎ ইচ্ছাসন্ স্যাদেব।

(২০) *'আচারেঽবগল্ভক্লীবহোড়েভ্যঃ কিব্ বা।'*

( নামধাতু-প্রকরণম্)

বার্ত্তিকমিদম্। 'গল্ভ ধার্ষ্ট্যে' অবপূর্বঃ, 'ক্লীবৃ অধার্ষ্ট্যে', 'হোড়ৃ অনাদরে' এভ্যঃ পচাদ্যচি অবগল্ভাদিশব্দাস্ত্রয়ো নিষ্পন্নাঃ। তথা চ অবগল্ভ ইবাচরতি, ক্লীব ইবাচরতি, হোড ইবাচরতি ইত্যর্থে অবগল্ভাদিশব্দেভ্যঃ কিপ্ ক্যঙৌ ইতি স্থিতম্। বাগ্রহণাৎ ক্যঙ্। বার্ত্তিকেঽস্মিন্ অবগল্ভাদয়ঃ পচাদ্যজন্তাঃ। কিপ্ সংনিযোগেন অনুদাত্তত্বমনুনাসিকত্বং চাচ্ প্রত্যয়স্য প্রতিজ্ঞায়তে। ততশ্চ তস্য ইৎসংজ্ঞায়াং লোপে চ অনুদাত্তেত্ত্বাদাত্মনেপদং লভ্যতে। ন চাত্র ক্বিপ্ প্রত্যয়সন্নিযোগেন অচ্ প্রত্যয়স্যানুনাসিকত্বাদিনিপাতনাদ্ গল্ভাদিঘটকাকারস্য লোপেঽনেকাচ্ ত্বাভাবেন 'অবগল্ভাঞ্চক্রে' ইত্যত্র আম্ ন স্যাদিতি বাচ্যম্. 'সাম্প্রতিকাভাবে ভূতপূর্বগতিরাশ্রীয়তে' ইতি পরিভাষয়া আম্প্রত্যয়স্য সিদ্ধত্বাৎ। উক্তবচনে প্রমাণঞ্চ— 'আচারেঽবগল্ভ' ইতি প্রকৃতবার্ত্তিকমেব। ন চ আচারেঽর্থে অবগল্ভতে, ক্লীবতে, হোড়তে ইত্যাদৌ আত্মনেপদার্থং বার্ত্তিকং সার্থকমিতি বাচ্যম্, 'ধাতূনামনেকার্থাঃ' ইতি বচনেন প্রত্যয়রহিত-গল্ভাদিধাতোরপ্যাচারে অর্থে শক্তিপ্রদর্শনাৎ 'অবগল্ভতে' ইত্যাদৌ তঙঃ ( আত্মনেপদস্য ) সিদ্ধত্বাৎ। বার্ত্তিকে অবেত্যুপসর্গবিশিষ্টপাঠাৎ

কেবলাদুপসর্গান্তরবিশিষ্টাচ্চ ক্যঙ্ এব ভবতীতি মাধবাদয়ঃ। পরঞ্চ ক্যঙ্‌ক্বিপো র্নাস্তি বিবাদো দ্বাভ্যামপি ভাব্যম্। কিন্তু অবো-পসর্গরহিতগল্‌ভাদিভ্যঃ ক্বিপি সতি পরস্মৈপদমেব স্যাৎ, নত্বাত্মনে-পদমিত্যেব বক্তুং যুক্তম্। বার্ত্তিকস্য মুখ্যপ্রয়োজনং প্রয়োগে আম্‌প্রত্যয়স্য সিদ্ধিঃ। আত্মনেপদং তু গৌণফলমিতি দিক্।

(২১) *উপসর্গসমানাকারং পূর্বপদং ধাতুসংজ্ঞাপ্রযো-জকে প্রত্যয়ে চিকীর্ষিতে পৃথক্ ক্রিয়তে।* (নামধাতুপ্রকরণম্)

যুদ্ধে যোঽয়ং গ্রামশব্দ ইতি ব্যাখ্যানেন কেবলগ্রামশব্দস্য যুদ্ধে শক্ত্যভাবাৎ সংগ্রামশব্দস্য লাভাৎ 'তৎকরোতি' ইত্যাদিনা সঙ্‌গ্রাময়তে ইত্যাদিসিদ্ধৌ চুরাদৌ 'সংগ্রাম যুদ্ধে' ইতি সংবিশিষ্টগ্রামশব্দো ব্যর্থীভূয় 'উপসর্গসমানাকারম্' ইত্যাদিবচনং জ্ঞাপয়তি। তেন স্বমনায়ত ইত্যাদৌ সুপসর্গস্য পৃথক্‌করণং ফলং ভবতি। অথ চ জ্ঞাপকস্য সজাতীয়াপেক্ষত্বেন যত্রোপসর্গস্য সম্পূর্ণরূপেণ স্থিতি স্তত্রৈব পৃথক্‌করণং ভবতি, যত্র তু গুণাদেশেন উপসর্গস্যাপহরণং ভবতি তত্র পৃথক্‌করণং ন ভবতি। ততশ্চ ওঢ়ঃ ইব আচর্যেতি 'ওঢ়ায়িত্বা' ইত্যত্র আঙঃ পৃথক্‌করণাভাবেন অব্যয়পূর্বপদত্বাভাবাৎ 'উন্মনায্য' 'অবগল্‌ভ্য' ইতিবৎ ল্যপ্ ন ভবতীতি ফলম্। জ্ঞাপকস্য বিশেষাপেক্ষত্বে 'উস্যোমাঙ্‌ক্ষ্বাটঃ প্রতিষেধো বক্তব্যঃ' ইতি বার্ত্তিকং তৎপ্রত্যাখ্যানপরকম্—'আটশ্চ' ইতি সূত্রে চকারগ্রহণং ন মানম্। অন্যথা 'ঔটীয়ৎ' ইত্যাদৌ ধাতুসংজ্ঞায়াং কর্ত্তব্যায়াম্ আঙঃ পৃথক্‌করণেন 'ওমাঙোশ্চ' ইতি সূত্রাপ্রবৃত্তৌ বার্ত্তিকং ব্যর্থমেব। এবঞ্চ পররূপাদি-কার্যাপ্রবৃত্তৌ পুনর্বৃদ্ধিবিধানার্থং চকারগ্রহণমপি ব্যর্থম্। 'আটশ্চ' ইতি সূত্রে চকারগ্রহণং 'আটশ্চ' ইতি বৃদ্ধিবিষয়ে যৎ যৎ কার্যং প্রাপ্নোতি তৎসর্বং নিবারয়তি ইতি চকারগ্রহণেনৈব পররূপং ন স্যাদিতি বার্ত্তিকং নিষ্প্রয়োজনমিতি ভগবতা ভাষ্যকারেণ প্রত্যাখ্যাতম্।

**(২২) সার্বধাতুকম্ ইতি আর্ধধাতুকমিতি চ সংজ্ঞয়োঃ কিং বীজম্ ?**

'তিঙ্‌শিৎ সার্বধাতুকম্' ইতি সার্বধাতুকস্য সংজ্ঞা। তিঙঃ শিতশ্চ প্রত্যয়াঃ সার্বধাতুকসংজ্ঞা ভবন্তি। তিপ্ ইত্যতঃ মহিঙন্তাঃ প্রত্যয়াঃ তিঙ্‌পদেন উক্তাঃ। শ্ ইৎ যেষাং তে শিতঃ। শপ্‌শ্নন্ শত্রাদ্যাঃ প্রত্যয়াঃ শিতঃ। অত্রেদমবধেয়ম্—লকারেষু লট্-লোট্-লঙ্-বিধিলিঙঃ সার্বধাতুকসংজ্ঞাঃ। সূত্রস্যাস্য ব্যাখ্যানকালে দীক্ষিতেন 'ধাত্বধিকারোক্তা' ইত্যুক্তম্। তস্য গ্রহণং কিমর্থম্ ? সুবধিকারোক্তাঃ শস্‌প্রভৃতয়ঃ সার্বধাতুকসংজ্ঞাঃ ন ভবন্তি ইত্যর্থম্। তেন হরীন্ ইত্যত্র শসঃ সার্বধাতুকত্বং ন। নয়তি স্বপিতি ইত্যাদীনি সার্বধাতুকস্য উদাহরণানি। সার্বধাতুকপ্রদেশাঃ 'সার্বধাতুকে যক্'ত্যেবমাদয়ঃ।

'আর্ধধাতুকং শেষঃ' ইত্যনেন আর্ধধাতুকস্বরূপম্ অভিহিতম্। তিঙঃ শিতশ্চ বর্জয়িত্বা অন্যঃ প্রত্যয়ঃ শেষো ধাত্বধিকারোক্তঃ প্রত্যয় আর্ধধাতুসংজ্ঞো ভবতি। তিঙ্‌শিদ্‌ভ্যোঽন্যে ধাত্বধিকারোক্তাঃ প্রত্যয়া লিট্-লৃট্-লুট্-লৃঙ্-প্রভৃতয়ঃ আর্ধধাতুকসংজ্ঞাঃ. উদাহরণং যথা—ভবিতা ইতি। লুটঃ আর্ধধাতুকত্বাৎ 'আর্ধধাকস্যেড্‌বলাদেঃ' ইত্যনেন ইট্ প্রাপ্নোতি। 'আর্ধধাতুকং শেষঃ' ইতি সূত্রে দীক্ষিতব্যাখ্যায়াং 'ধাত্বধিকারোক্তঃ' ইত্যত্র 'ধাতোরিতি বিহিতঃ' ইত্যপি পাঠো দৃশ্যতে। তত্রায়মর্থঃ—যত্র যত্র সূত্রে ধাতোরিতি উচ্চার্যতে তত্র তত্র তাদৃশস্য ধাতোরার্ধধাতুকসংজ্ঞা ভবতি ইতি। তথা চ—'ধাতোঃ কর্মণঃ সমানকর্তৃকাদিচ্ছায়াং বা' ইত্যত্র ধাতোরিত্যুচ্চার্য বিধানাৎ সন আর্ধধাতুকত্বম্ ইট্ চ ভবতি। কিন্তু 'গুপ্‌তিজ্‌কিদ্‌ভ্যঃ সন্' ইত্যত্র ধাতোঃ ইত্যুচ্চার্য বিধানাভাবাৎ অত্র সন আর্ধধাতুকত্বম্ ইড়াগমশ্চ ন।

'লিট্ চ' ইতি সূত্রাৎ লিডাদেশস্তিঙার্ধধাতুকসংজ্ঞো ভবতি। সার্বধাতুকসংজ্ঞায়া অপবাদোঽয়ম্। যথা—পেচিথ, শেকিথ ইতি।

'লিঙাশিষি' ইতি সূত্রাৎ আশিষি বিষয়ে যো লিঙ্ স আর্ধধাতুক-সংজ্ঞো ভবতি। অয়মপি সার্বধাতুকসংজ্ঞায়া অপবাদঃ।

'ছন্দস্যুভয়থা' ইত্যস্মাৎ সূত্রাৎ ছন্দসি বিষয়ে উভয়থা ভবতি, সার্বধাতুকমার্ধধাতুকং চ। অত্র কাশিকা—কিং লিঙেবানন্তরঃ সংবধ্যতে? নৈতদস্তি, সর্বমেব প্রকরণমপেক্ষ্যৈতদুচ্যতে—তিঙ্-শিদাদি ছন্দস্যুভয়থা ভবতীতি।

(২৩) ***তেষাং ক্রিয়াসামান্যবাচিত্বাদাম্প্রকৃতীনাং বিশেষবাচিত্বাত্তদর্থয়োরভেদান্বয়ঃ। সম্পদিস্তু প্রত্যাহা-রেঽন্তর্ভূতোঽপি অনন্বিতার্থত্বান্ন প্রযুজ্যতে।*** (ভ্বাদিপ্রকরণম্)

'কৃঞ্চানুপ্রযুজ্যতে লিটি' ইতি সূত্রে কৃঞগ্রহণসামর্থ্যাৎ কৃভ্বস্তীনাং লাভঃ। ননু অনুপ্রযুজ্যমানানাং কৃভ্বস্তীনাম্ আম্প্রকৃতিভূতানাঞ্চ কথমন্বয়ঃ উভয়েষাং ভিন্নার্থকত্বাৎ ইত্যত আহ—তেষামিত্যাদিনা। কৃভ্বস্তয়ো হি ক্রিয়াসামান্যবাচিনঃ। ডুকৃঞ করণে, ভূ সত্তায়ামিত্যাদি-রূপবিশিষ্টার্থকা অপি তে অন্যেষামপি ধাতূনামর্থং প্রকাশয়ন্তি। যথা, পাতীত্যত্র পানং করোতীতি। তেন এতে ক্রিয়াসামান্যবাচিনঃ। যস্য যস্য ধাতোঃ (ক্রিয়ায়াঃ) অনু প্রযুজ্যন্তে তস্য তস্যৈবার্থস্য উপকরোতি ইতি ভাবঃ। অতএব সামান্যবিশেষয়োরভেদান্বয়স্য ন্যায্যত্বাৎ কৃভ্বস্তীনাম্ এধামিত্যনেন অভেদেনান্বয়ঃ। অত্র কৃঞাদয়ঃ সামান্যার্থকাঃ এধামিত্যাদয়স্তু বিশেষার্থকা ইতি।

ননু 'কৃভ্বস্তিযোগে' ইত্যস্য 'কৃঞো দ্বিতীয়—' ইত্যস্য চ সূত্রস্য মধ্যে 'অভিবিধৌ সংপদা চ' ইতি পঠিতম্। এবঞ্চ কৃঞ্প্রত্যাহারে সংপদোঽপি কুতো ন গ্রহণমিত্যত আহ—সম্পদিস্ত্বিতি। সিদ্ধস্য বস্তুনো রূপান্তরাপত্তিঃ সম্পদেরর্থঃ। এধাদিধাতোস্তু আম্-প্রকৃতিভূতস্য বৃদ্ধ্যাদিরর্থঃ। তয়োরুভয়োরপি বিশেষরূপত্বেন সামান্যবিশেষভাবেন অভেদান্বয়াসংভবাদিত্যর্থঃ। অতএব 'কৃভ্বস্তীনাং গ্রহণম্' ইতি ভাষ্যং সংগচ্ছত ইতি ভাবঃ।

# পদসাধনানি ঃ—

**ভবতি**—সত্তার্থকস্য ভূ ইত্যস্য 'ভূবাদয়ঃ ধাতবঃ' ইতি ধাতুসংজ্ঞায়াং ধাতুত্বাৎ' বর্তমানে লট্' ইতি লট্লকারে টকারস্য 'হলন্ত্যম্' ইত্যনেন ইৎসংজ্ঞায়াম্ অকারস্য 'উপদেশেঽজনুনাসিক ইৎ' ইত্যনেন ইৎ-সংজ্ঞায়াম্ 'তস্য লোপঃ' ইতি তয়োর্লোপে 'ভূ ল্' ইতি স্থিতে প্রথম-পুরুষৈকবচনবিবক্ষায়াং লস্য স্থানে 'তিপ্‌ তস্ ঝি—' ইত্যাদিনা তিবাদেশে পকারস্য লোপে 'ভূ তি' ইতি স্থিতে 'তিঙ্‌শিৎসার্বধাতুকম্' ইতি সার্বধাতুকসংজ্ঞায়াং 'কর্তরি শপ্‌' ইত্যনেন শপি শকারস্য 'লশক্বতদ্ধিতে' ইত্যনেন ইৎসংজ্ঞায়াং পকারস্য চ 'হলন্ত্যম্' ইত্যনেন ইৎসংজ্ঞায়াং চ 'ভূ অ তি' ইতি স্থিতে তত 'সার্বধাতুকার্ধধাতুকয়ো'-রিত্যনেন উকারস্য ওকারগুণে কৃতে 'এচোঽয়বায়াবঃ' ইত্যনেন ওকার-স্থানে অবাদেশে চ কৃতে 'ভবতি' ইতি পদং সিদ্ধম্।

**বভূব**—সত্তার্থকস্য ভূধাতোঃ 'পরোক্ষে লিট্' ইতি লিট্লকারে লকারস্য 'হলন্ত্যম্' ইত্যনেন ইকারস্য 'উপদেশেঽজনুনাসিক ইৎ' ইত্যনেন চ ইৎসংজ্ঞায়াং 'তস্য লোপঃ' ইতি তয়োর্লোপে 'ভূ ল্' ইতি স্থিতে তস্য প্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপ্‌ তস্—' ইত্যনেন তিবাদেশে তৎস্থানে চ 'পরস্মৈপদানাং ণলতুস্—' ইত্যনেন ণলাদেশে 'চুটূ' ইত্যনেন ণকারস্য ইৎসংজ্ঞায়াং লকারস্য চ 'হলন্ত্যম্' ইত্যনেন তয়োর্লোপে চ 'ভূ অ' ইতি জাতে তত্র পরত্বাৎ 'অচো ঞ্ণিতী'তি প্রাপ্তামপি বৃদ্ধিং নিত্যত্বাৎ বাধিত্বা 'ভুবো বুগ্‌লুঙ্‌লিটোঃ' ইত্যনেন বুগাগমে অনুবন্ধলোপে 'ভূব্ অ' ইতি জাতে, 'লিটি ধাতোরনভ্যাসস্য' ইত্যনেন ভূব্ ইত্যস্য দ্বিত্বে 'ভূব্‌ ভূব্‌ অ' ইতি স্থিতে, 'পূর্বোঽ-ভ্যাসঃ' 'ইত্যনেন পূর্বসমুদায়স্য অভ্যাসসংজ্ঞায়াং 'হলাদিঃ শেষ' ইত্যনেন অভ্যাসবকারস্য লোপে 'ভূ ভূব্‌ অ' ইতি স্থিতে 'হ্রস্বঃ' ইত্যনেন অভ্যাসোকারস্য হ্রস্বত্বে 'ভু ভূব্‌ অ' ইতি জাতে,

'ভবতেরঃ' ইত্যনেনাভ্যাসোকারস্য চ অকারে কৃতে 'ভ ভূব্ অ' ইতি জাতে, 'অভ্যাসে চর্চ্চ' ইত্যনেন অভ্যাসভকারস্য আন্তরতম্যাৎ চর্ত্বেন বকারে 'বভূব' ইতি পদম্।

**ভবানি**—সত্তার্থকস্য ভূ ইত্যস্য 'ভূবাদয়ঃ ধাতবঃ' ইত্যনেন ধাতু-সংজ্ঞায়াং ধাতুত্বাৎ 'লোট্ চ' ইতি 'আশিষি লিঙ্লোটৌ' ইতি বা লোটি টকারস্য 'হলন্ত্যম্' ইত্যনেন ইৎসংজ্ঞায়াম্ তস্য লোপে ওকারস্য চ লোপে 'ভূ ল্' ইতি দশায়াং লস্য স্থানে 'তিপ্তস্ঝি—'ইত্যাদিনা মিবাদেশে 'ভূ মিপ্ ইতি স্থিতে 'তিঙ্শিৎসার্বধাতুকম্' ইত্যনেন সার্বধাতুকসংজ্ঞায়াং 'কর্তরি শপ্' ইতি শপি শকারস্য 'লশকতদ্ধিতে' ইত্যনেন ইৎসংজ্ঞায়াং পকারস্য চ 'হলন্ত্যম্' ইত্যনেন ইৎসংজ্ঞায়াং চ 'ভূ অ মিপ্' ইতি কৃতে, 'সার্বধাতুকার্ধধাতুকয়োঃ' ইতি উকারস্য ওকারগুণে কৃতে, 'এচোঽয়বায়াবঃ' ইত্যনেন ওকারস্থানে অবাদেশে 'ভব্ অ মিপ্' ইতি স্থিতে, 'লোটো লঙবৎ' ইতি লঙ্কার্যাতিদেশেন 'তস্থস্যমিপাং তান্তন্তামঃ' ইতি মিপোঽমাদেশে প্রাপ্তে তং প্রবাধ্য 'মের্নিঃ' ইতি মের্ন্যাদেশে ইকারোচ্চারণসামর্থ্যাৎ ইকারস্যোত্বাভাবে 'আড়ুত্তমস্য পিচ্চ' ইত্যনেন আটি, 'অতো দীর্ঘো যঞি' ইত্যনেন দীর্ঘে ভবানি ইতি সিদ্ধম্।

**ভবন্তি**—সত্তার্থকস্য ভূধাতোঃ 'বর্তমানে লট্' ইতি লট্লকারে টকারস্য 'হলন্ত্যম্' ইত্যনেন ইৎসংজ্ঞায়াম্, অকারস্য 'উপদেশেঽজনু-নাসিক ইৎ' ইত্যনেন ইৎসংজ্ঞায়াং 'তস্য লোপঃ' ইতি তয়োর্লোপে ভূ ল্ ইতি স্থিতে লস্য স্থানে প্রথমপুরুষবহুবচনবিবক্ষায়াং 'তিপ্তস্ঝি' —ইত্যাদিনা ঝ্যাদেশে ভূ ঝি ইতি স্থিতে তস্য 'তিঙ্শিৎসার্বধাতুকম্' ইতি সার্বধাতুকসংজ্ঞায়াম্, 'কর্তরি শপ্' ইতি শপ্বিকরণে পকারস্য 'হলন্ত্যম্' ইত্যনেন, 'শকারস্য 'লশকতদ্ধিতে' ইত্যনেন চ ইৎসংজ্ঞায়াং, 'তস্য লোপঃ' ইতি তয়োর্লোপে চ 'ভূ অ ঝি' ইতি জাতে 'ঝোঽন্তঃ' ইত্যনেন ঝস্য অন্তাদেশে 'ভূ অ অন্তি' ইতি স্থিতে 'সার্বধাতুকার্ধ-ধাতুকয়োঃ' ইত্যনেন ভূ ইত্যত্র উকারস্য ওকারগুণে 'এচোঽয়বায়াবঃ'

ইতি অবাদেশে 'ভব অন্তি' ইতি জাতে 'অতো গুণে' ইতি দ্বয়োরকারয়োঃ পররূপত্বে অকারে কৃতে '**ভবন্তি**' ইতি পদং সিদ্ধম্।

**ভবেৎ**—সত্তার্থকস্য ভূধাতোঃ 'বিধিনিমন্ত্রণামন্ত্রণাধীনসংপ্রশ্ন-প্রার্থনেষু লিঙ্' ইত্যনেন লিঙ্লকারে অনুবন্ধলোপে 'ভূ ল্' ইত্যবস্থায়াং প্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপ্তস্ঝি ' ইত্যনেন লস্য স্থানে তিবাদেশে তস্য 'তিঙ্শিৎসার্বধাতুকম' ইতি সার্বধাতুকত্বাৎ 'কর্তরি শপ্' ইতি সূত্রেণ শপি অনুবন্ধলোপে, 'সার্বধাতুকার্ধধাতুকয়োঃ' ইতি উকারস্য ওকারগুণে, 'এচোঽয়বায়াব' ইত্যনেন অবাদেশে 'ভবতি' ইত্যবস্থায়াম্, 'ইতশ্চ' ইতীকারলোপে 'যাসুট্-পরস্মৈপদেষূদাত্তো ঙিচ্চ' ইতি যাসুডাগমে উটাবিতৌ 'ভব যাস্ৎ' ইত্যবস্থায়াং 'সুট্তিথোঃ' ইত্যনেন সুটি উটাবিতৌ চ 'ভব যাস্ স্ ৎ' ইত্যবস্থায়াং 'লিঙঃ সলোপোঽনন্ত্যস্য ইত্যনেন সকারদ্বয়নিবৃত্তৌ 'ভব যাৎ' ইতি স্থিতে 'অতো যেয়ঃ' (যা+ইয়ঃ) ইত্যনেন যা ইত্যস্য ইযাদেশে 'ভব ইয্ ৎ' ইতি স্থিতে, 'আদগুণঃ' ইত্যনেন গুণে, 'লোপো ব্যোর্বলি' ইতি যলোপে **ভবেৎ** ইতি সিদ্ধম্।

**ভবেয়ুঃ**—ভূধাতোঃ 'বিধিনিমন্ত্রণামন্ত্রণাধীন—' ইত্যাদিনা লিঙ্-লকারে অনুবন্ধলোপে 'ভূ ল্' ইতি স্থিতে প্রথমপুরুষবহুবচনবিবক্ষায়াং লস্য 'তিপ্তস্ঝি—' ইত্যাদিনা ঝ্যাদেশে তস্য 'তিঙশিৎ-সার্বধাতুকম্' ইত্যনেন সার্বধাতুকত্বাৎ 'কর্তরি শপ' ইতি শব্-বিকরণে পকারস্য হলন্ত্যমিত্যনেন শকারস্য 'লশক্বতদ্ধিতে' ইতি ইৎসংজ্ঞায়াং লোপে চ 'ভূ অ ঝি' ইতি জাতে, 'সার্বধাতুকার্ধ—ধাতুকয়োঃ' ইত্যনেন উকারস্য ওকারগুণে 'এচোঽয়বায়াবঃ' ইত্যনেন অবাদেশে চ 'ভব ঝি' ইতি স্থিতে 'যাসুট পরস্মৈপদযূদাত্তো ঙিচ্চ' ইত্যনেন যাসুডাগমে অনুবন্ধলোপে 'ভব যাস্ ঝি' ইতি স্থিতে 'লিঙঃ সলোপোঽনন্ত্যস্য' ইত্যনেন সকারলোপে 'ঝের্জুস্' ইত্যনেন ঝিস্থানে জুসাদেশে জুসঃ স্থানিবদ্ভাবেন প্রত্যয়ত্বাৎ 'চুটূ' ইত্যনেন প্রত্যয়াদৌ বর্তমানস্য জকারস্যেৎসংজ্ঞায়াং লোপে চ 'ভব যা উস্' ইত্যবস্থায়াম্

স্থিতে 'পুগন্তলঘূপধস্য চ' ইত্যনেন গুণে প্রাপ্তে 'দীধীবেবীটাম্' ইত্যনেন তন্নিষেধে 'ভবিতা' ইতি শব্দং নিষ্পন্নম্।

***ভবিষ্যতি***—ভূধাতোঃ 'ল্‌ট্ শেষে' ইতি ল্‌টি অনুবন্ধলোপে 'ভূ ল্' ইত্যবস্থায়াম্ প্রথমপুরুষৈকবচনবিবক্ষায়াং লস্য স্থানে 'তিপ্-তস্ঝি' ইত্যাদিনা তিবাদেশে সার্বধাতুকত্বাৎ 'কর্তরি শপ্' ইতি প্রাপ্তমপি শপং বাধিত্বা 'স্যতাসী ল্‌লুটোঃ' ইতি স্যবিকরণে 'আর্ধ-ধাতুকস্যেড্‌বলাদেঃ' ইত্যনেন তস্য ইডাগমে অনুবন্ধলোপে 'সার্ব-ধাতুকার্ধধাতুকয়োঃ ইতি উকারস্য গুণে ওকারে কৃতে 'এচোঽয়বায়াব' ইত্যনেন অবাদেশে 'ভবিস্যতি' ইত্যবস্থায়াম্ 'ইণ্‌কোঃ' ইতি অধিকার-সূত্রে 'আদেশপ্রত্যয়য়োঃ' ইতি সকারস্য মূর্ধন্যাদেশে ষত্বে 'ভবিষ্যতি' ইতি।

***দীব্যতি***—দিব্‌ধাতোঃ বর্তমানে লটি অনুবন্ধলোপে, প্রথম-পুরুষৈকবচনবিবক্ষায়াং 'তিপ্‌তস্ঝি—' ইত্যাদিনা লস্য স্থানে তিবাদেশে সার্বধাতুকত্বাৎ 'কর্তরি শপ্' ইতি শপি প্রাপ্তে তং প্রবাধ্য 'দিবাদিভ্যঃ শ্যন্' ইতি শ্যনি অনুবন্ধলোপে 'হলি চে' তি দীর্ঘে সিদ্ধং 'দীব্যতি' ইতি রূপম্।

***প্রণিভবতি***—প্রনি-উপসর্গাৎ ভূধাতোঃ 'বর্তমানে লট্' ইতি লট্‌লকারে টকারস্য 'হলন্ত্যম্' ইত্যনেন ইৎসংজ্ঞায়াম্, অকারস্য 'উপদেশেঽজনুনাসিক ইৎ' ইত্যনেন ইৎসংজ্ঞায়াং চ 'তস্য লোপঃ', ইত্যনেন তয়োঃ লোপে 'প্রনি ভূ ল্' ইতি জাতে প্রথমপুরুষৈকবচন-বিবক্ষায়াং লস্য স্থানে 'তিপ্‌তস্ঝি—' ইত্যাদিনা তিবাদেশে পকারস্য লোপে 'প্রনি ভূ তি' ইতি জাতে 'তিঙ্‌শিৎসার্বধাতুকম্'ইতি সার্বধাতুক-সংজ্ঞায়াং 'কর্তরি শপ্' ইত্যনেন শপি অনুবন্ধলোপে 'প্রনি ভূ অ তি' ইতি জাতে ততঃ 'সার্বধাতুকার্ধধাতুকয়োঃ' ইত্যনেন উকারস্য ওকারগুণে

কৃতে 'এচোঽয়বায়াব' ইত্যনেন ওকারস্থানে অবাদেশে চ কৃতে 'প্রনি ভবতি' ইতি অবস্থায়াম্, 'শেষে বিভাষাকখাদাবষান্ত উপদেশে' ইতি সূত্রেণ নকারস্য ণত্বে 'প্রণিভবতি' ইতি রূপম্।

এধাঞ্চক্রে—এধ্ বৃদ্ধাবিত্যস্মদ্ধাতোঃ 'পরোক্ষে লিট্' ইতি লিট্‌ল-কারে 'ইজাদেশ্চ গুরুমতোঽনৃচ্ছঃ' ইত্যনেন আম্প্রত্যয়ে আস্কাসোরাম্বিধানাৎ জ্ঞাপকাৎ মকারস্য ইত্বাভাবে 'এধাম্ লিট্' ইতি জাতে, আমঃ ইত্যনেন লিটো লুকি এধাম্ ইত্যস্য কৃদন্তত্বাৎ 'কৃত্তদ্ধিতসমাসাশ্চ' ইত্যনেন প্রাতিপদিকত্বেন সুবিভক্তৌ তস্যাপি আম ইত্যনেনৈব লুকি 'কৃঞ্চানুপ্রযুজ্যতে লিটি' ইত্যনেন এধামিত্যামন্তাল্লিট্‌শিরস্কে কৃধাতোরনুপ্রয়োগে 'এধাম্ কৃ লিট্' ইতি জাতে অনুবন্ধলোপে 'এধাম্ কৃ ল' ইতি স্থিতে কৃধাতোঃ পরগামিনি ক্রিয়াফলে বিবক্ষিতে, 'শেষাৎ কর্তরি পরস্মৈপদম্' ইতি পরস্মৈপদে প্রাপ্তে তং প্রবাধ্য 'আম্প্রত্যয়বৎ কৃঞোঽনুপ্রয়োগস্য' ইত্যনেন আত্মনেপবিধানাৎ লস্য স্থানে প্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপতস্ঝি—' ইত্যাদিনা তাদেশে 'এধাম্ কৃ ত্' ইতি জাতে 'লিটস্তঝয়োরেশিরেচ্' ইত্যনেন শিত্বাৎ ত ইত্যস্য সর্বস্যৈব স্থানে এশাদেশে শকারস্য ইৎসংজ্ঞায়াং লোপে চ 'এধাম্ কৃ এ' ইতি স্থিতে 'লিটি ধাতোরনভ্যাসস্য' ইতি দ্বিত্বে প্রাপ্তে তং পরত্বাদ্বাধিত্বা 'ইকো যণচি' ইতি যণি প্রাপ্তে তং 'দ্বির্বচনেঽচি' ইতি নিষেধে পুনঃ প্রসঙ্গবিজ্ঞানাৎ 'লিটি ধাতোঃ—' ইতি দ্বিত্বে 'এধাম্ কৃ কৃ এ' ইতি জাতে, 'পূর্বোঽভ্যাস' ইত্যনেন পূর্বস্য কৃ ইত্যস্যাভ্যাসসংজ্ঞায়াম, 'উরৎ' ইত্যনেনাভ্যাসঋবর্ণস্য স্থানে অত্বে 'উরণ্ রপরঃ' ইত্যনেন রপরত্বে 'হলাদিঃ শেষঃ' ইত্যনেন অভ্যাসহলো লোপে চ 'এধাম্ ক কৃ এ' ইতি স্থিতে 'কুহোশ্চুঃ' ইত্যনেনাভ্যাসককারস্য চকারে 'এধাম্ চ কৃ এ' ইতি স্থিতে 'ইকো যণচি' ইত্যনেন ঋকারস্য যণ্ত্বেন রেফে 'এধাম্ চক্রে' ইত্যবস্থায়াম্ এধামিত্যস্য সুবন্তত্বেন পদত্বাৎ 'মোঽনুস্বার' ইতানেন মকারস্যানুস্বারে 'বা পদান্তস্য' ইত্যনেন তস্য

দীর্ঘঃ' ইত নেন দীর্ঘে কৃতে, ততশ্চ 'খরবসানয়োরিতি' বিসর্গে (১) **উখতুঃ** (২) **উখূঃ** চ সিধ্যতঃ।

***উবোখ***—উখ্ ধাতোঃ 'পরোক্ষে লিট্' ইতি লিট্লকারে অনুবন্ধলোপে **'উখ্ ল'** ইতি স্থিতে লস্য স্থানে 'তিপ্তস্'— ইত্যাদিনা তিবাদেশে **'উখ্ তিপ্** ইতি জাতে পকারস্য লোপে, 'পরস্মৈপদানাং ণলতুসুস—' ইত্যনেন তিস্থানে ণলাদেশে **'উখ্ ণল্'** ইতি জাতে, অনুবন্ধলোপে **'উখ্ অ'** ইতি স্থিতে 'লিটি ধাতোরনভ্যাসস্য' ইত্যনেন উখ্ ইত্যস্য দ্বিত্বে **'উখ্ উখ্ অ'** ইতি জাতে 'পুগন্তলঘূপধস্য চ' ইতি লঘূপধগুণে ওকারে **'উখ্ ওখ্ অ'** ইতি স্থিতে 'পূর্বোঽভ্যাস' ইতি পূর্বসমুদায়স্য অভ্যাসসংজ্ঞায়াং 'হলাদিঃ শেষঃ' ইত্যভ্যাসহলো লোপে **'উ ওখ্ অ'** ইতি জাতে 'অভ্যাসস্যাসবর্ণে' ইতি অভ্যাসোকারস্য উবঙাদেশে **'উবোখ'** ইতি সিদ্ধম্।

***আনর্চ্চ***—'অর্চ্চ পূজায়াম্' ইত্যস্মাদ্ধাতোঃ 'পরোক্ষে' লিট্' ইতি লিট্লকারে **'অর্চ্চ্ লিট্'** ইতি স্থিতে অনুবন্ধলোপে লস্য পরস্মৈপদপ্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপ্তস্ঝি' ইত্যাদিনা তিবাদেশে **"অর্চ্চ্ তিপ্** ইতি স্থিতে 'পরস্মৈপদানাং ণলতুসুস্— ইত্যাদিনা তিপঃ স্থানে ণলাদেশে **'অর্চ্চ্ ণল্'** ইতি কৃতে, লকারস্য 'হলন্ত্যমি'ত্যনেন ণকারস্য 'চুটূ' ইত্যনেন ইৎসংজ্ঞায়াং লোপে চ **অর্চ্চ্ অ'** ইতি জাতে, 'লিটি ধাতোরনভ্যাসস্য' ইত্যনেন অর্চ্চ্ ইত্যস্য দ্বিত্বে **'অর্চ্চ্ অর্চ্চ্ অ'** ইতি দশায়াম্, 'পূর্বোঽভ্যাস' ইত্যনেন পূর্বস্য অভ্যাসসংজ্ঞায়াম্, 'হলাদিঃ শেষঃ' ইত্যনেন অভ্যাসহলো লোপে **'অ অর্চ্চ্ অ'** ইতি স্থিতে, 'অকঃ সবর্ণে দীর্ঘঃ' ইতি প্রাপ্তমপি দীর্ঘং বাধিত্বা "অতঃ আদেঃ' ইত্যনেন অভ্যাসাকারমাত্রস্য দীর্ঘে **'আ অর্চ্চ্ অ'** ইতি স্থিতে 'তস্মান্নুড্ দ্বিহলঃ' ইতি সূত্রেণ দীর্ঘীভূতাদকারাৎ পরস্য নুডাগমে অনুবন্ধলোপে **'আনর্চ্চ'** ইতি।

**আনর্দ**—অর্দধাতোঃ পরোক্ষে লিট্‌লকারে অনুবন্ধলোপে 'অর্দ্‌+ল' ইতি জাতে লস্য স্থানে প্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপতস্‌ঝি—' ইত্যাদিনা তিপি অর্দ্‌+তিপ্‌' ইতি কৃতে তিপ্‌স্থানে 'ণলতুসুস্‌—' ইত্যাদিনা ণলাদেশে অর্দ্‌+ণল্‌' ইতি জাতে, লকারস্য 'হলন্ত্যমি'ত্যাদিনা ণকারস্য চুটূ' ইত্যনেন ইৎসংজ্ঞায়াং লোপে চ 'অর্দ্‌+অ' ইতি স্থিতে 'লিটি ধাতোরনভ্যাসস্য—' ইত্যনেন অর্দ্‌ ইত্যস্য দ্বিত্বে-অর্দ্‌ অর্দ্‌+অ' ইতি জাতে, 'পূর্বোঽভ্যাস' ইত্যনেন অভ্যাসসংজ্ঞায়াং 'হলাদিঃ শেষঃ' ইত্যনেন অভ্যাসহলো লোপে অ অর্দ্‌+অ' ইতি কৃতে, 'অকঃ সবর্ণে দীর্ঘঃ' ইতি প্রাপ্তং দীর্ঘং বাধিত্বা 'অতঃ আদেঃ' ইত্যনেন অভ্যাসাকারমাত্রস্য দীর্ঘে 'আ অর্দ্‌+অ' ইতি প্রাপ্তে 'তস্মান্নুড্‌ দ্বিহলঃ' ইতি সূত্রেণ দীর্ঘীভূতাদকারাৎ পরস্য নুডাগমে অনুবন্ধলোপে আনর্দ ইতি রূপম্‌।

**ববৃশ্চ**—'ওব্রশ্চূ ছেদনে' ইত্যস্মাৎ ব্রশ্চ্‌ধাতোঃ পরোক্ষে লিট্‌লকারে অনুবন্ধলোপে ব্রশ্চ্‌+ল ইতি জাতে তস্য প্রথমপুরুষৈকবচনে তিপ্‌ প্রত্যয়ে ব্রশ্চ্‌+তিপ্‌ ইতি কৃতে 'পরস্মৈপদানাং ণলতুসুস্' ইত্যনেন ণলাদেশে ব্রশ্চ্‌+ণল্‌ ইতি জাতে, অনুবন্ধলোপে ব্রশ্চ্‌+অ ইতি স্থিতে, 'লিটি ধাতো—'ইত্যনেন ব্রশ্চ্‌ ইত্যস্য দ্বিত্বে ব্রশ্চ্‌ ব্রশ্চ্‌+অ ইতি প্রাপ্তে 'পূর্বোঽভ্যাস' ইত্যনেন পূর্বসমুদায়স্য অভ্যাসসংজ্ঞায়াং 'লিট্যভ্যাসস্য' ইত্যনেন অভ্যাসরেফস্য ঋকার-সম্প্রসারণে ঋকারস্য 'উরৎ' ইত্যনেন অত্বে 'ব্‌ অ শ্চ্‌ ব্রশ্চ+অ' ইতি স্থিতে 'উরণ্‌রপরঃ' ইত্যনেন রপরত্বে 'হলাদিঃ শেষঃ' ইত্যনেন বকারবর্জং সর্বেষামভ্যাসহলাং লোপে 'ববৃশ্চ' ইতি পদং সিদ্ধম্‌।

**অব্রাজীৎ**—ব্রজ্‌ধাতোঃ লুঙ্‌লকারে প্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপ্‌তস্‌ঝি' ইত্যাদিনা তিবাদেশে ব্রজ্‌+তিপ্‌ ইতি জাতে 'ইতশ্চে'তি ইকারলোপে পকারস্য লোপে চ ব্রজ্‌+ত্‌ ইতি স্থিতে

তিঙ্‌শিৎসার্বধাতুকম্' ইতি সার্বধাতুকত্বাৎ 'কর্তরি শপ্' ইতি শপি প্রাপ্তে তৎ প্রবাধ্য চ্লিলুঙি' ইতি চ্লৌ 'চ্লেঃ সিচ্' ইতি চ্লিস্থানে সিজাদেশে অনুবন্ধলোপে 'ব্রজ্+স্+ত্' ইতি জাতে 'আর্ধধাতুকস্যেড্‌বলাদেঃ ইত্যনেন সিচঃ আর্ধধাতুকত্বাৎ তস্য ইডাগমে ব্রজ্+ইস্ ত্' ইতি স্থিতে 'অস্তিসিচোঽপৃক্তে' ইত্যনেন অপৃক্তস্য ত্‌মাত্রস্য ইডাগমে অনুবন্ধলোপে 'লুঙ্‌লঙ্‌লৃঙ্ক্ষ্বড়ুদাত্ত' ইতি সূত্রেণ অঙ্গস্য অডাগমে 'অ ব্রজ্ ইস্ ঈৎ' ইত্যবস্থায়াম্ 'অচো হলাদেঃ লঘোরি'ত্যনেন বিকল্পেন বৃদ্ধিং বাধিত্বা 'বদব্রজহলন্তস্যাচঃ' ইত্যনেন আত্মচো বৃদ্ধৌ 'ইট ঈটি' ইত্যনেন সিচঃ সকারস্য লোপে 'সিজলোপ একাদেশে সিদ্ধো বাচ্যঃ'ইতি বার্ত্তিকবলাৎ সিজ্‌লোপস্যাসিদ্ধত্বাভাবেন "অকঃ সবর্ণে দীর্ঘ" ইতি দীর্ঘে **অব্রাজীদিতি** পদং নিষ্পন্নম্।

**অচীকমত**—কান্ত্যর্থক-উকারেৎসংজ্ঞক—কম্‌ধাতোঃ 'কমের্ণিঙ্' ইতি ণিঙ্‌প্রত্যয়ে অনুবন্ধলোপে কম্+ই ইতি স্থিতে 'অত উপধায়া' ইত্যনেনোপধাভূতস্যাকারস্য বৃদ্ধৌ কাম্+ই' ইতি স্থিতে ততঃ 'সনাদ্যন্তা ধাতবঃ' ইত্যনেন ধাতুত্বাৎ লুঙি তৎস্থানে ঙিত্বাদাত্মনেপদিত্বেন প্রথমপুরুষৈকবচনবিবক্ষায়াং তাদেশে 'কর্তরি শপ্' ইতি শপং বাধিত্বা চ্লি লুঙি' ইতি চ্লৌ 'চ্লেঃ সিচ্' ইতি প্রাপ্তমপি সিচং বাধিত্বা "ণিশ্রিদ্রুস্রুভ্যঃ কর্তরি চঙ্" ইতি চঙাদেশে অনুবন্ধলোপে 'কাম্+ই অ ত' ইতি জাতে পরত্বাৎ 'এরনেকাচোঽসংযোগপূর্বস্য' ইত্যনেন প্রাপ্তং যণং প্রবাধ্য পূর্ববিপ্রতিষেধাদপবাদত্বাদ্ বা 'ণেরনিটি' ইত্যনেন ণিলোপে 'ণৌ চঙ্যুপধায়া হ্রস্বঃ' ইত্যনেন উপধায়া হ্রস্বে কম্+অ ত ইতি স্থিতে 'চঙি' ইত্যনেন কম্ ইত্যস্য দ্বিত্বে 'পূর্বোঽভ্যাস' ইতি পূর্বসমুদায়স্যাভ্যাসসংজ্ঞায়াং 'হলাদিঃ শেষঃ' ইতি অভ্যাসহলো লোপে 'ক কম্+অ ত' ইতি জাতে 'কুহোশ্চুঃ' ইত্যনেন অভ্যাসককারস্য চুত্বেন চকারে 'লুঙ্‌লঙ্‌লৃঙ্ক্ষ্বড়ুদাত্তঃ' ইত্যনেন অঙ্গস্যাডাগমে অ চ কম্ অ ত' ইতি জাতে 'সন্বতঃ'

ইত্যনেন অভ্যাসাকারস্য ইত্বে 'দীর্ঘো লঘো'রিত্যনেন তস্য দীর্ঘে চ 'অচীকমত' ইতি রূপং নিষ্পন্নম্। ণিঙভাবপক্ষে তু 'অচকমত' ইতি।

**অবীভবৎ**—ভূধাতো 'হেতুমতি চ' ইত্যনেন প্রযোজকব্যাপারে বাচ্যে ণিচি অনুবন্ধলোপে 'ভূ ই' ইতি জাতে 'সনাদ্যন্তা ধাতব' ইত্যনেন ধাতুসংজ্ঞায়াং ধাতুত্বাৎ লুঙ্লকারে তৎস্থানে প্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপ্তস্ঝি'—ইত্যাদিনা তিবাদেশে পকারস্য ইৎসংজ্ঞায়াং লোপে চ 'চ্লি লুঙি' ইত্যনেন চ্লৌ, তৎস্থানে 'চ্লেঃ সিচ্' ইতি সিজাদেশং বাধিত্বা 'ণিশ্রিদ্রুস্রুভ্যঃ'—ইত্যনেন চঙাদেশে অনুবন্ধলোপে 'ভূ ই অ তি' ইতি জাতে 'ইতশ্চ' ইত্যনেন তিপ ইকারলোপে 'ভূ ই অ ৎ' ইতি স্থিতে 'চঙি' ইত্যনেন ভূ ইত্যস্য দ্বিত্বে ততঃ 'অচো ঞ্ণিতি' ইত্যনেন উকারস্য ঔকারবৃদ্ধৌ 'এচোঽয়বায়াব' ইত্যনেন আবাদেশে 'ণেরনিটি' ইত্যনেন ণিলোপে 'ণৌ চঙি উপধায়া হ্রস্ব' ইত্যনেন হ্রস্বত্বেন 'ভূ ভব্ অ ৎ' ইতি স্থিতে 'লুঙ্লঙ্লৃঙ্ক্ষ্বডুদাত্ত' ইত্যডাগমে 'সন্বল্লঘুনি চঙ্পরেঽনঙ্—' ইত্যনেন চ সন্বদ্ভাবে 'ওঃ পুয়ণ্জ্যপরে' ইত্যনেন অভ্যাসোকারস্য ইত্বে 'দীর্ঘো লঘোঃ' ইত্যনেন দীর্ঘে চ 'অভ্যাসে চর্চ্চ' ইত্যনেন জশ্ত্বেন অভ্যাসভকারস্য বকারে **'অবীভবৎ'** ইতি রূপং সিদ্ধম্।

***বোভূয়তে***—পুনঃ পুনঃ অতিশয়েন বা ভবতীত্যর্থে ভূধাতোঃ 'ধাতোরেকাচো হলাদেঃ ক্রিয়াসমভিহারে যঙ্' ইত্যনেন পৌনঃপুন্যে ভৃশার্থে বা দ্যোত্যে যঙ্প্রত্যয়ে অনুবন্ধলোপে যঙো ঙিত্বেন 'সার্বধাতুকার্ধধাতুকয়োঃ' ইতি প্রাপ্তস্য গুণস্য 'ক্ঙিতি চ' ইতি গুণনিষেধে 'সন্যঙোঃ' ইত্যনেন ভূ ইত্যস্য দ্বিত্বে 'ভূ ভূ য' ইতি স্থিতে 'পূর্বোঽভ্যাস' ইত্যনেন পূর্বস্যাভ্যাসসংজ্ঞায়াম্, 'গুণো যঙ্লুকো'রিত্যনেনাভ্যাসস্য গুণে 'অভ্যাসে চর্চ্চ' ইত্যনেন ঝলাং জশ্ত্বেন আন্তরতম্যাৎ অভ্যাস-

'ঘ ঘ্রপ্ অ ত্' ইতি স্থিতে, 'লুঙ্লঙ্ল্ঙ্‌ক্ষ্বডুদাত্ত' ইত্যডাগমে 'অ ঘ ঘ্রপ্অত্' ইতি জাতে 'কুহোশ্চু' রিত্যনেন অভ্যাসঘকারস্য ঝকারাদেশে 'অভ্যাসে চর্চ্চ' ইতি ঝকারস্থানে জকারাদেশে 'অ জ ঘ্র প্ অত্' ইতি জাতে, 'সন্যত' ইত্যনেন উপধাভূতস্যাকারস্য ইত্বে 'অ জি ঘ্রপ্ অত্' ইতি স্থিতে 'জিঘ্রতে র্বা' ইত্যনেন উপধাভূতস্যা-কারস্য পাক্ষিকে ইত্বে **'অজিঘ্রিপৎ'** ইতি। উপধায়া ইত্বাভাবে তু **'অজিঘ্রপৎ'** ইতি রূপম্।

***অধ্যজীগপৎ—অধ্যাপিপৎ***—অধিপূর্বকাৎ ইঙ্ধাতোঃ ণিচি অনুবন্ধলোপে 'সনাদ্যন্তা ধাতবঃ' ইত্যনেন ধাতুসংজ্ঞায়াং লুঙি তৎস্থানে প্রথমপুরুষৈকবচনবিবক্ষায়াং তিবাদেশে পকারস্য ইৎসংজ্ঞায়াং লোপে চ 'ইতশ্চে'তি ইকারলোপে 'চ্লি লুঙি' ইতি চ্লৌ চ্লিস্থানে 'ণিশ্রিদ্রুস্রুভ্যঃ—' ইতি চঙি ঙকারচকারয়োরিৎসংজ্ঞায়াং লোপে চ, 'ণৌ চ সংশ্চঙোঃ—' ইত্যনেন বৈকল্পিকগাঙাদেশে, 'অর্তিহ্রীব্লী—' ইত্যাদিনা পুগাগমে অনুবন্ধলোপে 'অধি গা প্ ই অ ত্' ইত্যবস্থায়াং 'ণৌ চঙ্যুপধায়া হ্রস্বঃ' ইত্যনেন উপধাহ্রস্বত্বে 'গা' ইত্যস্য 'গ' ইতি জাতে, 'ণেরনিটি' ইত্যনেন ণের্লোপে, 'চঙি' ইত্যনেন 'গপ্' ইত্যস্য দ্বিত্বে, 'পূর্বোঽভ্যাস' ইতি পূর্বসমুদায়স্যাভ্যাসসংজ্ঞায়াং 'হলাদিঃ শেষঃ' ইত্যনেন অভ্যাসপকারস্য লোপে 'অধি গ গপ্ অত্' ইতি জাতে 'সন্বল্লঘুনি—' ইত্যনেন সন্বদ্ভাবাৎ 'সন্যতঃ' ইতি অভ্যাসস্য অকারস্য ইত্বে 'দীর্ঘলঘো'রিতি দীর্ঘে 'অধি-গী-গপ্ অত্' ইতি জাতে 'কুহোশ্চু' রিতি গকারস্য জকারে 'অধিজীগপৎ' ইতি জাতে 'লুঙ্লঙ্ল্ঙ্‌ক্ষ্বডুদাত্ত' ইত্যনেন অঙ্গস্য অডাগমে অনুবন্ধলোপে 'অধি অ জীগপৎ' ইতি জাতে 'ইকো যণচি' ইতি সন্ধিকার্যে যকারাদেশে **অধ্যজীগপৎ** ইতি।

গাঙভাবে 'ক্রীঙ্জীনাং ণৌ' ইত্যাত্বে পুক 'অধি আ প্ ই অৎ' ইতি স্থিতে 'পি' ইত্যস্য দ্বিত্বাদিকার্যে কৃতে **অধ্যাপিপৎ** ইতি।

**স্থাপয়তি**—স্থাধাতোঃ 'হেতুমতি চ' ইত্যনেন ণিচ্ প্রত্যয়ে ণকারচকারয়োরিৎসংজ্ঞায়াং লোপে চ 'স্থা ই' ইত্যবস্থায়াম্, 'অর্তিহ্রীব্লী—' ইত্যাদিনা পুগাগমে অনুবন্ধলোপে চ 'স্থা প্ ই' ইত্যস্য 'সনাদ্যন্তা ধাতব' ইত্যনেন ধাতুসংজ্ঞায়াং ধাতুত্বাৎ 'বর্তমানে লট্' ইতি লট্লকারে অনুবন্ধলোপে 'স্থাপ্ ই ল' ইতি জাতে, লস্য স্থানে প্রথমপুরুষৈকবচনবিবক্ষায়াং তিবাদেশে পকারস্য লোপে 'স্থাপ্ ই তি'। 'তিঙ্শিৎসার্বধাতুকম্' ইতি সার্বধাতুকসংজ্ঞায়াং 'কর্তরি শপ্' ইতি শপি অনুবন্ধলোপে চ 'স্থাপ্ ই অতি' ইতি স্থিতে শপঃ শিত্ত্বাৎ সার্বধাতুকত্বেন 'সার্বধাতুকার্ধধাতুকয়োঃ' ইত্যনেন ইকারস্য একারগুণে 'এচোঽয়বায়াব' ইত্যনেন অয়াদেশে চ 'স্থাপয়তি' ইতি রূপম্।

√*অধ্যাপয়তি*—অধিপূর্বাৎ ইঙ্ অধ্যয়নে ইত্যস্মাদ্ধাতোঃ 'হেতুমতি চ' ইত্যনেন ণিচি অনুবন্ধলোপে 'অধী ই' ইতি জাতে 'অচো ঞ্ণিতি' ইত্যনেন ইকারস্য ঐকারবৃদ্ধৌ— 'ক্রীঙ্জীনাং ণৌ' ইত্যনেন ঐকারস্যাকারাদেশে 'অর্তিহ্রী'—ইত্যাদিনা পুগাগমে অনুবন্ধলোপে 'অধ্যাপ্ ই' ইতি জাতে ততঃ 'সনাদ্যন্তা ধাতবঃ' ইত্যেনন ধাতুত্বাল্লট্-লকারে প্রথমপুরুষৈকবচনবিবক্ষায়াং লস্য স্থানে তিবাদেশে অনুবন্ধলোপে 'অধ্যাপ্ই তি' সার্বধাতুকত্বাৎ 'কর্তরি শপ্' ইতি শপি অনুবন্ধলোপে 'অধ্যাপ্ই অতি' ইতি স্থিতে 'সার্বধাতুকার্ধধাতুকয়ো'-রিতি ইকারস্য একারগুণে 'এচোঽয়বায়াব' ইত্যনেন অযাদেশে 'অধ্যাপয়তি' ইতি রূপম্। অত্র 'বুধ-যুধ-নশ—' ইত্যনেন পরস্মৈ-পদমিতি বিশেষঃ।

**অষেধীৎ**—ষিধ্ গতৌ ইত্যস্মাদ্ধাতো লুঙ্লকারে অনুবন্ধলোপে লস্য স্থানে প্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপ্তস্ঝি' ইত্যাদিনা তিবাদেশে পকারস্য ইৎসংজ্ঞায়া লোপে চ 'ইতশ্চ' ইত্যনেন ইকারস্য

লোপে 'চ্লি লুঙি' ইত্যনেন চ্লিবিকরণে চ্লৌ-'চ্লেঃ সিচ্' ইতি সিজাদেশে ইকারচকারয়োরিৎসংজ্ঞায়াং লোপে চ 'অপৃক্তে একাল্— প্রত্যয়' ইত্যনেন অপৃক্তসংজ্ঞত্বাৎ 'অস্তিসিচোঽপৃক্তে' ইত্যনেন ইডাগমে সিচঃ 'আর্ধধাতুকং শেষঃ' ইত্যনেন অর্ধধাতুকসংজ্ঞত্বাৎ 'অর্ধধাতুকস্যেড্‌বলাদেঃ' ইত্যনেন তস্যাপি ইডাগমে টকারস্য ইৎসংজ্ঞায়াং লোপে চ 'ইট ঈটি' ইত্যনেন সিচঃ সকারস্য লোপে 'পূর্বত্রাসিদ্ধম্' ইতি অসিদ্ধত্বাভাবাৎ 'অকঃ সবর্ণে দীর্ঘঃ' ইত্যনেন দীর্ঘে 'লুঙ্‌লঙ্‌ল্‌ঙ্‌ক্ষ্বড়ুদাত্ত' ইত্যনেন অঙ্গস্য অডাগমে'পুগন্তলঘূপধস্য চ' ইত্যনেন ইকারস্য একারগুণে **অযেধীৎ** ইতি রূপম্।

***অবাক্ষীৎ***—বহ্‌ধাতোঃ 'হেতুমতি চ' ইত্যনেন ণিচ্‌প্রত্যয়ে অনুবন্ধলোপে 'সনাদ্যন্তা ধাতবঃ' ইতি ধাতুসংজ্ঞায়াং ধাতুত্বাৎ ততো লুঙ্‌লকারে প্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপ্‌তস্‌ঝি—' ইত্যাদিনা লস্য স্থানে তিবাদেশে অনুবন্ধলোপে 'ইতশ্চ' ইত্যনেন ইকারস্য লোপে চ 'চ্লি লুঙি' ইতি চ্লৌ তৎস্থানে 'চ্লেঃ সিচ্' ইতি সিজাদেশে ইকারচকারয়োঃ ইৎসংজ্ঞালোপয়োশ্চ, লুঙ্‌লঙ্‌ল্‌ঙ্‌ক্ষ্বড়ুদাত্ত ইত্যনেন অঙ্গস্য অডাগমে 'বদব্রজহলন্তস্যাচ' ইতি উপধাবৃদ্ধৌ 'অ বাহ্‌ স্‌ ত্‌' ইত্যবস্থায়াম্ 'হো ঢঃ' ইতি হকারস্য ঢত্বে 'ষঢোঃ কঃ সি' ইতি ঢস্য ককারে 'আদেশপ্রত্যয়য়োঃ' ইত্যনেন সিচঃ সস্য ষত্বে 'অস্তিসিচোহ- পৃক্তে' ইত্যনেন অপৃক্তহলঃ ইটি কৃষ্‌ ইত্যেতয়োঃ সংযোগে **অবাক্ষীৎ** ইতি পদম্।

***ক্রাপয়তি***—ক্রীধাতোঃ 'হেতুমতি চ' ইতি ণিচি অনুবন্ধলোপে 'অচো ঞ্ণিতি' ইত্যনেন ঈকারস্য ঐকারদীর্ঘে ততঃ 'ক্রীঙ্‌জীনাং ণৌ' ইত্যনেন ঐকারস্য আকারাদেশে'ক্রা ই' ইতি জাতে 'অর্তিহ্রী—' ইত্যনেন পুগাগমে অনুবন্ধলোপে 'ক্রাপ্‌ ই' ইত্যবস্থায়াং 'সনাদ্যন্তা ধাতবঃ' ইত্যনেন ধাতুত্বাল্লট্‌লকারে তৎস্থানে প্রথমপুরুষৈকবচনবিব-

ক্ষায়াং তিবাদেশে 'তিঙ্‌শিৎসার্বধাতুকম্' ইতি তিপঃ সার্বধাতুকত্বাৎ 'কর্তরি শপ্' ইত্যনেন শব্‌বিকরণে অনুবন্ধলোপে তস্যাপি শিত্ত্বাৎ 'সর্বধাতুকত্বাৎ 'সার্বধাতুকার্ধধাতুকয়োঃ' ইত্যনেন ইকারস্য ঐকারগুণে 'এচোঽয়বায়াব' ইত্যনেনৈকারস্য অয়াদেশে ক্রাপয়তি ইতি পদং নিষ্পন্নম্।

*পিপঠিষতি*—পঠিতুমিচ্ছতীত্যর্থে পঠ্‌ধাতোঃ 'ধাতোঃ কর্মণঃ সামানকর্তৃকাদিচ্ছায়াং বা' ইত্যনেন সন্ প্রত্যয়ে নকারস্য ইৎসংজ্ঞায়াং লোপে চ 'আর্ধধাতুকং শেষঃ' ইত্যনেন আর্ধধাতুকত্বাৎ 'আর্ধধাতুকস্যেড্‌বলাদেঃ' ইতি ইডাগমে 'সন্যঙোঃ' ইত্যনেন পঠ্ ইত্যস্য দ্বিত্বে 'পূর্বোঽভ্যাস' ইত্যনেন পূর্বসমুদায়স্য অভ্যাসসংজ্ঞায়াং 'হলাদিঃ শেষঃ' ইত্যনেন অভ্যাসহলো লোপে 'সন্যত' ইত্যনেন অভ্যাসাকারস্য ইত্বে 'পিপঠি স' ইত্যবস্থায়াম্, 'আদেশপ্রত্যয়য়ো'রিত্যনেন সনঃ সকারস্য ষত্বে 'পিপঠি ষ' ইত্যস্য 'সনাদ্যন্তা ধাতব' ইত্যনেন ধাতুসংজ্ঞায়াং ধাতুত্বাৎ লটি তৎস্থানে 'তিপ্‌তস্‌ঝি' ইত্যাদিনা প্রথমপুরুষৈকবচনবিবক্ষায়াং তিবাদেশে পকারস্য ইৎসংজ্ঞায়াং লোপে চ 'তিঙ্‌শিৎসার্বধাতুকম্' ইতি সার্বধাতুকত্বাৎ 'কর্তরি শপ্' ইতি শব্‌বিকরণে শকারপকারয়োঃ 'ইৎসংজ্ঞায়াং লোপে চ 'পিঠিষ অতি' ইতি স্থিতে 'অতো গুণে' ইতি পররূপে চ পিপঠিষতি ইতি সিদ্ধম্।

*জিঘৎসতি*—অত্তুমিচ্ছতীতি ভক্ষণার্থকস্য অদ্‌ধাতোঃ 'ধাতোঃ কর্মণঃ সমানকর্তৃকাদিচ্ছায়াম্' ইত্যনেন সন্‌প্রত্যয়ে অনুবন্ধলোপে অদ্+স ইতি জাতে 'লুঙ্‌সনোর্ঘস্ৢ' ইত্যনেন অদ্ ইত্যস্য ঘস্লাদেশে অনুবন্ধলোপে ঘস্+স ইতি জাতে, 'আর্ধধাতুকং শেষঃ' ইত্যার্ধধাতুকত্বাদ্ 'আর্ধধাতুকস্যেড্‌বলাদেঃ' ইত্যনেন ইটি প্রাপ্তে 'একাচ উপদেশেঽনুদাত্তাৎ' ইত্যনেন ইট্‌নিষেধে 'সন্যঙো'রিত্যনেন ঘস্ ইত্যস্য দ্বিত্বে ঘস্ ঘস্+স' ইতি স্থিতে 'পূর্বোঽভ্যাস' ইতি পূর্ব-

উপধাহ্রস্বত্বে 'জ্ঞপ্ ই' ইতি জাতে, ততো 'ধাতোঃ কর্মণঃ'—ইত্যনেন সন্‌প্রত্যয়ে অনুবন্ধলোপে 'ণেরনিটি' ইত্যনেন ণিলোপে কৃতে 'আপ্‌জ্ঞপৃধামীৎ' ইত্যনেন উপধাভূতস্যাকারস্য ঈত্বে 'জ্ঞীপ্ স' ইতি জাতে, 'সন্যঙো' রিত্যনেন দ্বিত্বে প্রাপ্তে 'জ্ঞীপ্ জ্ঞীপ্ স' ইতি স্থিতে 'অত্র লোপোঽভ্যাসস্য' ইত্যনেন অভ্যাসলোপে 'জ্ঞীপ্ স' ইতি জাতে 'সনাদ্যন্তা ধাতব' ইতি তস্য ধাতুত্বাল্লট্‌লকারে তিবাদেশে অনুবন্ধ-'লোপে, কর্তরি শপ' ইতি শপি অনুবন্ধলোপে 'অতো গুণে' ইতি পররূপে জাতে 'জ্ঞীপ্‌সতি' ইতি নিষ্পন্নম্।

*ঈপ্‌সতি*—আপ্তুমিচ্ছতীত্যর্থে আপ্‌ধাতোঃ 'ধাতোঃ কর্মণঃ—' ইত্যনেন সন্‌প্রত্যয়ে অনুবন্ধলোপে 'আপ্‌জ্ঞপৃধামীৎ' ইত্যনেন আকারস্য ঈকারাদেশে'ঈপ্ স' ইতি জাতে, 'সন্যঙোঃ' ইতি অজাদে-র্দ্বিতীয়স্য ইত্যনেন দ্বিতীয়ৈকাচঃ প্স ইত্যস্য দ্বিত্বে, 'অত্র লোপোঽ-ভ্যাসস্য' ইত্যনেনাভ্যাসস্য লোপে 'ঈপ্‌স' ইতি স্থিতে তস্য 'সনাদ্যন্তা ধাতবঃ' ইতি ধাতুত্বাল্লট্‌লকারে তস্য তিবাদেশে'কর্তরি শপ' ইতি শপি অনুবন্ধলোপে 'অতো গুণে' ইতি পররূপে জাতে ঈপ্‌সতি' ইতি।

*মুমূর্ষতি*—মরণার্থকস্য মৃধাতোঃ মরণাশঙ্কাবিষয়ো ভবতীত্যর্থে 'আশঙ্কায়াং সন্‌বক্তব্যঃ' ইত্যনেন সন্‌প্রত্যয়ে অনুবন্ধলোপে 'উদোষ্ঠ্যপূর্বস্য' ইত্যনেন ঋকারস্য উত্বে 'উরণ্‌রপরঃ' ইত্যনেন রপরত্বে 'হলি চ' ইতি দীর্ঘে 'মূর্ স' ইতি জাতে 'সন্যঙো' রিত্যনেন 'মূর্' ইত্যস্য দ্বিত্বে পূর্বোঽভ্যাস' ইতি পূর্বসমুদায়স্য অভ্যাসসংজ্ঞায়াং 'হলাদিঃ শেষঃ' ইত্যনেন অভ্যাসরেফস্য লোপে 'হ্রস্ব' ইত্যনেনাভ্যাস-হ্রস্বত্বে 'আদেশপ্রত্যয়য়ো' রিত্যনেন সকারস্য ষত্বে 'মুমূর্ষ' ইতি স্থিতে তস্য 'সনাদ্যন্তা ধাতব' ইতি ধাতুত্বাল্লট্‌লকারে তস্য তিবাদেশে 'কর্তরি শপ্' ইতি শপি অনুবন্ধলোপে 'অতো গুণে' ইতি পররূপে জাতে মুমূর্ষতি ইতি পদং সিদ্ধম্।

**জুগুপ্সতে**—গোপনার্থকগুপ্ধাতোঃ নিন্দায়াং গম্যমানায়াং 'গুপতিজ্কিদ্ভ্যঃ সন্' ইত্যনেন সন্প্রত্যয়ে অনুবন্ধলোপে ধাত্বধিকারত্বাভাবাৎ সনোরার্ধধাতুকত্বাভাবেনেঙ্গুণয়োরভাবে 'সনাদ্যন্তা ধাতব' ইত্যনেন ধাতুসংজ্ঞায়াং লটি তৎস্থানে 'পূর্ববৎসনঃ' ইত্যনেন আত্মনেপদিত্বেন প্রথমপুরুষৈকবচনবিবক্ষায়াং তাদেশে 'তিঙ্শিৎসার্বধাতুকম্' ইত্যনেন সার্বধাতুকত্বাৎ 'কর্তরি শপ্' ইতি শপি অনুবন্ধলোপে, 'অতো গুণে' ইতি অকারস্য পররূপে, 'টিত আত্মনেপদানাং টেরে' ইত্যনেন ত ইত্যত্র অকারস্য এত্বে, 'সন্যঙো'-রিত্যনেন 'গুপ্' ইত্যস্য দ্বিত্বে, অভ্যাসসংজ্ঞায়াং হলাদিশেষে 'গু গুপ্ স তে' ইতি জাতে, 'কুহোশ্চু' রিত্যনেন গকারস্য জকারে প্রাপ্তে 'জুগুপ্সতে' ইতি।

**ভীষয়তে**—ভয়ার্থকভীধাতোঃ প্রযোজকাৎ ণিচি অনুবন্ধলোপে ভয়বিবক্ষায়াং যদা 'বিভেতের্হেতুভয়ে' ইতি আত্বং ন ভবতি তদা ণিচি যুগাগমে 'ভিয়ো হেতুভয়ে ষুক্' ইতি ষুক্প্রত্যয়ে অনুবন্ধলোপে 'ভীষি' ইতি জাতে 'সনাদ্যন্তা ধাতবঃ' ইত্যনেন ধাতুত্বাৎ লট্লকারে তৎস্থানে 'ভীস্ম্যোর্হেতুভয়ে' ইত্যনেন আত্মনেপদিত্বেন প্রথমপুরুষৈকবচনবিবক্ষায়াং 'তিপ্তস্ঝি—' ইত্যাদিনা তাদেশে তস্য সার্বধাতুকত্বেন 'কর্তরি শপ্' ইতি শপি অনুবন্ধলোপে 'সার্ব-ধাতুকার্ধধাতুকয়ো' রিতি ইকারস্থানে একারগুণে'এচোঽয়বায়াব' ইতি অয়াদেশে জাতে, 'টিত আত্মনেপদানাং টেরে' ইতি তকারোত্তর-বর্ত্তিনোঽকারস্য এত্বে ভীষয়তে ইতি।

**ভায়য়তি**—ভীধাতোঃ 'হেতুমতি চ' ইতি ণিচি অনুবন্ধলোপে 'অচো ঞ্ণিতি' ইত্যনেন ইকারস্থানে ঐকারবৃদ্ধৌ 'এচোঽয়বায়াবঃ' ইতি ঐকারস্থানে আয়াদেশে 'ভায়ি' ইত্যস্মাৎ 'সনাদ্যন্তা ধাতবঃ' ইত্যনেন ধাতুত্বাৎ লট্সকারে তৎস্থানে প্রথমপুরুষৈকবচনবিবক্ষায়াং

ধাতবঃ' ইতি ধাতুত্বাল্লট্লকারে প্রথমপুরুষৈকবচনবিবক্ষায়াং' তৎস্থানে তিবাদেশে সার্বধাতুকত্বাৎ 'কর্তরি শপ্' ইতি শপি অনুবন্ধলোপে 'অতো গুণে' ইতি পররূপে জাতে 'দিৎসতি' ইতি রূপম্।

ক্রিয়াজন্যফলস্যাত্মগামিত্ববিবক্ষায়ামন্যত্র তু'পূর্ববৎ সনঃ' ইত্যনেন আত্মনেপদত্ববিধানেন লকারস্থানে তাদেশে 'টিত আত্মনেপদানাং টেরে' ইতি তকারোত্তরবর্ত্তিনোঽকারস্য এত্বে তস্য সার্বধাতুকত্বাৎ শপি প্রাপ্তে 'অতো গুণে' ইাত পররূপে জাতে 'দিৎসতে' ইতি।

*পাপঠ্যতে*—পঠ্ধাতোঃ পৌনঃপুন্যে ভৃশার্থে বা ধাতোরেকাচো হলাদেঃ ইত্যাদিনা যঙ্প্রত্যয়ে ঙকারস্য ইৎসংজ্ঞায়াং লোপে চ 'পঠ্ য' ইতি জাতে 'সন্যঙো'রিত্যনেন পঠ্ ইত্যস্য দ্বিত্বে পূর্বো'ঽভ্যাস' ইত্যনেন অভ্যাসসংজ্ঞায়াং 'হলাদিঃ শেষঃ' ইত্যনেন অভ্যাসহলো লোপে 'পপঠ্য' ইত্যবস্থায়াং 'দীর্ঘোঽকিতঃ' ইত্যনেনাভ্যাসাকারস্য দীর্ঘে 'পাপঠ্য' ইতি জাতে 'সনাদ্যন্তা ধাতব' ইত্যনেন ধাতুত্বাৎ লট্লকারে প্রথমপুরুষৈকবচনবিবক্ষায়াং ঙিদন্তাদাত্মনেপদিত্বেন তাদেশে তস্য সার্বধাতুকত্বেন 'কর্তরি শপ্' ইতি শপি অনুবন্ধলোপে 'অতো গুণে' ইতি পররূপে 'টিত আত্মনেপদানাং টেরে' ইত্যনেন তকারোত্তরবর্ত্তিনোঽকারস্য এত্বে 'পাপঠ্যতে' ইতি রূপম্।

*চঞ্চূর্যতে*—গর্হিতং চরতীত্যর্থে 'লুপসদচরজপ—' ইত্যনেন যঙ্ প্রত্যয়ে অনুবন্ধলোপে 'সন্যঙো' রিত্যনেন চর্ ইত্যস্য দ্বিত্বে 'পূর্বোঽভ্যাস' ইতি পূর্বসমুদায়স্যাভ্যাসসংজ্ঞায়াম্, 'হলাদিঃ শেষঃ' ইত্যনেনাভ্যাসরেফস্য লোপে 'চরফলোশ্চ' ইত্যনেন অভ্যাসাকারস্য নুগাগমে তস্যানুস্বারোপলক্ষকত্বেনানুস্বারে, 'স চ পদান্তবদ্বাচ্যঃ' ইতি বার্ত্তিকবলাত্তস্য পদান্তবদ্ভাবেন 'বা পদান্তস্য' ইত্যনেন বৈকল্পিক-

পরসবর্ণেন ঞকারে 'চ ঞ্চ য' ইতি জাতে 'উৎপরস্যাতঃ' ইত্যনেন পরস্য চকারোত্তরবর্ত্তিনোঽকারস্য উকারে 'উরণ্ রপরঃ' ইত্যনেন রপরত্বে 'হলি চ' ইতি দীর্ঘে 'চঞ্চূর্য' ইতি জাতে, 'সনাদ্যন্তা ধাতবঃ' ইতি ধাতুত্বাল্লট্লকারে ঙিদন্তাদাত্মনেপদবিধানেন লস্য প্রথমপুরুষৈক-বচনবিবক্ষায়াং তাদেশে তস্য সার্বধাতুকত্বে 'কর্তরি শপ্' ইতি শপি অনুবন্ধলোপে 'অতো গুণে' ইতি পররূপে 'টিত আত্মনেপদানাং টেরে' ইতি তকারোত্তরবর্ত্তিনোঽকারস্য এত্বে 'চঞ্চূর্যতে' ইতি রূপম্।

পরঃসবর্ণাভাবে তু 'চং চূর্যতে' ইতি।

*চিকীর্ষতি*—

কর্ত্তুমিচ্ছতীতি বিগ্রহে কৃধাতোঃ 'ধাতোঃ কর্মণঃ—' ইতি সন্-প্রত্যয়ে অনুবন্ধলোপে 'একাচ উপদেশেঽনুদাত্তাৎ'ইত্যনেন ইণ্ নিষেধে 'অজ্ ঝনগমাং সনি'ইতি দীর্ঘে,'ইকো ঝল্' ইতি কিত্ত্বাদ্ গুণাভাবে'ঋত ইদ্ধাতোঃ' ইতি ইত্বে রপরত্বে 'কির্স' ইতি জাতে 'সন্যঙো' রিত্যনেন 'কির্' ইত্যস্য দ্বিত্বে, 'পূর্বোঽভ্যাস' ইত্যনেন পূর্বসমুদায়স্যাভ্যাস-সংজ্ঞায়াং 'হলাদিঃ শেষঃ' ইত্যভ্যাসরেফস্য লোপে 'কি কির্ স' ইতি জাতে, 'কুহোশ্চুঃ' ইতি ককারস্য চকারে জাতে 'চি কির্ স' ইতি জাতে, 'হলি চ' ইতি দীর্ঘে, 'আদেশপ্রত্যয়য়ো' রিতি সকারস্য ষত্বে 'চিকীর্ষ'ইতি কৃতে 'সনাদ্যন্তা ধাতব' ইতি ধাতুত্বাৎ লট্লকারে তৎস্থানে তিপি, পকারস্য লোপে, 'কর্তরি শপ্' ইতি শপি অনুবন্ধলোপে, 'অতো গুণে' ইতি পররূপে 'চিকীর্ষতি' ইতি।

***উদন্যতি***—উদকং পাতুমিচ্ছতি পিপাসার্থে 'অশনায়োদন্য-ধনায়া বুভুক্ষাপিপাসাগর্ধেষু' ইত্যনেন ক্যচি প্রত্যয়ে, উদকশব্দস্য 'ক্যচি চ' ইত্যনেন ঈত্বাভাবে 'উদন্য' ইতি নিপাতনে সিদ্ধে, 'সনাদ্যন্তা ধাতব' ইতি ধাতুত্বাল্লটি প্রথমপুরুষৈকবচনবিবক্ষায়াং তিবাদেশে

***ব্রহ্মহত্যা***—ব্রহ্মণঃ হননম্ ইত্যর্থে ব্রহ্মোপপদাৎ হন্‌ধাতোঃ ভাবে 'হনস্ত চ' ইত্যনেন ক্যপ্‌প্রত্যয়ে অনুবন্ধলোপে হন্ ইত্যস্য নকারস্থানে তকারাদেশে চ ব্রহ্মহত্য ইতি স্থিতে লোকাৎ স্ত্রীত্বে অজাদ্যতষ্টাপ্ ইত্যনেন টাপ্‌প্রত্যয়ে টকারপকারয়োঃ ইৎসংজ্ঞায়াং লোপে চ 'অকঃ সবর্ণে দীর্ঘঃ' ইত্যনেন দীর্ঘে ব্রহ্মহত্যা ইতি পদং সিধ্যতি।

✓ ***শিষ্যঃ***—শাস্‌ধাতোঃ 'এতিস্তুশাস্বৃদৃজুষঃ ক্যপ্' ইত্যনেন ক্যপ্-প্রত্যয়ে ককারস্য 'লশক্বতদ্ধিতে' ইত্যনেন ইৎসংজ্ঞায়াং পকারস্য 'হলন্ত্যমি'ত্যনেন ইৎসংজ্ঞায়াং ততো লোপে শাস্ য ইতি জাতে 'শাস ইদঙ্‌হলোঃ' ইত্যনেন শা ইত্যস্য আকারস্য ইকারাদেশে 'শাসিবসিঘসীনাঞ্চ' ইত্যনেন সকারস্য ষকারে জাতে 'শিষ্য' ইত্যবস্থায়াং 'কৃত্তদ্ধিতসমাসাশ্চ' ইতি কৃদন্তত্বাৎ প্রতিপাদিকত্বেন সৌ তস্য রুত্বে বিসর্গে চ 'শিষ্যঃ' ইতি পদং সিদ্ধম্।

***বাচ্যম্***
***বাক্যম্*** }—

বচ্‌ধাতোঃ 'ঋহলোর্ণ্যৎ' ইত্যনেন ণ্যৎপ্রত্যয়ে অনুবন্ধলোপে 'অত উপধায়া' ইত্যনেন উপধাবৃদ্ধৌ 'বচোঽশব্দসংজ্ঞায়াম্' ইত্যনেন শব্দসংজ্ঞাভিন্নার্থে কুত্বাভাবে 'বাচ্য' ইতি স্থিতে প্রাতিপদিকত্বেন সৌ তৎস্থানে 'অতোঽম্' ইত্যনেন অমাদেশে 'অমি পূর্ব' ইত্যনেন পূর্বরূপে চ 'বাচ্যম্' ইতি সিদ্ধম্। শব্দাখ্যায়াং চ কুত্বেন চকারস্য ককারে 'বাক্যম্' ইতি।

***লভ্যম্***—লভ্‌ধাতোঃ 'ঋহলোর্ণ্যৎ' ইত্যনেন ণ্যৎপ্রত্যয়ে প্রাপ্তে অপবাদত্বাৎ 'পোরদুপধাৎ' ইত্যনেন ণ্যত্বং বাধিত্বা যৎপ্রত্যয়ে অনুবন্ধলোপে 'লভ্ য' ইত্যবস্থায়াং 'কৃত্তদ্ধিতসমাসাশ্চ' ইতি কৃদন্তত্বাৎ

প্রাতিপদিকসংজ্ঞায়াং প্রাতিপদিকত্বাৎ প্রথমায়া একবচনে সৌ বিভক্তৌ তস্য 'অতোঽম্' ইত্যনেন সুস্থানে অমাদেশে 'অমি পূর্ব' ইত্যনেন পূর্বরূপৈকাদেশে 'লভ্যম্' ইতি রূপং নিষ্পন্নম্।

*লাব্যম্*—লূধাতোঃ অবশ্যম্ভাব্যর্থে 'ওরাবশ্যকে' ইত্যনেন ণ্যৎ-প্রত্যয়ে অনুবন্ধলোপে 'অচো ঞ্ণিতি' ইতি বৃদ্ধৌ ঊকারস্থানে ঔকারে 'লৌ য' ইতি জাতে 'বান্তো যি প্রত্যয়ে' ইত্যনেন ঔকার-স্থানে আবাদেশে 'লাব্য' ইতি অবস্থায়াং প্রাতিপদিকত্বেন সৌ তৎস্থানে 'অতোঽম্' ইত্যনেন অমাদেশে 'অমি পূর্ব' ইত্যনেন পূর্বরূপে চ 'লাব্যম্' ইতি রূপম্।

*কার্য্যম্*—কৃধাতোঃ 'ঋহলোর্ণ্যৎ' ইত্যনেন ণ্যৎপ্রত্যয়ে অনুবন্ধলোপে ণকারস্য তকারস্য চ ইৎসংজ্ঞায়াং লোপে চ 'অচো ঞ্ণিতি' ইত্যনেন ঋকারস্য আকারবৃদ্ধৌ 'উরণ্রপরঃ' ইত্যনেন রপরত্বে 'কার্য্য' ইত্যবস্থায়াং 'কৃত্তদ্ধিতসমাসাশ্চ' ইতি প্রাতিপদিকত্বাৎ সৌ বিভক্তৌ 'অতোঽম্' ইত্যনেন অমাদেশে 'অমি পূর্ব' ইত্যনেন পূর্বরূপে চ 'কার্য্যম্' ইতি পদং সিদ্ধম্।

*কৃত্যম্*—কৃধাতোঃ 'বিভাষা কৃবৃষোঃ' ইত্যনেন ক্যপ্প্রত্যয়ে অনুবন্ধলোপে 'কৃ য' ইতি স্থিতে, 'হ্রস্বস্য পিতি কৃতি তুক্' ইত্যনেন তুগাগমে অনুবন্ধলোপে চ 'কৃত্ য' ইতি জাতে, তস্য 'কৃত্তদ্ধিত-সমাসাশ্চ' ইত্যনেন কৃদন্তত্বাৎ প্রাতিপদিকত্বেন প্রথমায়া একবচনে সৌ বিভক্তৌ 'কৃত্য সু' ইতি জাতে, 'অতোঽম্' ইতি সুস্থানে অমাদেশে 'কৃত্য অম্' ইতি স্থিতে, 'অমি পূর্ব' ইত্যনেন পূর্বরূপৈ-কাদেশে চ 'কৃত্যম্' ইতি।

*মৃজ্যঃ*—মৃজ্ধাতোঃ 'মৃজের্বিভাষা' ইত্যনেন পাক্ষিকে ক্যপ্—প্রত্যয়ে অনুবন্ধলোপে 'মৃজ্য' ইতি স্থিতে, 'কৃত্তদ্ধিতসমাসাশ্চ'

ইত্যনেন কৃদন্তত্বাৎ প্রাতিপদিকত্বেন সৌ বিভক্তৌ তস্য রুত্বে বিসর্গে চ 'মৃজ্যঃ' ইতি।

*মার্গ্যঃ*—'মৃজের্বিভাষা' ইতি ক্যবভাবপক্ষে মৃজ্‌ধাতোঃ 'ঋহলোর্ণ্যৎ' ইত্যনেন ণ্যৎপ্রত্যয়ে অনুবন্ধলোপে 'মৃজের্বৃদ্ধিঃ' ইতি বৃদ্ধৌ 'উরণ্‌রপরঃ' ইতি রপরত্বে 'মার্জ্য' ইতি স্থিতে 'চজোঃ কু ঘিণ্যতোঃ' ইত্যনেন জকারস্য কুত্বেন গকারে 'মার্গ্য' ইতি জাতে তস্য 'কৃত্তদ্ধিতসমাসাশ্চ' ইত্যনেন কৃদন্তত্বাৎ প্রাতিপদিকত্বেন সৌ বিভক্তৌ তস্য রুত্বে বিসর্গে চ কৃতে '**মার্গ্যঃ**' ইতি সিদ্ধম্।

*প্রগৃহ্যম্*—প্রপূর্বকাৎ গ্রহধাতোঃ পদার্থে দ্যোতে 'পদাস্বৈরিবাহ্যাপক্ষ্যেষু চ' ইত্যনেন ক্যপ্‌প্রত্যয়ে অনুবন্ধলোপে 'প্রগ্রহ্‌ য' ইতি স্থিতে, 'গ্রহিজ্যা' ইত্যাদিনা গ্রহেঃ রেফস্য ঋকারসম্প্রসারণে 'প্রগৃহ্য' ইতি জাতে তস্য কৃদন্তত্বাৎ প্রাতিপদিকত্বেন সৌ বিভক্তৌ 'অতোঽম্' ইত্যনেন সুস্থানে অমাদেশে 'অমি পূর্ব' ইত্যনেন পূর্বরূপৈকাদেশে চ **প্রগৃহ্যমিতি** পদং সিদ্ধম্।

*আচর্য্যঃ*—আঙ্‌পূর্বকচর্‌ধাতোঃ 'চরেরাঙি চাগুরৌ' ইতি বার্ত্তিকেন গুরুভিন্নে অর্থে যৎপ্রত্যয়ে অনুবন্ধলোপে 'আচর্য্য' ইত্যবস্থায়াম্, 'কৃত্তদ্ধিতসামাসাশ্চ' ইত্যনেন প্রাতিপদিকসংজ্ঞায়াং প্রাতিপদিকত্বাৎ প্রথমায়া একবচনে সৌ বিভক্তৌ রুত্বে বিসর্গে চ '**আচর্য্যঃ**' ইতি। 'অচো রহাভ্যাং দ্বে' ইত্যনেন 'য' ইত্যস্য দ্বিত্বম্।

*আচার্য্যঃ*—'গুরু' ইত্যর্থে আঙ্‌পূর্বকাৎ চর্‌ধাতোঃ 'ঋহলোর্ণ্যৎ' ইত্যনেন ণ্যৎ প্রত্যয়ে ণকারস্য 'চুটূ' ইত্যনেন ইৎসংজ্ঞায়াং তকারস্য 'হলন্ত্যম্' ইত্যনেন ইৎসংজ্ঞায়াং লোপে চ 'অত উপধায়া' ইত্যনেন উপধাভূতস্য অকারস্য আকারবৃদ্ধৌ 'আচার্য্য' ইত্যস্মাৎ 'কৃত্তদ্ধিত-

সমাসাশ্চ' ইত্যনেন কৃদন্তত্বেন প্রাতিপদিকসংজ্ঞায়াং প্রাতিপদিকত্বেন সৌ বিভক্তৌ রুত্বে বিসর্গে চ কৃতে, 'অচো রহাভ্যাং দ্বে' ইত্যনেন দ্বিত্বে চ **'আচার্য্যঃ'** ইতি।

***গদ্যম্***—গদ্‌ধাতোঃ 'গদমদচরযমশ্চানুপসর্গে' ইত্যনেন যৎপ্রত্যয়ে অনুবন্ধলোপে 'গদ্য' ইত্যবস্থায়াং 'কৃত্তদ্ধিতসমাসাশ্চ' ইত্যনেন প্রাতিপদিকসংজ্ঞায়াং প্রাতিপদিকত্বাৎ প্রথমায়া একবচনে সৌ বিভক্তৌ 'অতোঽম্' ইত্যনেন সুস্থানে অমাদেশে 'অমি পূর্ব' ইত্যনেন পূর্বরূপৈকাদেশে **'গদ্যম্'** ইতি সিদ্ধম্।

***জন্যম্***—'জনিঃ প্রাদুর্ভাবে' ইত্যস্মাৎ 'তকিশসিচতি—যতিজনিভ্যো যদ্‌বাচ্যঃ' ইতি বার্ত্তিকেন যৎপ্রত্যয়ে অনুবন্ধলোপে 'জন্য' ইতি স্থিতে কৃদন্তত্বাৎ 'কৃত্তদ্ধিতসমাসাশ্চ' ইত্যনেন প্রাতি-পদিকসংজ্ঞায়াং প্রথমায়া একবচনে সৌ বিভক্তৌ তস্য 'অতোঽম্' ইত্যনেন অমাদেশে 'অমি পূর্ব' ইত্যদেন পূর্বরূপৈকাদেশে **'জন্যম্'** ইতি।

***অনুদ্যম্***—নঞি উপপদে সতি বদ্‌ধাতোঃ 'বদঃ সুপি ক্যপ্ চ' ইত্যনেন ক্যপ্‌প্রত্যয়ে অনুবন্ধলোপে 'নঞ-বদ্+য' ইতি স্থিতে 'বচিস্বপিযজাদীনাং কিতি' ইত্যনেন বকারস্য উকারসম্প্রসারণে 'সম্প্রসারণাচ্চে'তি পূর্বরূপে 'কৃত্তদ্ধিতসমাসাশ্চ' ইত্যনেন প্রাতিপদি-কত্বে সৌ বিভক্তৌ তস্য স্থানে অমাদেশে **'অনুদ্যম্'** ইতি।

***পণ্যম্***<br>***পাণ্যম্*** } —

'পণ ব্যবহারে' ইত্যস্মাদ্ধাতোঃ 'অবদ্যপণ্যবর্য্যা'ইতি সূত্রেণ নিপাতনাদত্র যৎপ্রত্যয়ো ভবতি। অনুবন্ধলোপে 'পণ্য' ইতি জাতে, 'কৃত্তদ্ধিতসমাসাশ্চ' ইত্যনেন প্রাতিপদিকসংজ্ঞায়াং সৌ বিভক্তৌ তস্য অমাদেশে **'পণ্যম্'** ইতি। যদ্যপি 'পণ ব্যবহারে স্তুতৌ

আদিবৃদ্ধৌ 'আদেশপ্রত্যয়য়োঃ'রিত্যনেন ণত্বে স্ত্রৈণ ইত্যবস্থায়াং 'কৃত্তদ্ধিত-সমাসাশ্চ' ইত্যনেন প্রাতিপদিকত্বাৎ সৌ তস্য রুত্বে বিসর্গে চ স্ত্রৈণঃ ইতি।

*যাস্কীয়াঃ*—যস্কস্য গোত্রাপত্যমিত্যর্থে 'অত ইঞ্' ইতি প্রাপ্তস্য ইঞঃ অপবাদত্বেন 'শিবাদিভ্যোঽণ্' ইত্যণি বিভক্তিকার্যে 'যাস্কঃ' ইতি, তস্যাপত্যং যুবেত্যর্থে অণো দ্ব্যচঃ ইত্যনেন ফিঞি অনুবৃন্ধলোপে 'আয়নেয়ীনীয়িয়ঃ ফ খেছঘাং প্রত্যয়াদীনাম্' ইত্যনেন ফস্থানে আয়নাদেশে বিভক্তিকার্যে যাস্কায়নিঃ। যাস্কায়নেশ্ছাত্রা ইত্যর্থে তস্যেদমিত্যনুবৃত্তৌ 'বৃদ্ধাচ্ছ' ইতি ছঃ। ছাত্রার্থকচ্ছপ্রত্যয়ে বিবক্ষিতে 'যূনি লুক্' ইতি নিত্যে লুকি প্রাপ্তে 'ফক্ফিঞোঽন্যতরস্যাম্' ইত্যনেন ফিঞঃ পাক্ষিকলোপে যাস্কশব্দাৎ ছপ্রত্যয়ে ঈয়াদেশে 'যস্যেতি চ' ইত্যকারলোপে যাস্কীয়, তস্য প্রথমাবহুবচনে 'যাস্কীয়াঃ' ইতি।

*প্রালেয়ম্*—প্রলয়াদাগতমিত্যর্থে প্রলয়শব্দাদণি অনুবন্ধলোপে ণিত্বাদাদিবৃদ্ধৌ 'প্রালয় অ' ইতি স্থিতে 'কেকয়মিত্রয়ুপ্রলয়ানাং যাদোরিয়ঃ' ইত্যনেন য ইত্যস্য ইযাদেশে 'আদ্গুণ' ইত্যনেন 'প্রালেয় অ' ইতি জাতে, 'যস্যেতি চ' ইত্যনেন যকারাদকারস্য লোপে 'প্রালেয়' ইতি স্থিতে প্রাতিপদিকত্বাৎ সৌ বিভক্তৌ, তস্য ক্লীবত্ববিবক্ষায়াম্ 'অতোঽম্' ইত্যনেন অমাদেশে 'অমি পূর্ব' ইত্যনেন পূর্বরূপৈকাদেশে চ '**প্রালেয়ম্**' ইতি সিদ্ধম্।

মহাভাষ্যম্ ( পস্পশা )

## (১) ব্যাকরণাধ্যয়নস্য মুখ্যমানুষঙ্গিকং চ প্রয়োজনম্ ।

অনুশিষ্যন্তেঽপশব্দেভ্যঃ পৃথক্কৃত্য কথ্যন্তে সাধুশব্দা অনেন ইতি শব্দানুশাসনং নাম শাস্ত্রমিতি প্রতিজ্ঞয়া সাধুশব্দজ্ঞানং ব্যাকরণাধ্যয়নস্য সাক্ষাৎ প্রয়োজনম্ ইতি লভ্যতে, সাধুশব্দস্য ব্যাকরণাধীনত্বাৎ। মুখ্য-প্রয়োজনানি চ রক্ষোহাগমলঘ্বসন্দেহা ইত্যাদীনি। তথাহি— ব্যাকরণাধ্যয়নাবগতবর্ণলোপাগমবর্ণবিকারো গৃহীতপ্রকৃতিপ্রত্যয়-বিভাগো বেদান্ পালয়িষ্যতীতি রক্ষার্থং বেদানামধ্যেয়ং ব্যাকরণম্। প্রকৃতাবাম্নাতস্য মন্ত্রস্য বিকৃতৌ সমাবেতার্থত্বায় তদুচিতপদান্তর-প্রক্ষেপেণ পাঠঃ উহঃ। প্রকৃতিবদ্বিকৃতিঃ কর্ত্তব্যেতি মীমাংসকসিদ্ধান্তাৎ প্রকৃতিযাগে পঠিতস্য 'অগ্নয়ে ত্বা জুষ্টং নির্বপামী'তি মন্ত্রস্যাগ্নিপদস্য 'সৌর্য্যং চরুং নির্বপেদ্ ব্রহ্মবর্চসকামঃ' ইতি সৌর্য্যে চরৌ বিকৃতিযাগে সূর্যসম্বন্ধিনির্বাপপ্রকাশনাসামর্থ্যাৎ তদপহায় তৎস্থানে 'সূর্য্যায় ত্বা' ইত্যূহার্থমধ্যেয়ং ব্যাকরণম্। ব্রাহ্মণেন নিষ্কারণো ধর্ম্মঃ ষড়ঙ্গো বেদোঽধ্যেয়ো জ্ঞেয়শ্চ ইতি শ্রুত্যা ব্যাকরণস্য পদার্থাবগমদ্বারা বাক্যার্থাবগমোপযোগিত্বাত্তদনধ্যয়নপ্রযুক্তস্য বেদার্থাঽজ্ঞানপ্রযুক্তস্য চ প্রত্যবায়স্য পরিহারার্থমধ্যেয়ং ব্যাকরণম্। প্রধানবিষয়িকা বৃত্তিশ্চ ফলবতী ভবতীতি সর্বানুভবসিদ্ধা। শব্দানামানন্ত্যং প্রক্রিয়ারূপলঘু-ভূতোপায়জ্ঞানার্থমধ্যেয়ং ব্যাকরণম্। এবং লঘ্বর্থং চাপ্যধ্যেয়ং ব্যাকরণম্। অসন্দেহার্থঞ্চাধ্যেয়ং ব্যাকরণম্। তথা চ 'স্থূলপৃষতী-মাগ্নিবারুণীমনড্বাহীমালভেত' ইত্যত্র কর্মধারয়ো বহুব্রীহি র্বেতি সন্দেহে প্রাগভাবপরিপালনার্থমধ্যেয়ং ব্যাকরণম্।

শব্দানুশাসনস্য আনুষঙ্গিকানি প্রয়োজনানি ভগবতা ভাষ্যকারেণ বহূনি উপন্যস্তানি। তানি আদৌ সঙ্কেতেন প্রদর্শিতানি। যথা— (১) তেঽসুরাঃ (২) দুষ্টঃ শব্দঃ (৩) যদধীতম্ (৪) যস্তু প্রযুঙ্ক্তে, (৫) অবিদ্বাংসঃ (৬) বিভক্তিং কুর্বন্তি (৭) যো বা ইমাম্ (৮) চত্বারি (৯) উত ত্বঃ (১০) সক্তুমিব (১১) সারস্বতীম্ (১২) দশম্যাং পুত্রস্য

(১৩) সুদেবোঽসি ইতি। তথাহি—(১) হে অরয়, হে অরয় ইতি প্রযোক্তব্যে বাক্যদ্বির্বচনেন লত্বকরণেন চ নিন্দিতত্বমিতি তদপনোদনায় ব্যাকরণমধ্যেয়ম্। (২) 'ইন্দ্রশত্রুর্বর্ধস্ব' ইতি মন্ত্রে শাতয়িতৃপরকশত্রু-শব্দেনেন্দ্রশব্দস্য তৎপুরুষেণান্তোদাত্তত্বে কর্ত্তব্যে বহুব্রীহিণাঽহত্যুদাত্তত্বং কৃতবতা ঋত্বিজা যজমানো বিনাশিত ইতি দুষ্টশব্দবারণদ্বারা যজমান-রক্ষণমস্য প্রয়োজনম্। (৩) অর্থজ্ঞানপূর্বকশব্দপ্রয়োগ এব ধর্ম ইত্যর্থ-জ্ঞানস্য ব্যাকরণাধীনত্বেন সুশব্দপ্রয়োগার্থং নিষিদ্ধাধ্যয়ননিবৃত্ত্যর্থঞ্চ ব্যাকরণমধ্যেয়ম্। (৪) অপশব্দপ্রয়োগস্যাধর্মজনকত্বেন লক্ষণস্মরণ-পূর্বকসুশব্দপ্রয়োগস্যানন্তফলজনকত্বেন চাদৃষ্টদ্বারা পুরুষার্থসাধকং ব্যাকরণম্। তস্মাদধ্যেয়ং তৎ। (৫) নাম্নষ্টেঃ প্লুতিজ্ঞানস্য ব্যাকরণ-জ্ঞানাধীনত্বেনাশীর্বাদবাক্যে নাম্নষ্টেঃ প্লুতিমকুর্বতঃ পুমাংসঃ স্ত্রীসাদৃশ্য-বারণায় ব্যাকরণমধ্যেয়ম্। (৬) প্রযাজমন্ত্রে উহ্যমানাগ্নিশব্দপ্রকৃতি-কবিভক্তিজ্ঞানং ব্যাকরণেন সিধ্যতি। (৭) যো বা ইমাং পদশঃ স্বরশোঽক্ষরশশ্চ বাচং বিদধাতি স আর্ত্বিজীনো ভবতি। ততঃ আর্ত্বি-জীনাঃ ভবিতুং ব্যাকরণমধ্যেয়ম্। (৮) পদচতুষ্টয়জ্ঞানং কালত্রয়জ্ঞানং ব্যঙ্গ্যব্যঞ্জকশব্দজ্ঞানং সপ্তবিভক্তিজ্ঞানং বর্ণানামুরঃকণ্ঠশিরোরূপস্থান-ত্রয়জ্ঞানং চ ব্যাকরণাধীনমিতি তজ্‌জ্ঞস্য শব্দব্রহ্মণোঽভেদাধ্যবসায়েন মোক্ষপদজনকত্বমস্য নির্বাধম্। (৯) অর্থো হি বাচঃ শরীরমিত্যর্থবিদমেব বৈয়াকরণং ব্রহ্মরূপা বাক্ স্বীকরোতি নান্যমিতি মোক্ষসাধকং ব্যাকরণম্। (১০) শব্দাপশব্দসমূহাদ্ ব্যাকরণজ্ঞানেন পরিশোধ্যাপশব্দান্ বিহায়ৈব সাধুশব্দঃ প্রযোক্তব্যঃ। (১১) আহিতাগ্নিরপশব্দং প্রযুজ্য প্রায়শ্চিত্তীয়ো মা ভূদিত্যেতদর্থং ব্যাকরণমধ্যেয়ম্। (১২) নামকরণে ঘোষবদাদ্যন্তরন্তস্থাদিজ্ঞানং ব্যাকরণাধীনম্। ন চান্তরেণ ব্যাকরণং কৃতস্তদ্ধিতা বা শক্যা বিজ্ঞাতুম্। (১৩) যথা বরুণস্য সত্যদেবত্বং তথা সপ্তবিভক্তিজ্ঞানেন ব্যাকরণজ্ঞস্যাপি তদিতি বরুণবৎ স্বর্গবাসিতয়া স্বর্গফলং ব্যাকরণাধ্যয়নস্য ইত্যাদীনি আনুষঙ্গিকানি প্রয়োজনানি।

### (২) পস্পশাশব্দস্য ব্যুৎপত্তিঃ।

পাতঞ্জলমহাভাষ্যস্য প্রথমাহ্নিকং পস্পশেত্যভিধীয়তে। শাস্ত্রারম্ভসমর্থকোপদ্‌ঘাতগ্রন্থসন্দর্ভস্য পস্পশশব্দেন পস্পশাশব্দেন বা ব্যবহারঃ। তদাহ শব্দকৌস্তুভে—

শাস্ত্রারম্ভকো গ্রন্থ উপোদ্‌ঘাত ইতীরিতঃ।
স এব গ্রন্থসন্দর্ভঃ পস্পাশঃ কথিতো বুধৈঃ ॥ ইতি॥

তত্রেয়ং ব্যুৎপত্তিরিষ্যতে। স্পশ বাধনস্পর্শনয়োরিতি ভ্বাদিষু পঠ্যতে। স্পশ্যতে স্পৃশ্যতে উপোদ্‌ঘাততয়া ইতি বিগ্রহে স্পশ্ ধাতোঃ কর্মণ্যঙি বাহুলকাদ্ দ্বিত্বে রূপম্। দ্বিত্বে চ 'স্পশ্ স্পশ্ অ' ইতি স্থিতে পূর্বস্য স্পশ্ শব্দস্যাভ্যাসসংজ্ঞায়াং 'শর্পূর্বাঃ খয়ঃ' ইতি সূত্রেণ পূর্বসকারস্য লোপে পস্পশ ইতি রূপম্। স্ত্রীত্ববিবক্ষায়াম্ 'অজাদ্যতষ্টাপ্' ইতি টাপি পস্পশা ইতি রূপম্।

পস্পশাশব্দেন তু 'চক্ষুরিন্দ্রিয়েণ জ্ঞানম্' ইতি ব্যাখ্যাতম্। আলোচ্যবিষয়ে সমগ্রত আপাততো জ্ঞানং জায়তে ইতি হি পস্পশাশব্দস্য দ্যোতনা। এবং হি মহাভাষ্যস্য প্রথমাহ্নিকস্য সমগ্রব্যাকরণশাস্ত্রস্যোপোদ্‌ঘাতরূপত্বাৎ (অর্থাৎ ভূমিকাস্বরূপত্বাৎ) পস্পশেতি ব্যপদেশঃ সর্বথোপপদ্যতে। তথা হ্যত্র কো নাম শব্দঃ, কিং তাবৎ শব্দানুশাসনস্য প্রয়োজনম্, কো বা শব্দানামনুশাসনে উপায়ঃ, কশ্চ পদার্থঃ, কিং পুনর্নিত্যঃ শব্দ আহোস্বিৎ কার্য্য ইত্যাদীনি মৌলিকতত্ত্বানি পর্যালোচিতানি। এষু সম্যগ্ জ্ঞাতেষ্বেব ব্যাকরণাধ্যয়নং যুজ্যতে ইত্যত এষামুপোদ্‌ঘাতরূপতা স্পষ্টৈব।

### ✓(৩) মহাভাষ্যস্য মহত্ত্বম্। ভাষ্যস্য লক্ষণম্।

পাণিনি-কাত্যায়ন-পতঞ্জলিবিরচিতে ব্যাকরণে অষ্টাধ্যায়ীতি প্রথমং শাস্ত্রম্। তত্র পাণিনিপ্রোক্তানাং সূত্রাণাং কাত্যায়নপ্রণীতানাং বার্ত্তিকানাং বিবরণশাস্ত্রং মহাভাষ্যমিতি কথ্যতে। তথা চোক্তং ভাষ্যলক্ষণম্—

সূত্রার্থো বর্ণ্যতে যত্র বাক্যৈঃ সূত্রানুসারিভিঃ।

স্বপদানি চ বর্ণ্যন্তে ভাষ্যং ভাষ্যবিদো বিদুঃ ॥ ইতি।

যদ্বা, সূত্রকারেণ উক্তমনুক্তং দুরুক্তং বা বিষয়ং সুবিস্তরতয়া ভাষ্যকারেণ বিস্পষ্টীক্রিয়তে।

পতঞ্জলিমহাভাষ্যে দর্শনসূত্রভাষ্যবৎ স্বপদবর্ণনানি দৃশ্যন্তে। যথা, অথ শব্দানুশাসনম্ ইত্যত্র অথশব্দস্য ব্যাচিখ্যাসয়া অথ ইত্যেবং শব্দোঽধিকারার্থঃ প্রযুজ্যতে ইত্যুক্তম্। কিঞ্চ, বৃত্তিসমবায়ার্থঃ বর্ণানামুপদেশঃ ইত্যুক্ত্বা বৃত্তয়ে সমবায়ো বৃত্তিসমবায়ো, বৃত্ত্যর্থো বা সমবায়ো বৃত্তিপ্রয়োজনো বা সমবায়ো বৃত্তিসমবায় ইতি স্বপদবর্ণনমুপলভ্যতে। অতোঽত্র ব্যাকরণভাষ্যে অপি ভাষ্যলক্ষণসমন্বয়তয়া উত্তরভাষ্যসাধারণ্যেন অস্যাপি ভাষ্যত্বমেব ন্যায্যং প্রতিভাতি, ন তু মহাভাষ্যত্বম্। অতঃ অত্র কা বা বিলক্ষণতা যেন হেতুনাস্য গ্রন্থস্য মহাভাষ্যমিতি নাম ভবতীত্যস্মাভিঃ পর্যালোচনা করিষ্যতে।

"ব্যাখ্যাতৃত্বেঽপ্যস্য ইষ্টাদিকথনেন অন্বাখ্যাতৃত্বাদ্ ইতরভাষ্যবিলক্ষণেন মহত্বম্" ইত্যুক্তং নাগেশেনোচ্যতে। ভাষ্যান্তরে তু কেবলং সূত্রমেব বৈশদ্যেন ব্যাখ্যায়তে। অত্র ব্যাকরণভাষ্যে ন কেবলং সূত্রং ব্যাখ্যায়তে অপি তু সূত্রস্য প্রত্যাখ্যানং ক্রিয়তে, সূত্রকারমতস্য বিরুদ্ধমতং সংস্থাপ্যতে চ। যথা সূত্রকারেণ বহুব্রীহৌ চিকীর্ষিতে এব সর্বনামসংজ্ঞা প্রতিষিদ্ধা। ভাষ্যকারেণ তু 'ন বহুব্রীহৌ' ইতি সূত্রং প্রত্যাখ্যায় বহুব্রীহিসমাসার্থবাক্যেঽপি সর্বনামসংজ্ঞা বিহিতা। তথাহি সর্বত্র শাস্ত্রেষু সূত্রভাষ্যয়ো বিরোধে সূত্রস্যৈব প্রামাণ্যম্। কিন্তু অত্র ব্যাকরণে সূত্রভাষ্যয়োঃ বিরোধে 'যথোত্তরং মুনীনাং প্রামাণ্যম্' ইতি নিয়মাৎ ভাষ্যস্যৈব প্রামাণ্যম্। অপি চ ব্যাকরণভাষ্যস্য সর্বেভ্যো ভাষ্যেভ্যঃ প্রাঙ্ নির্মিতত্বাদ্ বৃদ্ধত্বেনাস্য মহত্বম্। প্রদীপঃ সর্বশাস্ত্রাণাম্ ইত্যাদিবিশেষণীভূতস্য চ পাণিনীয়ব্যাকরণস্য বিবরণভূতস্য মহাভাষ্যস্য প্রাচীনত্বাৎ সর্বোপকারকত্বেন মহত্বময়াতি।

এতদ্ ব্যাকরণভাষ্যং ন কেবলং ব্যাকরণনিবন্ধ ইতি যাবৎ। কিন্তু

সর্বেষাং ন্যায়বীজানাম্ ইত্যুক্ততয়া বোদ্ধব্যমিত্যত এব সর্বন্যায়বীজ-হেতুত্বাদেব মহাশব্দেন বিশেষ্য মহাভাষ্যমিত্যুচ্যতে লোকে। ইদং খলু মহাভাষ্যং ব্যাকরণশাস্ত্রার্ণবস্য অপূর্বং গ্রন্থরত্নম্। অতীব সরলেন সর-সেন চ প্রকারেণ শুষ্কব্যাকরণবিষয়োঽস্মিন্ প্রতিপাদিতো দৃশ্যতে। ন চ পতঞ্জলেরিব সরলগম্ভীরা প্রাঞ্জলতয়া ভাষা অপি কস্যাপি অন্যস্য গ্রন্থ-কৃতো ভাষ্যে বিধিনা নিবেশিতা। তস্মাৎ মহাভাষ্যমিদম্ অলৌকিকং বস্তু।

## (৪) 'সিদ্ধে শব্দার্থসম্বন্ধে' ইত্যস্য বার্ত্তিকস্য ভাষ্য-কাররীত্যা ব্যাখ্যানম্।

ননু পাণিনেঃ শাস্ত্রস্য কিমপূর্বশব্দনিষ্পাদনদ্বারার্থবিশেষসম্বন্ধ-নিষ্পাদকত্বমুত সিদ্ধশব্দার্থসম্বন্ধবোধকত্বমিত্যাশঙ্কায়ামস্য বার্ত্তিকস্যো-ত্থিতিরিতি বোধ্যম্। শব্দশ্চ অর্থশ্চ সম্বন্ধশ্চেতি সমাহারদ্বন্দ্বাৎ সপ্তমী। অত্র সিদ্ধা দ্যৌরিত্যাদিবন্নিত্যপর্য্যায়বাচিসিদ্ধশব্দগ্রহণম্। ন তু সিদ্ধ ওদনঃ. সিদ্ধঃ সূপঃ ইত্যাদ্যনিত্যেষ্বপি সিদ্ধশব্দপ্রয়োগদর্শনাদনিত্য-পর্য্যায়বাচিনোঽত্র গ্রহণম্। ন চ সিদ্ধশব্দস্য নিত্যানিত্যয়োঃ প্রয়োগ-দর্শনেন কথং নিত্যপর্য্যায়স্য গ্রহণমিতি বাচ্যম্, সংগ্রহে কিং কার্য্যঃ শব্দঃ অথ সিদ্ধঃ ইতি পক্ষদ্বয়বিচারে কার্যপ্রতিপক্ষার্থাভিধায়িনঃ সিদ্ধ-শব্দস্য নিত্যপর্য্যায়বাচিতয়া তৎসমানতন্ত্রত্বাদিহাপি তথৈব যুক্তম। অথবা যথা অব্‌ভক্ষো মীনঃ বায়ুভক্ষঃ সর্পঃ ইতি বাক্যেন সামর্থ্যাদ্ অপ এব ভক্ষয়তি বায়ুমেব ভক্ষয়তীতি নিয়মো গম্যতে। তথাত্রাপি সিদ্ধ এব ন সাধ্যঃ ইতি নিয়মপ্রতীতিঃ। কিঞ্চ বিনাপি প্রত্যয়ং পূর্বোত্তরপদলোপো বক্তব্য ইত্যনেনাত্র পূর্বপদলোপেন দেবদত্তো দত্তঃ, সত্যভামা ভামেতিবদত্যন্তসিদ্ধঃ সিদ্ধ ইতি। অন্যথা ব্যাখ্যানাদেব নিত্যপর্য্যায়বাচিনো গ্রহণমিতি সিদ্ধশব্দস্য নিত্য এবার্থঃ ইতি সিদ্ধান্তঃ।

ননু সন্দিগ্ধসিদ্ধপদং বিহায়াসন্দিগ্ধনিত্যপদমেব কথং নোপাত্ত-মিতি চেন্ন, নিত্যপদোপাদানেঽপি নিত্যপ্রহসিতঃ নিত্যপ্রজল্পিতঃ

ইত্যাদৌ আভীক্ষ্ণ্যে অপি নিত্যশব্দদর্শনেন সংশয়বারণায় ব্যাখ্যানত ইত্যস্যৈবানুশরণীয়তয়া মঙ্গলার্থং মাঙ্গলিকাসন্ধশব্দাপাদানস্যৈবোপযুক্তত্বাদিতি দিক্।

### (৫) "*ব্যাকরণমিত্যস্য শব্দস্য কঃ পদার্থ*" *ইতি ভাষ্যগ্রন্থস্য ব্যাখ্যানম্।*

পাণিনিব্যাকরণস্য ভাষ্যং প্রণেতুমিচ্ছতা তত্রভবতা পতঞ্জলিনা স্বকীয়গ্রন্থস্য প্রারম্ভে পস্পশাহ্নিকে উপোদ্‌ঘাততয়া 'অথ ব্যাকরণমিত্যস্য শব্দস্য কঃ পদার্থঃ' ইতি প্রশ্নঃ উত্থাপিতঃ। তত্রেদং বিচারিতং তেনাচার্যেণ—'ন চান্তরেণ ব্যাকরণম্, তস্মাদধ্যেয়ং ব্যাকরণম্' ইত্যাদৌ যদি সূত্রমাত্রং ব্যাকরণশব্দস্য প্রবৃত্তিনিমিত্তং তদা ব্যাকরণস্য সূত্রমিত্যাদৌ ষষ্ঠ্যর্থোঽনুপপন্নঃ। অভেদে ষষ্ঠ্যভাবাৎ। অপি চ ব্যাকরণাৎ শব্দান্ প্রতিপদ্যামহ ইতি লোকব্যবহারসিদ্ধস্য ব্যাকরণে শব্দপ্রতিপত্তিহেতুত্বস্য চানুপপত্তিঃ এতৎপক্ষে। নহি সূত্রত এব শব্দপ্রতিপত্তির্দৃষ্টা। কিন্তু উদাহরণপ্রত্যুদাহরণবাক্যাধ্যাহারাদিসমুদায়রূপাদ্ ব্যাখ্যানাদেব। নাপি শব্দোঽপি ব্যাকরণপদার্থঃ। ব্যাকরণস্য শব্দপদার্থত্বে ব্যাকরণে ভবো যোগঃ বৈয়াকরণ ইতি ভবার্থকতদ্ধিতস্য পাণিনিনা প্রোক্তং পাণিনীয়মিত্যত্র প্রোক্তার্থকতদ্ধিতস্য চানুপপত্তিঃ স্যাৎ। নহি শব্দে ভবো যোগঃ কিন্তু সূত্রে এব। নহি চ পাণিনিনা শব্দাঃ প্রোক্তাঃ কিন্তু সূত্রমেব ইত্যুভয়থা দোষঃ। এবং তর্হি লক্ষ্যলক্ষণসমুদিতমেব ব্যাকরণপদার্থঃ। ন চৈবং কেবলমধীতসূত্রোঽপি বৈয়াকরণ ইতি ব্যবহারানুপপত্তিঃ সমুদায়ে প্রবৃত্তস্য শব্দস্য একদেশে প্রবৃত্ত্যসম্ভবাদিতি বাচ্যম্। পটৈকদেশে দগ্ধে পটো দগ্ধ ইতিবৎ সমুদায়ে প্রবৃত্তস্যাপ্যেকদেশে প্রবৃত্তিসম্ভবাৎ। যদি চ রাহোঃ শির ইতি ব্যবহারে একস্মিন্নপি বস্তুনি ঔপাধিকভেদমাদায় ভেদব্যবহারঃ, এবমিহাপি ব্যাকরণশব্দেন শাস্ত্রস্য ব্যাকৃতিক্রিয়ায়াং করণরূপত্বমুচ্যতে, সূত্রশব্দেন তু সমুদায়রূপতেতি ভেদব্যবহারোপপত্তিঃ। শব্দাপ্রতি-

সংবৃতাদিদোষনিবৃত্তিঃ। নৈবং করণেন গৌরবমপি। সম্পূর্ণাষ্টাধ্যায়ীং প্রতি তেষামসিদ্ধত্বেন শাস্ত্রদৃষ্ট্যা কলাদিদোষসত্ত্বাৎ কলাদাত্মনেপদম্, খ্যাতকর্ত্তৃগামিনি ক্রিয়াফলে ইত্যেবং সূত্রকরণেনেষ্টসিদ্ধৌ শীঙাদৌ সর্বানুবন্ধপ্রত্যাখ্যানেন কলাদিদোষযুক্তপাঠেনৈব নির্বাহাদনেকশক্ত-মনুবন্ধং নোচ্চার্যম্ ইৎসংজ্ঞা চ ন বক্তব্যা. লোপশ্চ ন বক্তব্য: ইতি প্রত্যুত লাঘবাদিতি তন্ন বাচ্যম্। বর্ণসমাম্নায়সমর্থনায় প্রবৃত্তস্য একদোষবারণায় সকলশাস্ত্রস্য ব্যাখ্যানসাপেক্ষগুরুপ্রকারেণ অন্যথা-করণে বৃশ্চিকভিয়া পলায়মানস্যাশীবিষমুখে নিপাত ইতি ন্যায়া-পাতো ন শঙ্কনীয়ঃ।

ননু জাত্যুপদেশাৎ সংবৃতাদিদোষবিশিষ্টানামপি গ্রহণাপত্তিরিতি চেন্ন। গর্গাদিবিদাদিপাঠাৎ স‚বৃতাদীনাং নিবৃত্তিসিদ্ধেঃ। ন চ গর্গাদিসমুদায়ানাং সাধুত্বার্থং পাঠস্য চারিতার্থ্যাৎ কথং সংবৃতাদি-দোষাণাং নিবৃত্তিঃ স্যাদিতি বাচ্যম্। শ্বেতো ধাবতি অলম্বুসানাং যাতেতিবদ্ গর্গাদিবিদাদিপাঠস্য তন্ত্রেণ প্রয়োজনদ্বয়সাধকতয়া যথাভূতা গর্গাদিস্থা অকারাদয়স্তথাভূতা এব সর্বত্র প্রযোক্তব্যা ইতি প্রতিপাদনেনাদোষাৎ। অথবা কেবলানাং বর্ণানাং লোকে প্রয়োগাভাবাদ্ধাত্বাগমাবকারপ্রত্যয়প্রতিপাদিকানাং শুদ্ধানামেব পাঠেন তৎস্থত্বাচ্চ বর্ণানামিতি ন কশ্চিদ্দোষঃ। ন চ যান্যগ্রহণানি প্রাতি-পদিকানি তত্র দোষস্তদবস্থ এবেতি বাচ্যম্। শশঃ ষষ ইতি মা ভূৎ, মঞ্চকো মঞ্জক ইতি মা ভূদিত্যেতদর্থমেতেষামপি স্বরবর্ণা-নুপূর্বীজ্ঞানার্থমুপদেশস্যাবশ্যকত্বাৎ। তদুক্তম্—

আগমাশ্চ বিকারাশ্চ প্রত্যয়াঃ সহ ধাতুভিঃ।
উচ্চার্য্যন্তে ততস্তেষু নেমে প্রাপ্তাঃ কলাদয়ঃ॥ ইতি।

## (৯) *শব্দানাং নিত্যত্বং কার্যত্বং বা*—

মীমাংসকা ধ্বনিব্যঙ্গ্য-বর্ণাত্মকং নিত্যং শব্দম্ আহুঃ। অত্র মতে পদে বাক্যে বর্ণসমূহরূপে ইতি একং পদম্ ইত্যাদ্যনুপপত্তিঃ।

বৈশেষিকাদয়স্তু ধ্বনিরেব শব্দঃ স চ কার্যঃ, তদ্ব্যতিরেকেন অন্যস্যানুপলম্ভাৎ। ধ্বনিস্তু বর্ণাত্মকত্বেনাবর্ণাত্মকত্বেন চ দ্বিবিধঃ —বৈয়াকরণস্তু বর্ণব্যতিরিক্তোঽখণ্ডবাক্যস্ফোটরূপঃ শব্দো নিত্যঃ। এবঞ্চ পদে বর্ণানাং বাক্যে পদানাং কাল্পনিকমেবার্থবত্ত্বমিতি সিদ্ধে শব্দার্থ ইত্যত্র বিশদীকৃতং শ্রীমদ্ভিঃ। ন চ শব্দানাং নিত্যত্বে শাস্ত্রবৈয়র্থ্যমিতি বাচ্যম্ তত্র তত্র ভাষ্যসিদ্ধান্তেন সাধুত্বজ্ঞানায় তস্যাবশ্যকত্বাৎ। অতএব শব্দব্রহ্মণি নিষ্ণাতঃ পরং ব্রহ্মাধিগচ্ছতি ইত্যাদিঃ সঙ্গচ্ছতে।

## (১০) *সাধুশব্দস্য জ্ঞানে ধর্ম উত প্রয়োগে ?*

লোকত এবার্থপ্রত্যায়নার্থং শব্দপ্রয়োগে সিদ্ধে সতি 'শব্দেনৈবার্থোঽভিধেয়ো, নাপশব্দেন, এবং ক্রিয়মাণমভ্যুদয়কারি ভবতি' ইতীত্থং ধর্মার্থং নিয়মো ব্যাকরণশাস্ত্রেণ ক্রিয়তে ইতি উক্তম্। তৎপ্রসঙ্গাৎ কিং সাধুশব্দস্য জ্ঞানে ধর্ম উত তস্য প্রয়োগে ইতি বিচার্যতে। তত্র পক্ষত্রয়ম্—সাধুশব্দস্য জ্ঞানং ধর্মং জনয়তীত্যেকঃ পক্ষঃ। ন জ্ঞানং কিন্তু তস্য প্রয়োগ এব ধর্মজনক ইত্যপরঃ। ন কেবলং জ্ঞানং ন বা কেবলং প্রয়োগঃ, কিন্তু শাস্ত্রজ্ঞানপূর্বকসাধুশব্দপ্রয়োগ এব ধর্মোৎপত্তৌ কারণমিতি তৃতীয়ঃ পক্ষঃ।

তত্র জ্ঞানে ধর্ম ইত্যঙ্গীকারে সাধুশব্দস্য জ্ঞানাৎ ধর্ম ইব, তদ্বিপরীতস্যাপশব্দস্য জ্ঞানাদ্ধর্মবিপরীতোঽধর্মোঽপি উপজায়তে। যো হি শব্দান্ জানাত্যপশব্দান্ অপ্যসৌ জানাতি। ন কেবলমধর্মং প্রাপ্নোতীতীয়ানেব দোষঃ, প্রত্যুত ভূয়ানধর্মঃ স্যাৎ, ধর্মস্তল্পীয়ানেব বর্ততে একৈকস্য শব্দস্য বহূনামপশব্দানামুপলব্ধেঃ। অতো ধর্মলিপ্সোর্ভূয়োঽধর্মপ্রাপ্তিরিয়ং শোচনীয়া স্যাৎ।

জ্ঞানে ধর্ম ইতি কথনং তু বেদবিরুদ্ধং ভবতি। 'তেঽসুরা হেঽলয়ো' ইত্যাদিগ্রন্থে অপশব্দস্য প্রয়োগাদেব ন তু জ্ঞানাত্তেষামধর্মো বর্ণিতঃ। তস্মাদ্ জ্ঞানাদ্ধর্ম ইতি কথনং বেদবিরুদ্ধম্।

প্রয়োগে ধর্ম ইত্যঙ্গীকারে তু উক্তয়োর্দোষয়োঃ অবকাশাভাবে অপি দোষান্তরমুপজায়তে। যো মহতা প্রযত্নেন ব্যাকরণশাস্ত্রমধীত্য সাধুশব্দান্ জ্ঞাত্বা প্রযুঙ্‌ক্তে, তস্য চ সমানস্যৈব ফলস্যাবাপ্তৌ ক্লেশসাধ্যং শাস্ত্রাধ্যয়নং নিরর্থকমেব স্যাৎ।

ব্যাকরণশাস্ত্রাৎ সাধুশব্দং জ্ঞাত্বা যঃ প্রযুঙ্‌ক্তে তস্যৈব ধর্ম ইতি পক্ষস্তু সাধীয়ান্। অত্র জ্ঞানপ্রয়োগয়োরুভয়োরপ্যপেক্ষিতত্বাদন্য—তরাঙ্গীকারপ্রযুক্তানাং পূর্বোক্তদোষাণাং নাস্তি সম্ভবঃ। 'যোঽগ্নিষ্টোমেন যজতে য উ চৈনমেবং বেদ' ইতি বেদবাক্যমপি জ্ঞানপূর্বকে যাগানুষ্ঠানে ফলং প্রতিপাদয়েৎ এতৎপক্ষাঙ্গীকারে অনুকূলম্।

ভাষ্যকারস্তু জ্ঞানে ধর্ম ইতি প্রথমপক্ষাঙ্গীকারে যুক্তিপ্রদর্শনদ্বারেণ সম্ভাবিতদোষপ্রতিবিধানং করোতি। 'একঃ শব্দঃ সম্যগ্‌জ্ঞাতঃ সুপ্রযুক্তঃ স্বর্গে লোকে চ কামধুগ্‌ ভবতী'তি শ্রুতিরেব তৎপ্রমাণম্। সা তু শব্দজ্ঞানাদীপ্সিতাবাপ্তিং দর্শয়তি, ন ত্বপশব্দজ্ঞানাদধর্মপ্রাপ্তিম্। তস্মাদপশব্দজ্ঞানাদধর্মঃ স্যাদিত্যপ্রমাণকং বচনমশ্রদ্ধেয়ম্।

সমাধানান্তরঞ্চাত্র—শব্দাপশব্দয়োরন্যতরোপদেশে শব্দজ্ঞানে জাতে অপশব্দজ্ঞানস্য শব্দজ্ঞানে নান্তরীয়কত্বাত্তস্য নাতিরিক্তং ফলং ভবতি। কিন্তু তস্যাপি শব্দজ্ঞানজন্যো ধর্ম এব ফলম্। যো হি শব্দান্ জানাত্যপশব্দানপ্যসৌ জানাতীত্যেতদ্ ব্যুৎক্রমেণ নির্ধার্য যো হি অপশব্দান্ জানাতি শব্দানপ্যসৌ জানাতীতি প্রাপ্তম্। তস্মাদধর্মস্য ভূয়সো বাল্পীয়াসঃ বা নাস্ত্যাপত্তিরিতি তত্ত্বম্।

অথবা—অপশব্দজ্ঞানাদধর্মস্য সম্ভবে অপি তস্য ভাবিনা শব্দজ্ঞান-জন্যেন ধর্মেণাপাকরণং ভবিষ্যতি কূপখানকন্যায়বৎ। তস্মাচ্ছব্দ—জ্ঞানাদ্ধর্ম ইতি কথনে অপশব্দজ্ঞানাদধর্ম আপতেদিতি ন ভেতব্যম্। অস্মিন্ পক্ষে 'তেঽসুরা' ইতি বেদবাক্যবিরোধে অপি পূর্বোক্তো ন শঙ্কনীয়ঃ। তদ্বাক্যগম্যঃ শব্দপ্রয়োগে ধর্মোঽপশব্দপ্রয়োগেঽধর্ম ইতি নিয়মস্তু যাগক্রিয়াবিষয়ঃ, ন ত্বন্যবিষয়ঃ। এবং জ্ঞানে ধর্ম ইতি পক্ষোঽপি কথঞ্চিদঙ্গীকর্তুং শক্য ইতি পতঞ্জলিরন্তে দর্শয়তি।

(১১) ব্যাখ্যা—

*দুষ্টঃ শব্দঃ স্বরতো বর্ণতো বা মিথ্যাপ্রযুক্তো ন তমর্থমাহ।*
*স বাগ্‌বজ্রো যজমানং হিনস্তি যথেন্দ্রশত্রুঃ স্বরতো—*
*ঽপরাধাৎ॥*

শব্দানুশাসনপ্রয়োজনপ্রতিপাদনকালে 'দুষ্টঃ শব্দঃ' ইতি প্রতীকমুপন্যস্তম্‌। অত্র হি সমগ্রঃ শ্লোক উপস্থাপিতঃ। 'স্বরতঃ' স্বরেণ উদাত্তানুদাত্তাদিনা। 'বর্ণতঃ বা' অথবা স্বরবর্ণব্যঞ্জনবর্ণপ্রভৃতিনা। অত্রোভয়ত্র তৃতীয়ার্থে তসিঃ। 'দুষ্টঃ' অশুদ্ধঃ। 'শব্দঃ' নামাখ্যাতোপসর্গনিপাতরূপঃ। 'মিথ্যা' অযথাবৎ, 'প্রযুক্তঃ' উচ্চারিতঃ, 'তমর্থম্‌' যদর্থপ্রতিপাদনায় প্রযুক্তস্তমর্থং 'ন আহ' স্বরদোষাদ্‌ বর্ণদোষাদ্বা উভয়দোষাদ্‌ বা বক্তুঃ অভিমতমর্থং নাভিধত্তে। ন কেবলং তমর্থং ন বদতীতি, অপি তু বিঘ্নোৎপাদনদ্বারা হিংস্রো ভবতীতি দর্শয়িতুমুক্তম্‌—স বাগ্‌বজ্রো যজমানমিতি। বাগ্‌বজ্র ইত্যত্র রূপকালঙ্কারেণ দুষ্টায়া বাচোঽমর্ষিতত্বমমোঘহিংসত্বং চ প্রতীয়তে। 'যজমানং হিনস্তি'। "যেন খল্বভ্যুদয়ায় মহতাভিনিবেশেন প্রভূতেন পরিশ্রমেণ গরীয়সা চ অর্থব্যয়েন যাগঃ প্রারব্ধঃ তমেব যজমানং ন কেবলমভ্যুদয়েন ন যোজয়তি, প্রত্যুত হিনস্তি বিনাশয়তি, তস্য মহতীং হানিং করোতীত্যর্থঃ। যথা 'স্বরতঃ' স্বরেণ 'অপরাধাৎ' দোষাৎ, বৃথোচ্চারিতেন স্বরেণেতি যাবৎ। 'ইন্দ্রশত্রুঃ' লক্ষণয়া ইন্দ্রশত্রুরিতি শব্দঃ যজমানং ত্বষ্টারম্‌ অহিনদিতি শেষঃ"। অত্রায়মাশয়ঃ—বিশ্বরূপাখ্যং ত্বষ্টুঃ পুত্রং নিহত্য ইন্দ্রঃ ত্বষ্টুঃ সোমযাগে আগত্য তস্য যজ্ঞবিঘ্নং কৃত্বা সোমরসং চ বলাৎ পীত্বা গতবান্‌। তদা ইন্দ্রস্য পীড়াং জনয়িতুং ত্বষ্টা 'ইন্দ্রশত্রুর্বর্ধস্ব' ইত্যুক্তবান্‌। তত্র শত্রুশব্দস্য ঘাতক ইত্যর্থঃ। হে পুরুষ! ইন্দ্রস্য নিহন্তা ত্বং বর্ধস্ব ইতি হি ত্বষ্টুঃ অভিপ্রায়ঃ। অত্র ষষ্ঠীতৎপুরুষসমাসত্বাৎ অন্তোদাত্তত্বম্‌ ইন্দ্রশত্রুশব্দস্য। কিন্তু ভ্রমবশাদাদ্যুদাত্তো মন্ত্রঃ উচ্চারিতঃ। অয়মাদ্যুদাত্তো হি বহুব্রীহৌ সমাসে বিহিতঃ। তস্মাৎ 'ইন্দ্রো হন্তা যস্য' ইত্যর্থে জাতে ইন্দ্রেণ বধ্যো 'বৃত্রঃ' অত্র নির্দ্দিষ্টো ভবতি।

(১৪) ব্যাখ্যা

***অবিদ্বাংসঃ প্রত্যভিবাদে নাম্নো যে ন প্লুতিং বিদুঃ।***
***কামং তেষু তু বিপ্রোষ্য স্ত্রীষ্বিবায়মহং বদেৎ॥***

ব্যাকরণস্য প্রয়োজনপ্রতিপাদনকালে 'অবিদ্বাংসঃ' ইতি প্রতীক-মুপন্যস্তম্, তত্রায়ং পূর্ণঃ শ্লোকঃ। 'অবিদ্বাংসঃ' ব্যাকরণজ্ঞানশূন্যা জনাঃ, 'প্রত্যভিবাদে' অভিবাদনোপযুক্তবচনপ্রয়োগসময়ে 'নাম্নঃ' অভিবাদক-নাম্নঃ টেঃ 'প্লুতিং' প্লুতস্বরাপাদনং 'যে ন বিদুঃ' জানন্তি 'তেষু' 'কামম্' নিঃশঙ্কং 'বিপ্রোষ্য' প্রবাসাৎ প্রত্যাবৃত্য 'স্ত্রীষ্বিবায়মহং বদেৎ' যথা স্ত্রীষু অভিবাদনসময়ে 'অভিবাদয়ে সোমশর্মা অহং ভোঃ' ইতি ন উক্ত্বা কেবলম্ 'অয়মহম্' ইতি উচ্যতে তথৈব অবিদ্বৎস্বপি প্রযোক্তব্যম্। অভিবাদনসময়ে সোমশর্মা যদা 'অভিবাদয়ে সোমশর্মাহং ভোঃ' ইতি বদতি, তদা প্রত্যভিবাদনকালে আচার্যৈঃ —'আয়ুষ্মানেধি সোমশর্মা—(৩) ন্' ইতি বাক্যস্য টেঃ প্লুতং বিধায় উচ্চারণীয়ম্। "যে তাবদনধীত-ব্যাকরণগ্রন্থা অবিজ্ঞাতপ্লুতাদিকা ন প্রভবন্তি যথবৎ প্রত্যভিবাদন-বাক্যং সমুচ্চারয়িতুং তেষাং সবিধে সমগ্রস্যাভিবাদনবাক্যস্যোচ্চারণং খরসূকরাণামিব মৃষ্টমন্নং সর্বথা নিষ্ফলমেব স্যাৎ। অতএব যথা স্ত্রীণাম-বিজ্ঞাতব্যাকরণত্বাৎ তাসাং সবিধে কেবলম্ অয়মহমিত্যুচ্যতে; তথৈব ব্যাকরণানভিজ্ঞানামপি সবিধে অয়মহমিতি বক্তব্যম্। এবঞ্চানভিজ্ঞাঃ স্ত্রীভিস্তুল্যমূল্যা ভবেয়ুঃ। কস্মৈ বা সহৃদয়ায়ৈতদ্রোচেত। অত ঈদৃশনিকারনিবারণায়াবশ্যমধ্যেয়ং ব্যাকরণম্।"

(১৫) ব্যাখ্যা—

***চত্বারি শৃঙ্গা ত্রয়ো অস্য পাদা দ্বে শীর্ষে সপ্ত হস্তাসো অস্য।***
***ত্রিধা বদ্ধো বৃষভো রোরবীতি মহো দেবো মর্ত্যা আ বিবেশ॥***

ঋক্‌সংহিতায়াং নিহিতোঽয়ং মন্ত্রঃ। অত্র হি পস্পশায়াং ব্যাকরণস্য প্রয়োজনপ্রতিপাদনকালে মন্ত্রোঽয়ম্ উপন্যস্তঃ। ঋগিয়ং বহুধা-

প্রকারেণ ব্যাখ্যাতা। তত্র বৈয়্যাকরণানাং ব্যাখ্যানমিদম্—'অস্য' মহতঃ শব্দলক্ষণস্য দেবস্য 'চত্বারি শৃঙ্গাঃ' চত্বারি শৃঙ্গাণি চত্বারি পদ-জাতানি নামাখ্যাতে চোপসর্গনিপাতাশ্চ। 'ত্রয়ঃ পাদাঃ' ত্রয়ঃ কালাঃ ভূতভবিষ্যদ্বর্ত্তমানাঃ অস্য পাদরূপেণ বিলসন্তি। অস্য 'দ্বে শীর্ষে' মস্তকদ্বয়ম্—দ্বৌ শব্দাত্মানৌ নিত্যঃ কার্যশ্চ। 'সপ্ত হস্তাসঃ' সপ্তঃ হস্তাঃ সপ্ত বিভক্তয়ঃ অস্য হস্তরূপেন তিষ্ঠন্তি। 'ত্রিধা বদ্ধঃ' ত্রিষু স্থানেষু নিয়ন্ত্রিতঃ—উরসি কণ্ঠে শিরসি চ। এষু ত্রিষু স্থানেষু বর্ণানাং প্রায়েণ স্থিতি র্ভবতি। 'বৃষভঃ' কামানাং বর্ষিতা 'রোরবীতি' শব্দং করোতি। রৌতিঃ শব্দকর্মা। 'মহো দেবঃ' মহান্ দেবঃ শব্দলক্ষণঃ 'মর্ত্যান্' মর্তবাসিনঃ মনুষ্যান্ 'আ বিবেশ' মর্ত্যেষু প্রবিষ্টবান্। মহতা দেবেন অস্মাকং সাম্যং যথা স্যাৎ ইত্যধ্যেয়ং ব্যাকরণম্।

নিরুক্তপরিশিষ্টে ব্যাখ্যানানন্তরং যথা—

'চত্বারি শৃঙ্গে'তি বেদা বা এত উক্তাঃ। 'ত্রয়ো অস্য পাদাঃ' ইতি সবনানি ত্রীণি। 'দ্বে শীর্ষে' প্রায়নায়োদয়নীয়ে। 'সপ্ত হস্তাসঃ' সপ্ত ছন্দাংসি। 'ত্রিধা বদ্ধঃ' ত্রেধা বদ্ধো মন্ত্র-ব্রাহ্মণ-কল্পৈঃ। 'বৃষভো রোরবীতি' রোরবণমস্য সবনক্রমেণ ঋগ্‌ভির্যজুর্ভিঃ সামভিঃ, যদেনমৃগ্‌ভিঃ শংসন্তি, যজুর্ভির্যজন্তি, সামভিঃ স্তুবন্তি। 'মহো দেবঃ' ইত্যেষ হি মহান্ দেবো যদ্ যজ্ঞঃ। 'মর্ত্যান্ আবিবেশ' ইত্যেষ হি মনুষ্যানাবিশতি। ইতি।

(১৬) ব্যাখ্যা—

*চত্বারি বাক্ পরিমিতা পদানি তানি বিদুর্ব্রাহ্মণা যে*
*মনীষিণঃ।*
*গুহা ত্রীণি নিহিতা নেঙ্গয়ন্তি তুরীয়ং*
*বাচো মনুষ্যা বদন্তি॥*

ঋক্‌সংহিতান্তর্গতোঽয়ং মন্ত্রঃ বহুধা ব্যাখ্যাতুং শক্যতে। তদ্যথা 'বাক্' শব্দরাশিঃ 'চত্বারি পদানি পরিমিতা' নামাখ্যাতোপসর্গনিপাত-

সমানায়ামর্থাবগতৌ শব্দেন চাপশব্দেন চ তত্র শাস্ত্রেণ ধর্মনিয়মঃ ক্রিয়তে শব্দেনৈবার্থোঽভিধেয়ো নাপশব্দেন ইতি এবং ক্রিয়মাণমভ্যুদয়কারি ভবতীতি দিক্।"

---

আলোচ্যগ্রন্থ সম্পাদনায় নিম্নলিখিত গ্রন্থগুলি হইতে অল্পবিস্তর সাহায্য লওয়া হইয়াছে—

(১) বালমনোরমা ও তত্ত্ববোধিনী টীকাসমন্বিত "সিদ্ধান্ত—কৌমুদী।"

(২) সারদারঞ্জন রায় সম্পাদিত "সিদ্ধান্তকৌমুদী"

(৩) পণ্ডিত রামচন্দ্র ঝা ব্যাকরণাচার্য সম্পাদিত "সোত্তরা প্রশ্নাবলী।"

(৪) পণ্ডিত ললিতকুমার সাংখ্যবেদতীর্থ সম্পাদিত "বৈয়াকরণসিদ্ধান্ত-কৌমুদী"।

(৫) শ্রীশোভিতমিশ্র সম্পাদিত 'কাশিকা'।

(৬) শ্রীক্ষিতীশ চন্দ্র চট্টোপাধ্যায় সম্পাদিত মহাভাষ্যম্ (পস্পশা)'। ( মহাভাষ্যের ব্যাখ্যাগুলি এই গ্রন্থের সাহায্য পুষ্ট। )

(৭) হরিশঙ্কর ঝা রচিত 'মহাভাষ্যকুঞ্চিকা' ( মহাভাষ্যের ১৯ নং এবং ২০ নং প্রশ্নদ্বয়ের উত্তর এই গ্রন্থ হইতে উদ্ধৃত। )

(৮) পণ্ডিত মধুকান্ত ঝা সম্পাদিত 'মহাভাষ্য প্রকাশ।'

# শুদ্ধিপত্র

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| ১ | ৫ | এতস্মৈব | এতস্মৈবম্ |
| ১ | ৮ | দ্বিতীয়োঽর্থ | দ্বিতীয়োঽর্থঃ |
| ১ | ১১ | কাষাভিদেশে নায়ম্ | .. দেশেনায়ম্ |
| ১ | ১৩ | উত্তানপত্তিঃ | উত্তানাপত্তিঃ |
| ২ | ৪ | ...শয়েণ | ...শযেন |
| ২ | ১৮ | শোচাষমাণ | শোচ্চাষমাণ |
| ২ | ২৫ | নিবৃত্যা | নিবৃত্ত্যা |
| ৩ | ২২ | দ্বিতীয়স্ত | দ্বিতীয়স্ত |
| ৬ | ১ | ইত্যংশো | ইত্যংশো |
| ৬ | ৬ | শব্দার্থ স্মৈবাত্র | শব্দার্থস্মৈবাত্র |
| ৭ | ১ | প্রযত্নশ্চ | প্রযত্নশ্চ |
| ৭ | ১০ | সিদ্ধতি | সিদ্ধ্যতি |
| ৮ | ১০ | ...রের | ...রেব |
| ৯ | ২ | বুৎপত্তি | ব্যুৎপত্তি |
| ৯ | ঐ | ঈদূদুপধস্যো | ইদুদুপধস্যে |
| ৯ | ১৪ | ইদুদ্ভ্যামুত্তরস্য | ইদুদ্ভ্যামুত্তরস্য |
| ১০ | ১৮ | দীর্ঘঽণঃ | দীর্ঘোঽণঃ |
| ১০ | ২৪ | নিমিত্ত তয়ো | নিমিত্তয়োঃ |
| ১১ | ১ | পূর্বগ্রহন | পূর্বগ্রহণ |
| ১১ | ১৯ | তস্মাদিতুত্তরস্য | তস্মাদিত্যুত্তরস্য |
| ১২ | ১১ | সূত্রেনৈব | সূত্রেণৈব |
| ১৩ | ১ | ইত্যর্তঃ | ইত্যতঃ |
| ১৩ | ২ | অপাদা | অপদা |
| ১৩ | ১৪ | শব্দরূপানীতি | শব্দরূপাণীতি |
| ১৩ | ১৬ | সকলদীনামপি | সকলাদীনামপি |
| ১৪ | ৬ | সজ্ঞায়া | সংজ্ঞায়া |
| ১৫ | ৬ | ত্রিপত্ত্যাং | ত্রিপাত্ত্যাং |
| ১৬ | ৬ | মূর্ধন্যঃ স্যাদিতুক্তম | মূ...ত্যু... |

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| ১৬ | ৮ | ·· দুর্বারা | ·· দু র্বারা |
| ১৮ | ১৩ | ষষ্ঠৈ্যা··· | ষষ্ঠ্যো··· |
| ২০ | ১৫ | এববোক্তম্ | এবোক্তম্ |
| ২৩ | ২৩ | কতৃ | কতৃ´ |
| ২৩ | ২৫ | আপ্ত ·· | আপ্তু · |
| ২৪ | ৪ | ত্বড্ক্তে | ভুড্ক্তে |
| ২৪ | ৫ | ঈপ্সিত গ্রহণং | ঈপ্সিততমগ্রহণং |
| ২৪ | ২০ | অবিক্ষয়া | অবিবক্ষয়া |
| ২৫ | ৯ | নিবশতে | নিবিশতে |
| ২৫ | ১৪ | নিবশতে সম্মার্গম্ | নিবিশতে সন্মার্গম্ |
| ২৭ | ১৩ | জায়তে | জায়েত |
| ২৮ | ৪ | তাদর্থে | তাদর্থ্যে |
| ২৮ | ১৩ | বিমুখাকরণং | বিমুখীকরণং |
| ৩১ | ৫ | স্রুগ্নস্য স্রধ্নং | স্রুঘ্নস্য স্রুঘ্নং |
| ৩২ | ৯ | বিভক্তে | বিভক্তেঃ |
| ৩৪ | ১ | কিমিতা | কিমিত্যা |
| ৩৫ | ১ | বহুব্রীহোস্ত | ······স্তু |
| ৩৬ | ১৬ | সপ্তম্যাস্ত্যং | সপ্তম্যন্তং |
| ৪০ | ২ | দণ্ড | দন্ত |
| ৪৪ | ৫ | সাকল্যস্য | শাকল্যস্য |
| ৪৫ | ১০,১১,১২,১৩,১৪ | শত্রুঃ | শত্রুঃ |
| ৪৫ | শেষ | সমজুষো | সসজুষো |
| ৪৮ | ১৪ | পুংস্কোকিলঃ | পুংস্কোকিলঃ |
| ৫৫ | ৬ | ইত্যানেন | ইত্যানেন |
| ৬৪ | ৬ | অব্যয়ভাব | অব্যয়ীভাব |
| ৬৯ | ১৭,২২ | সর্গেভ্যোঽপ ইং | সর্গেভ্যোঽপ ঈং |
| ৭০ | ২ | পদার্থাঃ | পদার্থাঃ |
| ৭০ | ৪ | তদ্ধিতেষাচা | তদ্ধিতেষাচা·· |
| ৭০ | ৫ | দৈত্যঃ | দৈত্যঃ |
| ৭২ | ৮ | বতি। | বেতি। |

| পৃষ্ঠা | লাইন | অশুদ্ধ | শুদ্ধ |
|---|---|---|---|
| ৮০ | ৩ | সিদ্ধং | সিদ্ধ |
| ৮৬ | ২ | ·· নিষ্ঠা··· | নিষ্টা··· |
| ৮৬ | ১৩ | বৃত্তার্থ | বৃত্ত্যার্থ |
| ৮৯ | ৭ | দেস্তদন্তসা | বিহিতস্তবাদেস্তদন্তসা |
| ৮৯ | ৮ | বিহিতস্তদা | Drop |
| ৮৯ | ১১ | সূত্রেনৈব | সূত্রেণৈব |
| ৯৭ | ১ | আনষ্টা | অনিষ্টা |
| ১০২ | ১৩ | স্ত্রীযাং | স্ত্রিযাং |
| ১১৭ | ১৫ | একাথসা | একার্থস্য |
| ১৪০ | ৯ | নিক্তিস্য | ণিক্তিত্য ·· |
| ১৪৩ | ৫ | প্রত্যযো | প্রত্যযো |
| ১৪৩ | ৭ | অকৎসার্ব | অকৃৎসার্ব |
| ১৪৪ | শেষ | কর্মশ্রযাণি কার্যাণি | কর্মাশ্রযাণি কার্যাণি |
| ১৪৯ | ২৪ | ব্যর্থামতি | ব্যর্থমিতি |
| ১৫১ | ১১ | যদ | যদ. |
| ১৫১ | ২১ | ভাবত্ত··· | ভাবাত্ত··· |
| ১৫৪ | ২৩ | শাকলস্য | শাকল্যস্য |
| ১৫৭ | ১৫ | উরত্তসা | উরত্তসা |
| ১৫৯ | ৮ | লকি | লুকি |
| ১৮৬ | ৭ | বার্ত্রক্ষাতে | বাত্রক্ষাতে |
| ১৯৪ | ৩ | সর্বধাতু | সার্বধাতু |
| ২০২ | ১৭ | ককাযসা | ককারস্য |
| ২০৩ | ৩ | কস্তোদ্ভম্ | কস্তোক্তম্ |
| ২০৫ | ২২ | ধাতোঃনভ্যাসস্য | ধাতোরণভ্যাসস্য |
| ২০৬ | ২২ | হস্বো | হস্বে |
| ২০৭ | ৩ | আত্মনেপদানাং | আত্মনেপদানাং |
| ২০৮ | ১৫ | বিভক্তৌ | বিভক্তৌঃ |
| ২১১ | ৯ | স্তোতে | স্তোতো |
| ২১২ | ১৩ | ইত্যাদেন | ইত্যানেন |
| ২১৫ | ৬ | অনুবৃদ্ধ | অনুবন্ধ |